महानिर्वाणतन्त्रम्।



कुलावधूत श्रीमद्धरिहरानन्दनाथभारती-

विरचितया टीकया सहितम्।

वि, ए, उपाधिधारिणा

श्रीजीवानन्द-विद्यासागर-भट्टाचार्य्येण

सङ्कलितम्

प्रकाशितञ्च।

कलिकाता-राजधान्याम्

नूतन बाल्मीकियन्त्रे

मुद्रितम्।

इं १८८४

প্রিণ্টর—শ্রীউদয়চরণ পাল
৩৯ নং শিবনারায়ণ দাসের গলি।

महानिर्वाणतन्त्रम्।

प्रथमोल्लासः।

गिरीन्द्रशिखरे रम्ये नानारत्नोपशोभिते।
नानाद्रुमलताकीर्णे नानापक्षिरवैर्युते ॥ १ ॥

इत्वा षडाम्नायमभेद्यशक्तिः सदाशिवः प्रेरित आदिशक्त्या।
जगाद सेतुं कुलवारिराशेर्निर्वाणतन्त्रं महता समस्तम् ॥
सारं सारं परब्रह्म नाम नाम गुरोः पदम्।
निरूपेच्छं वचः शम्भोर्विदुषोऽपि यथामति ॥

वेदादिबोधितसमस्तपुण्यकर्मोच्छेदेनकातिनिन्दितानन्तपापकर्मप्रवर्त्तक-कलियुगागमने सति परमात्मचिन्तनाद्यनुरक्ताना नानाविधपापकर्म-प्रसक्ताना नराणां कथं निस्तारो भविष्यतीति सञ्चिन्तयन्ती पार्वती कैलासशिखरे तिष्ठन्तं कारुण्यवन्तं सदाशिवं प्रति तेषा निस्तारोपाय-मप्राक्षीदेतत्तदेवाह—गिरीन्द्रशिखर इत्यादिभिः तत्र तस्मिन् गिरीन्द्रशिखरे पर्वताधिराजस्य कैलासस्य शृङ्गे स्थितं सौनधरं सौनिनं शिवं वीक्ष्य विलोक्य लोकानां हितकाम्यया जनानां हितेच्छया पार्वती देवी विनयावनता सती शिवमब्रवीदित्येकादश-श्लोकस्थितैः पदैरन्वयः। सौनधरमित्यनेन कथानवसरो दर्शितः रम्ये इत्यादीनि सप्तम्यन्तानि त्रयोदशपदानि गिरीन्द्रशिखरे इत्यस्य विशेषणानि चराचरजगद्गुरुमित्यादीनि द्वितीयान्तानि पदानि तु

सर्वर्त्तुकुसुमामोदमोदिते सुमनोहरे ।
शैत्यसौगन्ध्यमान्द्याढ्ये मरुद्भिरुपवीजिते ॥ २ ॥
अप्सरोगणसङ्गीतकलध्वनिनिनादिते ।
स्थिरच्छायद्रुमच्छायाच्छादिते स्निग्धमञ्जुले ॥ ३ ॥
मत्तकोकिलसन्दोहसङ्घुष्टविपिनान्तरे ।
सर्वदा स्वगणैः सार्द्धमृतुराजनिषेविते ॥ ४ ॥
सिद्धचारणगन्धर्वगाणपत्यगणैर्वृते ।
तत्र मौनधरं देवं चराचरजगद्गुरुम् ॥ ५ ॥

शिवमित्यस्येति बोद्धव्यम् । रम्यते क्रीड्यते सिद्धचारणादिभिर्यत्र तद्रम्यं तस्मिन् घोरदुष्पधादित्यधिकरणे यत् । नानारत्नोपशोभिते अनेकैः पद्मरागमरकतादिभीरत्नैर्विराजिते नानाष्टलतावीर्णे अनेकैर्द्रुचैरनेकाभिर्लताभिश्च व्याप्ते नानापक्षिरवैर्युते नानाविधाना पक्षिणा शब्दैर्युक्ते ॥ १ ॥

सर्वर्त्तुकुसुमामोदमोदिते सकलवसन्तादृतुसम्बन्धिपुष्पसम्बन्धिभिरतिमनोहारिभिर्गन्धैः सुरभीकृते अतएव सुमनोहरे अतिमनोहारके शैत्येन सौगन्ध्येन मान्द्येन चाढ्ये युक्ते मरुद्भिर्वायुभिरुपवीजिते ॥ २ ॥

अप्सरोगणेत्यादि । अप्सरसा गणैः समूहैः सङ्गीतो यः कलध्वनिर्गम्भीरः शब्दस्तेन निनादिते शब्दिते स्थिरा अचञ्चला छाया येषां द्रुमाणां तेषां छायाभिश्छादिते कृते स्निग्धं चिक्कणञ्च तन्मञ्जुलं सुन्दरञ्चेति स्निग्धमञ्जुले तस्मिन् ॥ ३ ॥

मत्तेत्यादि । मत्तानां कोकिलानां सन्दोहेन समूहेन सङ्घुष्टं संशब्दितं विपिनान्तरं वनमध्यं यस्मिन् तस्मिन् । सर्वदा सर्वस्मिन् काले स्वगणैर्भूतादिभिः सार्द्धमृतुराजेन वसन्तेन निषेविते ॥ ४ ॥

सिद्धेत्यादि । देवयोनिभिः सिद्धैः चारणैर्गन्धर्वैः गाणपत्यगणैर्गणपतिस्वामिकैर्गणैश्च वृते कृते देवं दीप्तिमन्तं चराचरजगद्गुरुं

सदाशिवं सदानन्दं करुणामृतसागरम् ।
कर्पूरकुन्दधवलं शुद्धसत्त्वमयं विभुम् ॥ ६ ॥
दिगम्बरं दीननाथं योगीन्द्रं योगिवल्लभम् ।
गङ्गाशीकरसंसिक्तजटामण्डलमण्डितम् ॥ ७ ॥
विभूतिभूषितं शान्तं व्यालमालं कपालिनम् ।
त्रिलोचनं त्रिलोकेशं त्रिशूलवरधारिणम् ॥ ८ ॥
आशुतोषं ज्ञानमयं कैवल्यफलदायकम् ।

गुरुं चराणां जङ्गमानामचराणां स्थावराणाञ्च जगतां पितरम् ॥ ५ ॥

सदेत्यादि । सदा सर्वदा शिवं कल्याणं यस्य यस्माद्वा तं, सदा आनन्दः सत् सर्वदास्थायी वा आनन्दो यस्य तं, सतः साधून् वा आनन्दयति यः तं, करुणामृतसागरं दयारूपस्य पीयूषस्य समुद्रं कर्पूरकुन्दधवलं कर्पूरकुन्दवत् शुभ्रं, शुद्धसत्त्वमयं विमलसत्त्वगुणप्रधानं, विभुं व्यापकम् ॥ ६ ॥

दिगित्यादि । दिगेवाम्बरं वस्त्रं यस्य तं वस्त्ररहितमित्यर्थः दीननाथं दरिद्राणां जनानां भर्त्तारं योगीन्द्रं योगः परमात्मचिन्तनं तद्वतश्च श्रेष्ठं योगिवल्लभं योगिनान्दयितं योगिनो वल्लभाः प्रिया यस्येति वा तं गङ्गायाः शीकरैरितस्ततो विच्छिन्नैरम्बुकणैः संसिक्तेन जटामण्डलेन जटासमूहेन मण्डितम् ॥ ७ ॥

विभूतीत्यादि । विभूतिभूषितं भस्मभिरलङ्कृतं शान्तं संयतात्मकरणं व्यालाः सर्पा एव माला यस्य तं कपालिनं नरकपालशालिनं लोच्यते दृश्यते यैस्तानि लोचनानि नेत्राणि तानि त्रीणि यस्य तं त्रिलोकेशं त्रयाणां लोकानामधिष्ठातारं त्रिशूलवरधारिणं त्रिशूलेषु वरं त्रिशूलञ्च वरञ्च वा धर्त्तुं शीलं यस्येति त्रिशूलवरधारी तम् ॥ ८ ॥

आशित्यादि । आशु शीघ्रं तोषस्तुष्टिर्यस्य तं ज्ञानमयं ज्ञानं तत्त्वतः समस्तपदार्थावबोधस्तदात्मकं कैवल्यफलदायकं निर्वाणरूपस्य

निर्विकल्पं निरातङ्कं निर्विशेषं निरञ्जनम् ॥ ९ ॥
सर्व्वेषां हितकर्त्तारं देवदेवं निरामयम् ।
प्रसन्नवदनं वीक्ष्य लोकानां हितकाम्यया ।
विनम्रवदना देवी पार्व्वती शिवमब्रवीत् ॥ १० ॥

श्रीपार्व्वत्युवाच ।

देवदेव । जगन्नाथ । मन्नाथ । करुणानिधे । ।
त्वदधीनास्मि देवेश । तवाज्ञाकारिणी सदा ॥ ११ ॥
विनाज्ञया मया किञ्चिद्भाषितुं नैव शक्यते ।
कृपावलेशो मयि चेत् स्नेहोऽस्ति यदि मां प्रति ॥१२॥
तदा निवेद्यते किञ्चिन्मनसा यद्विचारितम् ।
त्वदन्यः संशयस्यास्य कस्त्रिलोक्यां महेश्वर ! ।
छेत्ता भवितुमर्हो वा सर्व्वज्ञः सर्व्वशास्त्रवित् ॥ १३ ॥

फलस्य दातारं निर्विकल्पं निर्गतो विकल्पो विविधा कल्पना यस्मात्तं निरातङ्कं निर्गते आतङ्के तापशङ्के यस्मात्तं निर्विशेषं नानाविध-भेदरहितं निरञ्जनं अविद्यामप्रत्यक्षम् ॥ ९ ॥

सर्वेषामित्यादि । निरामय निर्गत आमयो व्याधिर्यस्मात्तम् ॥१०॥

पार्वती शिवं प्रति किमब्रवीदित्यपेक्षायामाह,—श्रीपार्वत्युवाच । देवदेवेत्यादि । हे देवेश ! देवानामिन्द्रादीनामपि नियन्तः ! यतोऽहं त्वदधीना तव वशीभूता सदा सर्वस्मिन् काले तवाज्ञाकारिणी चास्मि अतस्तवाज्ञया विना किञ्चिदपि भाषितुं कथयितुं नैव मया शक्यते ॥ ११ ॥ १२ ॥

त्वदन्य इति । त्वत्तोऽन्यस्त्वदन्य इति पञ्चमीतत्पुरुषः त्वदिति मच्छब्दस्यान्तं भिन्नं वा पदम् ॥ १३ ॥

श्रीसदाशिव उवाच ।

किमुच्यते महाप्राज्ञे ! कथ्यतां प्राणवल्लभे ! ।
यदकथ्यं गणेशेऽपि स्कन्दे सेनापतावपि ॥ १४ ॥
तवाग्रे कथयिष्यामि सुगोप्यमपि यद्भवेत् ।
किमस्ति त्रिषु लोकेषु गोपनीयं तवाग्रतः ॥ १५ ॥
मम कृपासि देवि ! त्वं न भेदोऽस्ति त्वया मम ।
सर्वज्ञा किं न जानासि त्वमभिज्ञैव पृच्छसि ॥ १६ ॥
इति देववचः श्रुत्वा पर्वती हृष्टमानसा ।
विनयावनता साध्वी परिपप्रच्छ शङ्करम् ॥ १७ ॥

श्रीआद्योवाच ।

भगवन् ! सर्वभूतेश ! सर्वधर्मविदां वर ! ।
कृपावता भगवता ब्रह्मान्तर्यामिना पुरा ॥ १८ ॥

पार्वत्या प्रष्टव्यमर्थमभिजिज्ञासुः श्रीसदाशिव उवाच । किमुच्यते इत्यादि । स्कन्दे कार्त्तिकेये गणेशेऽपि सेनापतावपीति व्याकुरता भगवता महादेवेन तयोर्महावीरत्वेन मदतिप्रियत्वादतिगुह्यत्वाप्यर्थस्य बलात्कारेणाप्यभिधाने योग्यत्वमस्तीति सूचितम् ॥ १४ ॥

तवाग्रतस्त्वदग्रे गोपनीयं त्रिष्वपि लोकेषु किं वस्त्वस्ति अपितु न किञ्चिदित्यर्थः । अग्रे इत्यसनः आद्यादिभ्य उपसंख्यानमिति सप्तम्यन्तात् स्वार्थे तसिः ॥ १५ ॥

मम कृपेत्यादि । कृप्यते कृपक्रिया विशिष्टा विधीयते इति कृपा कर्मण्यण् मम कृपा मद्रूपप्रकाशिनीत्यर्थः । मत्तस्त्वकृपेति पाठे तु मया सह समानमेकं रूपं यस्याः सा अभिज्ञैव अविद्वुषी इव १६॥१७

पार्वती शङ्करं किं परिपप्रच्छेत्याकाङ्क्षायामाह,—आद्योवाच भगवन्नित्यादि । हे भगवन् ! ऐश्वर्यादिगालिन् ! सर्वभूतेश ! सर्वेषां भूतानां नियन्तः ! यथा श्रुतिस्मृतिसंहितादौ पदेशेन सत्यत्वेनादौ

प्रकाशिताश्चतुर्वेदाः सर्वधर्मोपबृंहिताः ।
वर्णाश्रमादिनियमा यत्र चैव प्रतिष्ठिताः ॥ १९ ॥
तदुक्तयोगयज्ञाद्यैः कर्मभिर्भुवि मानवाः ।
देवान् पितॄन् प्रीणयन्तः पुण्यशीलाः कृते युगे ॥ २० ॥
स्वाध्यायध्यानतपसा दयादानैर्जितेन्द्रियाः ।
महाबला महावीर्या महासत्त्वपराक्रमाः ॥ २१ ॥
देवायतनगा मर्त्या देवकल्पा दृढ़व्रताः ।
सत्यधर्मपराः सर्वे साधवः सत्यवादिनः ॥ २२ ॥

भवता लोका निस्तारिता एव दुष्कर्मप्रवर्त्तके पापिनि कलावपि कोनाप्युपायेन दयावता भवतैव मनुष्या उद्धर्त्तव्या इत्याशयेनाह,— कृपावतेत्यादि ॥ १८ ॥

प्रकाशिता इत्यादि । सर्वे धर्मा उपबृंहिता वर्द्धिता येषु ते ॥१९

तदुक्तेत्यादि । कृते युगे सत्ययुगे भुवि पृथिव्यां पुण्यशीला मानवाः तदुक्तयोगयज्ञाद्यैर्वेदभाषितैर्निस्तारोपायभूतैर्यज्ञादिभिः न कर्मभिर्देवान् पितॄंश्च प्रीणयन्तस्तर्पयन्त आसन्निति यज्ञमन्त्रोक्तस्थितेन पदेनान्वयः ॥ २० ॥

स्वाध्यायेत्यादि । स्वाध्यायो वेदाध्ययनं ध्यानं परमात्मचिन्तनं तपः कृच्छ्रचान्द्रायणादि दया निष्कारणपरदुःखनाशेच्छा दानं न्यायार्जितस्य धनादेः पात्रेऽर्पणं तैः सर्वैर्विशिष्टा मानवा आसन् । जितेन्द्रिया इत्यादीनां सर्वेषां जसन्तानां पदानामसन्धित्वमन्वयो विधातव्यः । जितेन्द्रिया वशीकृतचक्षुरादयः महाबला महासामर्थ्याः, स्थौल्यसामर्थ्यसैन्येषु बलमित्यमरः । महावीर्या महाप्रभावाः महातेजसो वा, वीर्यं प्रभावे शुक्रे च तेजःसामर्थ्ययोरपीति मेदिनी । महात्मनो सत्त्वपराक्रमौ व्यवसायशौर्ये येषान्ते महासत्त्वपराक्रमाः ॥२१

देवायतनेत्यादि । देवायतनगा देवतामन्दिरगामिनः मर्त्या मरणशीला अपि देवकल्पा दैवेनेव देवाः देवतुल्या इत्यर्थः दृढं व्रतं

राजानः सत्यसङ्कल्पाः प्रजापालनतत्पराः ।
मातृवत् परयोषित्सु पुत्रवत् परसूनुषु ॥ २३ ॥
लोष्टवत् परवित्तेषु पश्यन्तो मानवास्तदा ।
आसन् स्वधर्मनिरताः सदा सन्मार्गवर्त्तिनः ॥ २४ ॥
न मिथ्याभाषिणः केचित् न प्रमादरताः क्वचित् ।
न चौरा न परद्रोहकारका न दुराशयाः ॥ २५ ॥
न मत्सरा नातिरुष्टा नातिलुब्धा न कामुकाः ।
सदन्तःकरणाः सर्वे सर्वदानन्दमानसाः ॥ २६ ॥
भूमयः सर्वशस्याढ्याः पर्जन्याः कालवर्षिणः ।
गावोऽपि दुग्धसम्पन्नाः पादपाः फलशालिनः ॥ २७ ॥
नाकालमृत्युस्तत्रासीत् न दुर्भिक्षं न वा रुजः ।
हृष्टाः पुष्टाः सदारोग्यास्तेजोरूपगुणान्विताः *॥२८॥

नियमो येषान्ते साधवः स्वस्वधर्मवर्त्तिनः सत्यवादिनः सत्यं यथार्थाभिधानं तस्य वक्तारः ॥ २२ ॥

राजान इत्यादि । सत्यः सङ्कल्पो मानसं कर्म येषान्ते परयोषित्सु परस्त्रीषु परसूनुषु अन्यपुत्रेषु ॥ २३ ॥ २४ ॥

नेत्यादि । न प्रमादरताः सावधाना इत्यर्थः न दुराशया न दुष्टाभिप्रायाः ॥ २५ ॥

नेत्यादि । न मत्सरा नान्यशुभद्वेषिणः नातिरुष्टा न बद्धक्रोधशालिनः सर्वदा आनन्दो यत्र एवम्भूतं मानसं हृदयं येषान्ते ॥ २६ ॥

पर्जन्या मेघाः ॥ २७ ॥

---

* तेजोरूपसमन्विता इति वा पाठः ।

स्त्रियो न व्यभिचारिण्य पतिभक्तिपरायणाः।
ब्राह्मणाः क्षत्रिया वैश्या शूद्राः स्वाचारवर्त्तिन ॥२८॥
स्वैः स्वैर्धर्मैर्यजन्तस्ते निस्तारपदवीं गताः।
कृते व्यतीते त्रेतायां दृष्ट्वा धर्मव्यतिक्रमम् ॥ ३० ॥
वेदोक्तकर्मभिर्मर्त्या न शक्ताः स्वेष्टसाधने।
बहुक्लेशकरं कर्म वैदिकं भूरिसाधनम् ॥ ३१ ॥
कर्त्तुं न योग्या मनुजाश्चिन्ताव्याकुलमानसाः।
त्यक्तुं कर्त्तुं न चार्हन्ति सदा कातरचेतसः ॥३२॥
वेदार्थयुक्तशास्त्राणि स्मृतिरूपाणि भूतले।
तदा त्वं प्रकटीकृत्य तपःस्वाध्यायदुर्बलान् ॥ ३३ ॥

नेत्यादि। तत्र कृतयुगे रुजो रोगाः सदा अरोग्यं येषान्ते। तेजोरूपगुणान्विताः तेजसा रूपेण अन्यैश्च गुणैर्युक्ताः ॥ २८ ॥ २९ ॥

स्वैरित्यादि। यजन्तः परमेश्वरमर्चयन्तः। कृते इत्यादि। कृते सत्ययुगे व्यतीते विगते सति त्रेतायाश्चायातायां सत्यां यदा वेदोक्तकर्मभिर्मर्त्या मनुष्याः स्वेष्टसाधने आत्मनोऽभीष्टसम्पादने शक्ताः समर्था न बभूवुः। यदा च भूरीणि बहूनि साधनानि यस्य तद् भूरिसाधनम्। अतएव बहुक्लेशकरं बहूनां क्लेशानां जनकम्। अथवा बहुभिः क्लेशैः क्रियते निष्पाद्यते यत्तद् बहुक्लेशकरम्। बाहुलकात् कर्मण्यच्। अतएवेदृशं वैदिकं कर्म्म कर्त्तुं चिन्ताव्याकुलमानसा मनुजा मनुष्या योग्या न बभूवुः। यदा च सदा कातरचेतसः सर्वदा अधीरस्वान्ता मनुजा वैदिककर्मत्यागे नानादोषश्रवणात् तत् कर्म्म त्यक्तुं बहुक्लेशसाध्यत्वात् कर्त्तुञ्च नार्हन्ति स्म तदा धर्म्मव्यतिक्रम धर्म्मोल्लङ्घन धर्म्मविपर्य्ययं वा दृष्ट्वा स्मृतिरूपाणि वेदार्थयुक्तशास्त्राणि भूतले

लोकानतारयः पापात् दुःखशोकामयप्रदात् ।
त्वां विना कोऽस्ति जीवानां घोरसंसारसागरे ॥ ३४ ॥
भर्त्ता पाता समुद्धर्त्ता पितृवत् प्रियकृत् प्रभुः ।
ततोऽपि द्वापरे प्राप्ते स्मृत्युक्तसुकृतोज्झिते ॥ ३५ ॥
धर्मार्द्धलोपे मनुजे आधिव्याधिसमाकुले ।
संहिताद्युपदेशेन त्वयैवोद्धारिता नराः ॥ ३६ ॥
आयाते पापिनि कलौ सर्वधर्मविलोपिनि ।
दुराचारे दुष्टपक्षे दुष्टकर्मप्रवर्त्तके ॥ ३७ ॥
न वेदाः प्रभवस्तत्र * स्मृतीनां स्मरणं कुतः ।
नानेतिहासयुक्तानां नानामार्गप्रदर्शिनाम् ॥ ३८ ॥

प्रकटीकृत्य तप'स्वाध्यायदुर्बलान् लोकान् जनान् पापात् त्वमतारयः तारितवानित्यन्वयः ॥ २० । २१ । २२ । २३॥

त्वामिति । यतस्त्वमेवम्भूतोऽतस्त्वां विनेत्येवं योजनीयम् । घोरसंसारसागरे भयानकसंसारसमुद्रे प्रसृजंगत्पतिः ॥ ३४ ॥

तत इत्यादि । स्मृत्युक्तसुकृतोज्झिते स्मृतिभिरुक्तानि यानि सुकृतानि पुण्यानि तैरुज्झिते त्यक्ते धर्मार्द्धलोपे धर्मस्यार्द्धं लुप्यतीति धर्मार्द्धलोपस्तस्मिन् स्मृत्युक्तसुकृतोज्झिते इति धर्मार्द्धलोपे इति च द्वापरे इत्यस्य विशेषणे मनुजे इत्यस्य वेति बोध्यम् । आधिर्मानसी व्यथा ॥ ३५ । ३६ ॥

आयाते इत्यादि । दुराचारे दुष्ट आचारो यत्र तस्मिन् ॥ ३७ ॥

---

* प्रभवन्त्यत्र इति वा पाठः ।

बहुलानां पुराणानां विनाशो भविता विभो ! ।
तदा लोका भविष्यन्ति धर्मकर्मबहिर्मुखाः ॥ ३८ ॥
उच्छृङ्खला मदोन्मत्ताः पापकर्मरताः सदा ।
कामुका लोलुपाः क्रूरा निष्ठुरा दुर्मुखाः शठाः ॥४०॥
स्वल्पायुर्मन्दमतयो रोगशोकसमाकुलाः ।
निःश्रीका निर्बला नीचा नीचाचारपरायणाः ॥ ४१ ॥
नीचसंसर्गनिरताः परवित्तापहारकाः ।
परनिन्दापरद्रोहपरिवादपराः खलाः ॥ ४२ ॥
परस्त्रीहरणे पापशङ्काभयविवर्जिताः ।
निर्धना मलिना दीना दरिद्राश्चिररोगिणः ॥ ४३ ॥
विप्राः शूद्रसमाचाराः सन्ध्यावन्दनवर्जिताः ।
अयाज्ययाजका लुब्धा दुर्वृत्ताः पापकारिणः ॥ ४४ ॥

नेत्यादि । प्रभवः समर्थः ॥ ३८ । ३९ ॥

उच्छृङ्खला इत्यादि । उन्नतं शृङ्खलं वेदादिरूपनिगडो येषां ते उच्छृङ्खलाः बन्धनरहिता इत्यर्थः । लोलुपाः अतिलुब्धाः क्रूराः निर्दयाः निष्ठुराः परुषवादिनः दुर्मुखाः अशङ्कसुखाः शठाः अन्तजवः ॥ ४० ॥

स्वल्पेत्यादि । स्वल्पायुषश्च ते मन्दमतयश्चेति कर्मधारयः ॥ ४१ ॥ खला दुर्जनाः ॥ ४२ ॥

परस्त्रीत्यादि । परस्त्रीहरणे पापशङ्काभयविवर्जिताः परस्त्रीहरणनिमित्तकपापउद्वेगशङ्कारहिताः मलिनाः मलदूषिताः दीनाः खेदवन्तः दरिद्राः दुर्गतिमन्तः ॥ ४३ ॥ ४४ ॥

असत्यभाषिणो मूर्खा दाम्भिका दुष्प्रपञ्चकाः ।
कन्याविक्रयिणो व्रात्यास्तपोव्रतपराङ्मुखाः ॥ ४५ ॥
लोकप्रतारणार्थाय जपपूजापरायणाः ।
पाषण्डाः पण्डितम्मन्याः श्रद्धाभक्तिविवर्जिताः ॥ ४६ ॥
कदाहाराः कदाचारा धृतकाः शूद्रसेवकाः ।
शूद्रान्नभोजिनः क्रूरा दुग्धलोरतिकामुकाः ॥ ४७ ॥
दास्यन्ति धनलोभेन स्वदारान्नीचजातिषु ।
ब्राह्मण्यचिह्नमेतावत् केवलं सूत्रधारणम् ॥ ४८ ॥
नैव पानादिनियमो भक्ष्याभक्ष्यविवेचनम् ।
धर्मशास्त्रे सदा निन्दा साधुद्रोहो निरन्तरम् ॥ ४९ ॥
सत्कथालापमात्रञ्च न तेषां मनसि क्वचित् ।
त्वया कृतानि तन्त्राणि जीवोद्धारणहेतवे ॥ ५० ॥

असत्येत्यादि । दाम्भिकाः दम्भो धर्मध्वजित्वं तद्वन्तः व्रात्याः षोड़शवर्षपर्य्यन्तमप्यसस्कृता भ्रष्टगायत्रीका विप्रा भविष्यन्तीति पूर्वेणान्वयः ॥ ४५ ॥

लोकेत्यादि । पाषण्डाः वेदबाह्यरक्तपटमौञ्जादिव्रतचर्य्याजिनः श्रद्धाभक्तिविवर्जिता. श्रद्धा वेदादौ दृढप्रत्ययः भक्तिः प्रीतिजनकव्यापारः ताभ्यां हीना ॥ ४६ ॥

कदाहारा इत्यादि । धृतका भरणायत्तजीवनाः अतएव शूद्राणामपि सेवका क्रूरा कठिनाः दुग्धलोरतिकामुका. शूद्रारतिकामयितारः ॥ ४७ ॥ ४८ ॥ ४९ ॥

सत्कथालापमात्र चेत्यत्र च शब्दः तु इत्यर्थे ॥ ५० ॥

निगमागमजातानि भुक्तिमुक्तिकराणि च ।
देवीनां यत्र देवानां मन्त्रयन्त्रादिसाधनम् ॥ ५१ ॥
कथिता बहवो न्यासाः सृष्टिस्थित्यादिलक्षणाः ।
वज्रपद्मासनादीनि गदितान्यपि भूरिशः ॥ ५२ ॥
पशुवीरदिव्यभावा देवता मन्त्रसिद्धिदाः ।
शवासनं चितारोहो मुण्डसाधनमेव च ॥ ५३ ॥
लतासाधनकर्माणि त्वयोक्तानि सहस्रशः ।
पशुभावदिव्यभावौ स्वयमेव निवारितौ ॥ ५४ ॥
कलौ न पशुभावोऽस्ति दिव्यभावः कुतो भवेत् ।
पत्रं पुष्पं फलं तोयं स्वयमेवाहरेत् पशुः ॥ ५५ ॥
न शूद्रदर्शनं कुर्य्यात् मनसा न स्त्रियं स्मरेत् ।

निगमेत्यादि । यत्र तन्त्रादिषु सृष्टिस्थित्यादिलक्षणा. सृष्टि-स्थित्यादिस्वरूपा. ॥ ५१ ॥

वज्रपद्मेत्यादि । यत्रेत्यनुषज्यते आदिना सुप्तपद्मासनादेः संग्रहः ॥ ५२ ॥

शवासनमिति । अत्रापि यत्रेत्यस्यानुषङ्गः शवासनं मृतशरीरा-सनम् ॥ ५३ ॥ ५४ ॥

कलौ युगे पशुभावदिव्यभावयोरसत्त्वे हेतुं दर्शयितुं प्रथमतः पशुदिव्ययोर्विधेयानि यानि कर्माणि तानि दर्शयति द्वाभ्याम् । पत्र-मित्यादि । आहरेत् आनयेत् ॥ ५५ ॥

दिव्यश्च देवताप्रायः शुद्धान्तःकरणः सदा ॥ ५६ ॥
द्वन्द्वातीतो वीतरागः सर्वभूतसमः क्षमी ।
कलिकल्मषयुक्तानां सर्वदाऽस्थिरचेतसाम् ॥ ५७ ॥
निद्रालस्यप्रसक्तानां भावशुद्धिः कथं भवेत् ।
वीरसाधनकर्माणि पञ्चतत्त्वोदितानि च ॥ ५८ ॥
मद्यं मांसं तथा मत्स्यमुद्रामैथुनमेव च ।
एतानि पञ्चतत्त्वानि त्वया प्रोक्तानि शङ्कर ! ॥ ५९ ॥
कलिजा मानवा लुब्धाः शिश्नोदरपरायणाः ।
लोभात्तत्र पतिष्यन्ति न करिष्यन्ति साधनम् ॥ ६० ॥
इन्द्रियाणां सुखार्थाय पीत्वा च बहुलं मधु ।

नेत्यादि । भवेदित्यध्याहार्य्यम् । देवताप्रायः देवतुल्यः द्वन्द्वातीतः सुखदुःखशीतोष्णादियुगलानि द्वन्द्वानि तान्यतीतोऽतिक्रान्तः तत्सहनशील इत्यर्थः वीतरागः वीतो विशेषेण गतो रागः प्रीतिर्मात्सर्यं वा यस्य यस्माद्वा सः रागोऽनुरागे मात्सर्ये इति कोशः । सर्वभूतसमः सर्वेषु भूतेषु समः रागद्वेषादिशून्यः क्षमी परेषापकारे सति तस्य प्रत्यपकारानाचरणं क्षमा तद्वान् ॥ ५६ ॥

एव पशुदिव्ययोर्विधेयानि कर्म्माणि प्रदर्श्येदानीं सर्वदा चञ्चलचित्तानां निद्रालस्यप्रसक्तानां नानाविधदुष्कृतशालिना पशुदिव्यविधेयकर्म्मसाधनायोग्यानां कलिजन्मनां मनुष्याणां पशुभावदिव्यभावौ न सिध्यत इति प्रतिपादयितुमाह । कलीत्यादि ॥ ५७ ॥

वीरेत्यादि । हे शङ्कर ! लोककल्याणकर्त्तः, पञ्चमद्यादीनि तत्त्वानि उदितान्युक्तानि येषु एवम्भूतानि वीरसाधनकर्म्माणि मद्यमांसादीनि पञ्चतत्त्वानि च त्वया प्रोक्तानीत्यन्वयः ॥ ५८ । ५९ ॥

तत्र मद्यादिपञ्चतत्त्वेषु ॥ ६० ॥

इन्द्रियाणामिति । मधु मद्यम् ॥ ६१ ॥

भविष्यन्ति मदोन्मत्ता हिताहितविवर्जिताः ॥ ६१॥
परस्त्रीधर्षकाः केचिद्दस्यवो बहवो भुवि ।
न करिष्यन्ति ते मत्ताः पापयोनिविचारणम् ॥ ६२ ॥
अतिपानादिदोषेण रोगिणो बहवः क्षितौ ।
शक्तिहीना बुद्धिहीना भूत्वा च विकलेन्द्रियाः ॥६३॥
ह्रदे गर्त्ते प्रान्तरे च प्रासादात् पर्वतादपि ।
पतिष्यन्ति मरिष्यन्ति मनुजा मदविह्वलाः ॥ ६४ ॥
केचिद्विवादयिष्यन्ति गुरुभिः स्वजनैरपि ।
केचिन्मौना मृतप्राया अपरे बहुजल्पकाः ॥ ६५ ॥
अकार्य्यकारिणः क्रूरा धर्म्ममार्गविलोपकाः ।
हिताय यानि कर्म्माणि कथितानि त्वया प्रभो ! ॥६६॥
अन्ये तानि महादेव ! विपरीतानि मानवे ।
के वा योगं करिष्यन्ति न्यासजातानि केऽपि वा ॥६७॥
स्तोत्रपाठं यन्त्रलिपिं पुरश्चर्य्यां जगत्पते ! ।
युगधर्म्मप्रभावेण स्वभावेन कलौ नराः ॥ ६८ ॥
भविष्यन्त्यतिदुर्वृत्ताः सर्वथा पापकारिणः ।
तेषामुपायं दीनेश ! कृपया कथय प्रभो ! ॥ ६९ ॥

परस्त्रीत्यादि । परस्त्रीधर्षकाः परस्त्रीअभिभवकर्त्तारः । दस्यवः चौराः ॥ ६२ ॥

ह्रदीत्यादि । ह्रदे अगाधजलाधारे प्रान्तरे आसन्न दूरे इत्यवतादिसूत्रेऽध्वनि ॥ ६३ । ६४ ॥

गुरुभिः पित्रादिभिः ॥ ६५ ॥

मौनाः न किञ्चिदपि व्याहरन्तः योगं तन्त्रादिप्रयुक्ततत्तत्पुरुषकर्त्तृकतत्तदारोपावधृ । पुरश्चर्य्यां पुरश्चरणम् ॥ ६६ । ६७ । ६८ ॥

आयुरारोग्यवर्चस्यं बलवीर्य्यविवर्द्धनम् ।
विद्याबुद्धिप्रदं नृणामप्रयत्नशुभङ्करम् ॥ ७० ॥
येन लोका भविष्यन्ति महाबलपराक्रमाः ।
शुद्धचित्ताः परहिता मातापित्रोः प्रियङ्कराः ॥ ७१ ॥
स्वदारनिष्ठाः पुरुषाः परस्त्रीषु पराङ्मुखाः ।
देवतागुरुभक्ताश्च पुत्रस्वजनपोषकाः ॥ ७२ ॥
ब्रह्मज्ञा ब्रह्मविद्याश्च ब्रह्मचिन्तनमानसाः ।
सिद्ध्यर्थं लोकयात्राया: कथयस्व हिताय यत् ॥ ७३ ॥
कर्त्तव्यं यदकर्त्तव्यं वर्णाश्रमविभेदतः ।
विना त्वां सर्वलोकानां कस्त्राता भुवनत्रये ॥७४॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्म्म-
निर्णयसारे श्रीमदाद्यासदाशिवसंवादे जीव-
निस्तारोपायप्रश्नो नाम प्रथमोल्लास ॥ १ ॥

तेषामित्यादि । तेषां नराणाम् । आयुरारोग्यवर्चस्यम् आयुषे आरोग्याय वर्चसे तेजसे च हितम् ॥ ६९ । ७० ॥

विद्येत्यादि । येन उपायेन ॥ ७१ ॥

ब्रह्मविद्याः सर्वं ब्रह्मवेति प्रज्ञावन्तः लोकयात्रायाः लोक-निर्वाहस्य ॥ ७२ । ७३ । ७४ ।

इति श्रीमहानिर्व्वाणतन्त्रटीकायां प्रथमोल्लासः ।

द्वितीयोल्लासः ।

इति देव्या वचः श्रुत्वा शङ्करो लोकशङ्करः ।
कथयामास तत्त्वेन महाकारुण्यवारिधिः ॥ १ ॥

श्रीसदाशिव उवाच ।

साधु पृष्टं महाभागे ! जगतां हितकारिणि ! ।
एतादृशः शुभः प्रश्नो न केनापि कृतः पुरा ॥ २ ॥
धन्यासि सुकृतज्ञासि हितासि कलिजन्मनाम् ।
यद् यदुक्तं त्वया भद्रे ! सत्यं सत्यं यथार्थतः ॥ ३ ॥
सर्वज्ञा त्वं त्रिकालज्ञा धर्म्मज्ञा परमेश्वरि ! ।
भूतं भवद्भविष्यच्च धर्म्मयुक्तं त्वया प्रिये ! ॥ ४ ॥
यथातत्त्वं यथान्यायं यथायोग्यं न संशयः ।
कलिकल्मषदीनानां द्विजादीनां सुरेश्वरि ! ॥ ५ ॥
मेध्यामेध्याविचाराणां न शुद्धिः श्रौतकर्म्मणा ।
न संहिताद्यैः स्मृतिभिरिष्टसिद्धिर्नृणां भवेत् ॥ ६ ॥

शङ्कर इदानीं कृतजीवनिस्तारोपायप्रश्नां पार्वतीं तत्प्रश्नञ्च स्तुवंस्तां प्रत्युत्तरं दातुमुपक्रमते । इतीत्यादि । लोकशङ्करः जानानां कल्याणस्रोत्पादकः महाकारुण्यवारिधिः महादयासमुद्रः ॥ १ । २ । ३ ॥

सर्वज्ञेत्यादि । भवत् वर्त्तमानम् ॥ ४ ॥

कलिकल्मषदीनानां कलियुगसम्बन्धिदुष्कृतहेतुकदुर्गतिशालिनां मेध्यामेध्याविचाराणां पवित्रापवित्रविचारशून्यानाम् अतएव द्विजादीनां ब्राह्मणप्रभृतीनां श्रौतकर्म्मणा वेदोक्तेन कर्म्मणा शुद्धिर्न भवेत् ॥ ५ । ६ ॥

सत्यं सत्यं पुनः सत्य सत्यं सत्यं मयोच्यते।
विना ह्यागममार्गेण कलौ नास्ति गतिः प्रिये!॥७॥
श्रुतिस्मृतिपुराणादौ मयैवोक्तं पुरा शिवे!।
आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः॥८॥
कलावागममुल्लङ्घ्य योऽन्यमार्गं प्रवर्त्तते।
न तस्य गतिरस्तीति सत्य सत्यं न संशयः॥९॥
सर्वैर्वेदैः पुराणैश्च स्मृतिभिः सहितादिभिः।
प्रतिपाद्योऽस्मि नान्योऽस्ति प्रभुर्जगति मां विना॥१०॥
आमनन्ति च ते सर्वे मत्पदं लोकपावनम्।
मन्मार्गविमुखा लोका पाषण्डा ब्रह्मघातिनः॥११॥
अतो मन्मतमुत्सृज्य यो यत् कर्म्म समाचरेत्।
निष्फलं तद्भवेद्देवि! कर्त्तापि नारको भवेत्॥१२॥
मूढो मन्मतमुत्सृज्य योऽन्यन्मतमुपाश्रयेत्।
ब्रह्महा पितृहा स्त्रोघ्नः स भवेन्नात्र संशयः॥१३॥
कलौ तन्त्रोदिता मन्त्राः सिद्धास्तूर्णफलप्रदाः।

हीत्यनुषङ्गः॥७॥

श्रुतीत्यादि। हे शिवे! सुधीर्विचक्षण आगमोक्तविधानेन देवान् यजेत् पूजयेत् इति पुरा पूर्वं श्रुतिस्मृतिपुराणादौ मयैवोक्तमित्यन्वयः॥८।९॥

स्वमतप्रामाण्याय प्रथमतः आत्मन एव सर्वोत्तमत्वं व्याहर्त्तुमाह। सर्वैरित्यादि। यतः इत्यध्याहार्य्यम् प्रतिपाद्यः बोधयितव्यः॥१०॥

आमनन्तीति। सर्वे ते वेदादयो मत्पदं मदीयं स्थानं लोकपावनं लोकानां पूतत्वजनकमामनन्ति बोधयन्ति। ब्रह्मघातिनो भवेयुरिति शेषः॥११॥

अत इत्यादि। उत्सृज्य परित्यज्य। तत् कर्म्म॥१२।१३॥

शस्ताः कर्म्मसु सर्वेषु जपयज्ञक्रियादिषु ॥ १४ ॥
निर्वीर्य्याः श्रौतजातीया विषहीनोरगा इव ।
सत्यादौ सफला आसन् कलौ ते मृतका इव ॥ १५ ॥
पाञ्चालिका यथा भित्तौ सर्व्वेन्द्रियसमन्विताः ।
असूरग्रहाः कार्य्येषु तथान्ये मन्त्रराशयः ॥ १६ ॥
अन्यमन्त्रैः कृतं कर्म्म वन्ध्यास्त्रीसङ्गमो यथा ।
न तत्र फलसिद्धिः स्यात् श्रम एव हि केवलम् ॥ १७ ॥
कलावन्योदितैर्म्मार्गैः सिद्धिमिच्छति यो नरः ।
तृषितो जाह्नवीतीरे कूपं खनति दुर्म्मतिः ॥ १८ ॥
मदुक्तादुदितं धर्म्मं हित्वान्यद्धर्म्ममीहते ।

अथ वेदोक्तानां मन्त्राणां कलौ निष्प्रभावत्वं तत्तत्फलानिष्पादकत्वञ्च प्रतिपादयंस्तन्त्रोदितानामेव मन्त्राणां सिद्धत्वात् झटिति तत्तत्फलप्रदात्वाच्चानिष्प्राश्रयमाह, कलाविस्यादिभिः ॥ १४ ॥

निर्वीर्य्या इत्यादि । ये श्रौतजातीया वेदोदिता मन्त्रा सत्यादौ युगे सफलास्तत्तत्फलोत्पादका आसन् ते सर्वे मन्त्रा कलौ युगे विषहीना उरगा सर्पा इव निर्वीर्य्या निष्प्रभा वा मृतका इव तत्तत्फलानिष्पादकाश्च बोद्धव्या इत्यन्वयः ॥ १५ ॥

पाञ्चालिका इत्यादि । भित्तौ स्थिताः सर्वैरिन्द्रियैः समन्विता युक्ता असूः पाञ्चालिका वस्त्रवस्त्रादिभिर्निर्म्मिता पुत्तिका यथा कार्य्येष्वशक्ता असमर्था भवन्ति तथैवान्ये तन्त्रोक्तभिन्ना मन्त्रराशयो मन्त्रसमूहा कलौ तत्तत्कार्य्यानिष्पादका ज्ञेया । पाञ्चालिका पुत्तिका स्याद्वस्त्रवस्त्रादिभिः कृतेत्यमरः ॥ १६ ॥

अन्येत्यादि । यथा वन्ध्यास्त्रीसङ्गमोऽपत्यरूपफलसाधको न भवति एवमन्यमन्त्रैः कृतं यस्य कर्म्म तत्र तस्मिन् कर्म्मणि कृते सति फलसिद्धिः फलनिष्पत्तिर्न स्यात् केवलं श्रम एव स्यात् । हीति निश्चितमेतत् ॥ १७ । १८ ॥

अमृतं खगटे त्यक्त्वा चीरमार्कं स वाञ्छति ॥ १९ ॥
नान्यः पन्था मुक्तिहेतुरिहामुत्र सुखाप्तये ।
यथा तन्त्रोदितो मार्गो मोक्षाय च सुखाय च ॥ २० ॥
तन्त्राणि बहुधोक्तानि नानाख्यानान्वितानि च ।
सिद्धानां साधकानाञ्च विधानानि च भूरिशः ॥ २१ ॥
अधिकारिविभेदेन पशुबाहुल्यतः प्रिये ! ।
कुलाचारोदितं धर्म्मं गुप्त्यर्थं कथितं क्वचित् ॥ २२ ॥
जीवप्रवृत्तिकारीणि कानिचित् कथितान्यपि ।
देवा नानाविधाः प्रोक्ता देव्योऽपि बहुधाः प्रिये ! ॥ २३ ॥
भैरवाश्चैव वेताला वटुका नायिका गणाः ।
शाक्ताः शैवा वैष्णवाश्च सौरगाणपतादयः ॥ २४ ॥
नानामन्त्राश्च यन्त्राणि सिद्धोपायान्यनेकशः ।
भूरिप्रयाससाध्यानि यथोक्तफलदानि च ॥ २५ ॥
यथा यथा कृताः प्रश्ना येन येन यदा यदा ।

महत्त्वात् मम सुखात् उदितं कथितम् । ईक्षते वाञ्छति । आर्कम् अर्कत्वोद्भवम् ॥ १९ ॥

अमृत घरोलोके ॥ २० । २१ ।

अधिकारीत्यादि । हे प्रिये ! अधिकारिविभेदेनाधिकारिणां विशेषेण पशूनां बाहुल्यतश्च हेतोः क्वचित् कुलाचारोदितं कुलाचारोक्तं धर्म्मं गुप्त्यर्थं कथितम् ॥ २२ ॥

जीवेत्यादि । अधिकारिविभेदेनेत्यनुषज्यते । कानिचित् तन्त्राणि । अपीत्यस्य जीवप्रवृत्तिकारीणीत्यत्रान्वयः कर्त्तव्यः ॥ २३ । २४ ॥

नानेत्यादि । सिद्धोपायानि सिद्धाः सिद्धिमन्त उपाया येषु तानि ॥ २५ ॥

तदा तस्योपकाराय तथैवोक्तं मया प्रिये ! ॥ २६ ॥
सर्व्वलोकोपकाराय सर्व्वप्राणिहिताय च ।
युगधर्मानुसारेण याथातथ्येन पार्व्वति ! ॥ २७ ॥
त्वया यादृक्कृता प्रश्ना न केनापि पुरा कृता ।
तव स्नेहेन वक्ष्यामि सारात्सार परात्परम् ॥ २८ ॥
वेदानामागमानाञ्च तन्त्राणाञ्च विशेषत ।
सारमुद्धृत्य देवेशि ! तवाग्रे कथ्यते मया ॥ २९ ॥
यथा नरेषु तन्त्रज्ञा सरितां जाह्नवी यथा ।
यथाह विदिवेशानामागमानामिदं तथा ॥ ३० ॥
किं वेदै किं पुराणैश्च किं शास्त्रैर्बहुभिः शिवे ! ।
विज्ञातेऽस्मिन् महातन्त्रे सर्व्वमिद्धोश्वरी भवेत् ॥ ३१ ॥
यतो जगन्मङ्गलाय त्वयाहं विनियोजित ।
अतस्ते कथयिष्यामि यद्विश्वहितकृत् भवेत ॥ ३२ ॥
कृते विश्वहिते देवि ! विश्वेशः परमेश्वरि ! ।

यथेत्यादि । यथा यथा यादृशा यादृशा प्रश्ना तथैव तादृशमेवोत्तरम् ॥ २६ ॥

सर्व्वलोकोपकारायेत्यस्य त्वया यादृक्कृत प्रश्न इत्यनेनान्वय कर्त्तव्य ॥ २७ । २८ ॥

वेदानामित्यादि । सारं स्थिरांशम् ॥ २९ ॥

अथ सर्व्वतन्त्रेभ्यो महानिर्व्वाणतन्त्रस्य सदृष्टान्तं श्रेष्ठमाह । यथेत्यादिना । तन्त्रज्ञा उत्तमा इति शेषः इदं महानिर्व्वाणतन्त्रम् ॥ ३० । ३१ ॥

यत इत्यादि । विनियोजितः प्रवर्त्तितः ॥ ३२ ॥

ननु विश्वहितोत्पादकोपायकथनाद्भवत को लाभोऽत आह । कृत इत्यादि । हे देवि ! विश्वहिते कृते सति विश्वेशो विश्वेषामभद्रा-

प्रीतौ भवति विश्वात्मा यतो विश्वं तदाश्रितम् ॥ ३३ ॥
स एक एव सद्रूपः सत्योऽद्वैतः परात्परः।
स्वप्रकाशः सदापूर्णः सच्चिदानन्दलक्षणः ॥ ३४ ॥
निर्विकारो निराधारो निर्विशेषो निराकुलः।
गुणातीतः सर्वसाक्षी सर्वात्मा सर्वदृग्विभुः ॥ ३५ ॥

दीना सर्वेषां नियन्ता परमेश्वरः प्रीतो भवति ननु। विश्वहितोत्पादनात् परमेश्वरे कथं प्रीतिरुत्पद्यते तत्राह विश्वात्मेति। यतः परमेश्वरो विश्वमात्मनि यस्य तथाभूतो भवति यतो विश्वहितोत्पादनेन तस्य प्रीतिर्जायते इति भावः। ननु तस्य विश्वात्मत्वमेव कथं स्यात्तत्राह यतो विश्वमित्यादि। यतो विश्वं तदाश्रितं तं परमेश्वरमाश्रित्य वर्त्तेऽतो विश्वात्मा स भवति ॥ ३३ ॥

यस्य परमात्मन एवैकस्य सत्यत्वं तदन्यस्याखिलपदार्थस्य मिथ्यात्वमस्तीति प्रतिपादयति। स एक एवेत्यादि। अथ सत्यत्वात्तज्ज्ञानादेः सर्वेषां प्रीतिजनकत्वान्निर्वाणहेतुत्वाच्च परमात्मैवैको ध्येयः पूज्यः सुखाराध्यश्चेत्यभिधातुं प्रथमतः सद्रूपः सत्स्वभावः स परमेश्वर एवैक सत्य तदन्यस्तु सर्वः पदार्थोऽसत्यो ज्ञेयः। तत्सत्यत्वे हेतून् दर्शयन्नाह अद्वैत इत्यादि। यतोऽद्वैतः सजातीयविजातीयशून्यः अतएव परात् ब्रह्मादेरपि परः श्रेष्ठः स्वेनात्मनैव प्रकाशते इति स्वप्रकाशः चन्द्रसूर्यादिप्रकाशनिरपेक्ष इत्यर्थः। सदापूर्णः सर्वदा अखण्ड सच्चिदानन्दलक्षण सन्नौ सर्वदा स्थायिनौ यौ चिदानन्दौ ज्ञानानन्दौ तत्स्वरूपः ॥ ३४ ॥

निर्विकार प्रकृतेरन्यथाभावो विकारः तद्रहित निराधारः आश्रयशून्यः निर्विशेषः स्वगतभेदरहितः निराकुलः आकुलताशून्यः गुणातीतः गुणा शीतोष्णाः सुखदुःखादयः सत्त्वादयो वा तानतीतोऽतिक्रान्तः सर्वसाक्षी सर्वेषां शुभाशुभकर्मणां साक्षात् द्रष्टा सर्वात्मा सर्वस्वरूपः सर्वदृक् अखिलस्य पदार्थस्यावलोकयिता विभुः प्राप्तसमस्तैश्वर्यः ॥ ३५ ॥

गूढ: सर्वेषु भूतेषु सर्वव्यापी सनातन: ।
सर्वेन्द्रियगुणाभास: सर्वेन्द्रियविवर्जित: ॥ ३६ ॥
लोकातीतो लोकहेतुरवाङ्मनसगोचर: ।
स वेत्ति विश्वं सर्वज्ञस्तं न जानाति कश्चन ॥ ३७ ॥
तदधीनं जगत् सर्वं चैलोक्यं सचराचरम् ।
तदालम्बनतस्तिष्ठेदवितर्क्यमिदं जगत् ॥ ३८ ॥
तत्सत्यतामुपाश्रित्य महद्भाति * पृथक् पृथक् ।
तेनैव हेतुभूतेन वयं जाता महेश्वरि ! ॥ ३९ ॥
कारणं सर्वभूतानां स एक: परमेश्वर: ।
लोकेषु सृष्टिकरणात् स्रष्टा ब्रह्मेति गीयते ॥ ४० ॥

सर्वेषु चराचरेषु भूतेषु गूढ: संहृत: सर्वव्यापी सकलपदार्थव्यापनशील: सनातन: आद्यन्तशून्य: सर्वेन्द्रियगुणाभास: सर्वाणीन्द्रियाणि गुणाश्च तद्विषयानाभासयति स: तथाभूत: सर्वेन्द्रियविवर्जित: चक्षुरादिसकलेन्द्रियशून्य: ॥ ३६ ॥

लोकातीतोऽतिक्रान्तलोक: लोकहेतु: भुवनबीजम् अवाङ्मनसगोचर: वाचो मनसश्चाविषय: सर्वज्ञ: स परमात्मा विश्वं सर्वं जगद्वेत्ति जानाति तं परमात्मानन्तु कश्चन क्वापि न जानाति अत: परमात्मैवैक: सत्य: तद्भिन्नस्त्वखिल: पदार्थोऽनेवम्भूतत्वादसत्य इत्यर्थ: ॥३७॥

तदधीनमित्यादि । सर्वं जगत्तदधीनं परमात्मवशवर्त्ति सचराचरं जङ्गमस्थावरसहितं त्रैलोक्यं तदालम्बनत: परमात्मावलम्बनतस्तिष्ठेत् । दुरन्तवितर्क्यमनूह्यनीयं जगत् तत्सत्यतां परमात्मसत्यत्वमुपाश्रित्य इयं पृथ्वी इमा आप: अयं वायुरित्यादिरूपेण पृथक् पृथक् महत् सत्यवद्भाति प्रकाशते इत्यन्वय: वयं भङ्गुरादय: ॥ ३८ । ३९ ॥

कारणमित्यादि । एक: केवलः तदिच्छया परमेश्वरेच्छया सृष्टि-

---

* सद्भातीति वा पाठ: ।

विष्णुः पालयिता देवि । संहर्त्ताहं तदिच्छया ।
इन्द्राद्यो लोकपालाः सर्वे तद्वशवर्त्तिनः ॥ ४१ ॥
स्वे स्वेऽधिकारे निरतास्ते यासन्ति † तदाज्ञया ।
त्वं परा प्रकृतिस्तस्य पूज्यासि भुवनत्रये ॥ ४२ ॥
तेनान्तर्यामिरूपेण तत्तद्विषययोजिताः ।
स्वस्वकर्म्म प्रकुर्व्वन्ति न स्वतन्त्राः कदाचन ॥ ४३ ॥
यद्वयाद्वाति वातोऽपि सूर्य्यस्तपति यद्वयात् ।
वर्षन्ति तोयदाः काले पुष्पन्ति तरवो वने ॥ ४४ ॥
कालं कालयते काले मृत्योर्मृत्युर्भियो भयम् ।
वेदान्तवेद्यो भगवान् यत्तच्छब्दाभिलक्षितः ॥ ४५ ॥
सर्वे देवाश्च देव्यश्च तन्मयाः सुरवन्दिते ।
आब्रह्मस्तम्बपर्य्यन्तं तन्मयं सकलं जगत् ॥ ४६ ॥

करणाल्लोकेषु ब्रह्मा सृष्टेति गीयते यद्व्रते । तदिच्छयैव सृष्टजगत्-पालनात् विष्णुः पालयितेति गीयते । तत्संहरणाद्वाह संहर्त्तेति गीयते । इन्द्राद्यः इत्यादि । तद्वशवर्त्तिनः परमेश्वराधीना ये इन्द्रादयो लोकपालास्ते सर्वे स्वे स्वेऽधिकारे निरताः सन्तस्तदाज्ञया लोकान् यासन्तीत्यन्वयः ॥ ४०—४२ ॥

तेनेत्यादि । तेन परमात्मना तत्तद्विषययोजिताः तस्मिन् तस्मिन् विषये प्रवर्त्तिताः न स्वतन्त्राः न स्वाधीनाः ॥ ४३ । ४४ ॥

कालमित्यादि । काले प्रलयसमये कालमपि कालयते नाशं नयति । भियो भयस्य । यत्तच्छब्दाभ्यां बोधितः ॥ ४५ ॥

सर्वे इत्यादि । तन्मयाः परमात्मस्वरूपाः आब्रह्मस्तम्बपर्य्यन्तं

† यसन्तीति पाठः ।

तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत् ।
तदाराधनतो देवि ! सर्वेषां प्रीणनं भवेत् ॥ ४७ ॥
तरोर्मूलाभिषेकेण यथा तद्वज्जपल्लवाः ।
तृप्यन्ति तदनुष्ठानात् तथा सर्वेऽमरादयः ॥ ४८ ॥
यथा तवार्चनाद्ध्यानात् पूजनाज्जपनात् प्रिये ! ।
भवन्ति तुष्टाः सुन्दर्य्यस्तथा जानीहि सुव्रते ! ॥ ४९ ॥
यथा गच्छन्ति सरितोऽवश्येनापि सरित्पतिम् ।
तथार्चादीनि कर्म्माणि तदुद्देश्यानि पार्व्वति ! ॥ ५० ॥
यो यो यान् यान् यजेद्देवान् श्रद्धया यद्यदाप्तये ।
तत्तद्ददाति सोऽध्यक्षस्तै स्तैर्देवगणैः शिवे ! ॥ ५१ ॥
बहुनात्र किमुक्तेन तवाग्रे कथ्यते प्रिये ! ।
ध्येयः पूज्यः सुखाराध्यस्तं विना नास्ति मुक्तये ॥ ५२ ॥
नायासो नोपवासश्च कायक्लेशो न विद्यते ।

ब्रह्माणमारभ्य तृणादिगुच्छपर्य्यन्तं सकलं सम्पूर्णं जगत्तन्मयं परब्रह्मस्वरूपं भवति ॥ ४६ ॥

तस्मिंस्तुष्टे इत्यादि । अत इति शेषः तस्मिन् परमात्मनि ॥ ४७ ॥

परब्रह्माराधनत सर्वेषां प्रीणने दृष्टान्तमाह, तरोरित्यादि । तद्वज्जपल्लवा तरोः शाखाः किशलयानि च । तदनुष्ठानात् परमेश्वराराधनात् ॥ ४८ ॥

यथेत्यादि । पूजनात् मानसार्च्चनात् ॥ ४९ ॥

यथेत्यादि । तदुद्देश्यानि स परमात्मा उद्देश्यो येषामर्च्चादिकर्म्मणां तानि ॥ ५० ॥

यो य इत्यादि । यद्यदाप्तये यस्य यस्य फलस्य लाभाय अध्यक्षः सर्वेषां प्राणिनां तत्तत्क्रियासु प्रवर्त्तकः ॥ ५१ ॥

बहुनेत्यादि । सुखेनाराध्य उपास्यः सुखाराध्यः ॥ ५२ ॥

नैवाचारादिनियमो नोपचाराश्च भूरिशः ॥ ५३ ॥
न दिक्कालविचारोऽस्ति न मुक्त्यासमहतिः ।
यत्साधने कुलेशानि ! तं विना कोऽन्यमाश्रयेत् ॥५४॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्म्मनिर्णयसारे
श्रीमदाद्याम्बादाशिवसंवादे जीवनिस्तारोपाय-
प्रश्नो नाम द्वितीयोल्लासः ॥ २ ॥

सुखाराध्यत्वमेव दर्शयन्नाह । नायास इत्यादि । आयासः परिश्रम ॥ ५३ ॥

तं परमात्मानम् ॥ ५४ ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां द्वितीयोल्लासः ।

तृतीयोल्लासः ।

श्रीदेव्युवाच ।

देवदेव महादेव ! देवतानां गुरोर्गुरो ! ।
वक्ता त्वं सर्वशास्त्राणां मन्त्राणां साधनस्य च ॥ १ ॥
कथितं यत् परं ब्रह्म परमेशं परात्परम् ।
यस्योपासनतो मर्त्यो भुक्तिं मुक्तिञ्च विन्दति ॥ २ ॥
केनोपायेन भगवन् ! परमात्मा प्रसीदति ।
किं तस्य साधनं देव ! मन्त्रः को वा प्रकीर्त्तितः ॥ ३ ॥
किं ध्यानं किं विधानञ्च परेशस्य महात्मनः ।
तत्त्वेन श्रोतुमिच्छामि कृपया कथय प्रभो ! ॥ ४ ॥

श्रीसदाशिव उवाच ।

अतिगुह्यं परं तत्त्वं शृणु मत्प्राणवल्लभे ! ।

कैवल्यार्थं परमात्मैव ध्येयः पूज्य सुखाराध्यश्चेत्याकर्ण्य तज्ज्ञानादिकं जिज्ञासुः सदाशिवं प्रशंसन्ती देव्युवाच । देवदेवेत्यादि । देवतानां गुरोर्ब्रह्मणोऽपि गुरो ॥ १ ॥

विन्दति लभते ॥ २ ॥

तस्य परमात्मनः ॥ ३ ॥

तत्त्वेन याथार्थ्येन ॥ ४ ॥

अथोत्तरयन् सदाशिव उवाच । अतिगुह्यमित्यादि । अतिगुह्य-

---

* परेतस्य परात्मनः इति वा पाठः ।

रहस्यमेतत् कल्याणि ! न कुत्रापि प्रकाशितम् ॥ ५ ॥
तव स्नेहेन वक्ष्यामि मम प्राणाधिकं परम् ।
ज्ञेय भवति तद्ब्रह्म सच्चिद्विश्वमयं परम् ॥ ६ ॥
यथा तत्त्वस्वरूपेण लक्षणैर्वा महेश्वरि ! ।
सत्तामात्रं निर्विशेषमवाङ्मनसगोचरम् ॥ ७ ॥
असच्चिलोकीसङ्ज्ञानं स्वरूपं ब्रह्मणः स्मृतम् ।
समाधियोगैस्तद्वेद्यं सर्वत्र समदृष्टिभिः ।
द्वन्द्वातीतैर्निर्विकल्पैर्देहात्माध्यासवर्जितैः ॥ ८ ॥

अतिरहस्यं परं तत्त्व परं ब्रह्म तत्त्व ब्रह्मणि याथार्थ्ये इति कोशः । रहस्यं गुह्यम् ॥ ५ ॥

ज्ञेयमित्यादि । हे महेश्वरि ! सच्चिद्विश्वमय सत् सदा स्थायि चित् चैतन्य विश्वमशेष जगत् एतत् स्वरूप यदतिगुह्य तत् पर ब्रह्म तत्-स्वरूपेण ब्रह्मणः स्वरूपेण लक्षणेन तटस्थैर्वा लक्षणैर्यावत् ज्ञेय भवति । लक्ष्यते ज्ञायते पदार्थो यै तानि लक्षणानि तै करणे ल्युट् ।

ननु किं तत्तत्त्वस्वरूपं येन परं ब्रह्म ज्ञेयं भवेदित्यपेक्षाया ब्रह्मणः स्वरूपं निरूपयति सत्तामात्रमित्यादि । यत् सत्तामात्रं केवल-परमार्थसत्त्वरूप निर्विशेष स्वगतभेदरहितम् अवाङ्मनसगोचर वचो मनसश्चाप्राह्यम् असच्चिलोकीसङ्ज्ञानम् असत्या मिथ्याभूतायाः स्त्रिलोक्याः सङ्ज्ञान सद्रूपज्ञानं यस्मात् तद्ब्रह्मणः स्वरूपं स्मृतम् ।

तच्च ब्रह्मस्वरूपं परमहंसैरेव वेदितव्यमित्याह । समाधी-त्यादिना । सर्वत्र समदृष्टिभिः सर्वत्रारिमित्रादौ समा तुल्या दृष्टि-र्येषां तैः द्वन्द्वातीतैः अतिक्रान्तसुखदुःखशीतोष्णादिभिः निर्विक-ल्पैर्नानाविधकल्पनाशून्यैः देहात्माध्यासवर्जितैः शरीरनिष्ठात्मत्वबु-द्धिरहितैर्योगिभिः समाधियोगैः समाधिश्चित्तैकाग्र्यम् योगाः पर-मेश्वरैकपरतासम्यग्दर्शनादयः तैः करणैः तद्ब्रह्म वेद्यं भवति ।

यतो विश्वं समुद्भूतं येन जातञ्च तिष्ठति ।
यस्मिन् सर्व्वाणि लीयन्ते ज्ञेय तद्ब्रह्म लक्षणैः ॥ ९॥
स्वरूपबुद्ध्या यद्वेद्यं तदेव लक्षणैः शिवे ! ।
लक्षणैरामुमिच्छूनां विहितं तत्र साधनम् ॥ १० ॥
तत् साधनं प्रवक्ष्यामि शृणुष्वावहिता प्रिये ! ।
तत्रादौ कथयाम्यद्ये ! मन्त्रोद्धारं महेशितुः ॥ ११ ॥
प्रणवं पूर्व्वमुद्धृत्य सच्चित्पदमुदाहरेत् ।

अथवा समाधीयते चित्तमस्मिन्निति समाधिः परमेश्वरः उपसर्गे घोः किरित्यधिकरणे किः । तत्र योगाः सम्यग्दर्शनादयो वेषां तैः समाधियोगैर्जनैः ॥ ६—८ ॥

तटस्थलक्षणानि दर्शयन्नाह । यतो विश्वमित्यादि । यतो हेतुभूतात् विश्वमग्रेयं जगत् समुद्भूतं जातम् जातञ्च सद्विश्व येनावलम्बनभूतेन तिष्ठति । प्रलयकाले सर्वाणि चराण्यचराणि च भूतानि यस्मिन् लीयन्ते लीनानि भवन्ति तद्ब्रह्म तटस्थैरेतैर्लक्षणैर्ज्ञेयं वेदितव्यम् ॥९॥

स्वरूपलक्षणेन तटस्थलक्षणेन च वेदितव्यस्य ब्रह्मणो भेदो नास्तीति प्रतिपादयितुमाह स्वरूपबुद्ध्येत्यादि । हे शिवे ! स्वरूपबुद्ध्या यद्ब्रह्म वेद्यं ज्ञेयं भवति तदेव ब्रह्म तटस्थैरपि लक्षणैर्वेद्यं भवेत् । स्वरूपलक्षणेन ब्रह्माधिगन्तुमिच्छता जनाना साधनानपेक्षत्वात्तटस्थैरेव लक्षणैस्तदधिगन्तुमिच्छतां साधनमभिधातुमाह लक्षणैरित्यादि । तत्र स्वरूपलक्षणतटस्थलक्षणेषु मध्ये तटस्थैर्लक्षणैर्ब्रह्माप्तुमधिगन्तुमिच्छूना जनानां साधनं विहितम् ॥१०॥

तदित्यादि । हे प्रिये ! तत्साधनं तटस्थलक्षणैर्वेद्यस्य ब्रह्मणः साधनमहं प्रवक्ष्यामि अवहिता सावधाना सती त्वं शृणुष्व तत्र साधने वक्तव्ये आदौ प्रथमतो महेशितुर्महेश्वरस्य मन्त्रोद्धारं कथयामि ॥ ॥ ११ ॥

मन्त्रोद्धारमेव कथयति प्रणवमित्यादिना । पूर्वंप्रथम प्रणव-

एकं पदान्ते ब्रह्मेति मन्त्रोद्धारः प्रकीर्त्तितः ॥ १२ ॥
सन्धिक्रमेण मिलितः सप्तार्णोऽयं मनुर्मतः।
तारहीनेन देवेशि! षड्वर्णोऽयं मनुर्भवेत् ॥ १३ ॥
सर्व्वमन्त्रोत्तमः साक्षाद्धर्म्मार्थकाममोक्षदः।
नात्र सिद्धाद्यपेक्षास्ति नारिमित्रादिदूषणम् ॥ १४ ॥
न तिथिर्न च नक्षत्रं न राशिगणनन्तथा।
कुलाकुलादिनियमो न संस्कारोऽत्र विद्यते।
सर्व्वथा सिद्धमन्त्रोऽयं नात्र कार्य्या विचारणा ॥ १५ ॥
बहुजन्मार्জ্জितैः पुण्यैः सद्गुरुर्यदि लभ्यते।
तदा तद्वक्त्रतो ज्ञात्वा जन्मसाफल्यमाप्नुयात् ॥ १६ ॥
चतुर्व्वर्गं करे कृत्वा परत्रेह च मोदते ॥ १७ ॥
स धन्यः स कृतार्थश्च स कृती स च धार्म्मिकः।

मोङ्कारमुद्धृत्य ततोऽनन्तरं सच्चित्पदमुद्धरेत् वदेत् सच्चित्पदान्ते च एकं ब्रह्मेत्युदाहरेत्। ततश्च ओं सच्चिदेकं ब्रह्मेत्याकारको मन्त्रो निष्पन्न मन्त्रोद्धारोऽयमेव प्रकीर्त्तित कथित ॥ १२ ॥

सन्धीति। हे देवेशि! सन्धिक्रमेण मिलितः सङ्कृतोऽयं मनुर्मन्त्र. सप्तार्ण सप्तवर्णको मत तारहीनेन प्रणवत्यागेनायं पूर्वोक्त एव मनु. षड्वर्णो भवेत् ॥ १३ ॥

अथेम मन्त्र स्तौति सर्वेत्यादिना। अयं मन्त्र सर्वेषु मन्त्रे-ष्वुत्तम. श्रेष्ठ.। सर्वमन्त्रोत्तमत्वमेवाह साक्षादित्यादिना ॥ १४ ॥

न तिथिरिति। तिथिर्न गणनीयेति शेष. ॥ १५ ॥

अथैतस्य मन्त्रस्य ग्रहीतु. पुरुषस्य सर्वोत्तमत्वं प्रतिपादयितु-माह बहिरित्यादि। तद्वक्त्रत. स गुरुमुखात् मन्त्रमिमं ज्ञात्वा ॥ १६ ॥

चतुर्वर्गमिति। धर्मार्थकाममोक्षैरुपलक्षितो वर्ग समूहश्चतु-र्वर्गस्तम्। त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गे समोक्षकैरित्यमर। परत्र परलोके ॥ १७ ॥

स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ॥ १८ ॥
सर्व्वशास्त्रेषु निष्णातः सर्व्वलोकप्रतिष्ठितः ।
यस्य कर्णपथोपान्तप्राप्तो मन्त्रमहामणिः ॥ १९ ॥
धन्या माता पिता तस्य पवित्रं तत्कुलं शिवे ! ।
पितरस्तस्य सन्तुष्टा मोदन्ते विदशैः सह ।
गायन्ति गायनीं गाथां पुलकाङ्कितविग्रहाः ॥ २० ॥
अस्मत्कुले कुलश्रेष्ठो जातो ब्रह्मोपदेशिकः ।
किमस्माक गयापिण्डैः किं तीर्थैः श्राद्धतर्पणैः ॥ २१ ॥
किं दानैः किं जपैर्होमैः किमन्यैर्बहुसाधनैः ।
वयमद्यत्वया सम्म सत्पुत्रस्यास्य साधनात् ॥ २२ ॥
शृणु देवि ! जगद्वन्द्ये ! सत्यं सत्यं मयोच्यते ।
परब्रह्मोपासकानां किमन्यैः साधनान्तरैः ॥ २३ ॥
मन्त्रग्रहणमात्रेण देहो ब्रह्ममयो भवेत् ।
ब्रह्मभूतस्य देवेशि ! किमवाप्यं जगत्त्रये ॥ २४ ॥

निष्णातो निपुणः कर्णपथस्योपान्तं प्राप्तः कर्णपथोपान्तप्राप्तः मन्त्र एव महामणिः ॥ १८ । १९ ॥

गीयते इति गायनी तां ल्युट् वेति बाहुलकात् कर्मणि ल्युट् । पुलकैः रोमहर्षणैरङ्किता अधिगता विग्रहा देहा येषां तथाभूताः सन्तः । पुलकाङ्कितविग्रहा इति पाठेऽप्यङ्कितं चिह्नित मित्यर्थः ॥ २० ॥

ता गाथामेवाह अस्मत्कुल इत्यादिभ्यां द्वाभ्याम् । ब्रह्मोपदेशिकः परब्रह्मोपदेशवान् अद्यत्वया अविनश्वरत्वप्राप्तमन्त्रः ॥ २१।२२ ॥

ग्रहणित्यादि । साधनान्तरैः साधनविशेषैः ॥ २३ ॥

मन्त्रेत्यादि । किमवाप्यं किं लब्धव्यमस्ति अपि तु सर्वं वस्तु लब्धमेवास्तीत्यर्थः ॥ २४ ॥

किं कुर्वन्ति ग्रहा रुष्टा वेतालाश्चेटकादयः ।
पिशाचा गुह्यका भूता डाकिन्यो मातृकादयः ।
तस्य दर्शनमात्रेण पलायन्ते पराङ्मुखाः ॥ २५ ॥
रक्षितो ब्रह्ममन्त्रेण प्रावृतो ब्रह्मतेजसा ।
किं विभेति ग्रहादिभ्यो मार्त्तण्ड इव चापरः ॥ २६ ॥
तं दृष्ट्वा ते भयापन्ना. सिंह दृष्ट्वा यथा गजाः ।
विद्रवन्ति च नश्यन्ति पतङ्गा इव पावके ॥ २७ ॥
न तस्य दुरितं किञ्चिद्ब्रह्मनिष्ठस्य देहिनः ।
सत्यपूतस्य शुद्धस्य सर्वप्राणिहितस्य च ।
को वोपद्रवमन्विच्छेदात्मावघातकं विना ॥ २८ ॥
ये द्रुह्यन्ति खलाः पापा· परब्रह्मोपदेशिने ।
स्वद्रोहं ते प्रकुर्वन्ति नातिरिक्ता यतः सतः ॥ २९ ॥

तस्य ब्रह्मभूतस्य दर्शनमात्रेण पराङ्मुखा· सन्तो ग्रहादय पलायन्ते ॥ २५ ॥

रक्षित इत्यादि । ब्रह्मभूतो जनो ग्रहादिभ्यो विभेति भीतो भवति किम् । किन्तु न विभेतीत्यर्थ· मार्त्तण्ड इव सूर्य्य इव ॥२६॥

तमित्यादि । तं परब्रह्मोपासकम् । ते ग्रहादय विद्रवन्ति पलायन्ते । पतङ्गा इव शलभा इव ॥ २७ ॥

शुद्धस्य निर्मलान्तःकरणस्य ॥ २८ ॥

ये पापा पापशालिन· खला दुर्जना परब्रह्मोपदेशिने जनाय द्रुह्यन्ति तस्यापकारं विदधति ते पापा· स्वद्रोहमेव प्रकुर्वन्ति । परब्रह्मोपदेशिने इति क्रुधद्रुहेर्ष्यासूयार्थानां य प्रति कोप इति सम्प्रदानत्वात् चतुर्थी सम्प्रदाने इति चतुर्थी । परब्रह्मोपदेशिजनद्रोहकरणात् स्वस्यैवापकारस्योत्पादने हेतु दर्शयन्नाह नातिरिक्ता इत्यादि । यतो हेतो· सत साधोर्ब्रह्मभूतादुब्रह्मोप-

स तु सर्वहितः साधुः सर्वेषां प्रियकारकः ।
तस्यानिष्टे कृते देवि ! को वा स्यान्निरुपद्रवः ॥ २० ॥
मन्त्रार्थं मन्त्रचैतन्यं यो न जानाति साधकः ।
शतलक्षप्रजप्तोऽपि तस्य मन्त्रो न सिद्ध्यति ॥ २१ ॥
अतोऽस्यार्थञ्च चैतन्यं कथयामि शृणु प्रिये ! ।
अकारेण जगत्पाता सहर्त्ता स्यादुकारतः ।
मकारेण जगत्स्रष्टा प्रणवार्थ उदाहृत ॥ २२ ॥
सच्छब्देन सदा ख्याति चिच्चैतन्यं प्रकीर्त्तितम् ॥ २३ ॥
एकमद्वैतमीशानि ! बृहत्वाद्ब्रह्म गीयते ।
मन्त्रार्थः कथितो देवि ! साधकाभीष्टसिद्धिद ॥ २४ ॥
मन्त्रचैतन्यमेतत्तु तदधिष्ठात्रदेवता ।
तज्ज्ञानं परमेशानि ! भक्तानां सिद्धिदायकम् ॥ २५ ॥
अस्याधिष्ठात्र देवेशि ! सर्वव्यापि सनातनम् ।
अवितर्क्यं निरातङ्कं वाचातीत निरञ्जनम् ॥ २६ ॥

देशिनो जनात् नेऽतिरिक्ता भिन्ना न भवन्ति अत स्वदोहमेव प्रकुर्वन्नीति भाव ॥ २६ ॥

स तु ब्रह्मनिष्ठस्तु ॥ २० ॥

तस्य साधकस्य यतो न सिद्ध्यति ॥ २१ ॥

अत इति प्रथमत प्रणवार्थ निरूपयति । अकारेणेत्यादिना ॥२२॥

अथ सच्चिदादिपदार्थमाह सच्छब्देनेत्यादिना ॥ २३ । २४ ॥

अथ मन्त्रचैतन्यमभिधत्ते मन्त्रेत्यादिना । हे परमेशानि ! या तस्य मन्त्रस्याधिष्ठात्री देवता तस्या यत् ज्ञानमेतदेव मन्त्रचैतन्यं जानीहीत्यन्वयः तज्ज्ञाधिष्ठात्रदेवताज्ञानं भक्तानां सिद्धिदायक भवेत् ॥ २५ ॥

नन्वस्य मन्त्रस्य काधिष्ठात्री देवतेत्यपेक्षायामाह अस्येत्यादि । हे देवेशि ! सर्वव्यापि सकलपदार्थव्यापनशीलं सनातनं प्रागभावध्वंस-

वाङ्मायाकमलाद्येन तारहीनेन पार्वति ! ।
दीयते विविधा विद्या माया श्रीः सर्वतोमुखी ॥३७॥
तारेण तारहीनेन प्रत्येकं सकलं पदम् ।
युग्मयुग्मक्रमेणापि मन्त्रोऽयं विविधो भवेत् ॥ ३८ ॥
ऋषिः सदाशिवो ह्यस्य छन्दोऽनुष्टुबुदाहृतम् ।

रहितम् अवितर्क्यमनूह्यनीय निराकारमाकृतिशून्य वाचातीतमतिक्रान्तवाक् निरञ्जन मनश्चक्षुराद्यविषयभूत यद्ब्रह्म तदस्य मन्त्रस्याधिष्ठात्र भवेत् ॥ ३६ ॥

वागित्यादि । हे पार्वति ! वाङ्माया कमलाद्येन ऐमिति ह्रीमिति श्रीमिति बीजमाद्य यस्य तथाभूतेन तारहीनेन प्रणवरहितेन पूर्वोक्तेन मन्त्रेण क्रमतो विविधानेकप्रकारा विद्या दीयते विविधा माया दीयते सर्वतो मुख यस्या एवम्भूता श्रीर्लक्ष्मीर्दीयते । यथा ऐ सच्चिदेकं ब्रह्मेत्यनेन मन्त्रेण विद्या दीयते । ह्रीं सच्चिदेकं ब्रह्मेत्यनेन माया दीयते । श्री सच्चिदेकं ब्रह्मेत्यनेन तु लक्ष्मीरिति ॥ ३७ ॥

अथैतस्यैव मन्त्रस्य नानाविधत्वं सम्पादयति तारेणेत्यादिना । पूर्वोक्तमन्त्रस्य प्रत्येकं पद सकलं वा पद तारेण प्रणवेन सहितं कर्त्तव्य तारहीनेन प्रणवत्यागेनोपलक्षितं वा विधेयम् । ततश्चायं मन्त्रो विविधो भवेत् युग्मयुग्मक्रमेणापि प्रणवसहितस्तद्रहितो वाय पूर्वोक्तो मन्त्रो विविधोऽनेकप्रकारको भवेत् । तारसहितं तद्रहित प्रत्येक पद यथा ओ तत् ओं चित् ओ एकम् ओं ब्रह्म सत् चित् एकम् ब्रह्म इति । प्रणवसम्बद्धं तदसम्बद्ध समस्तं पदम् यथा ओ सच्चिदेक ब्रह्म सच्चिदेकं ब्रह्मेति । युग्मयुग्मक्रमतो यथा ओं सद्ब्रह्म ओं चिद्ब्रह्म ओं एकब्रह्म ओं सच्चित् ओं चिदेकम् सद्ब्रह्म चिद्ब्रह्म एक ब्रह्म सच्चित् चिदेकमिति ॥ ३८ ॥

अथास्य मन्त्रस्य ऋष्यादिकमाह ऋषिरित्यादिना सार्द्धेन । अस्य

देवता परमं ब्रह्म सर्वान्तर्यामि निर्गुणम् ॥ ३९ ॥
चतुर्वर्गफलावाप्तौ विनियोगः प्रकीर्त्तितः ।
अङ्गन्यासकरन्यासौ कथयामि शृणु प्रिये ! ॥ ४० ॥
तारं सच्चिदेकमिति ब्रह्मेति सकलं ततः ।
अङ्गुष्ठतर्जनीमध्यानामिकासु महेश्वरि ! ॥ ४१ ॥
कनिष्ठयोः करतलपृष्ठयोः सुरवन्दिते ! ।
नमः स्वाहा वषट् हुँ वौषट् फड़न्तैर्यथाक्रमम् ॥ ४२ ॥
न्यसेन्न्यासोक्तविधिना साधकः सुसमाहितः ।
हृदादिकरपर्य्यन्तमेवमेव विधीयते ॥ ४३ ॥

मन्त्रस्य सर्वान्तर्यामि सर्वान्तर्नियन्तृ ऋषेर मन्त्रस्य सदाशिव ऋषिरनुष्टुप्छन्दः सर्वान्तर्यामि निर्गुणं परमं ब्रह्म देवता धर्म्मार्थकाममोक्षावाप्तये विनियोगः शिरसि सदाशिवाय ऋषये नमः मुखेऽनुष्टुप्छन्दसे नमः हृदि सर्वान्तर्यामिनिर्गुणपरमब्रह्मणे देवतायै नमः धर्म्मार्थकाममोक्षावाप्तये विनियोग इति ऋष्यन्यास विधायाङ्गन्यासकरन्यासौ विधातव्यौ अतस्तावभिधातुमाह । अङ्गन्यासेत्यादि ॥ ३९ । ४० ॥

तयोर्म्मध्ये प्रथमतः करन्यासमाह तारमित्यादिभ्या सार्द्धाभ्या द्वाभ्याम् । हे महेश्वरि ! हे सुरवन्दिते ! नम स्वाहावषट्हुंवौषट्फड-न्तैरन्तर्भूतैर्नम स्वाहावषट्हुंवौषट्फट्रूपैः षड्भिर्विशिष्टं तारं प्रणव सदिति चिदिति एकमिति ब्रह्मेति ततोऽनन्तरम् ओं सच्चिदेकं ब्रह्मेति सकलञ्च पदम् अङ्गुष्ठतर्ज्जनीमध्यानामिकासु कनिष्ठयो करतलपृष्ठयोश्च न्यासोक्तविधिना सुसमाहितोऽतिसावधानः सन् साधको यथाक्रमं न्यसेत् यथा ओं अङ्गुष्ठाभ्या नमः सच्तर्ज्जनीभ्या स्वाहा चिन्मध्यमाभ्या वषट् एकमनामिकाभ्या हुम् ब्रह्म कनिष्ठाभ्यां वौषट् ओं सच्चिदेकं ब्रह्म करतलपृष्ठाभ्यां फट् इति करन्यास । अथाङ्गन्यासमाहार्द्धेन हृदित्यादि । हृदादिकरपर्य्यन्तं प्रत्येवमेव न्यासो विधीयते । यथा ओं हृदयाय नमः

प्राणायाम ततः कुर्यान्मूलेन प्रणवेन वा ।
मध्यमानामिकाभ्याञ्च दत्तहस्तस्य पार्वति ! ॥ ४४ ॥
वामनासापुटं धृत्वा दक्षनासापुटेन च ।
पूरयेत् पवन मन्त्री मूलमष्टमितं जपन् ॥ ४५ ॥
अङ्गुष्ठेन दक्षनासां धृत्वा कुम्भकयोगतः ।
जपेद्वात्रिंशता वृत्त्या ततो दक्षिणनासया ॥ ४६ ॥
शनैःशनैस्त्यजेद्वायुं जपन् षोडशधा मनुम् ।
वामनासापुटेऽप्येवं पूरकुम्भकरेचकम् ॥ ४७ ॥
पुनर्दक्षिणतः कुर्यात् पूर्ववत् सुरपूजिते ! ।
प्राणायामविधिः प्रोक्तो ब्रह्ममन्त्रस्य साधने ॥ ४८ ॥

सच्चिरसे स्वाहा चिच्छिखायै वषट् एकं कवचाय हुम् ब्रह्म नेत्रत्रयाय वौषट् ओं सच्चिदेकं ब्रह्म करतलकरपृष्ठाभ्यां फट् इति ॥ ४१–४३ ॥

एवमङ्गन्यासकरन्यासौ विधाय प्राणायामो विधेय इत्याह । प्राणायाममित्यादिना । ततोऽनन्तरम् ओं सच्चिदेकं ब्रह्मेत्यादिमूलमन्त्रेण प्रणवेन ओङ्कारेण वा प्राणायाम कुर्यात् । ननु प्राणायामः कथं विधातव्य इत्यपेक्षायां तद्विधानमाह मध्यमेत्यादिभिः सार्द्धैश्चतुर्भिः । हे पार्वति । दक्षिणहस्तस्य मध्यमानामिकाभ्यामङ्गुलिभ्यां वामनासापुटं धृत्वा मन्त्री साधकोऽष्टमितं मूलमन्त्रं जपन् सन् दक्षिणनासापुटेन पवन वायुं पूरयेत् । ततो दक्षहस्तस्यैवाङ्गुष्ठेन दक्षनासापुटं धृत्वा कुम्भकयोगतो द्वात्रिंशता वृत्त्या मूलमन्त्रं जपेत् । तत षोडशधा मनुं मूलमन्त्रं जपन् सन् दक्षिणनासयैव शनैः शनैर्वायुं त्यजेत् ततो वामनासापुटेऽप्येवमेव पूरकुम्भकरेचकं कुर्यात् क्रमेणैवाक्षत निश्चल विशुद्धाञ्च श्वास विदध्यादित्यर्थः । पूर्ववत् पुनर्दक्षिणतोऽपि पूरकुम्भकरेचक कुर्यात् ब्रह्ममन्त्रस्य साधने एष प्राणायामविधि प्रोक्तः पूरकादिस्वरूपमाह योगियाज्ञवल्क्य नासिकोत्क्षष्ट उच्छ्वासो ध्यातः

ततो ध्यान प्रकुर्व्वीत साधकाभीष्टसाधनम् ॥ ४९ ॥
हृदयकमलमध्ये निर्व्विशेषं निरीहम्
हरिहरविधिवेद्यं योगिभिर्ध्यानगम्यम् ।
जननमरणभीतिभ्रंसि सच्चित् स्वरूपम् ।
सकलभुवनबीजं ब्रह्म चैतन्यमीड़े ॥ ५० ॥
ध्यात्वैवं परमं ब्रह्म मानसैरुपचारकैः ।
पूजयेत् परया भक्त्या ब्रह्मसायुज्यहेतवे ॥ ५१ ॥
गन्धं दद्यान्महीतत्त्वं पुष्पमाकाशमेव च ।
धूपं दद्याद्वायुतत्त्वं दीपं तेजः समर्पयेत् ।
नैवेद्यं तोयतत्त्वं न प्रदद्यात् परमात्मने ॥ ५२ ॥

पूरक उच्यते । कुम्भको निश्चलश्वासो मुच्यमानस्तु रेचक इति ॥ ४४—४८ ॥

इत्थं प्राणायामं कृत्वा परब्रह्मध्यानं कर्त्तव्यमित्याह तत इत्यादिना ॥ ४९ ॥

अथ तद्ध्यानमेवाह हृदयेत्यादि । हृदयकमलस्य मध्ये स्थितं चैतन्यं चेतन ब्रह्माहमीडे ध्यायामीत्यन्वयः । धातूनामनेकार्थत्वादीड़धातोर्ध्यानेऽर्थेऽपि वृत्तिः । निर्व्विशेषमित्यादीनि ब्रह्मणो विशेषणानि निर्व्विशेषं नानाविधभेदशून्यम् निरीहं निराकाङ्क्षम् प्राप्तसमस्तैश्वर्यमित्यर्थः । ध्यानगम्यं ध्यानेनावगन्तव्यम् जननमरणभीतिभ्रंसि जन्ममृत्युनिमित्तकभयापहन्तृ सच्चित्स्वरूपं सदास्थायिस्वरूपं ज्ञानस्वरूपञ्चेत्यर्थः । सकलभुवनबीजं सकलस्य भुवनस्य कारणम् ॥ ५० ॥

एवं ब्रह्म ध्यात्वा तस्य पूजनं विधेयमित्याह ध्यात्वेत्यादिना । मानसैर्मनः कल्पितैः ब्रह्मसायुज्यहेतवे ब्रह्मत्वनिमित्ताय सादृब्रह्मभूय ब्रह्मत्वं ब्रह्मसायुज्यमित्यपीत्यमरः ॥ ५१ ॥

मानसानुपचारानेवाह गन्धमित्यादिना ॥ ५२ ॥

ततो जप्त्वा महामन्त्रं मनसा साधकोत्तमः ।
समर्प्य ब्रह्मणे पश्चाद्बहिःपूजां समारभेत् ॥ ५३ ॥
उपस्थितानि द्रव्याणि गन्धपुष्पादिकानि च ।
वस्त्रालङ्करणादीनि भक्ष्यपेयानि यानि च ॥ ५४ ॥
मन्त्रेणानेन संशोध्य ध्यात्वा ब्रह्म सनातनम् ।
निमील्य नेत्रे मतिमानर्पयेत् परमात्मने ॥ ५५ ॥
ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ ५६ ॥
ततो नेत्रे समुन्मील्य जप्त्वा मूलं स्वशक्तितः ।
तज्जप ब्रह्मसात् कृत्वा स्तोत्रञ्च कवचं पठेत् ॥ ५७ ॥
स्तोत्रं शृणु महेशानि ! ब्रह्मणः परमात्मनः ।
यत् श्रुत्वा साधको देवि ! ब्रह्मसायुज्यमश्नुते ॥ ५८ ॥

महामन्त्रम् ओं सच्चिदेकं ब्रह्मेत्याद्यात्मकम् समर्प्य महामन्त्रजपहेतुकं फलं दत्वा बहिःपूजामेवाह उपस्थितानीत्यादिना । उपस्थितानि समीपे स्थितानि ॥ ५३ ॥

अनेन इतोऽनन्तरमेव वक्ष्यमाणेन मन्त्रेण ॥ ५४ । ५५ ॥

अथ गन्धपुष्पाद्यर्पणमन्त्रमेवाह ब्रह्मार्पणमिति । अर्प्यते दीयतेऽनेनेत्यर्पणं स्रुवादि यत्पात्रम् तदपि ब्रह्मैव दीयमान हविर्घृतादिकमपि ब्रह्मैव ब्रह्मैवाग्निस्तस्मिन् ब्रह्मणा कर्त्रा हुतं हवनमपि ब्रह्म अग्निश्च कर्त्ता च हवनक्रिया चापि ब्रह्मैवेत्यर्थः । पर ब्रह्मण्येव कर्म्मात्मके समाधिश्चित्तैकाग्र्यं यस्य तेन पुंसा ब्रह्मैव गन्तव्य प्राप्तव्यं न तु फलान्तरमित्यर्थः ॥ ५६ ॥

तत इत्यादि । समुन्मील्य उद्घाट्य मूलं मूलमन्त्रम् ब्रह्मसात् ब्रह्माधीनम् ॥ ५७ ॥

ब्रह्मसायुज्यमश्नुते ब्रह्मत्वं प्राप्नोति ॥ ५८ ॥

नमस्ते सते सर्वलोकाश्रयाय
नमस्ते चिते विश्वरूपात्मकाय ।
नमोऽद्वैततत्त्वाय मुक्तिप्रदाय
नमो ब्रह्मणे व्यापिने निर्गुणाय ॥ ५९ ।
त्वमेक शरण्य त्वमेक वरेण्य
त्वमेक जगत्कारण विश्वरूपम् ।
त्वमेकं जगत्कर्त्तृपाल्प्रहर्त्तृ
त्वमेकं पर निश्चलं निर्विकल्पम् ॥ ६० ॥
भयानां भय भीषणं भीषणानां
गतिः प्राणिनां पावनं पावनानाम् ।
महोच्चैःपदानां नियन्तृ त्वमेकं
परेषां परं रक्षकं रक्षकाणाम् ॥ ६१ ॥

अथ तत्स्तोत्रमेवाह नमस्ते इत्यादि । सते सदा स्थायिने सर्व-लोकाश्रयाय सकललोकाधारभूताय चिते चैतन्याय विश्वरूप आत्मा यस्य तस्मै अद्वैततत्त्वाय सजातीयविजातीयात्मगतभेदरहितत्वाय ब्रह्मणे अतिबृहते अतएव व्यापिने सकलवस्तुव्यापनशीलाय निर्गुणाय सत्त्वादिगुणरहिताय ॥ ५९ ॥

त्वमित्यादि । एक मुख्य केवलं वा शरण्ये रक्षणे साधु इति शरण्यम् तत्र 'साधुरिति यत् । वरेण्यं वरणीयम् । जन्मसृत्युदुष्टा वादिभीरूभिरुपासनीयमित्यर्थः । परं श्रेष्ठम् निर्विकल्पं नानाविध कल्पनाशून्यम् ॥ ६० ॥

भयानामित्यादि । भीषणानां भयानकानामपि भीषण भयानकम् पावनानां पूतत्वजनकानामपि पावनं पावित्र्यजनकम् पदानां स्थानानां मध्ये महोच्चैरत्युच्छ्रितं पदम् अथवा महोच्चैरत्युच्छ्रितं पदं येषां तेषां ब्रह्मादीनामपि नियन्तृ नियामकम् परेषां श्रेष्ठाना-

परेश प्रभो ! सर्वरूपाप्रकाशिन् !
अनिर्देश्य ! सर्वेन्द्रियागम्य ! सत्य ! ।
अचिन्याक्षर ! व्यापकाव्यक्ततत्त्व !
जगद्भासकाधीश ! पायादपायात् ॥ ६२ ॥
तदेकं स्मरामस्तदेकं जपामः
तदेक जगत्साक्षिरूप नमामः ।
सदेकं निधानं निरालम्बमीशं
भवाम्भोधिपोतं शरण्यं व्रजामः ॥ ६३ ॥
पञ्चरत्नमिद स्तोत्रं ब्रह्मण परमात्मन· ।
य. पठेत् प्रयतो भूत्वा ब्रह्मसायुज्यमाप्नुयात् ॥ ६४ ॥
प्रदोषेऽद पठेन्नित्यं सोमवारे विशेषतः ।
श्रावयेद्बोधयेत् प्राज्ञो ब्रह्मनिष्ठान् स्वबान्धवान् ॥ ६५ ॥

मपि ॥ ६१ ॥

परेशेत्यादि। परेश ! परेषा ब्रह्मादीनामप्यधिप! प्रभो! नियन्तः ! अनिर्देश्य ! शब्देन निर्देष्टुमशक्य ! सर्वेन्द्रियागम्य ! सर्वैर्नेत्रादिभिरिन्द्रियैरप्राप्य ! सत्य ! परमार्थसत्त्वशालिन् ! अचिन्य ! मनसोऽप्यविषयभूत! न क्षरति चलतीत्यक्षरम् तत्सम्बोधने अक्षर ! अव्यक्त ! रूपादिरहित ! जगद्भासकाधीश ! जगद्भासकानां चन्द्र-सूर्यादीनामप्यीश्वर ! अथवा जगद्भासकेति अधीशेति च भिन्नमेव पदम् पायात् रक्षेत् अपायात् भक्तिवृद्ध्यादिविश्लेषात् ॥ ६२ ॥

तदित्यादि । तत् ब्रह्म निधीयते जगद् यस्मिन् तन्निधान जगदा-श्रयभूतम् निरालम्बम् आश्रयशून्यम् ॥ ६३ ॥

पञ्चरत्नाख्यैतत्स्तोत्रपाठहेतुक फलमाह पञ्चरत्नमित्यादिना । प्रयत पवित्र· ॥ ६४ ॥

अद स्तोत्रम् ॥ ६५ ॥

इति ते कथितं देवि । पञ्चरत्न महेशितुः ।
कवचं शृणु चार्व्वङ्गि । जगन्मङ्गलनामकम् ।
पठनाद्धारणाद् यस्य ब्रह्मज्ञो जायते ध्रुवम् ॥ ६६ ॥
परमात्मा शिरः पातु हृदयं परमेश्वरः ।
कण्ठं पातु जगत्पाता वदनं सर्वदृग्विभुः ॥ ६७ ॥
करौ मे पातु विश्वात्मा पादौ रक्षतु चिन्मयः ।
सर्व्वाङ्गं सर्वदा पातु परं ब्रह्म सनातनम् ॥ ६८ ॥
श्रीजगन्मङ्गलस्यास्य कवचस्य सदाशिवः ।
ऋषिश्छन्दोऽनुष्टुबिति परमब्रह्म देवता ।
चतुर्व्वर्गफलावाप्त्यै विनियोगः प्रकीर्त्तितः ॥ ६९ ॥
यः पठेद् ब्रह्मकवचं ऋषिन्यासपुरःसरम् ।
स ब्रह्मज्ञानमाप्नोति साक्षाद्ब्रह्ममयो भवेत् ॥ ७० ॥
भूर्ज्जे विलिख्य गुटिकां स्वर्णस्थां धारयेत् यदि ।
कण्ठे वा दक्षिणे बाहौ सर्वसिद्धीश्वरो भवेत् ॥ ७१ ॥
इत्येतत् परमब्रह्मकवचन्ते प्रकाशितम् ।

स्तोत्रं पठित्वा कवचं पठितव्यमतस्तदभिधातुमुपक्रमते इतीति ॥ ६६ ॥

तद् ब्रह्मकवचमेवाह परमात्मेत्यादि ॥ ६७ ॥

चिन्मयः चैतन्यरूपः ॥ ६८ ॥

अथास्य कवचस्य ऋष्यादिकमाह श्रीजगदित्यादिना । अथ ब्रह्मकवचपठनजन्यं फलमाह य इत्यादिना । ऋषिन्यासः पुरःसरो यत्र तत् । ऋषिन्यासस्य अस्य श्रीजगन्मङ्गलनामकवचस्य सदाशिव ऋषिरनुष्टुप् छन्दः परमब्रह्मदेवता धर्म्मार्थकाममोक्षावाप्त्यै श्रीजगन्मङ्गलाख्यकवचपाठे विनियोगः । शिरसि सदाशिवाय ऋषये नमः मुखेऽनुष्टुपछन्दसे नमः हृदये परब्रह्मणे देवतायै नमः धर्म्मार्थकाममोक्षावाप्त्यै श्रीजग-

दद्यात् प्रियाय शिष्याय गुरुभक्ताय धीमते ॥ ७२ ॥
पठित्वा स्तोत्रकवचं प्रणमेत् साधकाग्रणीः ॥ ७३ ॥
नमस्ते परमं ब्रह्म नमस्ते परमात्मने।
निर्गुणाय नमस्तुभ्य सद्रूपाय नमो नमः ॥ ७४ ॥
वाचिक कायिकं वापि मानसं वा यथामति।
आराधने परेशस्य भावशुद्धिर्विधीयते ॥ ७५ ॥
एवं सपूज्य मतिमान् स्वजनैर्बान्धवैः सह।
महाप्रसाद स्वीकुर्य्याद् ब्रह्मणः परमात्मनः ॥ ७६ ॥
पूजने परमेशस्य नावाहनविसर्ज्जने।
सर्व्वत्र सर्व्वकालेषु साधयेद् ब्रह्मसाधनम् ॥ ७७ ॥
अस्नातो वा कृतस्नानो भुक्तो वापि बुभुक्षितः।
पूजयेत् परमात्मानं सदा निर्म्मलमानसः ॥ ७८ ॥
अनेन ब्रह्ममन्त्रेण भक्ष्यपेयादिकञ्च यत्।

कङ्कालाख्यकवचपाठे विनियोग इति। आसाद्य प्राप्य ब्रह्ममयः ब्रह्मस्वरूपः ॥ ६९ । ७० । ७१॥

इतीति। ते तुभ्य तवार्थे वा प्रणमेत् परमात्मानमिति शेषः। साधकाग्रणीः साधकोत्तमः ॥ ७२ । ७३॥

तत्प्रणमनमेवाह नम इत्यादिना ॥ ७४ ॥

ननु परमात्मानं प्रति कायिकवाचिकमानसात्मयोऽपि प्रणामा विधातव्यास्तेषां मध्ये कतमो वा तत्राह वाचिकमित्यादि। यथामति परब्रह्मणे कायिकं वाचिकं मानसं वा प्रणमन विदध्यात्। ननु परब्रह्मणे कायिकस्यैव प्रणामस्यौचित्यं नतु वाचिकमानसयोरत आह आराधन इत्यादि। भावशुद्धिरन्तःकरण शुद्धत्वम् ॥ ७५ ॥

एवमित्यादि। संपूज्य परमात्मानमिति शेषः ॥ ७६ ॥

साधयेत् निष्पादयेत् ॥ ७७ । ७८ ॥

दीयते परमेशाय तदेव पावनं महत् ॥ ७९ ॥
गङ्गातोये शिलादौ च सृष्टदोषोऽपि वर्त्तते ।
परब्रह्मार्पिते द्रव्ये सृष्टासृष्ट न विद्यते ॥ ८० ॥
पक्व वापि न पक्व वा मन्त्रेणानेन मन्त्रितम् ।
साधको ब्रह्मसात् कृत्वा भुञ्जीयात् स्वजनै. सह ॥ ८१ ॥
नात्र वर्णविचारोऽस्ति नोच्छिष्टादिविवेचनम् ।
न कालनियमोऽप्यत्र शौचाशौच तथैव च ॥ ८२ ॥
यथाकाले यथादेशे यथायोगेन लभ्यते ।
ब्रह्मसात् कृतनैवेद्यमश्नीयादविचारयन् ॥ ८३ ॥
आनीतं श्वपचेनापि श्वमुखादपि निःसृतम् ।
तदन्न पावनं देवि ! देवानामपि दुर्लभम् ॥ ८४ ॥
किं पुनर्मनुजादीनां वक्तव्यं देववन्दितं ।।
परमेशस्य नैवेद्यसेवनाद् यत् फल भवेत् ॥ ८५ ॥
महापातकयुक्तो वा युक्तो वाप्यन्यपातकै ।
सकृत् प्रसादग्रहणात् मुच्यते नात्र संशय: ॥ ८६ ॥
सार्द्धत्रिकोटितीर्थेषु स्नानदानेन यत्फलम् ।
तत् फलं लभते मर्त्यो ब्रह्मार्पितनिषेवणात् ॥ ८७ ॥

अथ परब्रह्मणो महाप्रसादस्य महात्म्य वर्णयितुमुपक्रमते अनेनेत्यादि । ब्रह्ममन्त्रेण ओं सच्चिदित्याद्यात्मकेन ब्रह्मार्पणमित्याद्यात्मकेन वा शिलादौ शालग्रामशिलादौ ॥ ७९ । ८० ॥

पक्वमिति । मन्त्रेण ओं सच्चिदित्याद्यात्मकेन ॥ ८१ ॥

नात्रेति । अत्र ब्रह्मणे महाप्रसादे ॥ ८२ । ८३ ॥

आनीतमिति श्वपचेन चाण्डालेनाप्यानीत यदन्नं तदु ब्रह्मस तृकृत सत् पावनं भवेत् ॥ ८४ । ८५ । ८६ । ८७ ॥

अश्वमेधादिभिर्यज्ञैरिष्ट्वा यत् फलमश्नुते ।
भक्षिते ब्रह्मनैवेद्ये तस्मात् कोटिगुणं लभेत् ॥ ८८ ॥
जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि ।
महाप्रसादमाहात्म्यं वर्णितुं नैव शक्यते ॥ ८९ ॥
यत्र कुत्र स्थितो वापि प्राप्य ब्रह्मार्पितामृतम् ।
गृहीत्वा कोकशो वापि ब्रह्मसायुज्यमाप्नुयात् ॥ ९० ॥
यदि स्यान्नीचजातीयमत्र ब्रह्मणि भावितम् ।
तदत्र ब्राह्मणैर्ग्राह्यमपि वेदान्तपारगैः ॥ ९१ ॥
जातिभेदो न कर्त्तव्यः प्रसादे परमात्मनः ।
योऽशुद्धबुद्धिं कुरुते स महापातकी भवेत् ॥ ९२ ॥
वरं पाषण्डतः कुर्य्याद्धरेर्विप्रबधं प्रिये ! ।
परब्रह्मार्पितं ह्यन्नं न कुर्य्यादवहेलनम् ॥ ९३ ॥
ये त्यजन्ति नरा मूढा महामन्त्रेण संस्कृतम् ।
अन्नतोयादिकं भद्रे ! पितृंस्ते पातयन्त्यधः ॥ ९४ ॥
स्वयमप्यन्धतामिस्रे पतन्त्याहृतसम्भवम् ।
ब्रह्मसात्कृतनैवेद्यदृष्टीनां नास्ति निष्कृतिः ॥ ९५ ॥

अश्नुते लभते ॥ ८८ । ८९ ॥

यत्रेत्यादि । आहृतम् शीघ्रं कोकशो वापि चाण्डालोऽपि ॥ ९० ॥

यदीति । नीचजातीयं चाण्डालादिसम्बन्धि ब्रह्मणि भावितं चिन्तितं ब्रह्मणेऽर्पितमित्यर्थः ॥ ९१ । ९२ ॥

वरमित्यादि । वरमीषत् प्रियम् । देवाद्यृते वरं श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिये इत्यमरः । अवहेलनम् तिरस्कारम् ॥ ९३ । ९४ ॥

स्वयमित्यादि । अन्धतामिस्रे नरके आहृतस्य विश्वस्य सम्भवः सलिले सम्यक् प्लवनं यत्र तत्कालपर्य्यन्तम् प्रलयकालपर्य्यन्तमित्यर्थः निष्कृतिर्निस्तारः ॥ ९५ ॥

पुण्यायन्ते क्रियाः सर्वाः सुषुप्तिः सुकृतायते।
स्वेच्छाचारोऽत्र विहितो महामन्त्रस्य साधने ॥ ९६ ॥
किं तस्य वैदिकाचारैस्तान्त्रिकैर्वापि तस्य किम्।
ब्रह्मनिष्ठस्य विदुषः स्वेच्छाचारो विधिः स्मृतः ॥ ९७ ॥
कृतेनास्य फलं नास्ति नाकृतेनापि किल्विषम्।
न विघ्नः प्रत्यवायोऽस्य ब्रह्ममन्त्रस्य साधनात् ॥ ९८ ॥
अस्मिन् धर्म्मे महेशि! स्यात् सत्यवादी जितेन्द्रियः।
परोपकारनिरतो निर्विकारः सदाशयः ॥ ९९ ॥
मात्सर्य्यहीनोऽदम्भी च दयावान् शुद्धमानसः।
मातापित्रोः प्रीतिकारी तयोः सेवनतत्परः ॥ १०० ॥
ब्रह्मश्रोता ब्रह्ममन्ता ब्रह्मान्वेषणमानसः।
यतात्मा दृढबुद्धिः स्यात् साक्षाद्ब्रह्मेति भावयन् ॥१०१॥
न मिथ्याभाषणं कुर्य्यान्न परानिष्टचिन्तनम्।
परस्त्रीगमनञ्चैव ब्रह्ममन्त्री विवर्ज्जयेत् ॥ १०२ ॥
तत्सदिति वदेद्देवि! प्रारम्भे सर्वकर्म्मणाम्।

पुण्येत्यादि। सर्वा अपुण्या अपि क्रिया पुण्यायन्ते पुण्या इवाचरन्तीत्यर्थः ॥ ९६ ॥

किमित्यादि। विदुष सर्वं ब्रह्मैवेति जानतः स्वेच्छाचार एव विधिः ॥ ९७ ॥

अस्य ब्रह्मनिष्ठस्य ॥ ९८ ॥

अस्मिन्नित्यादि। सदाशयः साध्वभिप्रायः ॥ ९९ ॥

मात्सर्य्यहीनः अन्यगुणद्वेषरहितः। अदम्भी कपटशून्यः। तयोः मातापित्रोः ॥ १०० ॥

ब्रह्मेत्यादि यतात्मा संयतचित्तः ब्रह्म साक्षादस्तीति भावयन् चिन्तयन् ब्रह्मार्पणमस्तिति वाक्यम् ॥ १०१। १०२। १०३ ॥

ब्रह्मार्पणमस्तु वाक्य पानभोजनकर्म्मणोः ॥ १०२ ॥
येनोपायेन मर्त्यानां लोकयात्रा प्रसिद्ध्यति ।
तदेव कार्य्य ब्रह्मज्ञैरिद धर्म्म सनातनम् * ॥ १०४ ॥
अथ सन्ध्याविधि वक्ष्ये ब्रह्ममन्त्रस्य शाम्भवि ।।
यां कृत्वा ब्रह्मसम्पत्ति लभन्ते भुवि मानवाः ॥ १०५ ॥
प्रातर्मध्याह्नसायाह्ने यथादेशे यथासने ।
पूर्ववत् परम ब्रह्म ध्यात्वा साधकसत्तमः ॥ १०६ ॥
अष्टोत्तरशत देवि । गायत्रीजपमाचरेत् ।
जप समर्प्य विधिवत् पूर्ववत् प्रणमेत् सुधीः ॥ १०७ ॥
एषा सन्ध्या मया प्रोक्ता सर्वथा ब्रह्म साधने ।
यदनुष्ठानतो मन्त्री शुद्धान्तःकरणो भवेत् ।। १०८ ।।
गायत्रीं शृणु चार्वङ्गि । सर्वपापप्रणाशिनीम् ।
परमेश्वर ङेऽन्तमुक्त्वा विद्महे तदनन्तरम् ।। १०९ ।।
परतत्त्वाय पदतो धीमहीति वदेत् प्रिये ।।
तदनन्तरमीशानि । तन्नो ब्रह्म प्रचोदयात् ।। ११० ॥

लोकयात्रा लोकनिर्वाह ॥ १०४ ॥

अथेति । या सन्ध्याम् ब्रह्मसम्पत्तिम् ब्रह्मरूपां सम्पदम् ॥१०५॥

तत्सन्ध्याविधिमेवाह प्रातरित्यादिना ॥ १०६ । १०७ ॥

यदनुष्ठानत यदाचरणत ॥ १०८ ॥

तां ब्रह्मगायत्रीमेवाह परमेश्वरमित्यादिना सार्द्धेन । हे प्रिये ! इशानि ! ङेऽन्त ङेविभक्त्यन्त परमेश्वर पदमुक्त्वा विद्महे इति पद वदेत् । तदनन्तर विद्महे इति पदानन्तर परतत्त्वायेति पद वदेत् । परतत्त्वायेति पदत· पर धीमहीति पद वदेत् । तदनन्तर धीमहीति

---

* इद कार्य्यसमापनम् इति वा पाठ ।

इय श्रीब्रह्मगायत्री चतुर्वर्गप्रदायिनी ।
पूजनं यजनञ्चैव स्नानं पानञ्च भोजनम् ॥ १११ ॥
यद्यत्कर्म्म प्रकुर्व्वीत ब्रह्ममन्त्रेण साधयेत् ।
ब्राह्मे मूहूर्त्ते चोत्थाय प्रणम्य ब्रह्मदं गुरुम् ॥ ११२ ॥
ध्यात्वा च परम ब्रह्म यथाशक्ति मनुं स्मरेत् ।
पूर्ववत् प्रणमेद् ब्रह्म प्रातःकृत्यमिदं स्मृतम् ॥ ११३ ॥
द्वात्रिंशता सहस्रेण जपेनास्य पुरस्क्रिया ।
तद्दशांशेन हवन तर्पणं तद्दशांशतः ॥ ११४ ॥
सेचन तद्दशांशेन तद्दशांशेन सुन्दरि ! ।
ब्राह्मणान् भोजयेन्मन्त्री पुरश्चरणकर्म्मणि ॥ ११५ ॥
भक्ष्याभक्ष्यविचारोऽत्र त्याज्य ग्राह्यं न विद्यते ।
न कालशुद्धिनियमो न वा स्थाननिरूपणम् ॥ ११६ ॥

पदानन्तर तन्नो ब्रह्म प्रचोदयादिति वदेत् । ततश्च परमेश्वराय विद्महे परतत्त्वाय धीमहि तन्नो ब्रह्म प्रचोदयादित्याकारिका ब्रह्मगायत्री सम्पन्नासीत् । ब्रह्मगायत्रर्थस्तु परतत्त्वाय परमेश्वराय परतत्व परमेश्वरमाप्तं यद्ब्रह्म वय विद्महे मन्यामहे धीमहि चिन्तयामश्च तद्ब्रह्म नोऽस्मान् प्रचोदयात् प्रेरयेत् धर्म्मार्थकाममोक्षेषु विनियोजयेदित्यर्थ इति ॥ १०९ । ११० । १११ ॥

साधयेत् तत्तत्कर्मेति शेष ।

अथ प्रातःकृत्यमाह ब्राह्मे इत्यादिना । मनुम् ओं सच्चिदेक ब्रह्मेति मन्त्रम् ॥ ११३ ॥

अथ ब्रह्ममन्त्रस्य पुरश्चरणविधिमाह द्वात्रिंशतेत्यादिना । अस्य ब्रह्ममन्त्रस्य पुरस्क्रिया पुरश्चरणम् । तद्दशांशेन जपदशमांशेन हवन होमः तद्दशांशत होमदशांशत ॥ ११४ ॥

तद्दशांशेन तर्पणदशांशेन सेचनं मार्जनम् । तद्दशांशेन

अभुक्तो वापि भुक्तो वा स्नातो वास्नात एव वा।
साधयेत् परमं मन्त्रं स्वेच्छाचारेण साधकः॥ ११७॥
विनायासं विनाक्लेशं स्तोत्रञ्च कवच विना।
विना न्यास विना मुद्रां विना सेतुं वरानने!॥११८॥
विना चीरगणेशादिजपञ्च कुल्लुकां विना।
अकस्मात् परमब्रह्मसाक्षात्कारो भवेत् ध्रुवम्॥११९॥
संकल्पोऽस्मिन् महाहन्त्रे मानस परिकीर्त्तितः।
साधने ब्रह्ममन्त्रस्य भावशुद्धिर्विधीयते॥ १२०॥
सर्वं ब्रह्ममयं देवि! भावयेत् ब्रह्मसाधक।
न चास्य प्रत्यवायोऽस्ति नाङ्गवैगुण्यमेव च।
महामनो साधने तु व्यङ्गं साङ्गायते ध्रुवम्॥ १२१॥
कलौ पापयुगे घोरे तपोहीनेऽतिदुस्तरे।
निस्तारबीजमेतावत् ब्रह्ममन्त्रस्य साधनम्॥ १२२॥
साधनानि बहूक्तानि नानातन्त्रागमादिषु।
कलौ दुर्बलजीवानामसाध्यानि महेश्वरि!॥ १२३॥

मार्जनहृदयांशेन। भक्ष्येत्यादि अत्र ब्रह्ममन्त्रस्य पुरश्चरणकर्मणि॥ ११५। ११६॥

अभुक्त इत्यादि न भुक्तमस्यास्तीति अभुक्तः। अर्श आदिभ्योऽजित्यच्॥ ११७॥

सेतुम् जपविशेषम्॥ ११८॥

कुल्लुकापि जपविशेष एव तामपि विना भावयेत् चिन्तयेत्॥ ११९। १२०॥

न चेत्यादि। अस्य महामनोरङ्गवैगुण्यादितः प्रत्यवायो न भवेत। व्यङ्गम् अङ्गहीनमपि॥ १२१। १२२॥

अल्पायुषः खलवृत्ता अन्नाधीनासवः प्रिये ! ।
लुब्धा धनार्जने व्यग्राः सदा चञ्चलमानसाः ॥ १२४ ॥
समाधावस्थिरधियो योगक्लेशासहिष्णवः ।
तेषां हिताय मोक्षाय ब्रह्ममार्गोऽयमीरितः ॥ १२५ ॥
कलौ नास्त्येव नास्त्येव सत्यं सत्यं मयोच्यते ।
ब्रह्मदीक्षां विना देवि ! कैवल्याय सुखाय च ॥ १२६ ॥
प्रातःकृत्यं प्रातरेव सन्ध्यां कुर्य्यात् त्रिकालतः ।
मध्याह्ने पूजनं कुर्य्यात् सर्वतन्त्रेष्वयं विधिः ।
परब्रह्मोपासने तु साधकेच्छाविधिः शिवे ! ॥ १२७ ॥
विधयः किङ्करा यत्र निषेधाः प्रभवोऽपि न ।
स्वेच्छाचारेणेष्टसिद्धिस्तद्विना कोऽन्यमाश्रयेत् ॥१२८॥
ब्रह्मज्ञानिगुरुं प्राप्य शान्तं निश्चलमानसम् ।
धृत्वा तच्चरणाम्भोजं प्रार्थयेद् भक्तिभावतः ॥ १२९ ॥

नन्वनेकेषु तन्त्रागमादिषु निस्तारबीजानि बह्वनि साधनानि भवतैवोक्तानि तत् कथमुच्यते कलौ ब्रह्ममन्त्रस्य साधनमेव निस्तारबीजमित्यत आह साधनानीत्यादि । अत्र यद्यपि तथापीति हयमध्याहार्य्यम् ॥ १२३ ॥

असाध्यत्वे हेतुं दर्शयन्नाह अल्पायुष इत्यादि । यत इति शेषः । अन्नाधीनासवः अन्नवशीभूतप्राणाः ॥ १२४ ॥

समाधावित्यादि । समाधिश्चित्तवृत्तिनिरोधः, तत्र योगक्लेशासहिष्णव निस्तारोपायभूततत्तत्कर्मसाधनहेतुकक्लेशसहनाशीलाः ॥ १२५ ॥

कलौ युगे ब्रह्मदीक्षाया अन्या काचिदपि दीक्षा मोक्षाय सुखाय च नैवास्तीति प्रतिज्ञां कुर्वन्नाह कलाविति । ॥ १२६ ॥

साधकेच्छैव विधिः ॥ १२७ ॥

यत्र परब्रह्मोपासने ॥ १२८ ॥

करुणामय। दीनेश! तवाहं शरणागतः।
त्वत्पदाम्भोरुहच्छायां देहि मूर्ध्नि यशोधन! ॥ १२०॥
इति प्रार्थ्य गुरुं पश्चात् पूजयित्वा स्वशक्तितः।
कृताञ्जलिपुटो भूत्वा तूष्णीं तिष्ठेत् गुरोः पुरः ॥१२१॥
गुरुर्विचार्य्य विधिवत् यथोक्तं शिष्यलक्षणम्।
आहूय कृपया दद्यात् सत्शिष्याय महामनुम् ॥ १२२॥
उपविश्यासने ज्ञानी प्राङ्मुखो वाप्युदङ्मुखः।
स्ववामे शिष्यमानीय कारुण्येनावलोकयेत् ॥ १२३ ॥
ततः शिष्यस्य शिरसि ऋषिन्यासपुरःसरम्।
जपेदष्टशतं मन्त्रं साधकस्येष्टसिद्धये ॥ १२४ ॥
दक्षकर्णे ब्राह्मणानामितरेषाञ्च वामतः।
सप्तधा श्रावयेत् मन्त्रं सद्गुरुः करुणानिधिः ॥ १२५॥
उपदेशविधिः प्रोक्तो ब्रह्ममन्त्रस्य कालिके!।
नात्र पूजाद्यपेक्षास्ति सकल्पं मानसञ्चरेत् ॥ १२६ ॥
ततः श्रीगुरुपादाब्जे दण्डवत् पतितं शिशुम्।

अथ ब्रह्ममन्त्रोपदेशविधिमभिधातुमुपक्रमते ब्रह्मज्ञानीत्यादि। शान्तम् रागद्वेषादिशून्यम् भक्तिभावत भक्तियोगेन ॥ १२९ ॥

किं प्रार्थयेदित्यपेक्षायामाह करुणामयेत्यादि ॥ १२० । १२१ ॥

गुरुरित्यादि। यथोक्त शिष्यलक्षणम् शान्तो दान्तो विनीतश्चेत्यादिकम् ॥ १२२ ॥

उपविश्येत्यादि। ज्ञानी ब्रह्मज्ञानवान् गुरु कारुण्येन कृपायुक्तया दृष्ट्या ॥ १२३ ॥

तत इत्यादि। मन्त्रम् ओं सच्चिदेक ब्रह्मेत्याद्यात्मकम् ॥ १२४॥

दक्षेत्यादि। वामतः वामे कर्णे मन्त्रम् पूर्वोक्तमेव ॥ १२५ ॥

उपदेशेति। अत्र ब्रह्ममन्त्रोपदेशविधौ चरेत् कुर्यात् ॥ १२६ ॥

उत्थापयेद् गुरु: स्नेहादिमं मन्त्रमुदीरयन् ॥ १२७ ॥
उत्तिष्ठ वत्स ! मुक्तोऽसि ब्रह्मज्ञानपरो भव ।
जितेन्द्रिय: सत्यवादी बलारोग्य सदास्तु ते ॥ १२८ ॥
तत उत्थाय गुरवे यथाशक्त्यनुसारत: ।
दक्षिणां स्वं फल वापि दद्यात् साधकसत्तम: ।
गुरोराज्ञावशीभूत्वा विहरेद्देववद् भुवि ॥ १२९ ॥
मन्त्रग्रहणमात्रेण तदात्मा तन्मयो भवेत् ।
ब्रह्मभूतस्य देवेशि ! किमन्यैर्बहुसाधनै: ।
इति संक्षेपतो ब्रह्मदीक्षा ते कथिता प्रिये ! ॥ १४० ॥
गुरुकारुण्यमात्रेण ब्रह्मदीक्षां समाचरेत् ॥ १४१ ॥
शाक्ता: शैवा वैष्णवाश्च सौरा गाणपतास्तथा ।
विप्रा विप्रेतराश्चैव सर्व्वेऽप्यत्राधिकारिण: ॥ १४२ ॥
अहं मृत्युञ्जयो देवि ! देवदेवो जगद्गुरु: ।
स्वेच्छाचारी निर्विकल्पो मन्त्रस्यास्य प्रसादत: ॥ १४३ ॥

तत इत्यादि । तत मन्त्रश्रवणात् परम् शिष्यम् शिष्यम् ॥ १२७ ॥
तं मन्त्रमेवाह उत्तिष्ठ वत्सेति ॥ १२८ ॥
तत इति । स्वं धनम् आत्मानं वा ॥ १२९ ॥
मन्त्रेत्यादि । तदात्मा ब्रह्मनिष्ठान्तःकरणः तन्मय ब्रह्मस्वरूप ॥ १४० ॥
ब्रह्ममन्त्रग्रहणे कालादिनियमो नास्तीति प्रतिपादयन्नाह गुर्वित्यादि ॥ १४१ ॥
अपदिष्टानामनुपदिष्टानाञ्च ब्राह्मणादीनां सर्वेषामस्मिन् ब्रह्ममन्त्रेऽधिकारोऽस्तीत्याह शाक्ता इत्यादिना । अत्र ब्रह्ममन्त्रे ॥ १४२ ॥
एतन्मन्त्रप्रसादादेव मयि मृत्युञ्जयित्वादिकमासीदित्याह अहमित्यादिना । अहं मृत्युञ्जयोऽभूवमिति शेषः ॥ १४३ ॥

अमुमेव ब्रह्ममन्त्रं मत्तः पूर्वमुपासिताः।
ब्रह्मा ब्रह्मर्षयश्चापि देवा देवर्षयस्तथा ॥ १४४ ॥
देवर्षिवक्त्रान्मुनयस्तेभ्यो राजर्षयः प्रिये!।
उपासिता ब्रह्मभूताः परमात्मप्रसादतः ॥ १४५ ॥
ब्राह्मे च मनौ महेशानि विचारो नास्ति कुत्रचित्।
स्वीयमन्त्रं गुरुर्दद्यात् शिष्येभ्यो ह्यविचारयन् ॥ १४६ ॥
पितापि दीक्षयेत् पुत्रान् भ्राता भ्रातॄन् पतिः स्त्रियम्।
मातुलो भागिनेयांश्च नप्तॄन् मातामहोऽपि च ॥ १४७ ॥
स्वमन्त्रदाने यो दोषस्तथा पित्रादिदीक्षया।
सिद्धे ब्रह्ममहामन्त्रे तद्दोषो नैव विद्यते ॥ १४८ ॥
ब्रह्मज्ञानिमुखात् श्रुत्वा येन केन विधानतः।
ब्रह्मभूतो नरः पूतः पुण्यपापैर्न लिप्यते ॥ १४९ ॥

एतन्मन्त्रोपासनादेव विरिञ्च्यादिषु ब्रह्मभूतत्वं जातमित्याह अमुमित्यादिना। मन्त्रं गृहीत्वेति शेषः उपासिता श्रद्धया अनुष्ठितवन्त गत्यर्थाकर्मकश्लिषशीङित्यादिना कर्त्तरि क्तः। ब्रह्मर्षयो भृग्वादयः। देवा इन्द्रादयः। देवर्षयो नारदाद्याः ॥ १४४ ॥

देवर्षिवक्त्रात् नारदमुखात् मुनयो व्यासाद्याः राजर्षयो जनकादयः ॥ १४५ ॥

आत्मनाप्यगृहीतोऽप्ययं ब्रह्ममन्त्रो गुरुणा शिष्येभ्यो देयः पित्रादिभिरपि पुत्रादिभ्यो देय इत्याह ब्राह्मे इत्यादिभ्यां द्वाभ्याम्। अविचारयन् स्वकीयमन्त्रदाननिमित्तकं दोषमगणयन् ॥ १४६। १४७ ॥

ननु पितुर्मन्त्रं न गृह्णीयात्तथा मातामहस्य चेत्यादिनिषेधवाक्यमुल्लङ्घ्य पित्रादिभ्यो ब्राह्मं मन्त्रं गृह्णतां पुत्रादीनामात्मीयमन्त्रदाने तत्तन्निषेधवाक्यमनादृत्य शिष्येभ्यः स्वयं ब्रह्ममन्त्रं ददतो गुरोश्च प्रत्यवायभागित्वं स्यात्तत्राह स्वमन्त्रदाने इत्यादि। यो दोषः उक्त इति शेषः ॥ १४८ ॥ १४९ ॥

ब्रह्ममन्त्रोपासिता ये गृहस्था ब्राह्मणादयः ।
स्वस्व वर्णोत्तमास्ते तु पूज्या मान्या विशेषतः ॥ १५० ॥
ब्राह्मणा यतयः साक्षादितरे ब्राह्मणैः समाः ।
तस्मात् सर्व्वे पूजयेयुर्ब्रह्मज्ञान ब्रह्मदीक्षितान् ॥ १५१ ॥
ये च तानवमन्यन्ते ते नरा ब्रह्मघातिनः ।
पतन्ति घोरनरके यावद्भास्करतारकम् ॥ १५२ ॥
यत् पापं स्त्रीवधे प्रोक्तं यत्पापं भ्रूणघातने ।
तस्मात् कोटिगुणं पापं ब्रह्मोपासकनिन्दनात् ॥ १५३ ॥
यथा ब्रह्मोपदेशेन विमुक्तः सर्व्वपातकैः ।
गच्छन्ति ब्रह्मसायुज्यं तथैव तव साधनात् ॥ १५४ ॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णय-
सारे श्रीमदाद्यासदाशिवसंवादे जीवनिस्तारोपाय-
प्रश्ने परब्रह्मोपदेशकथन नाम तृतीयो-
ल्लासः ॥ ३ ॥

ब्रह्ममन्त्रेत्यादि । यत इति शेषः ब्रह्ममन्त्रसुपासिता ब्रह्मम न्त्रोपासिता गृह्यादीनामुपसंख्यानमिति द्वितीयातत्पुरुषः ॥१५०॥


ब्राह्मणाः साक्षात् यतयः परिव्राजिका भवेयु इतरे क्षत्रिया-दयः ॥ १५१ ॥

अथ ब्रह्मोपासकान् जनान्निन्दतां जनानामखिलपातकाश्रयत्व-मित्याह ये च तानित्यादिभ्यां द्वाभ्याम् । तान् ब्रह्मदीक्षितान् अव-मन्यन्ते अनादियन्ते भास्करतारकं यावत्तिष्ठेत्तावत् भ्रूणघातने गर्भघातने ॥ १५२ । १५३ ॥

ब्रह्मसायुज्यम् ब्रह्मत्वम् ॥ १५४ ॥

इति श्रीमहानिर्व्वाणतन्त्रटीकायां तृतीयोल्लासः ।

चतुर्थोल्लासः ।



श्रीदेव्युवाच ।

श्रुत्वा सम्यक् परब्रह्मोपासनं परमेश्वरी ।
परमानन्दसम्पन्ना शङ्करं परिपृच्छति ॥ १ ॥
कथितं यत्त्वया नाथ ! ब्रह्मोपासनमुत्तमम् ।
सर्वलोकप्रियकरं साक्षाद्ब्रह्मपदप्रदम् ॥ २ ॥
तेजोवृद्धिवलैश्वर्यदायकं सुखसाधनम् ।
तस्मात्त्वं जगदीशान ! तववाक्यामृतप्लुता ॥ ३ ॥
यदुक्तं करुणासिन्धो ! यथा ब्रह्मनिषेवणात् ।
गच्छन्ति ब्रह्मसायुज्यं तथैव मम साधनात् ॥ ४ ॥
एतद्वेदितुमिच्छामि मदीयसाधनं परम् ।

परमेश्वरी शङ्करं किं परिपृच्छतीत्यपेक्षायामाह । कथितं यदित्यादि ॥ १ । २ ॥

तेज इत्यादि । तस्मात्त्वं तद् ब्रह्मोपासनं श्रुत्वेति शेषः । तव वागमृतप्लुता तावकीनवाग्रूपपीयूषे निमग्ना ॥ ३ ॥

यदुक्तमित्यादि । हे करुणासिन्धो ! कृपासमुद्र ब्रह्मनिषेवणात् परब्रह्मण उपासनाद्यथा जना ब्रह्मसायुज्यं ब्रह्मत्वं गच्छन्ति प्राप्नुवन्ति तथैव मम साधनादपि ब्रह्मत्वं प्राप्नुवन्तीति यत्त्वयोक्तं तत्र किं कारणमस्तीत्येतद्वेदितुं ज्ञातुमहमिच्छामीति द्वितीयश्लोकगतैः पदैरन्वयः ॥ ४ ॥

ब्रह्मसायुज्यजननं यत्त्वया कथितं प्रभो ! ॥ ५ ॥
विधानं कीदृशं तस्य साधनं केन वर्त्मना ।
मन्त्रः को वात्र विहितो ध्यानपूजादिकञ्च किम् ॥ ६ ॥
सविशेषं सावशेषमामूलाद्वक्तुमर्हसि ।
मम प्रीतिकरं देव ! लोकानां हितकारकम् ।
को ह्यन्यस्त्वामृते प्रभो ! भवव्याधिभिषग्गुरुः ॥ ७ ॥
इति देव्या वचः श्रुत्वा देवदेवो महेश्वरः ।
उवाच परया प्रीत्या पार्व्वतीं पार्व्वतीपतिः ॥ ८ ॥

श्रीसदाशिव उवाच ।

शृणु देवि ! महाभागे तवाराधनकारणम् ।
तव साधनतो येन ब्रह्मसायुज्यमश्नुते ॥ ९ ॥
त्वं परा प्रकृतिः साक्षाद् ब्रह्मणः परमात्मनः ।

एतदित्यादि । हे प्रभो ! ब्रह्मसायुज्यजनन ब्रह्मत्वोत्पादकमतएव परं श्रेष्ठं यन्मदीय साधन त्वया कथितं तच्च कीदृग वर्त्तते एतदपि वेदितुमिच्छामि ॥ ५ ॥

तस्य मदीयसाधनस्य । अत्र मम साधने ॥ ६ ॥

सविशेषमित्यादि । सावशेषम् अवशेषपर्य्यन्तम् आमूलात् मूलमारभ्य त्वामृते त्वां विना भवव्याधिभिषग्गुरुः जन्मरूपस्य व्याधेश्चिकित्सकराजः ॥ ७ ॥

इतीत्यादि । उवाच उत्तरमिति शेषः ॥ ८ ॥

पार्वतीपतिः पार्वतीं किमुत्तरमुवाचेत्यपेक्षायामाह शृणु देवीत्यादि । हे देवि ! हे महाभागे ! महाभाग्यशालिनि ! येन कारणेन तव साधनतो जनो ब्रह्मसायुज्य ब्रह्मत्वमश्नुते लभते तन्मया कथ्यमान तवाराधनकारण त्व शृणुष्वेत्यन्वयः ॥ ९ ॥

अथ परमेश्वरीसाधनस्य ब्रह्मसायुज्यजनकत्वे तद्रूपं ब्रह्मसा-

त्वत्तो जातं जगत् सर्वं त्व जगज्जननी शिवे ! ॥ १० ॥
महदाद्यणुपर्य्यन्तं यदेतत् सचराचरम् ।
त्वयैवोत्पादितं भद्रे ! त्वदधीनमिदं जगत् ॥ ११ ॥
त्वमाद्या सर्वविद्यानामस्माकमपि जन्मभूः ।
त्वं जानासि जगत सर्वं न त्वां जानाति कश्चन ॥१२॥
त्वं काली तारिणी दुर्गा षोड़शी भुवनेश्वरी ।
धूमावती त्व वगला भैरवी छिन्नमस्तका ॥ १३ ॥
त्वमन्नपूर्णा वाग्देवी त्वं देवि ! कमलालया ।
सर्वशक्तिस्वरूपा त्व सर्वदेवमयी तनुः ॥ १४ ॥
त्वमेव सूक्ष्मा स्थूला त्वं व्यक्ताव्यक्तस्वरूपिणी ।
निराकारापि साकारा कस्त्वां वेदितुमर्हति ॥ १५ ॥

रूप्यमेव कारणमस्तीत्यभिधातुमुपक्रमते त्व परा प्रकृतिरित्यादि। यत इति शेषः । परमा माया शक्तिर्वा यस्य स परम अतति सर्वं व्याप्नोतीत्यात्मा परमश्चासावात्मा चेति परमात्मा तस्य परमात्मनो ब्रह्मणो यतस्त्व साक्षात् परात्मृतृष्टा प्रकृतिरसीत्येवमन्वयः कार्यः ॥ १० ॥

महत्तत्त्वमादिर्यस्य तन्महदादि ॥ ११ ॥

किञ्च त्वमाद्येत्यादि । आद्या आदिभूता नत्वन्येषामेव जगतां जननी त्वमसि किन्त्वस्माक ब्रह्मरुद्रादीनामपि जन्मभूरुत्पत्तिस्थान त्वम् । जगज्जननीत्वात् सर्व जगत् त्व जानासि त्वत्तो जातत्वात् कश्चन अपि त्वां तु न जानाति ॥ १२ ॥

किञ्च त्व कालीत्यादि ॥ १३ ॥

वाग्देवी सरस्वती कमलालया लक्ष्मीः । तनुः तवेति शेषः ॥१४॥

त्वमित्यादि । सूक्ष्मा परमाणुरूपा स्थूलरूपत्वात् व्यक्तम् परमाणुरूपत्वाच्चाव्यक्तं त्वं स्वरूप विद्यते यस्या. सा त्वम् । वस्तुतो

उपासकानां कार्य्यार्थं श्रेयसे जगतामपि ।
दानवानां विनाशाय धत्से नानाविधास्तनूः ॥ १६ ॥
चतुर्भुजा त्वं द्विभुजा षड्भुजाष्टभुजा तथा ।
त्वमेव विश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी ॥ १७ ॥
तत्तद्रूपविभेदेन मन्त्रयन्त्रादिसाधनम् ।
कथितं सर्वतन्त्रेषु भावाश्च कथितास्त्रयः ॥ १८ ॥
पशुभावः कलौ नास्ति दिव्यभावोऽपि दुर्लभः ।
वीरसाधनकर्म्माणि प्रत्यक्षाणि कलौ युगे ॥ १९ ॥
कुलाचारं विना देवि ! वलौ सिद्धिर्न जायते ।
तस्मात् सर्वप्रयत्नेन साधयेत् कुलसाधनम् ॥ २० ॥
कुलाचारेण देवेशि ! ब्रह्मज्ञान प्रजायते ।
ब्रह्मज्ञानयुतो मर्त्यो जीवन्मुक्तो न संशयः ॥ २१ ॥
ज्ञानेन मेध्यमखिलममेध्यं ज्ञानतो भवेत् ।
ब्रह्मज्ञाने समुत्पन्ने मेध्यामेध्यं न विद्यते ॥ २२ ॥
यो जानाति परं ब्रह्म सर्वव्यापि सनातनम् ।

निराकारापि आकृतिशून्याऽपि त्व साकारा आकारविशिष्टा भवसि । अतः त्वां वेदितुं ज्ञातुं कोऽर्हति योग्यो भवति न कोऽपीत्यर्थः ॥ १५ ॥

ननु वस्तुतो यदि निराकारैवाहं तर्हि किमर्थं नानाविधमाकारं दधासि तत्राह उपासकानामित्यादि ॥ १६ ॥

ता नानाविधास्तनूरेव दर्शयन्नाह चतुर्भुजेत्यादि ॥ १७ । १८ ॥

अथ पशुभावादिप्रसङ्गात् कलौ युगे वीरभावस्यैव विद्यमानत्वेन प्रत्यक्षफलदायकानि वीरसाधनकर्माण्येव साधनीयानीत्येवाह पशुभाव इत्यादिभिः ॥ १९—२१ ॥

मेध्यम् पवित्रम् ॥ २२ ॥

किमस्त्यमेध्यं तस्याग्रे सर्वं ब्रह्मेति जानतः ॥ २३ ॥
त्वं सर्वरूपिणी देवी सर्वेषां जननी परा।
तुष्टायां त्वयि देवेशि! सर्वेषां तोषणं भवेत् ॥ २४ ॥
सृष्टेरादौ त्वमेकासीत् तमोरूपमगोचरम।
त्वत्तो जातं जगत् सर्वं परब्रह्ममिरूपया ॥ २५ ॥
महत्तत्त्वादिभूतान्तं त्वया सृष्टमिदं जगत्।
निमित्तमात्रं तद्ब्रह्म सर्वकारणकारणम ॥ २६ ॥
सद्रूपं सर्वतोव्यापि सर्वमावृत्य तिष्ठति।
सदैकरूपं चिन्मात्रं निर्लिप्तं सर्ववस्तुषु ॥ २७ ॥
न करोति न चाश्नाति न गच्छति न तिष्ठति।
सत्यं ज्ञानमनाद्यन्तमवाङ्मनसगोचरम् ॥ २८ ॥
तस्येच्छामात्रमालम्ब्य त्वं महायोगिनी परा।
करोषि पासि हंस्यन्ते जगदेतच्चराचरम् ॥ २९ ॥
तव रूपं महाकालो जगत्संहारकारकः।
महासंहारसमये कालः सर्वं ग्रसिष्यति ॥ ३० ॥

सनातनम् सर्वदैकरूपम् ॥ २३ । २४ ॥

अगोचरम् आकृतिशून्यत्वात् वाङ्मनसयोरप्यविषयभूतम् ॥ २५ ॥

महदित्यादि भूतान्त पृथिवीपर्य्यन्तम् सर्वकारणकारणम् सर्वेषा महादादीनां कारणानामपि कारण निमित्तभूतम् ॥ २६ ॥

सद्रूपमित्यादि। सद्रूप सर्वदा स्थायिस्वरूपम् सर्वमावृत्य नि-श्शेष पदार्थमावेष्ट्य सर्ववस्तुषु स्थितमपि निर्लिप्तमसम्बद्धम् ॥ २७ ॥

नेत्यादि। न चाश्नाति न च भुङ्क्ते सत्यम् यथार्थस्वरूपम् ज्ञान समस्तपदार्थावबोध ततस्वरूपम् अनाद्यन्तम् न विद्यते आदि कार-णम् अन्तो नाशश्च यस्य तथाभूतम् ॥ २८ ॥

तदिच्छामात्रम् परब्रह्मण इच्छामेव अन्ते प्रलयकाले ॥ २९ । ३० ॥

कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः ।
महाकालस्य कलनात् त्वमाद्या कालिका परा ॥ २१ ॥
कालसंग्रसनात् कालीं सर्व्वेषामादिरूपिणीं ।
कालत्वादादिभूतत्वादाद्या कालीति गीयते ॥ २२ ॥
पुनः स्वरूपमासाद्य तमोरूपा निराकृतिः ।
वाचातीतं मनोगम्यं त्वमेकैवावशिष्यसे ॥ २३ ॥
साकारापि निराकारा मायया बहुरूपिणी ।
त्वं सर्व्वादिरनादिस्त्वं कर्त्री हर्त्री च पालिका ॥२४ ॥
अतस्ते कथितं भद्रे ! ब्रह्ममन्त्रेण दीक्षितः ।
यत् फलं समवाप्नोति तत् फलं तव साधनात् ॥ २५ ॥
नानाचारेण भावेन देशकालाधिकारिणाम् ।
विभेदात् कथितं देवि ! क्वचिदेकमसाधनम् ॥ २६ ॥

कलनात् ग्रसनात् ॥ २१ ॥

आदिरूपिणी कारणस्वरूपा ॥ २२ ॥

पुनरित्यादि । निराकृतिः आकारशून्यम् वाचातीतम् अतिक्रान्तवाक् मनोऽगम्यम् मनसोऽप्यग्राह्यम् ॥ २३ ॥

साकारेत्यादि । सर्व्वादिः सर्व्वेषां कारणभूता सर्व्वकारणत्वादेव न विद्यते आदिः कारणं यस्यास्तथाभूता त्वमसि ॥ २४ ॥

तव साधनतो ब्रह्मत्वलाभे इदमेव कारणमस्तीत्याह अत इत्यादिना ॥ २५ ॥

अथ साधनं केन वर्त्मनेति मदीय साधनं परं कीदृग वर्त्तते इति च यत् परमेश्वर्या पृष्टं तत्र मत्कथितेनैव मार्गेण सर्वं कर्म साधनीयं मदुक्तवर्त्मना नित्यनैमित्तिककर्मणा यत् साधनं तदेव तावत्कीर्त्य साधनमित्युत्तरं दातुं प्रक्रमते नानाचारेणेत्यादि । नानाभावेन च विभेदात् विशेषात् कुत्रचित् तन्त्रादिषु ॥ २६ ॥

ये यत्राधिकृता मर्त्यास्ते तत्र फलभागिनः ।
भविष्यन्ति तरिष्यन्ति मानुषा गतकिल्बिषाः ॥ ३७ ॥
बहुजन्मार्जितैः पुण्यैः कुलाचारे मतिर्लभेत् ।
कुलाचारेण पूतात्मा साक्षाच्छिवमयो भवेत् ॥ ३८ ॥
यत्रास्ति भोगबाहुल्यं तत्र योगस्य का कथा ।
योगेऽपि भोगविरहः कौलस्तूभयमश्नुते ॥ ३९ ॥
एकश्चेत् कुलतत्त्वज्ञः पूजितो येन सुव्रते ! ।
सर्वे देवाश्च देव्यश्च पूजिता नात्र संशयः ॥ ४० ॥
पृथिवीं हेमसम्पूर्णां दत्त्वा यत् फलमाप्नुयात् ।
तस्मात् कोटिगुणं पुण्यं लभते कौलिकार्चनात् ॥ ४१ ॥
श्वपचोऽपि कुलज्ञानी ब्राह्मणादतिरिच्यते ।
कुलाचारविहीनस्तु ब्राह्मणः श्वपचाधमः ॥ ४२ ॥
कौलधर्म्मात् परो धर्म्मो नास्ति ज्ञाने तु मामके ।
यस्यानुष्ठानमात्रेण ब्रह्मज्ञानी नरो भवेत् ॥ ४३ ॥
सत्यं ब्रवीमि ते देवि ! हृदि कृत्वावधारय ।
सर्वधर्म्मोत्तमात् कौलात् परो धर्म्मो न विद्यते ॥ ४४ ॥

यत्र गुप्तसाधने व्यक्तसाधने वा ॥ ३७ ॥

अथ प्रबले कलौ युगे कुलमार्गेणैव सर्वं कर्म साधनीयमिति प्रतिपादनाय तमेव मार्गं स्तोतुमना महादेवः पूर्वं तन्मार्गवर्त्तिन जन प्रशंसति । बहुजन्मेत्यादिभि. साक्षाच्छिवमय. साक्षाच्छिव-स्वरूप· ॥ ३८ ॥

यत्रेति । यत्र साधने भोगविरह. भोगाभाव उभयमश्नुते योग भोगञ्च लभते ॥ ३९ ॥

पूजिता· तेनेति शेषः ॥ ४० । ४१ ॥

श्वपच इत्यादि । अतिरिच्यते उत्तमतावत्त्वाद्विशिष्यते ॥ ४२ ॥

अयन्तु परमो मार्गो गुप्तोऽस्ति पशुसङ्कटे ।
व्यक्तीभविष्यत्यचिरात् सङ्कल्पे प्रबले कलौ ॥ ४५ ॥
कलिकाले प्रवृद्धे तु सत्यं सत्यं मयोच्यते ।
न स्थास्यति विना कौलान् पशवो मानवा भुवि ॥ ४७ ॥
यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी तथा ।
न स्थास्यति वरारोहे । तदैव प्रबलः कलिः ॥ ४७ ॥
यदा तु पुण्यपापानां परीक्षा वेदसम्भवा ।
न स्थास्यति शिवे ! शान्ते ! तदैव प्रबलः कलिः ॥ ४८ ॥
क्वचिच्छिन्ना क्वचिद्भिन्ना यदा सुरतरङ्गिणी ।
भविष्यति कुलेशानि ! तदैव प्रबलः कलिः ॥ ४९ ॥
यदा तु म्लेच्छजातीया राजानो धनलोलुपाः ।
भविष्यन्ति महाप्राज्ञे ! तदैव प्रबलः कलिः ॥ ५० ॥
यदा स्त्रियोऽतिदुर्दान्ताः कर्कशाः कलहे रताः ।
गर्हिष्यन्ति च भर्त्तारं तदैव प्रबलः कलिः ॥ ५१ ॥
यदा तु मानवा भूमौ स्त्रीजिताः कामकिङ्कराः ।
दुह्यन्ति गुरुभिक्षादीन् तदैव प्रबलः कलिः ॥ ५२ ॥

कौलधर्मस्य सर्वधर्मोत्तमत्वे हेतुं दर्शयन्नाह यस्मात्युष्ठानमात्रेणे त्यादि ॥ ४३ । ४४ ॥

पशुसङ्कटे पशुसमूहे । सम्भृते सम्यक् प्रवृत्ते ॥ ४५ । ४६ ॥

अथ तत्तद्युगविधेयाचारप्रसङ्गेन संक्षेपत कलियुगप्रबलतालक्षणानि कथयति यदा त्वित्यादिभिः । हे वरारोहे ! उत्तमे । ॥ ४७ ॥

शान्ते ! हे संयतचित्ते ! ॥ ४८ ॥

सुरतरङ्गिणी गङ्गा ॥ ४९ ॥

यदा त्वित्यादि । अतिदुर्दान्ताः अतिदुःखेन दम्यन्ते याः तथा-

यदा क्षीणो खल्पफला तोयदाः स्तोकवर्षिणः ।
असम्यक्फलिनो वृक्षास्तदैव प्रबलः कलिः ॥ ५३ ॥
भ्रातरः स्वजनामात्या यदा धनकणेहया ।
मिथः सम्प्रहरिष्यन्ति तदैव प्रबलः कलिः ॥ ५४ ॥
प्रकटे मद्यमांसादौ निन्दादण्डविवर्जिते ।
गूढपानं चरिष्यन्ति तदैव प्रबलः कलिः ॥ ५५ ॥
सत्यत्रेताद्वापरेषु यथा मद्यादिसेवनम् ।
कलावपि तथा कुर्यात् कुलधर्मानुसारतः ॥ ५६ ॥
ये कुर्वन्ति कुलाचारं सत्यपूता जितेन्द्रियाः ।
व्यक्ताचारा दयाशीला न हि तान् बाधते कलिः ॥ ५७ ॥
गुरुशुश्रूषणे युक्ता भक्ता मातृपदाम्बुजे ।
अनुरक्ताः स्वदारेषु न हि तान् बाधते कलिः ॥ ५८ ॥
सत्यव्रता सत्यनिष्ठाः सत्यधर्मपरायणाः ।
कुलसाधनसत्या ये न हि तान् बाधते कलिः ॥ ५९ ॥

भूताः अतिदुःखेन दमनीया इत्यर्थः । कर्कशाः कठोराः । गर्हिष्यन्ति निन्दिष्यन्ति ॥ ५०–५२ ॥

स्तोकवर्षिण खल्पवर्षणशीलाः ॥ ५३ ॥

धनकणेहया वित्तलेशाकाङ्क्षया ॥ ५४ ॥

प्रकटे इत्यादि । प्रकटे प्रव्यक्ते मद्यमांसादौ निन्दादण्ड-विवर्जितेऽपि सति यदा गूढपानं जनाश्चरिष्यन्ति तदैव प्रबलः कलिर्ज्ञातव्यः ॥ ५५ ॥

सत्यत्रेत्यादि । यथा मद्यादिसेवनम् प्रकाशतः कृतवानिति शेषः ॥ ५६ ॥

नहि तान् बाधते तान्न पीड़यति ॥ ५७ ॥

गुर्वित्यादि । युक्ताः सङ्गताः । अनुरक्ताः अनुरागवन्तः ॥ ५८ ॥

कुलमार्गेण तत्त्वानि शोधितानि च योगिने।
ये दद्युः सत्यवचसे न हि तान् बाधते कलिः ॥ ६० ॥
हिंसामात्सर्य्यरहिता दम्भद्वेषविवर्ज्जिताः।
कुलधर्म्मेषु निष्ठा ये न हि तान् बाधते कलिः ॥ ६१ ॥
कौलिकैः सह संसर्गं वसतिं कुलसाधुषु।
कुर्वन्ति कौलसेवां ये न हि तान् बाधते कलिः ॥ ६२ ॥
नानावेशधराः कौलाः कुलाचारेषु निश्चलाः।
सेवन्ते त्वां कुलाचारैर्न हि तान् बाधते कलिः ॥ ६३ ॥
स्नानं दानं तपस्तीर्थं व्रतं तर्पणमेव च।
ये कुर्वन्ति कुलाचारैर्न हि तान् बाधते कलिः ॥ ६४ ॥
जीवसेकादिसंस्काराः पितृश्राद्धादिकाः क्रियाः।
ये कुर्वन्ति कुलाचारैर्न हि तान् बाधते कलिः ॥ ६५ ॥
कुलतत्त्वं कुलद्रव्यं कुलयोगिनमेव च।
नमस्कुर्वन्ति ये भक्त्या न हि तान् बाधते कलिः ॥ ६६ ॥
कौटिल्यानृतहीनानां स्वच्छानां कुलमार्गिणाम्।
परोपकारव्रतिनां साधूनां किङ्करः कलिः ॥ ६७ ॥

कुलसाधनसत्याः कुलसाधने यथार्थाभिधायिनः ॥ ५९ ॥

तत्त्वानि मद्यमांसादीनि ॥ ६० ॥

हिंसामात्सर्य्यरहिताः प्राणवियोगानुकूलव्यापारो हिंसा अन्यशुभद्वेषो मात्सर्य्यम् ताभ्यां हीनाः ॥ ६१ ॥

वसतिं निवासम् ॥ ६२–६५ ॥

कुलतत्त्वम् स्त्रीकुसुमादि कुलद्रव्यम् मद्यमांसादि ॥ ६६ ॥

परोपकारव्रतिनाम् परोपकाररूपं व्रतमस्त्येषामिति परोपकारव्रतिनः तेषाम् ॥ ६७ ॥

कलेर्दोषसमूहस्य महानेको गुणः प्रिये ! ।
सत्यप्रतिज्ञकौलानां श्रेयः सङ्कल्पमात्रतः ॥ ६८ ॥
अपरे तु युगे देवि ! पुण्यं पापञ्च मानसम् ।
नृणामासीत् कलौ पुण्यं केवलं न तु दुष्कृतम् ॥ ६९ ॥
कुलाचारैर्विहीना ये सततासत्यभाषिणः ।
परद्रोहपरा ये च ते नराः कलिकिङ्कराः ॥ ७० ॥
कुलवर्त्मस्वभक्ता ये परयोषित्सु कामुकाः ।
द्वेष्टारः कुलनिष्ठानां ते ज्ञेयाः कलिकिङ्कराः ॥ ७१ ॥
युगाचारप्रसङ्गेन कलेः प्राबल्यलक्षणम् ।
संक्षेपात् कथितं भद्रे ! प्रीतये तव पार्व्वति ! ॥ ७२ ॥
प्रकटेऽत्र कलौ देवि ! सर्वे धर्म्माश्च दुर्बलाः ।
स्थास्यत्येकं सत्यमात्रं तस्मात् सत्यमयो भवेत् ॥ ७३ ॥
सत्यधर्म्मं समाश्रित्य यत् कर्म्म कुरुते नरः ।
तदेव सफलं कर्म्म सत्यं जानीहि सुव्रते ! ॥ ७४ ॥
न हि सत्यात् परो धर्मो न पापमनृतात् परम् ।
तस्मात् सर्व्वात्मना मर्त्यः सत्यमेकं समाश्रयेत् ॥ ७५ ॥

कलेरिति । दोषसमूहस्य दोषसमूहवतः ॥ ६८ ॥

अपरे सत्यत्वेतादौ ॥ ६९ । ७० । ७१ । ७२ ॥

कलेर्युगस्य प्राबल्ये सति सत्येनैव प्रव्यक्तः कुलाचारो विधातव्य इत्याभिधातुकामो महादेवः सत्यं प्रशंसिष्यन्नाह । प्रकटेऽत्रेत्यादि ॥ ७३ । ७४ ॥

नहीत्यादि । अनृतात् असत्यात् सर्वात्मना सर्वप्रयत्नेन । आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म धर्म्म वेत्यमरः । समाश्रयेत् सम्यक् सेवेत ॥ ७५ ॥

सत्यहीना हृथा पूजा सत्यहीनो हृथा जपः ।
सत्यहीन तपो व्यर्थमूषरे वपन यथा ॥ ७६ ॥
सत्यरूप परं ब्रह्म सत्य हि परमं तपः ।
सत्यमूलाः क्रियाः सर्व्वाः सत्यात् परतरो न हि ॥७७॥
अतएव मया प्रोक्तं दुष्कृते प्रबले कलौ ।
कुलाचारोऽपि सत्येन कर्त्तव्यो व्यक्तभावतः ॥ ७८ ॥
गोपनाद्धीयते सत्य न गुप्तिरनृतं विना ।
तस्मात् प्रकाशतः कुर्य्यात् कौलिक कुलसाधनम् ॥७९॥
कुलधर्म्मस्य गुप्त्यर्थं नानृतं स्याज्जुगुप्सितम् ।
यदुक्तं कुलतन्त्रेषु न ग्रस्तं प्रबले कलौ ॥ ८० ॥
कृते धर्म्मश्चतुष्पादः त्रेतायां पादहीनकः ।
द्विपादो द्वापरे देवि ! पादमात्रं कलौ युगे ॥ ८१ ॥
तत्रापि सत्यं बलवत् तप खड्गं दयापि च ।
सत्यपादे क्षते लोपे धर्म्मलोपः प्रजायते ॥ ८२ ॥

ऊषरे क्षारमृत्तिकायुक्तदेशे ॥ ७६ । ७७ ॥

अतएव सर्वेषां कर्म्मणां सत्यमूलत्वादेवेत्यर्थ । दुष्कृते पापिनि ॥ ७८ ॥

क्षीयते क्षीनं भवति त्यक्तं भवतीत्यर्थः ॥ ७९ ॥

नन्वु कुलधर्म्मस्य गुप्त्यर्थं नानृतं स्याज्जुगुप्सितमिति कुलतन्त्रेषु भवतैवोक्तं तत्कथमिदानीमुच्यते तस्मात् प्रकाशतः कुर्य्यात् कौलिक कुलसाधनमित्यत आह । कुलधर्म्मस्येत्यादि ॥ ८० ॥

कृत इत्यादि । कृते सत्ययुगे चतुष्पादो धर्म्म आसीदिति शेषः । समासान्तविधेरनित्यत्वान्न पादशब्दस्यान्तस्य लोपः । पादमात्रम् धर्म्मस्यावशिष्यते इति शेष ॥ ८१ ॥

तत्रापि पादमात्रेऽपि दयापि च खड्गा लुप्यते इति लोपः ।

तस्मात् सत्यं समाश्रित्य सर्वकर्माणि साधयेत् ।
कुलाचारं विना यत्र नास्त्युपायः कुलेश्वरि ! ॥ ८३ ॥
तत्रानृतप्रवेशश्चेत् कुतो निःश्रेयसं भवेत् ।
सर्वथा सत्यपूतात्मा मन्त्रखेरितवर्त्मना ॥ ८४ ॥
सर्वं कर्म्म नरः कुर्य्यात् स्वस्ववर्णाश्रमोदितम् ।
दीक्षां पूजां जपं होमं पुरश्चरणतर्पणम् ॥ ८५ ॥
व्रतोद्वाहौ पुंसवनं सीमन्तोन्नयनन्तथा ।
जातकर्म्म तथा नामचूड़ाकरणमेव च ॥ ८६ ॥
मृतक्रियां पितृश्राद्धं कुर्य्यादागमसम्मतम् ।
तीर्थश्राद्धं वृषोत्सर्गं शारदोत्सवमेव च ॥ ८७ ॥
यात्रां गृहप्रवेशञ्च नववस्त्रादिधारणम् ।
वापीकूपतड़ागानां संस्कारं तिथिकर्म्म च ॥ ८७ ॥
गृहारम्भप्रतिष्ठाञ्च देवानां स्थापनन्तथा ।
दिवाकृत्यं निशाकृत्यं पर्वकृत्यं तथैव च ॥ ८८ ॥
ऋतुमासवर्षकृत्यं नित्यं नैमित्तिकञ्च यत् ।
कर्त्तव्यं यदकर्त्तव्यं त्याज्यं ग्राह्यञ्च यद्भवेत् ॥ ८९ ॥
मयोक्तेन विधानेन तत् सर्वं साधयेन्नरः ।
न कुर्य्याद् यदि मोहेन दुर्म्मत्याश्रद्धयापि वा ॥ ९० ॥

तस्मिन् कर्म्मणि घञ् ॥ ८२ ॥

यत्र प्रबले कलौ निःश्रेयस सक्ति ॥ ८३ । ८४ ॥

तत्र किं सर्वं कर्म्म तत्राह दीक्षामित्यादि । पुरश्चरणमिति समाहारद्वन्द्वः ॥ ८५ ॥

नामचूड़ाकरणमेव च नामकरणं चूड़ाकरणञ्चेत्यर्थः ॥ ८६ ॥

नववस्त्रादीत्यादिना नवीनभूषणादेः संग्रहः ॥ ८७ ॥

विनष्टः सर्वकर्म्मभ्यो विष्ठायां स भवेत् कृमिः ।
यदि मन्त्रमनुत्सृज्य महेशि ! प्रबले कलौ ॥ ९१ ॥
यदा यत् क्रियते कर्म विपरीताय तद्भवेत् ।
मन्त्रतासम्मता दीक्षा साधकप्राणघातिनी ॥ ९२ ॥
पूजापि विफला देवि ! हुत भस्मार्पणं यथा ।
देवता कुपिता तस्य विघ्नस्तस्य पदे पदे ॥ ९३ ॥
कलिकाले प्रवृद्धे तु ज्ञात्वा मच्छास्त्रमम्बिके ! ।
योऽन्यमार्गैः क्रियां कुर्य्यात् स महापातकी भवेत् ॥ ९४ ॥
व्रतोद्वाहौ प्रकुर्व्वाणो योऽन्यमार्गेण मानवः ।
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ॥ ९५ ॥
व्रते ब्रह्मवधः प्रोक्तः व्रात्यो भवति मानवः ।
केवलं सूत्रवाहोऽसौ चण्डालादधमोऽपि सः ॥ ९६ ॥
उद्वाहितापि या नारी जानीयात् सा तु गर्हिता ।
उद्वोढ़ापि भवेत् पापी संसर्गात् कुलनायिके ! ॥ ९७ ॥
वेश्यागमनजं पापं तस्य पुंसो दिने दिने ।

ष्टद्वारस्थप्रतिष्ठाञ्च ष्टद्वारस्थं ष्टद्वप्रतिष्ठाञ्चेत्यर्थः ॥ ८८—९० ॥

प्रबले कलौ युगे सदाशिवमतसत्त्वेऽपि कर्म्माणि कुर्वतो जनस्य भक्तिपातकित्व क्रियमाणानां कर्म्मणाञ्च नैष्फल्यनित्याद्व न कुर्य्यादित्यादिभिः । मोहेन अविवेकेन अश्रद्धया विश्वासाभावेन ॥ ९१ । ९२ ॥

भस्मार्पणम् अर्प्यते यत्र तदर्पणम् कर्म्मणि ल्युट् भस्मन्यर्पणमिति सप्तमीतत्पुरुषः भस्मार्पितमित्यर्थः भस्मार्पितमित्येव वा पाठः ॥ ९३ । ९४ । ९५ ॥

व्रतेत्यादि । अन्यमार्गेण जातसंस्कारोऽपि मानवको व्रात्यो भवेत् संस्कारहीनो भवेदित्यर्थ ॥ ९६ ॥

उद्वाहितेत्यादि । अन्यमार्गेणोद्वाहिता या नारी सा तु गर्हिता

तद्वस्तदन्नतोयादि नैव गृह्णन्ति देवताः ॥ ९७ ॥
पितरोऽपि न चाश्नन्ति यतस्तन्मलपूयवत् ।
तयोरपत्यं कानीन सर्वधर्मबहिष्कृतः ॥ ९८ ॥
देवे पैत्रे कुलाचारे नाधिकारोऽस्य जायते ।
अगाम्भवेन मार्गेण देवतास्थापनञ्चरेत् ॥ ९९ ॥
न सान्निध्यं भवेत्तत्र देवतायाः कथञ्चन ।
इहामुत्र फलं नास्ति कायक्लेशो धनक्षयः ॥ १०० ॥
आगमोक्तविधिं हित्वा यः श्राद्धं कुरुते नरः ।
श्राद्धं तद्विफलं सोऽपि पितृभिर्निरयं व्रजेत् ॥ १०१ ॥
तत्तोय शोणितसमं पिण्डो मलमयो भवेत् ।
तस्मात्सर्वैः प्रयत्नेन श्राद्धरं मतमाश्रयेत् ॥ १०२ ॥
बहुनात्र किमुक्तेन सत्यं सत्यं मयोच्यते ।
अगाम्भवं कृतं कर्म सर्वं देवि ! निरर्थकम् ॥ १०३ ॥
अस्तु तावत् परो धर्मः पूर्वधर्मोऽपि नश्यति ।
अगाम्भवाचारहीनस्य नरकान्नैव निष्कृतिः ॥ १०४ ॥
मदुदीरितमार्गेण नित्यनैमित्तकर्मणाम् ।
साधनं यन्महेशानि ! तदेव तव साधनम् ॥ १०५ ॥

निन्दिता भवेदिति जानीयात् । तान्तु गर्हितामिति वा पाठ । असद्-मार्गात् अन्यमार्गेणोद्वाहितायां नार्यां सङ्गमात् तस्य कृतान्यविध्युद्वाहितनारीसंसर्गस्य तद्वस्तदन्नतोयाद्यभक्षणे कारणमाह यत इत्यादि । तत् अन्नतोयादि तयोः अन्यमार्गोद्वाहितनारीतदुद्वोढृपुरुषयो ॥ ९७ ॥

अस्य कानीनस्य ॥ ९८ ॥

तत्र अगाम्भवमार्गस्थापितदेवतानिषायाम् ॥ १०० — १०२ ॥

विशेषाराधनं तत्र मन्त्रयन्त्रादिसंयुतम् ।
भेषजं कलिरोगाणां श्रूयतामुदितो मम ॥ १०६ ॥

इति श्रीमहानिर्व्वाणतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे सर्व्वधर्म्मनिर्णयसारे श्रीसदाद्यासदाशिवसंवादे जीवनिस्तारोपायप्रश्ने परा-प्रकृतिसाधनोपक्रमो नाम चतुर्थोल्लास ॥ ४ ॥

निष्कृतिर्निस्तारः ॥ १०४ । १०५ ॥

भेषजम् औषधम् गदतो मम कथयतो मत्त ममेत्यपादानस्य शेषत्वेन विवक्षितत्वात् शेषे षष्ठीति षष्ठी ॥ १०६ ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां चतुर्थोल्लासः ।

पञ्चमोल्लासः ।

श्रीमदाशिव उवाच

त्वमाद्या परमा शक्तिः सर्वशक्तिस्वरूपिणी ।
तव शक्त्या वयं शक्ताः सृष्टिस्थितिलयादिषु ॥ १ ॥
तव रूपाण्यनन्तानि नानावर्णाकृतीनि च ।
नानाप्रयाससाध्यानि वर्णितुं केन शक्यते ॥ २ ॥
तव कारुण्यलेशेन कुलतन्त्रागमादिषु ।
तेषामर्चासाधनानि कथितानि यथामति ॥ ३ ॥
गुप्तसाधनमेतत्तु न कुत्रापि प्रकाशितम् ।
अस्य प्रसादात् कल्याणि ! मयि ते करुणेदृशी ॥ ४ ॥
त्वया पृष्टमिदानीं तन्नाहं गोपयितुं क्षमः ।
कथयामि तव प्रीत्यै मम प्राणाधिकं प्रिये ! ॥ ५ ॥
सर्वदुःखप्रशमनं सर्वापद्विनिवारकम् ।
त्वत्प्राप्तिमूलमचिरात्तव सन्तोषकारणम् ॥ ६ ॥

मन्त्रयन्त्रादिसंयुक्तस्य विशेषाराधनस्यैवाभिधाने प्रवृत्त श्रीसदाशिव उवाच त्वमाद्या परमेत्यादि ॥ १ ॥

नानावर्णाकृतीनि नाना अनेके वर्णा आकृतय आकाराश्च येषा रूपाणान्तानि ॥ २ ॥

कारुण्यलेशेन दयाया लवेन । तेषा तव रूपाणाम् ॥ ३ ॥

एतत्तु अत परमुच्यमानन्तु । अस्य गुप्तसाधनस्य ॥ ४ ॥

एतत् गुप्तसाधनम् ॥ ५ । ६ ॥

कलिकल्मषदीनानां नृणां स्वल्पायुषां प्रिये ! ।
बहुप्रयासासक्तानामेतदेव परं धनम् ॥ ७ ॥
न चात्र न्यासबाहुल्यं नोपवासादिसंयमः ।
सुखसाध्यमबाहुल्यं भक्तानां फलदं महत् ॥ ८ ॥
तत्रादौ शृणु देवेशि ! मन्त्रोद्धारक्रमं शिवे ! ।
यस्य श्रवणमात्रेण जीवन्मुक्तः प्रजायते ॥ ९ ॥
प्राणेशस्तैजसारूढो मेरुखण्डाव्योमबिन्दुमान् ।
बीजमेतत् समुद्धृत्य द्वितीयमुद्धरेत् प्रिये ! ॥ १० ॥
सन्ध्या रक्तसमारूढा वामनेत्रेन्दुसंयुता ।
तृतीयं शृणु कल्याणि ! दीपसंस्थः प्रजापतिः ॥ ११ ॥
गोविन्दबिन्दुसंयुक्तः साधकानां सुखावहः ।
बीजत्रयन्त्विदं परमेश्वरि ! सम्बोधनं पदम् ॥ १२ ॥

एतदेवात परमुच्यमानं गुप्तसाधनमेव ॥ ७ ॥

अत्र अत परमुच्यमाने साधने । अबाहुल्य बाहुल्यशून्यम् ॥८॥

तत्र साधने ॥ ९ ॥

तमेव मन्त्रोद्धारक्रममाह प्राणेश इत्यादिभि । तैजसारूढ तैजसो रेफस्तमारूढ· प्राणेशो हकारो मेरुखण्डाव्योमबिन्दुमान् मेरुखण्डा ईकार व्योमबिन्दुरनुस्वार ताभ्या विशिष्टो विधातव्य· एवं ह्रीमित्येतद्बीज समुद्धृत्य द्वितीय बीजमुद्धरेत् ॥ १० ॥

तच्च किं बीजमत आह सन्ध्येत्यादि । रक्तसमारूढा रेफ समारूढा सन्ध्या तालव्य शकारो वामनेत्रेन्दुसयुता वामनेत्रमीकारः इन्दुरनुस्वार ताभ्या सयुक्ता कर्त्तव्या एवञ्च श्रीमिति द्वितीय बीजमुद्धृत्यमासीत् । हे कल्याणि ! तृतीय बीज शृणु· तच्च किं बीजमत आह । दीपसंस्थः इत्यादि । दीपसस्थ दीपो रेफ तत्र स्थित प्रजापति· ककारो गोविन्दबिन्दुसयुक्त· गोविन्द ईकारः बिन्दुरनुस्वारः

वह्निकान्तावधि प्रोक्तो दशार्णोऽयं मनुः शिवे ! ।
सर्वविद्यामयो देवो विद्येयं परमेश्वरी ॥ १३ ॥
आद्यत्रयाणां बीजानां प्रत्येकं त्रयमेव वा ।
प्रजपेत् साधकाधीशः सर्वकामार्थसिद्धये ॥ १४ ॥
बीजमाद्यत्रयं हित्वा सप्तार्णोपि दशाक्षरी ।
कामवाग्भवताराद्या सप्तार्णाष्टाक्षरी त्रिधा ॥ १५ ॥

ताभ्यां संयुक्तं करणीयं एतादृशश्च ककारः साधकानां सुखावहः सुखप्रायको भवति एवञ्च क्रीमिति तृतीय बीजमूहृत्यभासीत् । बीजत्रयस्यान्ते वह्निकान्ता स्वाहा अवधिरन्तभूता यस्य एतादृशं परमेश्वरि इति सम्बोधन पदं वदेत् । सकलपदयोजनया ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेति मन्त्रो जात । हे शिवे ! अयं मनुर्मन्त्रो दशार्णो दशवर्णक प्रोक्त वह्निकान्तावधिरिति पाठे तु मन्त्रो विशेष्यं तस्यैवेदं विशेषणमिति ज्ञातव्य सर्वविद्यामयी सर्वविद्यास्वरूपेय मन्त्रात्मिका देवी परमेश्वरी विद्या नाम ॥ ११ । १२ । १३ ॥

आद्येत्यादि । आद्यत्रयाणामेतस्यैव मन्त्रस्यादिभूतानां ह्रीं प्रभृतीनां त्रयाणां बीजानां मध्ये प्रत्येक ह्रींमिति श्रींमिति क्रींमिति वा बीजं ह्रींश्रींक्रींमिति बीजत्रयमपि वा धर्मकामार्थसिद्धये साधकाधीशः साधकोत्तम प्रजपेत एवन्तु पञ्चमन्त्रा आसन् ॥ १४ ॥

बीजमित्यादि ह्रीं प्रभृत्याद्यत्रय बीजं हित्वा त्यक्त्वा दशाक्षरी मन्त्रात्मिका परमेश्वरी विद्या सप्तार्णापि परमेश्वरि स्वाहेत्याकारा सप्ताक्षर्यपि भवेत् अनेन सहिता षड्मन्त्रा अभूवन् । कामवाग्भवताराद्या क्लींमिति ऐंमिति ओंमिति वा बीजमाद्य यस्यास्तथाभूता चेत् सप्तार्णा मन्त्ररूपा परमेश्वरी विद्या स्यात्तदा क्लीं परमेश्वरि स्वाहेत्याकारा ऐं परमेश्वरि स्वाहेत्याकारा ओं परमेश्वरि स्वाहेत्याकारा चाष्टाक्षर्यपि भवति एवञ्चैभिरष्टाक्षरी त्रिधा जाता एतैस्त्रिभिः सहिता नवमन्त्रा बभूवुः ॥ १५ ॥

दशार्णामन्त्रणपदात् कालिके । पदमुच्चरेत् ।
पुनराद्यत्रयं बीजं वह्निजायां ततो वदेत् ॥ १६ ॥
षोड़शीयं समाख्याता सर्वतन्त्रेषु गोपिता ।
वध्वाद्या प्रणवाद्या चेदेषा सप्तदशी द्विधा ॥ १७ ॥
तव मन्त्रा ह्यसंख्याता कोटिकोट्यर्बुदास्तथा ।
संक्षेपादत्र कथिता मन्त्राणां दादश प्रिये ! ॥ १८ ॥
येषु येषु च तन्त्रेषु ये ये मन्त्राः प्रकीर्त्तिताः ।
ते सर्वे तव मन्त्राः स्युस्त्वमाद्या प्रकृतिर्यतः ॥ १९ ॥
एतेषां सर्वं मन्त्राणां एकमेव हि साधनम ।
कथयामि तव प्रीत्यै तथा लोकहिताय च ॥ २० ॥
कुलाचारं विना देवि ! शक्तिमन्त्रो न सिद्धिदः ।

दशार्णेत्यादि । दशार्णस्य मनोराद्यन्त्रणपदात् परं कालिके इति पदमुच्चरेत् वदेत् ततः पर ह्री प्रभृत्याद्यत्रय बीज पुनर्वदेत् ततोऽनन्तर वह्निजायां स्वाहेति पद वदेत् सकलपदयोजनया ह्री श्री क्रीं परमेश्वरि कालिके ह्री श्रीं क्रीं स्वाहेति मन्त्रो जात । इय षोडशी षोडशवर्णा मन्त्रात्मिका परमेश्वरी विद्या सर्वतन्त्रेषु गोपितापि तव प्रीत्यै मया समाख्याता सम्यक् कथिता । एतेन सह ता दश मन्त्रा अभवन् । वेद्यत्रेषा षोड़शी वध्वाद्या क्लीमिति-बीजाद्या प्रणवाद्या ओङ्काराद्या वा स्यात् तदा क्लीं ह्रीं श्री क्रीं परमेश्वरि कालिके ह्री श्रीं क्रीं स्वाहेत्याकारा ओ ह्रीं श्रीं क्रीं परमेश्वरि कालिके ह्रीं श्रीं क्रीं स्वाहेत्याकारा च सप्तदशी सप्तदशार्ण्यपि भवेत् एवञ्चैषा सप्तदशी द्विधा जाता एताभ्या मिलिता द्वादशमन्त्रा आसन् ॥ १६–१८ ॥

सकलतन्त्रोक्तानां सर्व्वेषा मन्त्राणा पार्व्वतीस्वरूपत्वे हेतुमाह । त्वमाद्या प्रकृतिर्यत इति ॥ १९ । २० ॥

तस्मात् कुलाचाररतः साधयेच्छक्तिसाधनम् ॥ २१ ॥
मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च ।
शक्तिपूजाविधावाद्ये पञ्चतत्त्वं प्रकीर्त्तितम् ॥ २२ ॥
पञ्चतत्त्वं विना पूजा अभिचाराय कल्पते ।
शिलायां शस्यवापे च यथा नैवाङ्कुरो भवेत् ॥ २३ ॥
पञ्चतत्त्वविहीनायां पूजायां न फलोद्भवः ।
प्रातःकृत्यं विना देवि ! नाधिकारी तु कर्म्मसु ॥ २४ ॥
तस्मादादौ प्रवक्ष्यामि प्रातःकृत्यं यथोचितम् ।
रजनीशेषयामस्य शेषार्द्धे मरुणोदयः ॥ २५ ॥
तदा साधक उत्थाय मुक्तस्वापः कृतासनः ।
ध्यायेच्छिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम् ॥ २६ ॥
श्वेताम्बरपरीधानं श्वेतमाल्यानुलेपनम् ।
वरं भयकरं शान्तं करुणामयविग्रहम् ॥ २७ ॥

तदेव साधनमाह कुलाचारमित्यादिभिः ॥ २१ ॥

पञ्चतत्त्वं विना शक्तिपूजाया निष्फलत्वादवश्यमेव पञ्चतत्त्वेन शक्तेः पूजा विधातव्येत्याह मद्यमित्यादिभि ॥ २२ ॥

अभिचाराय हिंसाकर्म्मणे । हिंसाकर्म्माभिचारः स्यादित्यमरः ॥ २३ । २४ । २५ ॥

प्रातःकृत्यमेवाह रजनीशेषयामस्येत्यादिभिः । रजनीशेषयामस्य रात्रेरन्तिमस्य प्रहरस्य शेषार्द्धमन्तिमं दण्डचतुष्टयमरुणोदयः स्यात् तदा तस्मिन्नेवारुणोदये काले मुक्तस्वापस्त्यक्तनिद्रः साधक उत्थाय कृतासनं येन तथाभूत आसनोपविष्टश्च सन् शिरसि शुक्लाब्जे श्वेतपद्मे स्थितं गुरुं ध्यायेदित्यन्वयः । द्विनेत्रमित्यादीनि द्वितीयान्तानि गुरुविशेषणानि ॥ २६ ॥

श्वेतेत्यादि । श्वेताम्बरपरीधानं परिधीयते यत्तत् परीधानं

वामेनोत्पलधारिण्या शक्त्यालिङ्गितविग्रहम् ।
स्मेराननं सुप्रसन्नं साधकाभीष्टदायकम् ॥ २८ ॥
एवं ध्यात्वा कुलेशानि ! मानसैरुपचारकैः ।
पूजयित्वा जपेन्मन्त्री वाग्भवं बीजमुत्तमम् ॥ २९ ॥
यथाशक्ति जपं कृत्वा समर्प्य दक्षिणे करे ।
ततस्तु प्रणमेद्धीमान् मन्त्रेणानेन सद्गुरुम् ॥ ३० ॥
भवपाशविनाशाय ज्ञानदृष्टिप्रदर्शिने ।
नमः सद्गुरवे तुभ्यं भुक्तिमुक्तिप्रदायिने ॥ ३१ ॥
नराकृतिपरब्रह्मरूपायाज्ञानहारिणे ।
कुलधर्मप्रकाशाय तस्मै श्रीगुरवे नमः ॥ ३२ ॥
प्रणम्यैवं गुरुं तत्र चिन्तयेन्निजदेवताम् ।

कर्त्तरि क्त्युट् परीत्यस्य दीर्घत्वार्थः । श्वेते अम्बरे वस्त्रे परीधाने यस्य तथाभूतं श्वेतमाल्यानुलेपनम् अनुलिप्यते यत्तदनुलेपनं चन्दनादि श्वेते माल्यानुलेपने यस्य तम् । वरेत्यादि । वरामयकरं वरोऽभय च करयोर्यस्य तं शान्तं रागद्वेषादिशून्यं करुणामयविग्रहं करुणामय कृपाप्राचुर्यवान् विग्रहो देहो यस्य तम् । वामेनोत्पलधारिण्या वामहस्तेन कमलं दधत्या शक्त्या स्त्रिया आलिङ्गित विग्रहमालिष्टशरीरम् ॥ २७ । २८ ॥

एवमित्यादि । हे कुलेशानि ! मन्त्री साधक एवं गुरुं ध्यात्वा मानसैर्मनःप्रकल्पितैः पाद्यार्घ्याचमनादिभिरुपचारकैः पूजयित्वा चोत्तमं श्रेष्ठं वाग्भवम् ऐमिति बीजं जपेत् ॥ २९ ॥

जपम् ऐमिति बीजस्येति शेषः ॥ ३० ॥

अनेन केन मन्त्रेणोक्तप्रक्रियायां तमेव मन्त्रमाह भवपाशविनाशायेति । भवपाशविनाशाय संसाररूपस्य पाशस्य विनाशकाय ज्ञानदृष्टि प्रदर्शिने ज्ञानरूपां दृष्टिं दृष्टिवत् बोधं यस्य स तस्मै ॥ ३१ । ३२ ॥

पूर्ववत् पूजयित्वा तां मूलमन्त्रजपञ्चरेत् ॥ २२ ॥
यथाशक्ति जपं कृत्वा देव्या वामकरेऽर्पयेत्।
मन्त्रेणानेन मतिमान् प्रणमेदिष्टदेवताम् ॥ २४ ॥
नमः सर्वस्वरूपिण्यै जगद्धात्र्यै नमोनमः।
आद्यायै कालिकायै ते कल्यै हल्यै नमोनमः ॥२५॥
नमस्कृत्य बहिर्गच्छेद्दामपादपुरःसरम्।
त्यक्त्वा मूत्रपुरीषञ्च दन्तधावनमाचरेत् ॥ २६ ॥
ततो गत्वा जलाभ्यासे स्नानं कृत्वा यथाविधि।
आदावप उपस्पृश्य प्रविशेत् सलिले ततः ॥ २७ ॥
नाभिमात्रजले स्थित्वा मलानामपनुत्तये।
सकृत् स्नात्वा तथोन्मज्य मान्त्रमाचमनञ्चरेत् ॥ २८ ॥
आत्मविद्याशिवैस्तत्त्वैः स्वाहान्तैः साधकाग्रणी।
त्रिस्त्राप्यापो द्विरुन्मृज्य त्वाचमेत् कुलसाधकः ॥ २९ ॥

प्रणम्येत्यादि। एवमुक्तप्रकारेण गुरुं प्रणम्य प्रकर्षेण भक्तिश्रद्धातिशयेन नत्वा तत्र शिरसि शुक्लाब्जे आसीनां निजदेवतां साधकश्चिन्तयेद्ध्यायेत् ततः पूर्ववत् गुरुवन्मानसैरुपचारकैस्तान्निजदेवतां पूजयित्वा ह्रीं श्रीं क्रीं त्रिव्यादिकस्य मूलमन्त्रस्य जपञ्चरेत् कुर्यात् ॥ २३। २४ ॥

त मन्त्रमेवाह। नम सर्वेति ॥ २५। २६ ॥

तत इत्यादि। जलाभ्यासे वारिनिकटे स्नानविधिमेवाह। आदावप इत्यादिभिः अपो जलानि। सलिले जले ॥ २७ ॥

मन्त्रैः कार्यं मान्त्रम् ॥ २८ ॥

आचमनमन्त्रानेव दर्शयन्नाह। आत्मेत्यादि। स्वाहा अन्तो येषां तथाभूतैः आत्मविद्याशिवतत्त्वैः आत्मतत्त्वाय स्वाहा विद्यातत्त्वाय स्वाहा शिवतत्त्वाय स्वाहेति मन्त्रैरित्यर्थः साधकाग्रणीः साधकश्रेष्ठः कुलसाधकोऽपो जलानि त्रिर्वारत्रयं प्राश्य प्रपीय द्विर्वारद्वयमुन्मृज्य

कुलयन्त्रं मन्त्रगर्भं विलिख्य सलिले सुधीः ।
मूलमन्त्रं द्वादशधा तस्योपरि जपेत् प्रिये ! ॥ ४० ॥
तेजोरूपं जलं ध्यात्वा सूर्य्यमुद्दिश्य दैशिकः ।
तत्तोयैस्त्र्यञ्जलीन् दत्त्वा तेनैव पायसा त्रिधा ।
अभिषिच्य स्वमूर्द्धानं सप्तच्छिद्राणि रोधयेत् ॥ ४१ ॥
ततस्तु देवताप्रीत्यै त्रिर्निमज्ज्य जलान्तरे ।
उत्थाय गात्रं सम्मार्ज्ज्य पिदध्याच्छुद्धवाससी ॥ ४२ ॥
मृत्स्नया भस्मना वापि त्रिपुण्ड्रं विन्दुसंयुतम् ।
ललाटे तिलकं कुर्य्यान्नायत्रया बद्धकुन्तलः ॥ ४३ ॥
वैदिकीं तान्त्रिकीञ्चैव यथानुक्रमयोगतः ।

इत्येवमाचम्य ह्रीं प्रभृतीनां मन्त्राणां मध्ये कश्चिदपि मन्त्रो गर्भे यस्यैवम्भूतं त्रिकोणाद्यात्मकं कुलं यन्त्रं सलिले जले विलिख्य सुधीर्धीरः साधकस्तस्य कुलयन्त्रस्योपरि ह्रीं श्रीं क्रीमित्याद्यात्मकं मूलमन्त्रं द्वादशधा द्वादशवारञ्जपेदिति द्वितीयेनान्वयः ॥ ३९ । ४० ॥

तेजोरूपमिति । दैशिकः साधकः कुलयन्त्रसम्बन्धि जलं तेजोरूपं ध्यात्वा तत्तोयैः कुलयन्त्रसम्बन्धिभिर्जलैस्त्र्यञ्जलीन् सूर्य्यमुद्दिश्य दत्त्वा तेनैव कुलयन्त्रसम्बन्धिनैव पायसा जलेन स्वमूर्द्धानं त्रिधा त्रिवारमभिषिच्य सप्तच्छिद्राणि कर्णनेत्रनासासुखविवराणि हस्तद्वयाङ्गुलिभी-रोधयेत् ॥ ४१ ॥

ततस्त्विति । ततस्तु सप्तच्छिद्ररोधनादनन्तरं तु देवताप्रीत्यै सङ्कल्प्य जलान्तरे त्रिर्वारत्रयं निमज्ज्य तत उत्थाय गात्रं सम्मार्ज्ज्य वस्त्रेण प्रोच्य च शुद्धवाससी धौतवस्त्रे पिदध्यात् आच्छादयेत् परिद-ध्यादित्यर्थः ॥ ४२ ॥

मृत्स्नयेति । ततो गायत्र्या बद्धकुन्तलो निबद्धकेशः सन् मृत्स्न-या प्रशस्तया मृत्तिकया तादृशेनैव भस्मना वापि विन्दुसंयुतं त्रिपुण्ड्रं तिलकं ललाटे कुर्य्यात् ॥ ४३ ॥

सन्ध्यां समाचरेन्मन्त्री तान्त्रिकीं शृणु कथ्यते ॥ ४४ ॥
आचम्य पूर्ववत्तोयै स्तीर्थान्यावाहयेच्छिवे ! ॥ ४५ ॥
गङ्गे ! च यमुने ! चैव गोदावरि ! सरस्वति ! ।
नर्म्मदे ! सिन्धु ! कावेरि ! जलेऽस्मिन् सन्निधिं कुरु ४६
मन्त्रेणानेन मतिमान् मुद्रयाङ्कुशसंज्ञया ।
आवाह्य तीर्थं सलिले मूल द्वादशधा जपेत् ॥ ४७ ॥
ततस्तत्तोयतो विन्दूंस्त्रिधा भूमौ विनिक्षिपेत् ।
मध्यमानामिकायोगान्मूलोच्चारणपूर्वकम् ॥ ४८ ॥
सप्तवारं स्वमूर्द्धानमभिषिच्य ततो जलम् ।
वामहस्ते समादाय छादयेद्दक्षपाणिना ॥ ४९ ॥

वैदिकीमिति । ततो मन्त्री साधकः यथानुक्रमयोगतोऽनुक्रमेणैव वैदिकी तान्त्रिकीञ्च सन्ध्यां समाचरेत् कुर्य्यात् । तयोर्मध्ये तान्त्रिकी सन्ध्या त्वं शृणु मया कथ्यते ॥ ४४ ॥

तान्त्रिकी सन्ध्यामेवाह । आचम्येत्यादिभिः हे शिवे ! पूर्ववदाचम्य तोये जले तीर्थान्यावाहयेत् ॥ ४५ ॥

नन्वत्र केन मन्त्रेण कानि वा तीर्थान्यावाहयेदित्यपेक्षायामाह । गङ्गेत्यादि । सन्निधिम् आसत्तिम् ॥ ४६ ॥

मन्त्रेणेति । मतिमान् साधकोऽनेन अनन्तरमेवोक्तेन मन्त्रेणाङ्कुशसंज्ञया मुद्रया सलिले जले तीर्थमावाह्य मूलं मन्त्र सलिले एव द्वादशधा जपेत् अङ्कुशमुद्रा यथा ज्ञानार्णवे । दक्षमुष्टिं विधायाथ तर्ज्जन्यङ्गुष्ठरूपिणी । अङ्कुशाख्या महामुद्रा त्रैलोक्याकर्षणक्षमेति ॥ ४७ ॥

तत इत्यादि । ततः परं मूलमन्त्रस्योच्चारणं पूर्वं यत्र कर्म्मणि तत् मूलोच्चारणपूर्वकं मध्यमानामिकायोगात्तत्तोयतो विन्दून् त्रिधा त्रिवारं भूमौ विनिक्षिपेत् ॥ ४८ ॥

सप्तवारमिति । मूलोच्चारणपूर्वकं मध्यमानामिकायोगाद् तेनैव

ईशानवायुवरुणवह्नीन्द्रबीजपञ्चकम् ।
प्रजप्य वेदधा तोय दत्तहस्ते समानयेत् ॥ ५० ॥
वीक्ष्य तेजोमय ध्यात्वा चेड़याक्रष्य साधकः ।
देहान्तःकलुष तेन रेचयेत् पिङ्गलाख्यया ॥ ५१ ॥
निष्कृष्य पुरतो वज्रशिलायामस्त्रमुच्चरन् ।
त्रिवार ताड़यन् मन्त्री हस्तौ प्रक्षालयेत्ततः ॥ ५२ ॥
आचम्योक्तेन मन्त्रेण सूर्य्यायार्घ्यं निवेदयेत् ॥ ५३ ॥
तारमायाहंस इति घृणिसूर्य्य । ततःपरम् ।
इदमर्घ्यं तुभ्यमुक्तां दद्यात् स्वाहेत्युदीरयन् ॥ ५४ ॥
ततो ध्यायेन्महादेवीं गायत्रीं परदेवताम् ।

जलेन सप्तवारं स्वमूर्द्धानमात्मीय मस्तकमभिषिच्य तत परं वामहस्ते जल समादाय गृहीत्वा दक्षपाणिनाच्छादयेत् ॥ ४९ ॥

ईशानेत्यादि । दक्षपाणिनाच्छाद्य च ईशानं वायुवरुणवह्नीन्द्रस्वामिकं हं यं वं रं लमित्येतद्बीजपञ्चक वेदधा चतुर्व्वारं प्रजप्य तत्तोयं दक्षहस्ते समानयेत् ॥ ५० ॥

वीक्ष्येति । साधको जनो दक्षहस्ते समानीत तज्जलं वीक्ष्य विलोक्य तेजोमयं तेजोरूप ध्यात्वा ईडया नाड्या आकृष्य च पिङ्गलाख्यया नाड्या तेन जलेन देहान्तःकलुष शरीरान्तःप्राप्त रेचयेन्निष्कर्षेत् ॥ ५१ ॥

निष्कृष्येति । मन्त्री साधक एवं देहान्त कलुषं निष्कृष्य पुरतोऽग्रेसन कल्पितायां वज्रशिलायामस्त्रं फडिति मन्त्रमुच्चरन् जपन् सन् त्रिवारं ताड़येत् आहन्यात् ततोऽनन्तर हस्तौ प्रक्षालयेद्धावेत् ॥ ५२ ॥

आचम्येति । तत उक्तेन मन्त्रेणाचम्य सूर्य्यायार्घ्यं निवेदयेद्दद्यात् ॥ ५३ ॥

अथ केन मन्त्रेण सूर्य्यायार्घ्यं निवेदनीयमत आह । तारेत्यादि ।

प्रातर्मध्याह्नसायाह्ने त्रिरूपा गुणभेदतः ॥ ५५ ॥
प्रातर्ब्राह्मीं रक्तवर्णां द्विभुजाञ्च कुमारिकाम्।
कमण्डलु तीर्थपूर्णमक्षमालाञ्च बिभ्रतीम्।
कृष्णाजिनाम्बरधरा हंसारूढ़ा शुचिस्मिताम् ॥ ५६ ॥
मध्याह्ने तां श्यामवर्णां वैष्णवीञ्च चतुर्भुजाम्।
शङ्खचक्रगदापद्मधारिणीं गरुडासनाम् ॥ ५७ ॥
पीनोत्तुङ्गकुचद्वन्द्वां वनमालाविभूषिताम्।
युवतीं सततं ध्यायेन्मध्ये मार्त्तण्डमण्डले ॥ ५८ ॥
सायाह्ने वरदां देवीं गायत्रीं संस्मरेद् यतिः।
शुक्लां शुक्लाम्बरधरां वृषासनकृताश्रयाम् ॥ ५९ ॥

पूर्व तारसायाह्नस इत्युक्त्वा ततःपरं हंसिसूर्य्येत्युक्त्वा ततश्च परमिदमर्घ्यं तुभ्यमित्युक्त्वा ततोऽनन्तरं स्वाहेत्युदीरयन् कीर्त्तयन् साधकः सूर्य्यायार्घत्रयं दद्यात् ओं ह्रीं हंसहंसिसूर्य्य इदमर्घ्यं तुभ्यं स्वाहेति मन्त्रेणार्घत्रयं निवेदयेदित्यर्थः ॥ ५४ । ५५ ॥

रजआदिगुणभेदात् प्रातर्मध्याह्नसायाह्ने त्रिरूपत्वं प्रदर्शयन् गायत्र्या ध्यानमेवाह। प्रातर्ब्राह्मीमित्यादिभिः प्रातरिति। रक्तवर्णां रक्तो लोहितो वर्णो यस्यास्तां द्विभुजां द्वौ भुजौ बाहू यस्यास्तथाभूतां तीर्थपूर्णं गङ्गादितीर्थजलैः पूरितं कमण्डलुम् अक्षमालां स्फटिकमालाञ्च पाणिभ्यां बिभ्रतीं दधतीं कृष्णाजिनाम्बरधरां नीलचर्म्मरूपं वस्त्रं परिदधतीं हंसारूढां हंसं पक्षिविशेषमारूढां शुचिस्मितां शुचि पवित्रं शुभ्रं वा स्मितमीषद्धासो यस्यास्ताम्। कुमारिकां कन्यकां ब्राह्मीं ब्रह्मण शक्तिम् एवम्भूतां गायत्रीं देवीं प्रातःकाले ध्यायेत्। अन्यत्र्येवमेवान्वयः कर्त्तव्यः ॥ ५६ ॥

तां गायत्रीम् ॥ ५७ ॥

पीनेति। पीनं दृढमुत्तुङ्गमुन्नतं कुचद्वन्द्वं यस्याः तथाभूताम् ॥५८॥

त्रिनेत्रां वरदां पाशं शूलञ्च नृकरोटिकाम् ।
विभ्रतीं करपद्मैश्च दृढां गलितयौवनाम् ॥ ६० ॥
एवं ध्यात्वा महादेव्यै जलानामञ्जलित्रयम् ।
दत्त्वा जपेत्तु गायत्रीं दशधा शतधापि वा ॥ ६१ ॥
गायत्रीं शृणु देवेशि ! वदामि तव भावतः ।
आद्यायै पदमुच्चार्य्य विद्महे तदनन्तरम् ॥ ६२ ॥
परमेश्वर्य्यै धीमहि तन्नः काली प्रचोदयात् ।
एषा तु तव गायत्री महापापप्रणाशिनी ॥ ६३ ॥

सायाह्ने इत्यादि । यतिः निर्जितेन्द्रियव्यूहः* वे निर्जितेन्द्रियव्यूहा यतिनो यतयश्च ते इत्यमरः । दृषासनकृताश्रयाम् दृषरूपमासनं यस्य स दृषासनः शिवः स एव कृत आश्रयो निजाधारो यया तथाभूताम् । अथवा दृषरूपं यत् मकरदासनं तदात्मक कृत आश्रयो यया तथाभूताम् ॥ ५९ ॥

नृकरोटिकाम् नरकपालम् । गलितयौवनां भ्रस्ततारुण्याम् ॥६०॥

एवमित्यादि । महादेव्यै गायत्रैत्र दशधा शतधापि वा दशवारं शतवार वेत्यर्थ ॥ ६१ ॥

भावतः प्रीतितः ॥ ६२ ॥

तां गायत्रीमेवाह आद्यायै इत्यादिना । पूर्वमाद्यायै इति पदमुच्चार्य्य तदनन्तरं विद्महे इति पदमुच्चरेत् । तदनन्तरं परमेश्वर्य्यै धीमहि तन्नः काली प्रचोदयादित्युच्चरेत् । योजनया आद्यायै विद्महे परमेश्वर्य्यै धीमहि तन्नः काली प्रचोदयादित्याकारा गायत्र्यासीत् । एतद्गायत्र्यर्थस्तु आद्यायै परमेश्वर्य्यै आद्यां परमेश्वरी प्राप्तुं यां वयं विद्महे मन्यामहे धीमहि चिन्तयामश्च तत् जगत्कारणत्वेन व्याप्तासिद्धा काली नोऽस्मान् प्रचोदयात् प्रेरयेत् धर्मार्थकाममोक्षेषु विनियोजयेदित्यर्थः इति ॥ ६३ ॥

त्रिसन्ध्यमेतां प्रजपन् सन्ध्यायाः फलमाप्नुयात् ।
ततस्तु तर्पयेद्भक्त्या देवर्षिपितृदेवताः ॥ ६४ ॥
प्रणव सहितीयाख्या तर्पयामि नमः पदम् ।
शक्तौ तु प्रणवे मायां नमःस्थाने द्विठं वदेत् ॥ ६५ ॥
मूलान्ते सर्वभूतान्ते निवासिन्यै पदं वदेत ।
सर्वस्वरूपां ङेयुक्तां सायुधामपि तथा पठेत् ॥ ६६ ॥
सावरणां सचतुर्थीं तद्वदेव परात्पराम् ।
आद्यायै कालिकायै च इदमर्घ्यं ततो द्विठः ॥ ६७ ॥

एताम् केवलां तव गायत्रीम् । ततस्तु गायत्रीजपादनन्तरं तु ॥ ६४ ॥

ननु कैन कैन मन्त्रेण देवर्षिपितृदेवतास्तर्पयितव्या इत्याकाङ्क्षायां तर्पणमन्त्रमाह । प्रणवमित्यादिना । पूर्वं प्रणवमोङ्कारं वदेत् । ततः सहितीयाख्यां द्वितीयया विभक्त्या सहितामाख्यां नामधेयं वदेत् । ततश्च परं तर्पयामीति नमः इति च पदं वदेत् । शक्तौ तु शक्तिविषये तु प्रणवे प्रणवस्थाने मायां ह्रीमिति बीजं वदेत् । नमःस्थाने द्विठं स्वाहेति पदं वदेत् । एतेन ओं देवांस्तर्पयामि नमः इति मन्त्रेण देवान् । ओमृषीस्तर्पयामि नमः इत्यनेन ऋषीन् । ओं पितॄंस्तर्पयामि नमः इति मन्त्रेण पितॄन् । ह्रीमाद्या काली तर्पयामि स्वाहेत्यनेनाद्या काली तर्पयेदिति ज्ञापितम् ॥ ६५ ॥

मूलान्त इत्यादि । मूलस्य ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेति मन्त्रस्यान्ते यत् सर्वभूतेति पदं तस्यान्ते निवासिन्यै इति पदं वदेत् ततो ङेयुक्तां सर्वस्वरूपां वदेत् । तत तथा ङेयुक्ता सायुधेत्यपि पदं वदेत् । ततः सचतुर्थीं सावरणां वदेत् । ततः तद्वदेव सचतुर्थीमेव परात्परां वदेत् । ततः आद्यायै कालिकायै ते इदमर्घ्यमिमि वदेत् । ततो द्विठं स्वाहेति पदं वदेत् । सकलपदयोजनया ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा स-

अनेनार्घ्यं महादेव्यै दत्त्वा मूलं जपेत् सुधीः ।
यथाशक्ति जपं कृत्वा देव्या वामकरेऽर्पयेत् ॥ ६८ ॥
प्रणम्य देवीं पूजार्थं जलमादाय साधकः ।
नत्वा तीर्थं पठन् स्तोत्रं देवताध्यानतत्परः ॥ ६९ ॥
यागमण्डपमागत्य पाणिपादौ विशोधयेत् ।
ततो द्वारस्य पुरतः सामान्यार्घ्यं प्रकल्पयेत् ॥ ७० ॥
त्रिकोणवृत्तभूबिम्बं मण्डलं रचयेत् सुधीः ।
आधारशक्तिं सम्पूज्य तत्राधारं नियोजयेत् ॥ ७१ ॥
अस्त्रेण पात्रं प्रक्षाल्य हृन्मन्त्रेण प्रपूर्य्य च ।

र्व्वभूतनिवासिन्यै सर्व्वरूपायै सायुधायै सावरणायै परात्पर-
नायै आद्यायै कालिकायै ते हृदमर्घ्यं स्वाहेति मन्त्र आसीत्
॥ ६६ । ६७ ॥

अनेनेति । अनेनानन्तरमेवोक्तेन मन्त्रेण महादेव्यै अर्घ्यं दत्त्वा सुधीर्धीर साधको मूलं मन्त्र जपेत् । यथाशक्ति जपं कृत्वा च जपजन्य फल देव्या वामकरेऽर्पयेत् दद्यात् ॥ ६८ ॥

प्रणम्येति । तत साधको देवीं प्रणम्य पूजार्थं जलमा-
दाय गृहीत्वा तीर्थं नत्वा च स्तोत्र पठन् देवताध्यानतत्पर-
सन् यागमण्डपं यजनगृहमागत्य पाणिपादौ विशोधयेत् धावेत् ।
ततो द्वारस्य पुरतोऽग्रे सामान्यार्घ्यं प्रकल्पयेत् रचयेत् ॥ ६९ । ७० ॥

ननु सामान्यार्घ्यं कि नामेत्यत आह । त्रिकोणेत्यादि ।
सुधीर्विचक्षण· त्रिकोणञ्च वृत्तञ्च भूबिम्बं चैतेषां समाहार· त्रिकोण-
वृत्तभूबिम्बं मण्डल रचयेत् पूर्वं त्रिकोणं ततस्तद्बहिरभितो वृत्तं
वर्त्तुलं ततस्तद्बहिर्भूबिम्बं चतुष्कोणञ्च मण्डलं कुर्य्यादित्यर्थः तत्र
रचिते मण्डले ओं आधारशक्तये नम इति मन्त्रेण गन्धपुष्पादि-
भिराधारशक्तिं सम्पूज्य सामान्यार्घ्यं पात्रस्थापनाय तस्मिन्नेव रचिते
मण्डले कमठाधारं नियोजयेत् स्थापयेत् ॥ ७१ ॥

निक्षिप्य गन्धं पुष्पञ्च तीर्थान्यावाहयेत्ततः ॥ ७२ ॥
आधारपात्रतोयेषु वह्न्यर्कशशिमण्डलम् ।
पूजयित्वा तदग्रधा मायाबीजेन मन्त्रयेत् ॥ ७३ ॥
प्रदर्श्ययेद्धेनुयोनिं सामान्यार्घ्यमिदं स्मृतम् ।
ततस्तज्जलपुष्पैश्च पूजयेद् द्वारदेवताः ॥ ७४ ॥
गणेशं क्षेत्रपालञ्च वटुकं योगिनीं तथा ।
गङ्गाञ्च यमुनाञ्चैव लक्ष्मीं वाणीं ततो यजेत् ॥ ७५ ॥

अस्त्रेणेति । अस्त्रेण फडिति मन्त्रेण पात्रं प्रक्षाल्याधारे संस्थाप्य च हृन्मन्त्रेण नमोमन्त्रेण जलै प्रपूर्य च तत्र गन्धं चन्दनादिकं पुष्पञ्च निक्षिप्य तत परं तत्र तीर्थान्यावाहयेत् ॥ ७२ ॥

आधारेति । तत आधारश्च पात्रञ्च तोयञ्च तान्याधारपात्रतोयानि तेषु वह्न्यर्कशशिमण्डलं पूजयित्वा आधारे वह्निमण्डलं पात्रेऽर्कमण्डलं तोये च शशिमण्डलं वह्निमाद्यमन्त्रेण गन्धपुष्पादिभिरर्चयित्वेत्यर्थं दशधा दशवारं मायाबीजेन ह्रीमितिबीजेन तज्जलं मन्त्रयेत् ॥ ७३ ॥

प्रदर्श्ययेदिति । ततः तस्योपरि धेनुयोनीं मुद्रां प्रदर्श्ययेत् दर्शनेन सामान्यार्घ्यं संस्कृतम् । तत परं तज्जलपुष्पै. सामान्यार्घ्यसम्बन्धितोयकुसुमैर्द्वारदेवताः पूजयेत् । धेनुमुद्रा यथा । अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुन । तथा च तर्ज्जनीमध्या धेनुमुद्रा-स्मृतप्रदेति ॥ ७४ ॥

या द्वारदेवता पूजयेत्ता एव दर्शयन्नाह । गणेशमित्यादि । गं गणेशाय नम इति मन्त्रेण गणेशम् । क्षं क्षेत्रपालाय नम इति मन्त्रेण क्षेत्रपालम् । वं वटुकाय नम इत्यनेन वटुकम् । यां योगिन्यै नम इत्यनेन योगिनीम् । गां गङ्गायै नम इत्यनेन गङ्गाम् । यं यमुनायै नम इति मन्त्रेण यमुनाम् । श्रीं लक्ष्म्यै नम इत्यनेन लक्ष्मीम् । ऐं सरस्वत्यै नम इति मन्त्रेण वाणीं गन्धपुष्पादिभिर्यजेत् पूजयेत् ॥ ७५ ॥

किञ्चित् स्मृशन् वामशाखां वामपादपुरःसरम् ।
स्मरन् देव्या पदाम्भोज मण्डपं प्रविशेत् सुधीः ॥७६॥
नैर्ऋत्यां दिशि वास्त्रोक्त ब्रह्माणञ्च समर्चयन् ।
सामान्यार्घ्यस्य तोयेन प्रोक्षयेद्यागमन्दिरम् ॥ ७७ ॥
अनन्तरं साधकेन्द्रो दिव्यदृष्ट्यवलोकनैः ।
दिव्यानुत्सारयेद्विघ्नान्नस्त्राङ्गिश्चान्तरीक्षगान् ॥७८॥
पार्ष्णिघातत्रिभिर्भौमानिति विघ्नान्निवारयेत् ।
चन्दनागुरुकस्तूरीकर्पूरैर्यागमण्डपम् ॥ ७९ ॥
धूपयेत् स्वोपवेशार्थं चतुरस्रं त्रिकोणकम् ।
विलिख्य पूजयेत्तत्र कामरूपाय हृल्लभुः ॥ ८० ॥

किञ्चिदिति । ततो वामशाखां द्वारस्थितचतुष्काष्ठानां मध्ये वामं काष्ठं किञ्चित् स्मृशन् देव्या पदाम्भोजञ्च स्मरन् सुधीः साधको वामपादपुरःसर यथा स्यात् तथा मण्डपं देवीयजनमण्डपं देवीयजनमन्दिरं प्रविशेत् ॥ ७६ ॥

नैर्ऋत्यामित्यादि । मण्डपं प्रविश्य च तत्रैव नैर्ऋत्यां दिशि प्रणवादिनमोऽन्तेन मन्त्रेण गन्धपुष्पादिभिर्वास्त्रोक्त ब्रह्माणं च समर्चयन् पूजयन् सन् सामान्यार्घ्यस्य तोयेन यागमन्दिरं प्रोक्षयेत् प्रसिञ्चेत् ॥ ७७ ॥

अनन्तरमिति । अनन्तर तत.परमेव साधकेन्द्रो दिव्यदृष्ट्यवलोकनै निमेषशून्या दृष्टिर्दिव्यदृष्टिस्तयावलोकनैर्निरीक्षणैर्दिवि भवा दिव्यास्तान् विघ्नानुत्सारयेन्निवारयेत् अन्तरीक्षगान् गगनगतान् विघ्नास्तु अस्त्राङ्गिः फडिति मन्त्रेण अस्त्रैरुत्सारयेत् । भौमान् भूमिभवान् विघ्नास्तु पार्ष्णिघातत्रिभिः त्रिभिः पादतलाघातैर्निवारयेत् । ततो यागमण्डपं चन्दनागुरुकस्तूरीकर्पूरैर्धूपयेत् धूपयेत तत. स्वोपवेशार्थं त्रिकोणकं तद्बहिश्चतुरस्रं चतुष्कोणञ्च मण्डलं विलिख्य तत्र लिखिते मण्डले तदधिष्ठातृदेवतं

तत्रासनं समास्तीर्य्य कामआधारशक्तितः।
कमलासनाय नमो मन्त्रेणैवासनं यजेत्॥ ८१॥
उपविश्यासने विद्वान् प्राङ्मुखो वाप्युदङ्मुखः।
वह्निवीरासनो मन्त्री विजयां परिशोधयेत्॥ ८२॥
तारं मायां समुच्चार्य्य अमृते! अमृतोद्भवे!।
अमृतवर्षिणि! ततोऽमृतमाकर्षय द्विधा॥ ८३॥
सिद्धिं देहि ततो ब्रूयात् कालिकां मे ततः परम्।
वशमानय ठद्वन्द्वं सम्बिदाशोधने मनुः॥ ८४॥
मूलमन्त्रं सप्तवारं प्रजप्य विजयोपरि।

कामरूपं कामरूपाय हृत् कामरूपाय नम इति यो मनुर्मन्त्रस्तेन गन्धपुष्पादिभि पूजयेत्॥ ७८-८०॥

तत्रेति। ततस्तत्र मण्डले आसनमास्तीर्य्याच्छाद्य पूर्वं काम क्लीमिति वीजमुच्चार्य्य तत आधारशक्तीति वदेत् आधारशक्तितश्च पर कमलासनाय नम इति वदेत्। योजनया क्लीमाधारशक्तिकमलासनाय नम इति मन्त्रो जात. अनेनैव मन्त्रेणासनं तदधिष्ठात्रदैवतं यजेत्॥ ८१॥

विजया भङ्गाम्॥ ८२॥

ननु केन मन्त्रेण विजयां परिशोधयेदित्यपेक्षाया तच्छोधनमन्त्रमेवाह। तारमित्यादिद्वाभ्याम्। पूर्वं तारं प्रणवं मायां ह्रीमिति वीजञ्च समुच्चार्य्य ततःपरम् अमृते अमृतोद्भवे अमृतवर्षिणि इति ब्रूयात् ततोऽमृतमिति ब्रूयात् ततो द्विधा द्विवारमाकर्षयेति ब्रूयात्। ततश्च सिद्धिं देहीति ब्रूयात्। ततःपर कालिकां मे इति ब्रूयात्। ततश्च वशमानयेति ठद्वन्द्वं स्वाहेति ब्रूयात्। सकलपदयोजनया ओं ह्रीममृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षयाकर्षय सिद्धिं देहि कालिकां मे वशमानय स्वाहेति मन्त्रो जात. सम्बिदाशोधने भङ्गायाः शोधनेऽयमेव मनुः प्रोक्त.॥ ८३। ८४॥

आवाहन्यादिमुद्राञ्च धेनुयोनिं प्रदर्शयेत् ॥ ८५ ॥
गुरुं पद्मे सहस्रारे यथा सङ्केतमुद्रया ।
त्रिधैव तर्पयेद्देवीं हृदि मूलं समुच्चरन् ॥ ८६ ॥
वाग्भवं वदयुग्मञ्च वाग्वादिनि ! पदं ततः ।
मम जिह्वाग्रे स्थिरीभव सर्वसत्त्ववशङ्करि ।
स्वाहान्तो नैव मनुना जुहुयात् कुण्डलीमुखे ॥ ८७ ॥
स्वीकृत्य सम्बिदां वामकर्णोर्द्धं श्रीगुरुं नमेत् ।

मूलमन्त्रमिति । विजयोपरि मूलमन्त्रं सम्प्रचार प्रजप्य आवाह्यते यया सा आवाहनी मुद्रा सा मुद्रा आदिर्येषाः सा आवाहन्यादिः सा चासौ मुद्रा चेत्यावाहन्यादिमुद्रा ताम् । धेनुयोनी च मुद्रे विजयोपरि प्रदर्शयेत् आवाहन्यादिमुद्रा यथा दक्षिणामूर्त्तिसंहितायाम् । पुटाञ्जलिमधः कुर्य्यादियमावाहनी भवेत् । इयन्तु विपरीतेन तदा वै स्थापनी भवेत् । जङ्घांकुष्ठसुष्टिभ्यां तदेय सन्निधापनी । अन्ताङ्गुष्ठकसुष्टिभ्यां तदेयं सन्निरोधिनीति ॥ ८५ ॥

गुरुमिति । ऐमु असुकानन्दनाथं श्रीगुरुं तर्पयामि नमः इति मन्त्रेण सङ्केतमुद्रया गुरूपदिष्टया तत्त्वमुद्रया सहस्रारे सहस्रदले पद्मे गुरुं यथावत्त्रिधा विजयया तर्पयेत् मूल मन्त्रं समुच्चरन् सन् ह्रीमाद्या कालीं तर्पयामि स्वाहेति मन्त्रेण तत्त्वमुद्रयैव हृदये देवीं विजयया त्रिधैव तर्पयेत् ॥ ८६ ॥

वाग्भवमिति । पूर्वं वाग्भवम् ऐमिति वीजं वदेत् ततो वदयुग्मं वदेत् ततो वाग्वादिनि इति पदं वदेत् ततो मम जिह्वाग्रे स्थिरीभव सर्वसत्त्ववशङ्करि इति वदेत् । योजनया ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्वसत्त्ववशङ्करि मन्त्रो जातः स्वाहान्तेनैवानुना मनुना कुण्डलीमुखे विजयां जुहुयात् दद्यात् ॥ ८७ ॥

स्वीकृत्येति । एव सम्बिदां भङ्गां स्वीकृत्य गृहीत्वा वामकर्ण

दक्षिणे च गणेशानमाद्यां मध्ये सनातनीम् ॥ ८८ ॥
कृताञ्जलिपुटो भूत्वा देवीध्यानपरायणः ।
पूजाद्रव्याणि सर्व्वाणि दक्षिणे स्थापयेत् सुधीः ।
वामे सुवासितं तोयं कुलद्रव्याणि यानि च ॥ ८९ ॥
अस्त्रान्तमूलमन्त्रेण सामान्यार्घ्योदकेन च ।
सम्प्रोक्ष्य सर्व्ववस्तूनि वेष्टयेज्जलधारया ।
वह्निबीजेन देवेशि ! वह्नेः प्राकारमाचरेत् ॥ ९० ॥
पुष्पं चन्दनसंयुक्तमादाय करयोर्द्वयोः ।
अस्त्रेण घर्षयित्वा तत् प्रक्षिपेत् करशुद्धये ॥ ९१ ॥
तर्ज्जनीमध्यमाभ्याञ्च वामपाणितले शिवे ! ।
ऊर्द्ध्वोर्द्ध्वं तालत्रितयं दत्त्वा दिग्बन्धनं ततः ।
अस्त्रेण क्षोटिकाभिश्च भूतशुद्धिमथाचरेत् ॥ ९२ ॥

स्वोर्द्ध्वदेशे ओं श्रीगुरुभ्यो नम इति मन्त्रेण श्रीगुरूनमेत् । दक्षिणे दक्षकर्णस्वोर्द्ध्वदेशे ओं गणेशाय नम इत्यनेन मन्त्रेण गणेशानं नमेत् । ओं सनातन्यै आद्यायै कालिकै नम इत्यनेन मध्ये ललाटदेशे सनातनीमाद्यां कालिकां नमेत् ॥ ८८ ॥

पूजाद्रव्याणि पुष्पादीनि । कुलद्रव्याणि मद्यादीनि ॥ ८९ ॥

अस्त्रान्तेति । ततः अस्त्रान्तमूलमन्त्रेण फड़न्तेन मूलमन्त्रेण सामान्यार्घ्योदकेन च सर्व्ववस्तूनि सम्प्रोक्ष्याभिषिञ्च्य जलधारया वेष्टयेत् । हे देवेशि ! ततो वह्निबीजेन रमिति-बीजेन वह्नेः प्राकारमावरणमाचरेत् कुर्य्यात् ॥ ९० ॥

पुष्पमिति । ततः करशुद्धये चन्दनसयुक्त पुष्प द्वयोः करयोरादाय गृहीत्वा अस्त्रेण फड़िति मन्त्रेण तत् पुष्पं घर्षयित्वा प्रक्षिपेत् ॥ ९१ ॥

तर्ज्जनीति । हे शिवे ! ततः तर्जनीमध्यमाभ्यामङ्गुष्ठाभ्या वाम-

स्वाङ्के निधाय च करावुत्तानौ साधकोत्तमः ।
मनो निवेश्य मूले च हङ्कारेणैव कुण्डलीम् ॥ ९३ ॥
उत्थाप्य हंसमन्त्रेण पृथिव्या सहितान्तु ताम् ।
स्वाधिष्ठान समानीय तत्त्वं तत्त्वे नियोजयेत् ॥ ९४ ॥
गन्धादिघ्राणसंयुक्तां पृथिवीमप्सु सञ्चरेत् ।
रसादिजिह्वया सार्द्धं जलमग्नौ विलापयेत् ॥ ९५ ॥
रूपादिचक्षुषा सार्द्धमग्नि वायौ विलाप्य च ।
स्पर्शादि त्वग्युत वायुमाकाशे प्रविलापयेत् ॥ ९६ ॥
अहङ्कारे हरेद्व्योम सशब्दं तन्महत्यपि ।

पाणितले ऊर्द्ध्वाधः तालत्रितयं दत्त्वा ततोऽस्त्रेण फडिति मन्त्रेण क्षोटिकाभिरङ्गुलिध्वनिभिश्च दिग्बन्धनमाचरेत् । अथ दिग्बन्धनादनन्तर भूतशुद्धिमाचरेत् ॥ ९२ ॥

भूतशुद्धाचरणप्रकारमेवाह स्वाङ्के इत्यादिभिः । साधकोत्तमः स्वाङ्के स्वक्रोडे उत्तानौ करौ निधाय संस्थाप्य मूले मूलाधारचक्रे च मनो निवेश्य हङ्कारेणैव कुण्डलीमुत्थाप्य हंसमन्त्रेण हंस इत्यात्मकेनैव मन्त्रेण पृथिव्या सहिता तां कुण्डलीं शक्तिं स्वाधिष्ठान स्वाधिष्ठानचक्रं समानीय तत्त्वं पृथिव्यादिकं तत्त्वे जलादौ नियोजयेत् विलापयेत् ॥ ९३ ॥ ९४ ॥

पृथिव्यादेस्तत्त्वस्य जलादितत्त्वे विलापनप्रकारमेव दर्शयन्नाह गन्धादीत्यादि । गन्ध आदिर्यस्य तद्गन्धादि एवम्भूतञ्च तद्घ्राणं नासा चेति गन्धादिघ्राण तेन स युक्ता पृथिवीम् अप्सु जलेषु सञ्चरेत् विलापयेत् । घ्राणादीति पाठे तु घ्रायते नासिकया गृह्यते यः स घ्राणो गन्ध एव जलादिकमप्यग्न्यादावेवमेव विलापयेत् ॥ ९५ ॥ ९६

अहङ्कारे इति । अहङ्कारे सशब्दं शब्दसहितं व्योम आकाश

महत्तत्त्वञ्च प्रकृतौ तां ब्रह्मणि विलापयेत् ॥ ९७ ॥
इत्थं विलाप्य मतिमान् वामकुक्षौ विचिन्तयेत्।
पुरुषं कृष्णवर्णञ्च रक्तश्मश्रुविलोचनम् ॥ ९८ ॥
रक्तचर्म्मधरं क्रुद्धमङ्गुष्ठपरिमाणकम्।
सर्वपापस्वरूपञ्च सर्वदाधोमुखस्थितम् ॥ ९९ ॥
ततस्तु वामनासायां यं वीजं धूम्रवर्णकम्।
सञ्चिन्त्य पूरयेत्तेन वायु षोड़शमात्रया।
तेन पापात्मकं देहं शोषयेत् साधकाग्रणीः ॥ १०० ॥
नाभौ रं रक्तवर्णञ्च ध्यात्वा तज्जातवह्निना।
चतुःषष्ट्या कुम्भकेन दहेत् पापरतान्तनम् ॥ १०१ ॥
ललाटे वारुणं वीजं शुक्लवर्णं विचिन्त्य च।

हरेत् विलापयेत्। तत् अहङ्कारतत्त्वं महति महत्तत्त्वे हरेत्। महत्तत्त्वञ्च प्रकृतौ विलापयेत्। तां प्रकृतिं ब्रह्मणि विलापयेत् ॥ ९७ ॥

इत्थमिति। मतिमान् साधक इत्थमनेन प्रकारेण पृथिव्यादितत्त्वं विलाप्य वामकुक्षौ वामे उदरे कृष्णवर्णं सर्वपापस्वरूपं पुरुषं विचिन्तयेत्। रक्तश्मश्रुविलोचनमित्यादीनि द्वितीयान्तपदानि सर्वपापस्वरूपस्य पुरुषस्यैव विशेषणानि। रक्तश्मश्रुविलोचनम् रक्ते लोहितवर्णे श्मश्रुविलोचने यस्य तथाभूतम् ॥ ९८। ९९ ॥

ततस्त्विति। ततोऽनन्तरन्तु वामनासाया धूम्रवर्णकं यं वीजं सञ्चिन्त्य तदेव वीजं जपन् साधकस्तेन वामनासारन्ध्रेण षोडशमात्रया वायुं पूरयेदाकर्षेत्। साधकाग्रणीः साधकोत्तमस्तेन पूरितेन वायुना पापात्मकं पापमात्मनि स्थितं यस्य एवम्भूतं देहं शोषयेत् ॥ १०० ॥

नाभाविति। ततो नाभौ रक्तवर्णं रमिति वीजं ध्यात्वा तदेव वीजं जपन्नपि तज्जातवह्निना ततो रमिति वीजादुत्पन्नेनाग्निना चतुःषष्ट्या कुम्भकेन पापरतां निजां तनूं दहेत् ॥ १०१ ॥

द्वात्रिंशता रेचकेन प्लावयेदमृताम्भसा ॥ १०२ ॥
आपादशीर्षपर्य्यन्तमाप्लाव्य तदनन्तरम् ।
उत्पन्नं भावयेद्देहं नवीन देवतामयम् ॥ १०३ ॥
पृथ्वीबीजं पीतवर्णं मूलाधारे विचिन्तयन् ।
तेन दिव्यावलोकेन दृढ़ीकुर्य्यान्निजान्तनूम् ॥ १०४ ॥
हृदये हंसमादाय आं ह्रीं क्रों हंसमुच्चरन् ।
सोऽहं-मन्त्रेण तद्देहे देव्याः प्राणान् निधापयेत् ॥१०५॥
भूतशुद्धिं विधायेत्थं देवीभावपरायणः ।
समाहितमना कुर्य्यात् मातृकान्यासमम्बिके ! ॥१०६॥
मातृकाया ऋषिर्ब्रह्मा गायत्रीछन्द ईरितम् ।
देवता मातृका देवी बीजं व्यञ्जनसंज्ञकम् ॥ १०७ ॥

ललाटे इति । ततो ललाटे शुक्लवर्णं वारुणं वमिति बीजं सञ्चिन्त्य तद्देव बीजं जपन्नपि द्वात्रिंशता रेचकेनामृताम्भसा वारुणबीजाख्येते-नामृतरूपेण जलेन दग्धां तनूं प्लावयेत् ॥ १०२ ॥

आपादेति । एवमापादशीर्षपर्य्यन्तं देहमाप्लाव्य तदनन्तर देवतामय देवतादेहस्वरूप नवीनमुत्पन्नं देहं भावयेत् चिन्तयेत् ॥ १०३ ॥

पृथ्वीति । ततो मूलाधारे पीतवर्णं लमित्याकारकं पृथ्वीबीजं विचिन्तयन् सन् तेन लमिति-बीजेन दिव्यावलोकेन च निजा तनूं दृढ़ीकुर्य्यात् ॥ १०४ ॥

हृदये इति । ततो हृदये हंसमादाय निधाय आं ह्रीं क्रों हंस इत्युच्चरन् साधकः सोऽहं मन्त्रेण तद्देहे तस्मिन्नवीने देहे देव्याः प्राणान् प्रतिष्ठयेत् आं ह्रीं क्रों हंसः सोऽहमिति मन्त्रेण तत्र देहे देव्याः प्राणानां प्रतिष्ठां कुर्य्यादित्यर्थः ॥ १०५ ॥

देवीभावपरायणः देवीस्वरूपोऽहमिति चिन्तनं तत्परः ॥ १०६ ॥

अथ मातृकान्यासप्रकारमेव दिदर्शयिषन् मातृकाया ऋष्यादिकमाह

स्वराश्च शक्तयः सर्गः कीलकं परिकीर्त्तितम् ।
लिपिन्यासे महादेवि ! विनियोगप्रयोगिता ।
ऋषिन्यास विधायैवं कराङ्गन्यासमाचरेत् ॥ १०८ ॥
अ आं-मध्ये कवर्गञ्च इं ईं-मध्ये चवर्गकम् ।
उ ऊं मध्ये टवर्गन्तु एं ऐं-मध्ये तवर्गकम्॥१०९॥
ओं औं-मध्ये पवर्गन्तु यादिक्षान्तं वरानने ! ।
विन्दुसर्गान्तराले च षड़ङ्गे मन्त्र ईरितः ॥ ११० ॥
विन्यस्य न्यासविधिना ध्यायेन्मातृसरस्वतीम् ॥ १११ ॥

मातृकाया इत्यादिना । सर्ग· विसर्गे विनियोगप्रयोगिता । विनियोगस्य प्रयोगित्वम् विनियोग प्रयोक्तव्य इत्यर्थ । अस्या मातृकाया ब्रह्मा ऋषिर्गायत्री छन्दो । मातृका सरस्वती देवी देवता । हलो बीजम् । स्वरा शक्तय । विसर्ग कीलकम् । धर्म्मार्थकाममोक्षावाप्तये लिपिन्यासे विनियोग । शिरसि ब्रह्मणे ऋषये नम । मुखे गायत्र्यै छन्दसे नम । हृदये मातृकायै सरस्वत्यै देव्यै देवतायै नम· । गुह्ये व्यञ्जनाय बीजाय नम· । पादयो स्वरेभ्य शक्तिभ्यो नम । सर्वाङ्गेषु विसर्गाय कीलकाय नम । धर्म्मार्थकाममोक्षावाप्तये लिपिन्यासे विनियोग । एवम् ऋषिन्यासं विधाय कृत्वा कराङ्गन्यासमाचरेत् कुर्य्यात् ॥ १०७ ॥ ॥ १०८ ॥

कराङ्गन्यासक्रममेवाह । अं आ-मध्ये इत्यादिना । अं आ-मध्ये स्थित कवर्गम् इं ईं-मध्ये स्थित चवर्गम् उ ऊ-मध्ये स्थित टवर्गम् एं ऐं-मध्ये स्थित तवर्गम् ओं औं-मध्ये स्थितं पवर्गम् विन्दुसर्गान्तराले अनुस्वारविसर्गमध्ये स्थितं यादि क्षान्तञ्च वर्णमङ्गुष्ठादिषु हृदयादिषु च षट्षु षट्षुअङ्गेषु न्यासविधिना यथाक्रम विन्यस्य मातृसरस्वतीं ध्यायेदित्यन्वय· । यथा अ कं खं गं घ ङ अां अङ्गुष्ठाभ्या नम । इ चं छ जं झं ञ इं तर्जनीभ्यां स्वाहा । उ टं ठ ड ढ ण ऊ मध्यमाभ्यां वषट् । एं तं थ द ध न ऐं अनामिकाभ्या

पञ्चाशल्लिपिभिर्विभक्तमुखदोःपद्मद्वयवक्त्रःस्थलां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम् ।
मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥११२॥
ध्यात्वैवं मातृकां देवीं षट्सु चक्रेषु विन्यसेत् ।

ङम् । ओं प फ बं भ मं औं कनिष्ठाभ्यां वौषट् । अं य रं लं वं श ष सं हं क्ष अः करतलकरपृष्ठाभ्यां फट् । इति करन्यास । हृदयादिन्यासो यथा अं कं खं गं घं ङं आं हृदयाय नम । इं चं छं जं झं ञं ईं शिरसे स्वाहा । उं टं ठं डं ढं णं ऊं शिखायै वषट् । एं तं थं दं धं नं ऐं कवचाय हुम् । ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट् । अं यं रं लं वं शं षं सं हं क्षं अः अस्त्राय फट् । इति षड़ङ्गे न्यासेऽवमेव मन्त्र ईरित: कथित: ॥ १०९—१११ ॥

मातृसरस्वतीध्यानमेवाह पञ्चाशल्लिपिभिरिति । वाग्देवतां सरस्वतीमाश्रये भजे इत्यन्वय: । कथम्भूता वाग्देवताम् पञ्चाशल्लिपिभिर्विभक्तमुखदोःपद्मद्वयवक्त्रःस्थलाम् पञ्चाशता वर्णैर्विभक्तानि पृथक् पृथक् भूतानि मुखदो:पद्मद्वयवक्त्र स्थलानि यस्या तथाभूताम् । तत्र दोर्वाङ्ग पद् पाद: । पुन कथम्भूताम् भास्वन्मौलिनिबद्धचन्द्रशकलाम् भास्वन्मौलौ दीप्यमाने किरीटे निबद्धं चन्द्रशकलं चन्द्रखण्डं यया ताम् । चूडा किरीटं केशाश्च सयता मौलयस्त्रय इत्यमर: । पुन: कथम्भूताम् आपीनतुङ्गस्तनीम् आपीनौ अतिमहान्तौ तुङ्गावुन्नतौ स्तनौ यस्यास्तथाभूताम् । पुन: कथम्भूताम् हस्ताम्बुजै: पाणिकमलैर्ज्ञानमुद्राम् अक्षगुणमक्षमाल्यम् । सुधाढ्यकलशममृतयुक्तं घट विद्यां च बिभ्राणां दधतीम् । पुन: कीदृशीम् विशदप्रभाम् विशदा शुभ्रा प्रभा यस्यास्ताम् । पुन: कीदृशीम् त्रीणि नयनानि नेत्राणि यस्यास्तथाभूताम् ॥ ११२ ॥

ध्यात्वेति । एवं मातृकां देवीं ध्यात्वा षट्सु चक्रेषु विन्यसेत् ।

हृच्चौ भ्रूमध्यगे पद्मे कण्ठे च षोडश स्वरान् ॥११३॥
हृदम्बुजे कादिठान्तान् विन्यस्य कुलसाधकः।
डादिफान्तान् नाभिदेशे वादिलान्तांश्च लिङ्गके॥ ११४
मूलाधारे चतुःपत्रे वादिसान्तान् प्रविन्यसेत्।
इत्यन्तर्मनसा न्यस्य मातृकार्णान् बहिर्न्यसेत् ॥११५॥
ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गण्डयोः।
ओष्ठदन्तोत्तमाङ्गास्यदोःपत्सन्ध्यग्रगेषु च ॥ ११६ ॥

षट्सु चक्रेषु मातृकाया न्यासस्य क्रमसेवाह हृच्चावित्यादिना। भ्रूमध्यगे विशुद्धाख्ये द्विदले पद्मे हृच्चौ वर्णौ विन्यसेत्। कण्ठे कण्ठस्थिते आज्ञाख्ये षोडशपत्रे पद्मे षोड़श स्वरान् न्यसेत्। हृदम्बुजे अनाहताख्ये द्वादशदले हृदयपद्मे कादिठान्तान् द्वादशवर्णान् विन्यस्य कुलसाधको नाभिदेशस्थिते मणिपूराख्ये दशदले पद्मे डादिफान्तान् दशवर्णान् विन्यसेत्। लिङ्गके लिङ्गदेशस्थे स्वाधिष्ठानाख्ये षड्दले पद्मे वादिलान्तान् षड्वर्णान् विन्यसेत्। चतुष्पत्रे मूलाधारे वादिसान्तांश्चतुरो वर्णान् प्रविन्यसेत्। यथा भ्रूमध्यगे पद्मे हं नमः क्षं नम। कण्ठगे पद्मे अं नमः आं नम इं नम ईं नम उं नम ऊं नमः ऋं नम ॠं नमः ऌं नमः ॡं नम एं नम ऐं नम ओं नम औं नम अं नम अः नम। हृद्गते पद्मे कं नमः खं नम गं नम घं नम ङं नमः चं नम छं नमः जं नमः झं नमः ञं नमः टं नम ठं नम। नाभिगते पद्मे डं नम ढं नम णं नमः तं नमः थं नमः दं नम धं नमः नं नमः पं नमः फं नम। लिङ्गगते पद्मे बं नमः भं नमः मं नमः यं नम रं नम लं नम। मूलाधारे वं नमः शं नमः षं नमः सं नमः। इति षट्चक्रेषु मातृकान्यासक्रमः। इत्यनेन प्रकारेण मनसा मातृकार्णान् मातृकावर्णानन्तरभ्यन्तरे न्यस्य बहिरपि न्यसेत् ॥ ११३–११५ ॥

पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयांसयोः ।
ककुद्यग्रे च हृत्पूर्वं पाणिपादयुगे ततः ॥ ११७ ॥
जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमम् ।
इत्थं लिपिं प्रविन्यस्य प्राणायामं समाचरेत् ॥ ११८ ॥
मायाबीजं षोड़शधा जप्त्वा वामेन वायुना ।
पूरयेदात्मनो देहं चतुःषष्ट्या तु कुम्भयेत् ॥ ११९ ॥

मातृकावर्णाना वहिर्न्यासस्य क्रममाह ललाटेत्यादिना । ललाट-मुखवृत्तादिषु मातृकार्णान् यथाक्रम न्यसेदिति वृतीयेनान्वयः । यथा ललाटे ऋं नमः मुखवृत्ते ॠं नमः दक्षेऽक्ष्णि ऌं नमः वामेऽक्ष्णि ॡं नमः दक्षश्रुतौ ऽं नमः वामकर्णे ः नमः दक्षघ्राणे कं नमः वामनासायाम् खं नमः दक्षगंण्डे गं नमः वामकपोले घं नमः ओष्ठे ङं नमः अधरे चं नमः ऊर्द्ध दन्तपङ्क्तौ छं नम अधरदन्तपङ्क्तौ जं नमः ऊर्द्धमाड़े झं नमः आस्यविवरे ञः नमः वाह्वो ईशानां सन्धीनामग्रेषु क्रमत टं नम. ठं नमः गं नमः डं नमः ढं नमः णं नमः तं नम थं नमः दं नमः धं नमः नं नमः दक्षपार्श्वे पं नमः वामपार्श्वे फं नमः पृष्ठे बं नमः नाभौ भं नमः जठरे मं नमः हृदये यं नमः दक्षस्कन्धे रं नमः वामस्कन्धे लं नम ककुद्ग्रेऽग्रे वं नम हृदयपूर्वे पाणियुगे शं नमः षं नमः हृत्पूर्वे पादयुगे सं नम हं नमः जठराननयोः क्षं नमः इति मातृकार्णानां वहिर्न्यासस्य क्रमः ॥ ११६—११८ ॥

नन्तु देवीमन्त्रस्य साधने कथं प्राणायामं विदध्यात् तत्राह । मायाबीजमित्यादि । सुधीर्धीरो मायाबीजं ह्रीं-बीजं षोड़शधा षोडशवारं जप्त्वा वामेन नासापुटेन वायुनात्मनो देहं पूरयेत् । तत कनिष्ठानामिकाङ्गुष्ठैर्नासाद्वयं धृत्वा चतुःषष्ट्या आवृत्त्या ह्रीं बीज

कनिष्ठानामिकाङ्गुष्ठैर्धृत्वा नासाद्वयं सुधीः।
द्वात्रिंशता जपन् वीजं वायुं दक्षेण रेचयेत् ॥ १२०॥
पुनः पुनस्त्रिराचम्य प्राणायाम इति स्मृतः।
प्राणायाम विधायेत्यृषिन्यासं समाचरेत् ॥ १२१ ॥
अस्य मन्त्रस्य ऋषयो ब्रह्मा ब्रह्मर्षयस्तथा।
गायत्र्यादीनि छन्दांसि आद्या काली तु देवता ॥१२२॥
आद्यावीजं वीजमिति शक्तिर्माया प्रकीर्त्तिता।
कमला कीलकं प्रोक्तं स्थानेष्वेतेषु विन्यसेत्।
शिरो वदनहृद्गुह्यपादसर्व्वाङ्गकेषु च ॥ १२३ ॥
मूलमन्त्रेण हस्ताभ्यामापादमस्तकावधि।

जपन् सन् वायुं कुम्भयेत् स्थिरं कुर्यात्। ततो द्वात्रिंशताऽऽवृत्त्या ह्रीं-वीज जपन् तेनैव वामनासापुटेनैव वायुं रेचयेत् त्यजेत्। पुन पुनराऽऽवृत्त्या त्रिर्वारत्रयमेवं कुर्यात्। देवीमन्त्रस्य साधने इति एष प्राणायाम. स्मृतः प्राणायामविधि· प्रोक्त इत्यर्थः ॥ ११९—१२१ ॥

ऋषिन्यासक्रमं दर्शयन्नस्य मन्त्रस्य ऋष्यादिकमाह। अस्य मन्त्रस्येत्यादिना। अस्य मन्त्रस्य ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेत्यस्य आद्यावीजं क्री-वीजम्। माया ह्री-वीजम्। कमला श्री वीजम्। एतेषु स्थानेषु ऋष्यादिकं विन्यसेत्। एतेषु केषु स्थानेषु विन्यसेत् तत्राह। शिर इत्यादिना। यथा अस्य मन्त्रस्य ब्रह्मा ब्रह्मर्षयश्च ऋषयो गायत्र्यादीनि छन्दांसि आद्या काली देवता क्रीं वीजं ह्रीं शक्तिः श्रीं कीलक धर्म्मार्थकाममोक्षावाप्तये ऋषिन्यासे विनियोगः। शिरसि ब्रह्मणे ब्रह्मर्षिभ्यश्चर्षिभ्यो नमः। मुखे गायत्र्यादिभ्यश्छन्दोभ्यो नमः। हृदये आद्यायै कालिकायै देवतायै नमः। गुह्ये क्रीं-वीजाय नमः पादयोर्ह्रीं-शक्तये नमः। सर्व्वाङ्गेषु श्रीं-कीलकाय नमः। धर्म्मार्थकाममोक्षावाप्तये ऋषिन्यासे विनियोगः। इति ऋषिन्यास-

मस्तकात् पादपर्य्यन्तं सप्तधा वा त्रिधा न्यसेत् ।
अयन्तु व्यापकन्यासो यथोक्तफलसिद्धिदः ॥ १२४ ॥
यद्बीजाद्या भवेद्विद्या तद्बीजेनाङ्गकल्पना ।
अथवा मूलमन्त्रेण षड्दीर्घेण विना प्रिये ! ॥ १२५ ॥
अङ्गुष्ठाभ्यां तर्जनीभ्यां मध्यमाभ्यां तथैव च ।
अनामिकाभ्या कनिष्ठाभ्यां करयोस्तलपृष्ठयोः ।
नमःस्वाहावषट्हुंच वौषट् फट् क्रमशः सुधीः ॥१२६॥
हृदयाय नमः पूर्वं मस्तके वह्निवल्लभा ।

क्रम ॥ १२२ । १२३ ॥

अथ व्यापकन्यास ब्रूते । मूलेत्यादिना । आपादमस्तकावधि-पादमारभ्य मस्तकपर्य्यन्त मस्तकमारभ्य पादपर्य्यन्तं च प्रतिहस्ताभ्यां मूलमन्त्रेण सप्तधा सप्तवार त्रिधा वा न्यसेन्न्यासं कुर्य्यात् । मस्तकादिति ल्यब्लोपे कर्म्मण्यधिकरणे चेति कर्म्मणि पञ्चमी ॥ १२४ ॥

अथ कराङ्गन्यासविधिस्वरूपयति । यद्बीजाद्येत्यादिना । यद्बीजमाद्य यस्या सा यद्बीजाद्या मन्त्रात्मिका विद्या भवेत् । परार्द्धे षट्-दीर्घेण विनेति निषेधात् आकारादि-षट्-दीर्घस्वरभाजा तेन बीजेनाङ्गकल्पना अङ्गुष्ठादि-हृदयादि-षड्ङ्गन्यासकल्पना कर्त्तव्येत्यर्थः । अथवा हे प्रिये ! षट् दीर्घेण विना अध्याहियमाणाकारादिषड्दीर्घ-स्वरशून्येन मूलमन्त्रेणैवाङ्गकल्पना कर्त्तव्या ॥ १२५ ॥

पूर्वमङ्गुष्ठादि-षड्ङ्गन्यासक्रममाह । अङ्गुष्ठाभ्यामित्यादिना सार्द्धेन । अङ्गुष्ठाभ्या नमः अङ्गुष्ठावुद्दिश्य नम इत्युक्तमित्यर्थः । एवमग्रेऽप्यन्वयोविधेय । सुधी साधकः क्रमश क्रमेण ह्रां अङ्गुष्ठाभ्या नमः ह्रीं तर्जनीभ्यां स्वाहा ह्रूं मध्यमाभ्या वषट् ह्रैं अनामिकाभ्या नमः ह्रौं कनिष्ठाभ्यां वौषट् ह्रः करतलकरपृष्ठाभ्यां फट् ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा अङ्गुष्ठाभ्यां नमः एवम्वा अङ्गुष्ठादिषड्ङ्गेषु न्यासं विदध्यादिति शेषः ॥ १२६ ॥

शिखायै वषडित्युक्तं कवचाय हुमीरितम् ॥ १२७ ॥
नेत्रत्रयाय वौषट् च अस्त्राय फडिति क्रमात् ।
षडङ्गानि विधायेत्थं पीठन्यासं समाचरेत् ॥ १२८ ॥
आधारशक्तिं कूर्मञ्च शेषं पृथ्वीं तथैव च ।
सुधाम्बुधिं मणिद्वीपं पारिजाततरुं ततः ॥ १२९ ॥
चिन्तामणिगृहञ्चैव मणिमाणिक्यवेदिकाम् ।
तत्र पद्मासनं वीरो विन्यसेत् हृदयाम्बुजे ॥ १३० ॥
दक्षवामांशयोर्वामकटौ दक्षकटौ तथा ।
धर्म्मं ज्ञान तथैश्वर्य्यं वैराग्यं क्रमतो न्यसेत् ॥ १३१ ॥

अथ हृदयादिषडङ्गन्यासमाह । हृदयाय नम इत्यादिना । पूर्वं हृदयाय नमः हृदयमुद्दिश्य नम इत्युक्तमित्यर्थः । एवमग्रेऽप्यन्वय । वह्निवल्लभा स्वाहा । ह्रां हृदयाय नम । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् । ह्रैं कवचाय हुम् । ह्रौं नेत्रत्रयाय वौषट् । ह्रः अस्त्राय फट् इति । ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा हृदयाय नमः एवं वा क्रमात् सुधीर्हृदयादिषडङ्गेषु न्यासं कुर्य्यात् । इत्थमेवं विधानेन षडङ्गानि प्रति न्यासं विधाय पीठन्यासं समाचरेत् ॥ १२७ । १२८ ॥

पीठन्यासावरणक्रममेव दर्शयन्नाह । आधारशक्तिमित्यादि । वीरो हृदयाम्बुजे हृत्पद्मे आधारशक्तिं न्यसेत् । तत्रैव कूर्म्मादिकमपि न्यसेत् । तत्र मणिमाणिक्यवेदिकायाम् यथा हृदयाम्बुजे आधारशक्तये नमः कूर्म्माय नमः शेषाय नमः पृथ्व्यै नम सुधाम्बुधये नमः मणिद्वीपाय नमः पारिजाततरवे नम चिन्तामणिगृहाय नमः मणिमाणिक्यवेदिकायां पद्मासनाय नमः इति ॥ १२९ । १३० ॥

दक्षेत्यादि । दक्षिणांशादिषु क्रमतो धर्म्मादिकं न्यसेत् । यथा दक्षस्कन्धे धर्म्माय नमः वामस्कन्धे ज्ञानाय नमः वामकटौ ऐश्वर्य्याय नमः दक्षकटौ वैराग्याय नम इति ॥ १३१ ॥

सुखपार्श्वे नाभिदक्षपार्श्वे साधकसत्तमः ।
नञ्पूर्व्वाणि च तान्येव धर्म्मादीनि यथाक्रमम् ॥१३२॥
आनन्दकन्दं हृदये सूर्य्यं सोमं हुताशनम् ।
सत्त्वं रजस्तमश्चैव विन्दुयुक्तादिमाक्षरैः ।
केशरान् कर्णिकाञ्चैव पत्रेषु पीठनायिकाः ॥ १३३ ॥
मङ्गला विजया भद्रा जयन्ती चापराजिता ।
नन्दिनी नारसिंही च वैष्णवीत्यष्टनायिकाः ॥ २३४ ॥
असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्ताख्यकस्तथा ।
कपाली भीषणश्चैव संहारीत्यष्ट भैरवा. ।
दलाग्रेषु न्यसेदेतान् प्राणायामं ततश्चरेत् ॥ १३५ ॥

सुखेत्यादि । साधकसत्तमो सुखादिषु नञ् पूर्व्वाणि तान्येव धर्म्मादीनि यथाक्रमं क्रमेणैव न्यसेत् । यथा सुखे अधर्म्माय नमः वामपार्श्वे अज्ञानाय नमः नाभौ अनैश्वर्य्याय नमः दक्षपार्श्वे अवैराग्याय नमः इति ॥ १३२ ॥

आनन्देत्यादि । आनन्दकन्दादीन् हृदये न्यसेत् । विन्दुयुक्तादिमाक्षरै सानुस्वारैरादिमैरक्षरैः सह सत्त्वं रजस्तमश्च तत्रैव न्यसेत् । यथा । हृदये आनन्दकन्दाय नमः सूर्य्याय नमः सोमाय नमः अग्नये नमः सं सत्त्वाय नमः रं रजसे नमः तं तमसे नमः केसरेभ्यो नमः कर्णिकायै नम इति । हृदयाम्बुजस्य पत्रेषु पीठनायिका न्यसेत् ॥१३३॥

पत्रेषु याः पीठनायिका न्यसेत्ता आह एकेन । मङ्गलेति । यथा हृत्पद्मपत्रेषु क्रमतः मङ्गलायै नमः विजयायै नमः भद्रायै नमः जयन्त्यै नमः अपराजितायै नमः नन्दिन्यै नमः नारसिंह्यै नमः वैष्णव्यै नम इति ॥ १३४ ॥

असिताङ्ग इति । असिताङ्गादीनेतानष्ट भैरवान् दलाग्रेषु न्यसेत् । यथा हृत्पद्मपत्राग्रेषु क्रमतः असिताङ्गाय भैरवाय नमः

गन्धपुष्पे समादाय करकच्छपमुद्रया ।
हृदि हस्तौ समाधाय ध्यायेद्देवीं सनातनीम् ॥ १३६ ॥
ध्यानन्तु द्विविधं प्रोक्तं सरूपा रूपभेदतः ।
अरूपं तव यद्ध्यानमवाङ्मनसगोचरम् ॥ १३७ ॥
अव्यक्तं सर्वतो व्याप्तमिदमित्थं विवर्ज्जितम् ।
अगम्यं योगिभिर्गम्यं ह्यच्छैर्बहुसमाधिभिः ॥ १३८ ॥
मनसो धारणार्थाय शीघ्रं स्वाभीष्टसिद्धये ।
सूक्ष्मध्यानप्रबोधाय स्थूलध्यानं वदामि ते ॥ १३९ ॥
अरूपायाः कालिकायाः कालमातुर्महाद्युतेः ।
गुणक्रियानुसारेण क्रियते रूपकल्पना ॥ १४० ॥

रूपवे भैरवाय नमः चण्डाय नमः क्रोधोन्मत्ताय नमः भयङ्कराय भैरवाय नमः कपालिने नमः भीषणाय नमः संहारिणे नमः इति सर्वं पीठन्यासं विधाय ततः प्राणायामञ्चरेत् ॥ १३५ ॥

गन्धेति । ततो गुरूपदिष्टया करकच्छपमुद्रया गन्धपुष्पे समादाय गृहीत्वा हृदि हस्तौ समाधाय संस्थाप्य सनातनीमाद्यामस्थूलां देवीं ध्यायेत् ॥ १३६ ॥

ध्यानन्त्विति । हे देवि ! सरूपारूपभेदतः तव ध्यानन्तु द्विविधं प्रोक्तम् । तयोर्मध्ये अरूप रूपरहितं तव यद्ध्यानं ध्येयं, सरूप तत्तु अवाङ्मनसगोचरम् । वाचो मनसश्चाविषयभूतम् । ध्यायते यत्तत् ध्यानम् । वाहुलकात् कर्मणि ल्युट् ॥ १३७ ॥

अव्यक्तमित्यादि । इदमित्थं विवर्ज्जितम् । इदमित्थमेवेति सिद्धान्तरहितम् । अगम्यम् अज्ञेयम् । ह्यच्छैः प्राजापत्यादिभिः इतैः शमोऽन्तःकरणसंयमः स आदिर्येषान्ते शमादयः बहवश्च ते शमादयः तैः ॥ १३८ ॥

शीघ्रमिति पूर्वान्वयि ॥ १३९ ॥

नन्तु रूपवत एव पदार्थस्य स्थूलध्यानं सम्भवति मम त्वाद्यामस्थू-

मेघाङ्गीं शशिशेखरां त्रिनयनां रक्ताम्बर बिभ्रतीं
पाणिभ्यामभयं वरञ्च विलसद्रक्तारविन्दस्थिताम् ।
नृत्यन्तं पुरतो निपीय मधुर माध्वीकमद्यं महा-
कालंवीक्ष्य विकासिताननवरामाद्यां भजे कालिकाम् ॥१४१॥

एवं ध्यात्वा स्वशिरसि पुष्पं दत्त्वा तु साधकः ।
पूजयेत् परया भक्त्या मानसैरुपचारकैः ॥ १४२ ॥
हृत्पद्ममासनं दद्यात् सहस्रारच्युतामृतैः ।
पाद्यं चरणयोर्दद्यात् मनस्त्वर्घ्यं निवेदयेत् ॥ १४३ ॥

न्यासा रूपरहितत्वात् कथं स्थूलध्यानं ब्रवीषीत्यत आह । करूपाया इत्यादि ॥ १४० ॥

स्थूलध्यानमेवाह । मेघाङ्गीमिति । आद्यां कालिकामहं भजे इत्यन्वयः । कथम्भूतां कालिकाम् मेघमिवाङ्गं यस्यास्तथा-भूताम् । पुनः कथम्भूताम् शशिशेखराम् शशी शेखरे शिरसि यस्याः ताम् । पुन कीदृशीम् त्रिनयनाम् त्रीणि नयनानि नेत्राणि यस्या-ताम् । पुनः कथम्भूताम् पाणिभ्या हस्ताभ्यामभय वरञ्च बिभ्रतीं दधतीम् । पुनः कीदृशीम् विकसद्रक्तारविन्दस्थितां विकसत् स्फुटद्रक्ता-रविन्दं लोहितं पद्म तत्र स्थितामुपविष्टाम् । पुनः कथम्भूताम् । मधुर माध्वीकमद्यं मधूकपुष्पोद्भवं मद्य निपीय पुरतोऽग्रे नृत्यन्तं महाकालं वीक्ष्य दृष्ट्वा विकासिताननवर सुखश्रेष्ठं यस्या. तथा-भूताम् ॥ १४१ ॥

एवमिति । एवमनेना प्रकारेणाद्यां कालीं ध्यात्वा करकच्छप-मुद्रया गृहीत पुष्प स्वशिरसि दत्त्वा साधक. परया भक्त्या मानसै-रुपचारकैर्देवीं पूजयेत् ॥ १४२ ॥

मानसैरुपचारकैर्देव्याः पूजनमेव दर्शयति । हृत्पद्ममित्यादिभि. । देव्यै हृत्पद्ममासनं दद्यात् । सहस्रारच्युतामृतै. सहस्रदलपद्माद्ग-लितैरमृतैर्देव्याश्चरणयोः पाद्यं दद्यात् । एवमग्रेऽप्यन्वय. ॥ १४३ ॥

तेनामृतेनाचमनं स्नानीयमपि कल्पयेत्।
आकाशतत्त्वं वसनं गन्धन्तु गन्धतत्त्वकम् ॥ १४४ ॥
चित्तं प्रकल्पयेत् पुष्पं धूपं प्राणान् प्रकल्पयेत्।
तेजस्तत्त्वन्तु दीपार्थे नैवेद्यञ्च सुधाम्बुधिम् ॥ १४५ ॥
अनाहतध्वनिं घण्टां वायुतत्त्वञ्च चामरम्।
नृत्यमिन्द्रियकर्माणि चाञ्चल्यं मनसस्तथा ॥ १४६ ॥
पुष्पं नानाविधं दद्यादात्मनो भावसिद्धये।
अमायमनहङ्कारमरागममदन्तथा ॥ १४७ ॥
अमोहकमदम्भञ्च अद्वेषाक्षोभके तथा।
अमात्सर्य्यमलोभञ्च दश पुष्पं प्रकीर्त्तितम् ॥ १४८ ॥
अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहः।

तेनामृतेन। सहस्रारच्युतेन ॥ १४४ ॥
सुधाम्बुधिमहामृतसमुद्रम् ॥ १४५। १४६ ॥

पुष्पमिति। आत्मनो भावसिद्धये स्वाभिप्रेतमदार्थनिष्पत्तये। कार्य्ये देयानि नानाविधानि पुष्पाण्यभिधत्ते। अमायमित्यादिना सार्द्धश्लोकेन। मायाया अभावोऽमायं प्रथमं पुष्पम्। अनहङ्कारम् अहङ्कार आत्मन्यतिपूज्यत्वाभिमान तदभावोऽनहङ्कार द्वितीय पुष्पम्। राग. क्रोध. तदभावोऽरागं तृतीय पुष्पम्। मदो धनविद्यादिनिमित्तक चित्तक्षोत्सुकत्व तदभावोऽमदं चतुर्थं पुष्पम् ॥ १४७ ॥

मोहोऽविवेक तदभावोऽमोहकं पञ्चमं पुष्पम्। दम्भ कपटः तदभावोऽदम्भं षष्ठं पुष्पम्। द्वेषोऽप्रीतिः तदभावोऽद्वेष सप्तम पुष्पम्। क्षोभो व्यर्थमितस्तत सञ्चलनम् तदभावोऽक्षोभकमष्टमं पुष्पम्। मात्सर्य्यमन्यशुभद्वेष. तदभावोऽमात्सर्य्यं नवमं पुष्पं। लोभो धनाद्यागमे बहुधा जायमानेऽपि पुनर्बुभुक्षानोऽभिलाष. तदभावो अलोभ दशमं पुष्पम्। एव दश पुष्प प्रकीर्त्तितम् ॥ १४८ ॥

दया क्षमा ज्ञानपुष्पं पञ्च पुष्प ततःपरम् ॥ १४९ ॥
इति पञ्चदशैः पुष्पैर्भावरूपैः प्रपूजयेत् ।
सुधाम्बुधिं मांसशैलं भर्ज्जितं मीनपर्वतम् ॥ १५० ॥
मुद्राराशिं सुभक्तञ्च घृताक्तं पायसं तथा ।
कुलामृतञ्च तत्पुष्पं पीठक्षालनवारि च ॥ १५१ ॥
कामक्रोधौ विघ्नकृतौ बलिं दत्त्वा जपं चरेत् ।
माला वर्णमयी प्रोक्ता कुण्डलीसूत्रयन्त्रिता ॥ १५२ ॥
सविन्दुं मन्त्रमुद्धार्य्य मूलमन्त्रं समुच्चरेत् ।
अकारादिलकारान्तमनुलोम इति स्मृतः ॥ १५३ ॥
पुनर्लकारमारभ्य श्रीकण्ठान्तं मनुं जपेत् ।
विलोम इति विख्यातः क्षकारो मेरुरुच्यते ॥ १५४ ॥

अहिंसा परपीड़ानिवृत्तिः । इन्द्रियनिग्रह विषयेषु चक्षुरादिसंयमनम् । दया निष्कारणपरदुःखविनाशेच्छा । क्षमा परेणापकारे कृते तस्य प्रत्यपकारानाचरणम् । ज्ञानं सारासारविवेकनैपुण्यम् । भावरूपे भाव्यन्ते चिन्त्यन्ते इति भावाः कर्म्मण्यच् । तद्रूपैः भाव्यमानैरित्यर्थ ॥ १४९ ॥

सुधाम्बुधिं मद्यसमुद्रम् । घृताक्तं घृतमिश्रितम् ॥ १५० ॥

कुलामृतं शक्तिघटितममृतविशेषम् । तत्पुष्पम् कुलपुष्पं स्त्रीपुष्पमित्यर्थ । पीठक्षालनवारि स्त्रद्रव्यविशेषधावनाम्भः ॥ १५१ ॥

नन्वाभ्यन्तरजपाचरणे कीदृशी माला जपविधानञ्च कीदृश वर्त्तते तत्रेच्छायामाह । मालेत्यादि । कुण्डलीरूपेण सूत्रेण यन्त्रिता ग्रथिता वर्णमयी वर्णरूपा मालाभ्यन्तरजपे प्रोक्ता ॥ १५२ ॥

सविन्दुमिति । सविन्दु सानुस्वारमकारादिलकारान्त वर्णसमुद्धार्य्य मूलमन्त्रं समुच्चरेत् जपेत् । यथा । अं ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेति एतमेव जपेत् । जपेऽयमनुलोम इति स्मृतः ॥ १५३ ॥

पुनरित्यादि । पुनर्हकारस्यान्तरस्थितं लकारमारभ्य श्रीकण्ठा-

अष्टवर्गान्तिमैर्वर्णैः सहमूलमयाष्टकम् ।
एवमष्टोत्तरशतं जप्त्वानेन समर्पयेत् ॥ १५५ ॥
सर्वान्तरात्मनिलये स्वान्तर्ज्योतिःस्वरूपिणि ।
गृहाणान्तर्जपं मातराद्ये कालि ! नमोऽस्तु ते ॥१५६॥
समर्प्य जपमेतेन साष्टाङ्गं प्रणमेद्भिया ।
इत्यन्तर्यजनं कृत्वा बहिःपूजां समारभेत् ॥ १५७ ॥
विशेषार्घस्य संस्कारस्तत्रादौ कथ्यते शृणु ।
यस्य स्थापनमात्रेण देवता सुप्रसीदति ॥ १५८ ॥
दृष्ट्वार्घ्यपात्रं योगिन्यो ब्रह्माद्या देवतागणाः ।
भैरवा अपि नृत्यन्ति प्रीत्या सिद्धिं ददत्यपि ॥ १५९ ॥
स्ववामे पुरतो भूमौ सामान्यार्घ्यस्य वारिणा ।
मायागर्भं त्रिकोणञ्च वृत्तञ्च चतुरस्रकम् ॥ १६० ॥

न्तमकारान्तं सबिन्दुं वर्णसप्तार्थं मनुं जपेत् । यथा लं ह्रीं श्रीं क्रीं परमेश्वरि ! स्वाहा । रं ह्रीं श्रीं क्रीं परमेश्वरि ! स्वाहेति एवम् । अयञ्च विलोम इति विख्यातः । क्षकारो मालाया मेरुरुच्यते ॥ १५४ ॥

अथेत्यादि अथानन्तरमष्टानाम् अकुचुटुतुपुयशानां वर्गाणामन्तिमैः सबिन्दुभि अं ओं अनन्तभवलरूपैर्वर्णैः सहाष्टकमष्टपरिमाणकं मूल मन्त्रं जपेत् । अनेन इतोऽनन्तरमेव वक्ष्यमाणेन मन्त्रेण ॥१५५॥

जपसमर्पणमन्त्रमेवाह । सर्वान्तरात्मेति । सर्वान्तरात्मनिलये । सर्वेषामन्तरात्मा हृदयं निलयो गृहं यस्याः तथाभूते ॥ १५६ । १५७ ॥

तत्र बहिःपूजासमारम्भे ॥ १५८ । १५९ ॥

विशेषार्घस्य संस्कारमेवाह । स्ववाम इत्यादिभि । स्ववामे आत्मनो वामदेशे । पुरतो भूमौ अग्रतः पृथ्व्यां सामान्यार्घस्य वारिणा करणेन माया ह्रीं बीज गर्भं यस्येदृशं त्रिकोणं मण्डलं पूर्वं विलिख्य तद्बहिरभितो वृत्त वर्तुलं तद्बहि चतुरस्र चतुष्कोण मण्डल विलिख्य

विलिख्य पूजयेत्तत्र मायाबीजपुरःसरम् ।
ङेन्तामाधारशक्तिञ्च नमःशब्दावसानिकाम् ॥ १६१ ॥
ततः प्रक्षालिताधारं विन्यस्य मण्डलोपरि ।
वं वह्निमण्डल ङेन्तं दशकलात्मने ततः ॥ १६२ ॥
नमोऽन्तेन च सम्पूज्य क्षालयेदर्घ्यपात्रकम् ।
अस्त्रेण स्थापयेत्तत्र आधारोपरि साधकः ॥ १६३ ॥
अमर्कमण्डलायोक्त्वा द्वादशान्तकलात्मने ।
नमोऽन्तेन यजेत् पात्रं मूलेनैव प्रपूरयेत् ॥ १६४ ॥
त्रिभागमलिनापूर्य्य शेष तोयेन साधकः ।
गन्धपुष्पे तत्र दत्त्वा पूजयेदमुनाम्बिके ! ॥ १६५ ॥

तत्र मण्डले मायाबीजं ह्रींबीजं पुर सरं यस्या एवम्भूतां ङेन्तिभक्तान्तां नम शब्दोऽवसानेऽन्ते यस्यास्तथाभूतामाधारशक्तिं पूजयेत् । ह्रीं आधारशक्तये नम इति मन्त्रेणाधारशक्तिमर्च्चयेदित्यर्थः ॥ १६०।१६१ ॥

तत इति । ततः आधारशक्तिपूजनादनन्तरं तन्मण्डलोपरि प्रक्षालिताधारं विन्यस्य संस्थाप्य । पूर्वं अमित्युक्त्वा ततः ङेन्तं वह्निमण्डलमुक्त्वा ततो दशकलात्मने इति वदेत् । योजनया । वं वह्निमण्डलाय दशकलात्मने इति मन्त्रो जात । नमोऽन्तेनानेन मन्त्रेण आधारे वह्निमण्डलं सम्पूज्य अस्त्रेण फडिति मन्त्रेणार्घ्यपात्रं क्षालयेत् । साधकस्तस्मिन्नाधारोपरि क्षालितमर्घ्यपात्रं स्थापयेत् ॥ १६२।१६३ ॥

अमित्यादि । पूर्वम् अम् अर्कमण्डलायेत्युक्त्वा ततो द्वादशान्तकलात्मने इति वदेत् । योजनया अम् अर्कमण्डलाय द्वादशकलात्मने इति मन्त्रो जातः । अनेनैव नमोऽन्तेन मन्त्रेण पात्रमर्घ्यपात्राधिष्ठातृदैवतमर्कमण्डलं यजेत् पूजयेत् । मूलेनैव मन्त्रेणार्घ्यपात्रं प्रपूरयेत् ॥ १६४ ॥

ननु केन वस्तुना पात्रं प्रपूरयेत् तत्राह । त्रिभागमिति । [illegible] तोयेन साधकः परयेत ।

षष्ठस्वरं विन्दुयुक्तं ङेन्तं वै चन्द्रमण्डलम् ।
षोड़शान्ते कलाशब्दादात्मने नम इत्यपि ॥ १६६ ॥
ततस्तु त्रैफले पत्रे रक्तचन्दनचर्चितम् ।
दूर्व्वापुष्पं साक्षतञ्च कृत्वा तत्र निधापयेत् ॥ १६७ ॥
मूलेन तीर्थमावाह्य तत्र देवीं विभाव्य च ।
पूजयेत् गन्धपुष्पाभ्यां मूलं द्वादशधा जपेत् ॥ १६८ ॥
धेनुयोनौ दर्शयित्वा धूपदीपौ प्रदर्शयेत् ।
तदम्बु प्रोक्षणीपात्रे किञ्चिन्निक्षिप्य साधकः ॥ १६९ ॥
आत्मानं देयवस्तूनि प्रोक्षयेत्तेन मन्त्रवित् ।
पूजासमाप्तिपर्य्यन्तमर्घ्यपात्रं न चालयेत् ॥ १७० ॥
विशेषार्घ्यस्य सत्कारः कथितोऽयं शुचिस्मिते ! ।
यन्त्रराज प्रवक्ष्यामि समस्तपुरुषार्थदम् ॥ १७१ ॥

तत्र तोये गन्धपुष्पे दत्वासुना दृतोऽनन्तरमेव वक्ष्यमाणेन मन्त्रेण तत्रैव शशिमण्डलं पूजयेत् ॥ १६५ ॥

शशिमण्डलपूजनस्य मन्त्रमाह । षष्ठेत्यादिना । पूर्वं विन्दुयुक्तमनुस्वारसहितं षष्ठस्वरमूं कथयित्वा कलाशब्दात् परमात्मने नम इत्यपि कथयेत् । योजनया । ॐ चन्द्रमण्डलाय षोडशकलात्मने नम इति मन्त्रः शशिमण्डलार्च्चने जातः ॥ १६६ ॥

ततस्त्रिति । ततस्तु परं त्रैफले विल्वसम्बन्धिनि पत्रे रक्तचन्दनचर्चितं रक्तचन्दनेन लिप्तं साक्षतमक्षतैर्विशिष्टं च दूर्व्वासहितं पुष्पं कृत्वा तत्र विशेषार्घ्यस्थापनभागे निधापयेत् स्थापयेत् ॥ १६७ ॥

तत्र विशेषार्घ्यतोये । विभाव्य विचिन्त्य ॥ १६८ ॥

धेन्विति । विशेषार्घ्यतोये धेनुयोनौ मुद्रे दर्शयित्वा तत्रैव धूपदीपावपि प्रदर्शयेत् । तदम्बु विशेषार्घ्यजलम् ॥ १६९ ॥

प्रोक्षयेत् सिञ्चेत् । तेन प्रोक्षणीपात्रनिक्षिप्तजलेन ॥ १७० ॥

मायागर्भं त्रिकोणञ्च तद्बाह्ये वृत्तयुग्मकम् ।
तयोर्मध्ये युग्मयुग्मक्रमात् षोडश केशरान् ॥ १७२ ॥
तद्बाह्येऽष्टदलं पद्मं तद्बहिर्भूपुरं लिखेत् ।
चतुर्द्वारसमायुक्तं सुरेखं सुमनोहरम् ॥ १७३ ॥
स्वर्णे वा राजते ताम्रे कुङ्कुमगोलविलेपिते ।
स्वयम्भूकुसुमैर्य्युक्ते चन्दनागुरुकुङ्कुमैः ॥ १७४ ॥
कुशोटेनाथवा लिखे स्वर्णमय्या शलाकया ।
मालूरकण्टकेनापि मूलमन्त्रं समुच्चरन् ॥ १७५ ॥
विलिखेत् यन्त्रराजन्तु देवताभावसिद्धये ।

ममरूपुरुषार्थदम् धर्मार्थकाममोक्षदायकमित्यर्थः ॥ १७१ ॥

यन्त्रराजलेखनस्य विधानमाह । मायागर्भमित्यादिभिः । माया ह्रीबीजं गर्भे यस्यैवम्भूतं त्रिकोणं मण्डलं पूर्वं लिखेत् । ततस्तद्बाह्ये तदभितो वृत्तयुग्मकं वर्त्तुलमण्डलद्वयं लिखेत् । तयोर्वृत्तमण्डलयोर्मध्ये युग्मयुग्मक्रमात् षोड़श केशरान् लिखेत् । तद्बाह्ये वृत्तमण्डलयोर्बहिरष्टदलं पद्मं लिखेत् । तद्बहिः पद्माद्बहिस्तदभितश्चतुर्द्वारसमायुक्तं सुरेखं शोभनरेखायुतं सुमनोहरमतिमनोरमं भूपुरं लिखेत् ॥ १७२ । १७३ ॥

ननु यन्त्रमिदं कस्मिन्नाधारे केन वा करणेन लेखितव्यं तत्राह । स्वर्णे इत्यादि । कुङ्कुमगोलविलेपिते कुङ्कुमैर्गोलैर्वा शक्तिविशेषघटितपुष्पविशेषैर्विलेपिते स्वयम्भूकुसुमैः शक्तिघटितैरेव पुष्पविशेषैर्युक्ते चन्दनागुरुकुङ्कुमैर्वा लिप्ते केवलेन कुशोदेन रक्तचन्दनेन वा लिप्ते स्वर्णे सुवर्णनिर्मिते राजते रजतनिर्मिते ताम्रनिर्मिते वा पात्रे स्वर्णमय्या सुवर्णविकारभूतया शलाकया मालूरकण्टकेन विल्वकण्टकेन वा मूलमन्त्रं समुच्चरन् सन् देवताभावसिद्धये देवताप्रीतिनिष्पत्तये यन्त्रराजं विलिखेत् ॥ १७४ । १७५ ॥

अथवेति । अथवा सुशिक्षितेन स्वकर्मविषयकातिनैपुण्यशालिना

अथवोत्कीलरेखाभिः स्फाटिके विद्रुमेऽपि वा ॥१७६॥
वैदुर्य्ये कारयेत् यन्त्रं कारुकेण सुशिल्पिना ॥ १७७ ॥
शुभप्रतिष्ठितं कृत्वा स्थापयेद् भवनान्तरे ।
नश्यन्ति दुष्टभूतानि ग्रहरोगभयानि च ॥
पुत्रपौत्रसुखैश्वर्य्यैर्मोदते तस्य मन्दिरम् ।
दाता भर्त्ता यशस्वी च भवेत् यन्त्रप्रसादतः ॥ १७८ ॥
एवं यन्त्रं समालिख्य रत्नसिंहासने पुरः ।
संस्थाप्य पीठन्यासोक्तविधिना पीठदेवताः ।
सम्पूज्य कर्णिकामध्ये पूजयेन्मूलदेवताम् ॥ १७९ ॥
कलसस्थापनं वक्ष्ये चक्रानुष्ठानमेव च ।
येनानुष्ठानमात्रेण देवता सुप्रसीदति ।
मन्त्रसिद्धिर्भवेन्नूनमिच्छासिद्धिः प्रजायते ॥ १८० ॥
कलां कलां गृहीत्वा तु देवानां विश्वकर्म्मणा ।
निर्मितोऽयं स वै यस्मात् कलसस्तेन कथ्यते ॥ १८१॥

कारुकेण शिल्पिना उत्कीलरेखाभिरुत्खानिताभी रेखाभिः स्फाटिके विद्रुमे वैदुर्य्ये वा यन्त्रं कारयेत् शुभेत्यादि । शुभप्रतिष्ठितम् शुभा प्रतिष्ठा सञ्जातास्यैवम्भूतं यन्त्रराज कृत्वा यो भवनान्तरे स्थापयेत् तस्य दुष्टभूतानि नश्यन्तीत्येवमन्वय ॥ १७६–१७८ ॥

एवमित्यादि । एवं विधानेन यन्त्रं समालिख्य पुरोऽग्रे रत्नसिंहासने संस्थाप्य च पीठन्यासोक्तविधिना पीठदेवता सम्पूज्य कर्णिकामध्ये पद्मबीजकोशमध्ये मूलदेवता पूजयेत् ॥ १७९ ॥

अथ मद्यादिभिः पञ्चतत्त्वैर्महादेव्याः पूजाया विधानं वक्तुमुपक्रमते । कलसेत्यादि ॥ १८० ॥

कलसं निर्वक्ति । कलामित्यादिना ॥ १८१ ॥

अथ घटनिर्माणविधानमाह । षट्त्रिंशदित्यादिना । षट्त्रिं-

षट्त्रिंशदङ्गुलायाम षोड़शाङ्गुलमुच्चकैः ।
चतुरङ्गुलक कण्ठं मुखन्तस्य षड़ङ्गुलम् ।
पञ्चाङ्गुलिमितं मूलं विधानं घटनिर्म्मितौ ॥ १८२ ॥
सौवर्णं राजतं ताम्रं कांस्यजं मृत्तिकोद्भवम् ।
पाषाणं काचजं वापि घटमच्चतमव्रणम् ।
कारयेद्देवताप्रीत्यै वित्तशाठ्य विवर्जयेत् ॥ १८३ ॥
सौवर्णं भोगदं प्रोक्तं राजतं मोक्षदायकम् ।
ताम्रं प्रीतिकरं ज्ञेय कांस्यजं पुष्टिवर्द्धनम् ।
काच वश्यकरं प्रोक्तं पाषाणं स्तम्भकर्म्मणि ।
मृण्मयं सर्वकार्य्येषु सुदृश्यं सुपरिष्कृतम् ॥ १८४ ॥
स्ववामभागे षट्कोणं तन्मध्ये ब्रह्मरन्ध्रकम् ।
तद्बहिर्वृत्तमालिख्य चतुरस्रन्ततो वृहिः १८५ ॥

षट्त्रिंशदङ्गुलायामं षट्त्रिंशदङ्गुलय· परिमाणं यस्य स षट्त्रिंशदङ्गुलः एवम्भूत· आयामो विस्तारो यस्य तथाभूतम् षोडशाङ्गुलसच्चकै षोड़शाङ्गुलय· परिमाण यस्यैवम्भूतसच्चं घटं कारयेदिति शेष· । तस्य घटस्य कण्ठ चतुरङ्गुलक चतुरङ्गुलिपरिमितं मुखं षड़ङ्गुलं षड़ङ्गुलिपरिमित मूलमधोदेशं च पञ्चाङ्गुलिमितं कारयेत् । घटनिर्म्मितौ विधानमेतदेव प्रोक्तम् ॥ १८२॥

नन्वु कस्य कस्य वस्तुन· कलशः कारयितव्य इत्यपेक्षायामाह । सौवर्णमित्यादि । अच्चतम् अभग्नम्। अव्रणम् छिद्रशून्यम् ॥ १८३ ॥

सौवर्ण सुवर्णजातं कलसमिति शेषः ॥ १८४ ॥

स्ववामेत्यादि । स्ववामभागे षट्कोणं मण्डलमालिख्य तन्मध्ये षट्कोणमण्डलमध्ये ब्रह्मरन्ध्रकं शून्यमेकमालिख्य तद्बहिः षट्कोणमण्डलस्य बहिर्वृत्तं मण्डलमालिख्य ततोऽपि बहि. चतुष्कोण मण्डलमालिखेत् ॥ १८५ ॥

सिन्दूररजसा वापि रक्तचन्दनकेन वा।
निर्म्माय मण्डलं तत्र यजेदाधारदेवताम् ॥ १८६ ॥
मायामाधारशक्तिञ्च ङे नमोऽन्ता समुद्धरेत् ॥ १८७ ॥
नमसा चालिताधारं स्थापयेन्मण्डलोपरि।
अस्त्रेण चालितं कुम्भं तत्राधारे निवेशयेत् ॥ १८८ ॥
ऋकाराद्यैरकारान्तैर्वर्णैर्विन्दुसमायुतैः।
मूलं समुच्चरन् मन्त्री कारणेन प्रपूरयेत् ॥ १८९ ॥
आधारकुम्भतीर्थेषु वह्नार्कशशिमण्डलम्।
पूर्ववत् पूजयेत् विद्वान् देवीभावपरायणः ॥ १९० ॥
रक्तचन्दनसिन्दूररक्तमाल्यानुलेपनैः।
भूषयित्वा तु कलसं पञ्चीकरणमाचरेत् ॥ १९१ ॥

नन्विदं मण्डलं केन द्रव्येण लेखनीयं तत्राह। सिन्दूरेत्यादि। तत्र मण्डले ॥ १८६ ॥

ननु केन मन्त्रेणाधारदेवता यजेत्तत्राह। मायामिति। पूर्वं मायां ह्रीं बीजं समुद्धरेत् ततो ङे नमोऽन्तामाधारशक्तिं समुद्धरेत्। योजनया। ह्रीमाधारशक्तये नम इति मन्त्र आधारदेवतायजने जात ॥ १८७ ॥

नमसा नम इति मन्त्रेण अस्त्रेण फडिति मन्त्रेण ॥ १८८ ॥

ऋकारेत्यादि। ऋकार आद्या येषाम् अकारश्चान्त्यो येषान्तैर्विन्दुसमायुतैरनुस्वारसहितैर्वर्णैः सह मूलं समुच्चरन् ऋ ॠ ऌ ॡ ं ः ं ः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं अं आं इं ईं उं ऊं एं ऐं ओं औं ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेति मन्त्रं प्रजपन्मन्त्री साधक कारणेन मद्येन कलसं प्रपूरयेत् ॥ १८९ ॥

तीर्थम् मद्यम्। पूर्ववत् विशेषार्घमस्त्रेण इव ॥ १९० ॥ १९१ ॥

फट दर्भेण सन्ताड्य हृं वीजेनावगुण्ठयेत् ।
क्रीं दिव्यदृष्ट्या संवीक्ष्य नमसाभ्युक्षणं चरेत् ।
मूलेन गन्धं निर्दद्यात् पञ्चीकरणमीरितम् ॥ १९२ ॥
प्रणम्य कलशं रक्तपुष्पं दत्त्वा विशोधयेत् ॥ १९३ ॥
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ १९४ ॥
सूर्य्यमण्डलसम्भूते ! वरुणालयसम्भवे ! ।
अमावीजमये देवि ! शुक्रशापाद्विमुच्यताम् ॥ १९५ ॥
वेदानां प्रणवो वीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ! ब्रह्महत्या व्यपोहतु ॥ १९६ ॥
क्रीं हंसः शुचिसद् वसुरन्तरीक्षसद्धोता ।

ननु पञ्चीकरणं किं नाम तत्राह । फट इत्यादि । फटा मन्त्रेण दर्भेण कुशेन कलसं सन्ताड्य हृमिति वीजेनावगुण्ठनमुद्रयावगुण्ठयेद्वेष्टयेत् । क्रीं वीजेन दिव्यदृष्ट्या कलसं संवीक्ष्य दृष्ट्वा नमसा मन्त्रेण कलसस्याभ्युक्षणमभिषेकं चरेत् कुर्यात् । मूलेन मन्त्रेण कलशे त्रिवारत्रयं गन्धं दद्यात् । इदमेव पञ्चीकरणमीरितं कथितम् ॥ १९२ ॥

विशोधयेत् मद्यमिति शेषः ॥ १९३ ॥

ननु केन केन मन्त्रेण मद्यं शोधयेदित्यपेक्षायान्तच्छोधनमन्त्रानेवक्रमत आह एकमेवेति । हे सुभे देवि ! ध्रुवं नित्यं स्थूलसूक्ष्ममयं स्थूलसूक्ष्मस्वरूपं एकमेवाद्वैतमेव यत्परं ब्रह्म अस्ति तेन परब्रह्मणा ते तव कचोद्भवां ब्रह्महत्यामहं नाशयामीत्यन्वयः ॥ १९४ । १९५ ॥

सूर्य्येत्यादि । हे वरुणालयसम्भवे ! । वरुणस्यालयो गृह वरुणालयः समुद्रः तस्मात् सम्भव उत्पत्तिर्यस्याः तथाभूते । अतएव हे सूर्यमण्डलमध्यस्थे ! सूर्यमण्डलाभ्यन्तरस्थायिनि सुभे देवि ! शुक्रशापान्मम विमुच्यतां विमुक्ता भूयताम् ॥ १९६ ॥

वेदिसदतिथिर्दुरोणसत् नृसदर्ष दृतसत् ।
गोजा ऋजा ऋतजा अद्रिजा ऋतं बृहत् ॥ १९७ ॥
बारुणेन च बीजेन षड्दीर्घस्वरभाजिना ।
ब्रह्मशापविशब्दान्ते मोचितायै पदं वदेत् ।
सुधादेव्यै नमः पश्चात् सप्तधा ब्रह्मशापनुत् ॥ १९८ ॥
अङ्कुशं दीर्घषट्केन युतं श्रीमायया युतम् ।
सुधा पश्चाद् ब्रह्मशापं मोचयेति पदन्ततः ।
अमृतं स्रावयेद्वन्द्वं द्विठान्तो मनुरीरितः ॥ १९९ ॥
एवं शापान्मोचयित्वा यजेत्तत्र समाहितः ।
आनन्दभैरवं देवमानन्दभैरवीन्तथा ॥ २०० ॥

वेदानामिति । हे देवि सुधे ! आनन्दमयमानन्दस्वरूप यद्ब्रह्म तत्स्वरूप यत् प्रणवरूपं वेदानां बीजन्तेन सत्येन प्रणवरूपवेदबीजेन ते तव ब्रह्महत्या व्यपोहतु नश्यतु ॥ १९७–१९८ ॥

बारुणेनेति । ब्रह्मशापविशब्दस्यान्ते मोचितायै इति पदं वदेत् पश्चात् सुधादेव्यै नम इति वदेत् । योजनया ब्रह्मणा परिमोचितायै सुधादेव्यै नम इति मन्त्रो जातः । अयं मन्त्रः षड्दीर्घस्वरभाजिना बारुणेन बीजेन सयोज्य यथा वा वीं वूं वैं वौं व. ब्रह्मशापविमोचितायै सुधादेव्यै नम इति सप्तधा सप्तवारं पठितोऽयं मन्त्रो ब्रह्मशापनुत् ब्रह्मशापमोचको भवति ॥ १९९ ॥

अङ्कुशमिति । पूर्वं दीर्घषट्केन युतमङ्कुशं क्रां वदेत् । पश्चात् श्रीमायया युतं श्रीं ह्रीं बीजयुक्तं सुधेति पदं वदेत् । पश्चात् ब्रह्मणशापमिति मोचयेति च पदं वदेत् । ततोऽमृतं वदेत् । ततः स्रावयद्वन्द्वं वदेत् । योजनया । क्रां क्रीं क्रूं क्रैं क्रौं क्र. श्रीं ह्रीं सुधाब्रह्मणशाप मोचयामृतं स्रावय स्रावयेति मन्त्रो जातः । अयं मनुर्द्विठान्तः स्राद्वान्त ईरितः कथितः ॥ २०० ॥

सहस्रमलशब्दान्ते वरयूं मिलितं वदेत् ।
आनन्दभैरव ङेऽन्तं वषडन्तो मनुर्मतः ॥ २०१ ॥
अस्यास्यं विपरीतञ्च अवर्णे वामलोचना ।
सुधादेव्यै वौषडन्तो मनुरस्याः प्रपूजने ॥ २०२ ॥
सामरस्यं तयोस्तत्र ध्यात्वा तदमृतप्लुतम् ।
द्रव्यं विभाव्य तस्योर्द्ध्वं मूलं द्वादशधा जपेत् ॥ २०३ ॥
मूलेन देवतावह्नेर्दत्त्वा पुष्पाञ्जलिं ततः ।
दर्शयेद्धूपदीपौ च घण्टावादनपूर्वकम् ॥ २०४ ॥
इत्थं तीर्थस्य संस्कारः सर्वदा देवपूजने ।
व्रते होमे विवाहे च तथैवोत्सवकर्म्मणि ॥ २०५ ॥

एवमिति । एवमुक्तक्रमेण पूर्वोक्तौ षड्भिर्मन्त्रैर्ब्रह्मशापान्मोचयित्वा तत्र मद्ये आनन्दभैरवं देवन्तथानन्दभैरवीन्देवीं समाहितः सावधानः सन् यजेत् ॥ २०१ ॥

उभयोर्यजनस्य मन्त्रमाह । द्वाभ्याम् । सहेति । सहस्रमलशब्दान्ते मिलितं वरयूमिति पदं वदेत् । ततो ङेऽन्तमानन्दभैरवं वदेत् । योजनया । सहस्रमलवरयू आनन्दभैरवायेति मनुर्जातः अथ मनुर्वषडन्तो वषट् शब्दान्तो मतः ॥ २०२ ॥

अस्येत्यादि । अस्य हसत्रमलवरयूमित्यस्यास्यं मुखं विपरीतं पठनीयम् । अवर्णे अकारस्थाने वामलोचनमीकारः पठनीयः । ततः सुधादेव्यै इति पठनीयम् । योजनया सहस्रमलवरयी इति मनुर्जातः अस्या आनन्दभैरव्याः प्रपूजने वौषडन्तो वौषट् शब्दान्तोऽयमेव मनुर्मतः ध्यानन्भयोरग्रे वक्ष्यति ॥ २०३ ॥

सामरस्यमिति । तत्र मद्ये तयोरानन्दभैरव्यानन्दभैरवयोः सामरस्यमैक्यरूपन्ध्यात्वा तदमृतप्लुतं तत्सामरस्यरूपामृतप्लुतं द्रव्यं मद्यं विभाव्य विचिन्त्य तस्य मद्यस्योर्द्ध्वं द्वादशधा द्वादशवारं मूलं मन्त्रं जपेत् ॥ २०४ ॥

मांसमानीय पुरतस्त्रिकोणमण्डलोपरि ।
फट्याभुक्ष्य वायुवह्निबीजाभ्यां मन्त्रयेत्त्रिधा ॥ २०६ ॥
कवचेनावगुण्ठ्याथ संरक्षेच्चास्त्रमन्त्रतः ।
धेन्वावमृतीकृत्य मन्त्रमेतमुदीरयेत् ॥ २०७ ॥
विष्णोर्वक्षसि या देवी या देवी शङ्करस्य च ।
मांसं मे पवित्रीकुरु कुरु तद्विष्णोः परमं पदम् ॥२०८॥
इत्थं मीनं समानीय प्रोक्तमन्त्रेण संस्कृतम् ।
मन्त्रेणानेन मतिमांस्तं मीनमभिमन्त्रयेत् ॥ २०९ ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ २१० ॥

मूलेनेति । ततो देवतामुद्रया मूलेन मन्त्रेण मद्यं पुष्पाञ्जलिं दत्त्वा घण्टावादनपूर्वकं तस्योपरि धूपदीपौ च दर्शयेत् ॥ २०५ ॥

तीर्थस्य मद्यस्य ॥ २०६ ॥

अथ मांससंस्कारविधिमाह त्रिभिः । मांसमिति । मांसमानीय पुरतोऽग्रे त्रिकोणमण्डलोपरि संस्थाप्य फट्यां मन्त्रेणाभ्युक्ष्याभिषिच्य वायुवह्निबीजाभ्यां यं रं बीजाभ्यां त्रिधा त्रिवार मन्त्रयेत् ॥ २०७ ॥

कवचेनेति । ततः कवचेन हुं बीजेन मांसमवगुण्ठ्यावगुण्ठनमुद्रया वेष्टयित्वा अस्त्रमन्त्रतः फड्मन्त्रेण संरक्षेत् । धेन्वा मुद्रया च बीजेन मांसममृतीकृत्य एतमितोऽनन्तरमेव वक्ष्यमाण मन्त्रमुदीरयेदुच्चरेत् ॥ २०८ ॥

तमेव मन्त्रमाह । विष्णोरिति । विष्णोर्वक्षसि या देवी तिष्ठति या देवी शङ्करस्य च वक्षसि तिष्ठति सा त्वं मे मम मांसं पवित्रीकुरु । एवं प्रोक्षितमांससमर्पणात् मम तत्प्रधानं विष्णोः पदं कुरु ॥२०९॥

अथ मीनसंस्कारविधिमाह । इत्थमित्यादिना । प्रोक्तमन्त्रेण । मांसप्रोक्षणे कथितेन मन्त्रेण ॥ २१० ॥

तथैव मुद्रामादाय शोधयेदमुना प्रिये ! ।
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ २११ ॥
ॐ तद्विप्रासो विपण्यवो जाग्वांसः समिन्धते ।
विष्णोर्यत् परमं पदम् ॥ २११ ॥
अथ वा सर्वतत्त्वानि मूलेनैव विशोधयेत् ।
मूले तु श्रद्धानो यः किन्तस्य दलशाखया ॥ २१२ ॥
केवल मूलमन्त्रेण यद्द्रव्यं शोधित भवेत् ।
तदेव देवतापीत्यै सुप्रशस्तं मयोच्यते ॥ २१३ ॥
यथा कालस्य सत्त्वेपात् साधकानवकाशतः ।
सर्वं मूलेन संशोध्य महादेव्यै निवेदयेत् ॥ २१४ ॥
न चात्र प्रत्यवायोऽस्ति नाङ्गवैगुण्यदूषणम् ।
सत्यं सत्यं पुनः सत्यमिति शङ्करशासनम् ॥ २१५ ॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्म्म निर्णयसारे
श्रीसदाद्यासदाशिवसंवादे मन्त्रोद्धारकलशस्थापन-
तत्त्वसंस्कारो नाम पञ्चमोल्लासः ।

तमेव मन्त्रमाह । त्र्यम्बकं यजामह इति ॥ २११ ॥

मुद्राशोधनमन्त्रमेवाह । तद्विष्णोरिति । सूरयो विद्वांसः परमत्वात्-
कृष्टं तत् अविदुषमप्रत्यक्षं विष्णोः पदं सदा पश्यन्ति । अत्र दृष्टान्तमाह ।
दिवीत्यादि । आततं विस्तृतं चक्षुर्दिवि स्थित सन्मानागोचरं सूर्य्य-
मिव ॥ २११ ॥

सर्वतत्त्वानि मद्यादीनि ॥ २१२ । २१३ ॥

अत्र मूलमन्त्रेणैव शोधितानां सर्वतत्त्वानां महादेव्यै समर्प-
णेन ॥ २१४ । २१५ ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां पञ्चमोल्लासः ।

षष्ठोल्लासः ।

श्रीदेव्युवाच ।

यत्त्वया कथितं पञ्चतत्त्वं पूजादिकर्म्मणि ।
विशिष्य कथ्यतां नाथ ! यदि तेऽस्ति कृपा मयि ॥ १ ॥

श्रीसदाशिव उवाच ।

गौडी पैष्टी तथा माध्वी त्रिविधा चोत्तमा सुरा ।
सैव नानाविधा प्रोक्ता तालखर्जूरसम्भवा ।
तथा देशविभेदेन नानाद्रव्यविभेदतः ।
बहुधेयं समाख्याता प्रशस्ता देवतार्चने ॥ २ ॥
येन केन समुत्पन्ना येन केनाहृतापि वा ।
नात्र जातिविभेदोऽस्ति शोधिता सर्वसिद्धिदा ॥ ३ ॥
मांसन्तु त्रिविधं प्रोक्तं जलभूचरखेचरम् ।
यस्मात् तस्मात् समानीत येन तेन विघातितम् ।
तत् सर्वं देवताप्रीत्यै भवेदेव नसंशयः ॥ ४ ॥

मद्यादि पञ्चतत्त्व विशेषतः श्रोतुमिच्छन्ती श्रीदेव्युवाच यत्त्वयेत्यादि ॥ १ ॥

देव्यैव प्रार्थितः सन् श्रीसदाशिव उवाच गौडीत्यादि । गौडी गुडोद्भवा । पैष्टी पिष्टोद्भवा । माध्वी मधूकपुष्पोद्भवा इति त्रिविधा त्रिप्रकारा सुरा उत्तमा श्रेष्ठा प्रोक्ता सैव सुरैव । सुरायाः नानाविधत्वमेव दर्शयन्नाह । तालखर्जूरेत्यादि इयं सुरा ॥ २ ॥

आहृता आनीता अत्र सुराविषये ॥ ३ ॥

साधकेच्छा बलवती देये वस्तुनि देवते ।
यद् यदात्मप्रियं द्रव्यं तत्तदिष्टाय कल्पयेत् ॥ ५ ॥
बलिदानविधौ देवि ! विहितः पुरुषः पशुः ।
स्त्रीपशुर्न च हन्तव्यस्तत्र शाम्भवशासनात् ॥ ६ ॥
उत्तमास्त्रिविधा मत्स्याः शालपाठीनरोहिताः ॥ ७ ॥
मध्यमाः कण्टकैर्हीना अधमा बहुकण्टकाः ।
तेऽपि देव्यै प्रदातव्या यदि सुष्ठु विभर्जिताः ॥ ८ ॥
मुद्रापि त्रिविधा प्रोक्ता उत्तमादि विभेदतः ।
चन्द्रबिम्बनिभं शुभ्रं शालितण्डुलसम्भवम् ।
यवगोधूमजं वापि घृतपक्वं मनोरमम् ॥ ९ ॥
मुद्र्यमुत्तमा मध्या भ्रष्टधान्यादिसम्भवा ।
भर्जितान्यन्यबीजानि अधमा परिकीर्त्तिता ॥ १० ॥
मांस मौनञ्च मुद्रा च फलमूलानि यानि च ।
सुधादाने देवतायै संज्ञैषां शुद्धिरीरिता ॥ ११ ॥

मांसस्य त्रिविधत्वमेव दर्शयति जलेत्यादिना । जलचर कूर्म्मादि-मांसम् भूचर छागादिमांसम् खेचरंतित्तिरिहारीतादिमांसम् तत् सर्व्वम् मांसम् ॥ ४ ॥

कल्पयेत् समर्पयेत् ॥ ५ ॥

पुरुषः पुरुषावच्छिन्न तत्र बलिदानविधौ ॥ ६ । ७ ॥

तेऽपि वल्लकण्टका अपि मत्स्या ॥ ८ ॥

चन्द्रबिम्बनिभम् चन्द्रमण्डलसदृशम् शुभ्रम् श्वेतम् शालितण्डुल-सम्भवम् शुक्लयवादि ॥ ९ ॥

भ्रष्टधान्यादिसम्भवा लाजादि ॥ १० ॥

मांसमित्यादि । देवतायै सुधादाने सुरासमर्पणे एषां मांसादीनां शुद्धिरिति सञ्ज्ञा ईरिता कथिता ॥ ११ ॥

विना शुद्ध्या हेतुदानं पूजनन्तर्पणन्तथा ।
निष्फलं जायते देवि ! देवता न प्रमोदति ॥ १२ ॥
शुद्धिं विना मद्यपान केवलं विषभक्षणम् ।
चिररोगी भवेन्मर्त्यो खल्पायुस्त्रियतेऽचिरात् ॥ १३ ॥
शेषतत्त्वं महेशानि ! निर्बीजे प्रवले कलौ ।
स्वकीया केवला शेया सर्वदोषविवर्जिता ॥ १४ ॥
अथ वात्र स्वयम्भ्वादि कुसुमं प्राणवल्लभे ! ।
कथितं तत्प्रतिनिधौ कुषोदं परिकीर्त्तितम् ॥ १५ ॥
अशोधितानि तत्त्वानि पत्रपुष्पफलानि च ।
नैव दद्यान्महादेव्यै दत्त्वा वै नारकी भवेत् ॥ १६ ॥
शौपात्रस्थापनं कुर्य्यात् स्वीयया गुणशीलया ।
अभिषिञ्चेत् कारणेन सामान्यार्घोदकेन वा ॥ १७ ॥
आदौ बालां समुच्चार्य्य त्रिपुरायै ततो वदेत् ।
नमःशब्दावसाने च इमां शक्तिमुदीरयेत् ॥ १८ ॥

मांसादीनां शुद्धिसंज्ञाविधाने प्रयोजनं दर्शयन्नाह विना शुद्ध्येत्यादि । विना शुद्ध्या मांसादिकं विना हेतुदानम् सुरासमर्पणम् ॥ १२ ॥

शुद्धिम् मांसादिकम् । अचिरात् अत्यल्पमेव कालमतीत्य ॥ १३ ॥

शेषतत्त्वम् मैथुनम् निर्बीजे निस्तेजसि स्वकीया आत्मीया शक्तिः ॥ १४ ॥

अथवेत्यादि । अत्र शेषतत्त्वविधौ तत्प्रतिनिधौ स्वयम्भ्वादि कुसुमप्रतिनिधौ । कुषोदम् रक्तचन्दनम् ॥ १५ ॥

अशोधितानि सुरामांसादीनि महादेव्यै ददत साधकस्य नरकगामित्वमाह अशोधितानीत्यादिना ॥ १६ ॥

स्वीयया शक्त्या सह अभिषिञ्चेत् स्वीयां शक्तिमिति शेषः । कारणेन सुरया ॥ १७ ॥

पवित्रीकुरुशब्दान्ते मम शक्तिं कुरु द्वितः ॥ १९ ॥
अदीक्षिता यदा नारी कर्णे मायां समुच्चरेत्।
शक्तयोऽन्याः पूजनीयाः नार्य्यस्ताड़नकर्मणि ॥ २० ॥
अथात्मयन्त्रयोर्मध्ये मायागर्भं त्रिकोणकम्।
वृत्तं षट्कोणमालिख्य चतुरस्रं लिखेद्बहिः ॥ २१ ॥
अस्रकोणे पूर्णशैलमुड्डीयानन्तथैव च।
जालन्धरं कामरूपं सचतुर्थीनमोऽन्तकम्।
निजनामादिबीजाढ्यं पूजयेत् साधकोत्तमः ॥ २२ ॥

ननु केन मन्त्रेण स्त्रीया शक्तिरभिषेक्तव्येत्याकाङ्क्षायां तदभिषेक-मन्त्रमाह। आदावित्यादिना सार्द्धेन। आदौ बालाम् ऐं क्लीं सौरिति समुच्चार्य्य ततस्त्रिपुरायै इति वदेत् ततस्तदन्ते पठितस्य नमश्शब्दस्यावसानेऽन्ते इमां शक्तिमुदीरयेदुच्चरेत् तदन्ते च पठितस्य पवित्रीकुरुशब्दस्यान्ते मम शक्तिं कुरु इति वदेत्। ततो द्विठस्स्वाहेति वदेत् योजनया ऐं क्लीं सौं त्रिपुरायै नमः इमां शक्तिं पवित्रीकुरु मम शक्तिं कुरु स्वाहेति स्त्रीयाभिषेके मन्त्रो जातः ॥ १८ । १९ ॥

मायाम् ह्रीं बीजम् अन्या तत्रोपविष्टा स्त्रीयाभिन्नाः ताड़नकर्मणि मैथुन कर्मणि ॥ २० ॥

अथेत्यादि। अथानन्तरमात्मयन्त्रयोरात्मनो यन्त्रराजस्य च मध्ये मायागर्भं माया ह्रीं बीज गर्भे यस्यैवम्भूतं त्रिकोणक तद्बहिर्वृत्तं तद्बहिश्च षट्कोणं मण्डलमालिख्य ततोऽपि बहिश्चतुरस्रं चतुष्कोणं मण्डल लिखेत् ॥ २१ ॥

अस्रकोणे इति। ततो निजनामादिबीजाढ्यमात्मनामसम्बन्ध्यादिमाक्षररूपबीजसयुक्तं सचतुर्थिनमोऽन्तक सचतुर्थि चतुर्थीसहितं नमोऽन्तक नमोऽन्ते यस्य तथाभूत पूर्णशैलम् उड्डीयानञ्जालन्धर कामरूपञ्चास्रकोणे चतुष्कोणमण्डलस्य चतुर्षु कोणेषु साधकोत्तमः पूजयेत् पुं पूर्णशैलाय पीठाय नम इत्यनेन प्रथमकोणे पूर्णशैलम्

षट्कोणेषु षडङ्गानि मूलेनैव त्रिकोणकम्।
मायामाधारशक्तिञ्च नमोऽन्तेन प्रपूजयेत् ॥ २३ ॥
नमसा चालिताधारं संस्थाप्य तत्र पूर्ववत्।
दृत्तोपरि यजेद्वह्नेः कलाः स्वस्वादिमाञ्चरैः ॥ २४ ॥
धूम्रार्चिर्ज्वलिनी सूक्ष्मा ज्वालिनी विष्फुलिङ्गिनी।
सुश्रीः सुरूपा कपिला हव्यकव्यवहा तथा ॥ २५ ॥
सचतुर्थीनमोऽन्तेन पूज्या वह्नेः कला दश ॥ २६ ॥

ॐ ॐड्डीयानाय पीठाय नमः इत्यनेन द्वितीयकोणे ॐड्डीयानम् जां जालन्धराय पीठाय नमः इत्यनेन तृतीये जालन्धरम् का कामरूपाय पीठाय नमः इत्यनेन चतुर्थे कामरूपं पूजयेदित्यर्थः ॥ २२ ॥

षट्कोणेष्विति। ततः षट्कोणमण्डलस्य षट्कोणेषु हृदयं नमः हृीं नमः हृू नमः हृैं नमः हृौं नमः हृः नमः इति मन्त्रैः षडङ्गानि षट्कोणाधिष्ठातृदेवतानि प्रपूजयेत् मूलेनैव मन्त्रेण त्रिकोणकं त्रिकोणाधिष्ठातृदेवतं प्रपूजयेत्। मायामित्यादि। पूर्वं माया हृीं बीजं ततो नमोऽन्तेन नमसाऽन्तेन महाधारशक्तिञ्च वदेत् योजनया। हृीमाधारशक्तये नमः इति मन्त्रो जातः अनेन मन्त्रेण मण्डले आधारदेवता पूजयेत् ॥ २३ ॥

नमसेति। ततो नमसा नमोमन्त्रेण चालितमाधारं पूर्ववत् कलशस्थापने इव तत्र मण्डले संस्थाप्य दृत्तोपरि वर्तुलमण्डलोपरि संस्थापिताधारे वह्नेः कलाः यजेत्। वह्नेर्याः कलाः यजेत्ता आह। धूम्राद्या दशकलाः पूज्याः यथा धूं धूम्रायै नमः इति धूम्रा। अं अर्चिषे नमः इत्यनेनार्चिः। ज्वं ज्वलिन्यै नमः इति ज्वलिनी सूं सूक्ष्मायै नमः इत्यनेन सूक्ष्मा ज्वां ज्वालिन्यै नमः इत्यनेन ज्वालिनी विं विष्फुलिङ्गिन्यै नमः इति विष्फुलिङ्गिनी सुं सुश्रियै नमः इति सुश्रीः सु सुरूपायै नमः इत्यनेन सुरूपा क कपि-

मं वह्निमण्डलायेति दशान्ते च कलात्मने ।
अवसाने नमो दत्वा पूजयेद्वह्निमण्डलम् ॥ २७ ॥
ततोऽर्घ्यपात्रमानीय फट्कारेण विशोधितम् ।
आधारे स्थापयित्वा तु कलाः सूर्यस्य द्वादश ।
कभादिवर्णबीजेन ठडान्तेन प्रपूजयेत ॥ २८ ॥
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।
सुधूम्राभो गदाविश्वा बोधिनी धारिणी क्षमा ॥ २९ ॥

लायै नम इति कपिला ह्रं हव्यकव्यवहायै नम इत्यनेन हव्यकव्यवहा पूजयेति ॥ २४—२६ ॥

समित्यादि । पूर्वं मं वह्निमण्डलायेति दत्त्वा ततो दशान्ते कलात्मने इति दत्त्वा अवसाने तदन्ते च नमो दत्त्वा वह्निमण्डल पूजयेत् मं वह्निमण्डलाय दशकलात्मने नम इति मन्त्रेणाधारे वह्निमण्डलमर्चयेदित्यर्थ ॥ २७ ॥

तत इत्यादि । ततोऽनंतरं फट्कारेण फटा मन्त्रेण विशोधितमर्घ्यपात्रमानीयाऽधारे स्थापयित्वा तत्र सूर्यस्य द्वादशकलाः सानुस्वारेण ठडान्तेन ठडौ अन्तौ यस्य तत् ठडान्तं तेन कभादिवर्णबीजेन कादि भादि वर्णरूपेण बीजेन सहितेन सचतुर्थीनमोऽन्तेन नाममन्त्रेण प्रपूजयेत् ॥ २८ ॥

वा सूर्यकलाः प्रपूजयेत्ता आह तपिनीत्याद्येकेन । यथा । कं भं तपिन्यै नम इति तपिनीम् खं वं तापिन्यै नम इति तापिनीम् गं फं धूम्रायै नम इति धूम्राम् घं पं मरीच्यै नम इति मरीचीम् ङं नं ज्वालिन्यै नम इति ज्वालिनीम् चं धं रुचये नम इति रुचिम् छं दं सुधूम्रायै नम इति सुधूम्राम् जं थं भोगदायै नम इति भोगदाम् झं तं विश्वायै नम इति विश्वाम् ञं णं बोधिन्यै नम इति बोधिनीम् टं ढं धारिण्यै नम इति धारिणीम् ठ ड क्षमायै नम इति क्षमां प्रपूजयेदिति ॥ २९ ॥

ॐ सूर्यमण्डलायेति द्वादशान्ते कलात्मने ।
नमोऽन्तेनार्घ्यपात्रे तु पूजयेत् सूर्यमण्डलम् ॥ ३० ॥
विलोममातृकां तद्वन्मूलमन्त्रं समुच्चरन् ।
त्रिभागं पूरयेन्मन्त्री कलशस्थेन हेतुना ॥ ३१ ॥
विशेषार्घ्यजलैः शेषं पूरयित्वा समाहितः ।
षोड़शस्वरबीजेन नाममन्त्रेण पूजयेत् ।
सचतुर्थीनमोऽन्तेन कलाः सोमस्य षोड़श ॥ ३२ ॥
अमृता मानदा पूजा तुष्टिः पुष्टीरतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ।
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः ॥ ३३ ॥

ॐमित्यादि । पूर्वम् ॐ सूर्यमण्डलायेत्युक्त्वा ततो द्वादशान्ते कलात्मने इति वदेत् योजनया ॐ सूर्यमण्डलाय द्वादशकलात्मने इति आसीत् नमोऽन्तेन तेन मन्त्रेणार्घ्यपात्रे सूर्यमण्डलं पूजयेत् ॥ ३० ॥

विलोमेत्यादि । ततो मन्त्री साधकस्तद्वत् कलशपूरणे इव विलोममातृकां सानुस्वारान् चकारादीनकारान्तान् वर्णान् समुच्चरन् तेषामन्ते मूलमन्त्रञ्च समुच्चरन् सन् कलशस्थेन हेतुना स्तवार्घ्यपात्रस्य त्रिभागं पूरयेत् ॥ ३१ ॥

विशेषेत्यादि । समाहितः सावधानः सन् अर्घ्यपात्रस्य शेषमुर्ध्वं भागं विशेषार्घ्यजलैः पूरयित्वा सानुस्वारेण षोड़शस्वरबीजेन कथितेन सचतुर्थीनमोऽन्तेन नाममन्त्रेण सोमस्य षोड़शकलाः अर्घ्यपात्रस्य तोये पूजयेत् ॥ ३२ ॥

याः सोमकलाः पूजयेत्ता आह अमृतेत्यादिना सार्द्धेन । यथा ॐ अमृतायै नमः इत्यमृताम् ॐ मानदायै नमः इति मानदाम् ॐ पूजायै नमः इति पूजाम् ॐ तुष्टयै नमः इति तुष्टिम् ॐ पुष्टयै नमः इति पुष्टिम् ॐ रत्यै नमः इति रतिं ॐ धृत्यै नमः इति धृतिं ॐ शशिन्यै

ॐ सोममण्डलायेति षोड़शान्ते कलात्मने ।
नमोऽन्तेन यजेन्मन्त्री पूर्ववत् सोममण्डलम् ॥ २४ ॥
दूर्वाञ्चतं रक्तपुष्पं वर्वरामपराजिताम् ।
मायया प्रक्षिपेत् पात्रे तीर्थमावाहयेदपि ॥ २५ ॥
कवचेनावगुण्ठ्यास्त्रमुद्रया रक्षणञ्चरेत् ।
धेन्वा चैवामृतीकृत्य क्षादयेन्मत्स्यमुद्रया ॥ २६ ॥
मूलं सञ्जप्य दशधा देवतावाहनञ्चरेत् ।
आवाह्य पुष्पाञ्जलिना पूजयेदिष्टदेवताम् ।
अखण्डाद्यैः पञ्चमन्त्रैर्मन्त्रयेत्तदनन्तरम् ॥ २७ ॥

नम इति शशिनीं वृं चन्द्रिकायै नम इति चन्द्रिकां लृं कान्तये नम इति कान्तिम् एं ज्योत्स्नायै नम इति ज्योत्स्नां ऐं श्रियै नम इति श्रिय ओं प्रीतये नम इति प्रीतिं औं अङ्गदायै नम इत्यङ्गदां अं पूर्णायै नम इति पूर्णां अः पूर्णामृतायै नमः इत्यनेन पूर्णामृतां पूजयेदिति ॥ २३ ॥

अमित्यादि । पूर्वम् ॐ सोममण्डलायेत्युक्त्वा ततः षोड़शान्ते कलात्मने इति वदेत् योजनया ॐ सोममण्डलाय षोड़शकलात्मने इत्यादीत् नमोऽन्तेनानेन मन्त्रेण मन्त्री साधकः पूर्ववत् कलशतोयदूर्वाद्यर्घ्यपात्रतोये सोममण्डलं यजेत् ॥ २४ ॥

दूर्वेत्यादि । ततो दूर्वया सहितानक्षतान् रक्तं पुष्पं वर्वरां वर्वरापत्रमपराजिताञ्च पुष्पं मायया ह्रीबीजेन पात्रे प्रक्षिपेत् तत्रैव तीर्थमप्यावाहयेत् ॥ २५ ॥

कवचेनेति ततः कवचेन हुंबीजेनावगुण्ठ्यावगुण्ठन् मुद्रयार्घ्यपात्रस्थं सुधातोयं वेष्टयित्वाऽस्त्रमुद्रया तस्यैव रक्षणञ्चरेत् कुर्यात् धेन्वा मुद्रया च तदेवाऽमृतीकृत्य मत्स्यमुद्रयाच्छादयेत् ॥ २६

मूलमिति । ततोऽर्घ्यपात्रस्थसुधातोयस्योपरि मूलं मन्त्रं दशधा दशवारं संजप्य तत्रैव देवतावाहनञ्चरेत् इष्टदेवतामावाह्य च पुष्पाञ्ज-

अखण्डैकरसानन्दाकरे परसुधात्मनि।
स्वच्छन्दस्फुरणामत्र निधेहि कुलरूपिणि! ॥ ३८ ॥
अनङ्गस्थामृताकारे! शुद्धज्ञानकलेवरे!।
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि ॥ ३९ ॥
तद्रूपेणैकरस्यञ्च कृत्वार्घ्यं तत्स्वरूपिणि!।
भूत्वा कुलामृताकारमपि विस्फुरणं कुरु ॥ ४० ॥
ब्रह्माण्डरससम्भूतमशेषरससम्भवम्।
आपूरितं महापात्रं पीयूषरसमावह ॥ ४१ ॥
अहन्तापात्रभरितमिदन्तापरमामृतम्।

लिना पूजयेत् तदनन्तरमखण्डाद्यै. पञ्चमन्त्रैस्तदेव सुधातोयं मन्त्रयेत् मन्त्रित कुर्यात् ॥३७॥

तानेवाखण्डादीन् पञ्चमन्त्रान् क्रमतो दर्शयति अखण्डैकेत्यादि। हे कुलरूपिणि! अखण्डैकरसानन्दाकरे पूर्णप्रधानानुरागानन्दजनके परसुधात्मनि श्रेष्ठसुराखरूपेऽत्र वस्तुनि स्वच्छन्दस्फुरणां स्वतन्त्रा विस्फूर्त्तिं निधेहि स्थापय, शुद्धे रागे द्रवे रस इत्यमरः ॥ ३८ ॥

अनङ्गेत्यादि। हे अनङ्गस्थामृताकारे! कामस्थामृतस्वरूपे! हे शुद्धज्ञानकलेवरे! शुद्धज्ञानरूपशरीरे! त्वं क्लिन्नरूपिणि स्निग्धरूपिण्यस्मिन् सुरारूपे वस्तुनि अमृतत्वं निधेहि स्थापय ॥ ३९ ॥

तद्रूपेणेत्यादि। हे तत्स्वरूपिणि! तत्तत्स्वरूपशालिनि! त्वं तद्रूपेण प्रधानमाधुर्य्यरसरूपेणार्घ्यं मद्यमेकरसं प्रधानमाधुर्य्यरसविशिष्टं कृत्वा कुलामृताकारं सुरारूपं वस्तु च भूत्वा मयि विस्फुरणं विस्फूर्त्तिं कुरु ॥ ४० ॥

ब्रह्माण्डेत्यादि। हे देवि! सुरया पूरितं महापात्रं प्रति ब्रह्माण्डरससम्भूत ब्रह्माण्डे ये रसास्तेभ्यः सञ्जातमत एवाशेषरससम्भवम् अशेषस्य सर्वस्य रसस्यासम्भवो यत्र तथाभूत पीयूषरसमावहानय ॥ ४१ ॥

पराहन्तामये वह्नौ होमस्वीकारलक्षणम् ॥ ४२ ॥
इत्यामन्त्र्य ततस्तस्मिन् शिवयोः सामरस्यकम् ।
विभाव्य पूजयेद्धूपदीपावपि च दर्शयेत् ॥ ४३ ॥
इति श्रीपात्रसंस्कारः कथितः कुलपूजने ।
अकृत्वा पापभाङ् मन्त्री पूजा च विफला भवेत् ॥४४॥
घटश्रीपात्रयोर्मध्ये पात्राणि स्थापयेद्बुधः ।
गुरुपात्रं भोगपात्रं शक्तिपात्रमतः परम् ॥ ४५ ॥
योगिनीवीरपात्रे च बलिपात्रं ततः परम् ।
पाद्याचमनयोः पात्रं श्रीपात्रेण नव क्रमात् ।
सामान्यार्घ्यस्य विधिना पात्राणां स्थापनञ्चरेत् ॥४६॥
कलशस्थामृतेनैवं त्रिभागं परिपूर्य च ।
माषप्रमाणं पात्रेषु शुद्धिखण्डं नियोजयेत् ॥ ४७ ॥

अहन्तेत्यादि । अहन्ताऽहम्भाव तद्रूपे पात्रे भरितं धारितं यदिदन्तापरमामृतम् इदन्ता मदीयमिदं मदीयमिदमित्येतद्भाव· तद्रूपं यत् परममृत तस्य पराहन्तामये परा याऽहन्ताऽहम्भावस्तद्रूपे वह्नौ होमस्वीकारलक्षणं कुर्यात् अहन्तारूपपात्रसहितं तत् स्थापितेदन्तारूपपरमामृतं पराहन्तारूपे वह्नौ जुहुयादित्यर्थ ॥ ४२ ॥

इतीति । इति एतै पञ्चभिर्मन्त्रैर्मद्यमामन्त्र्य ततोऽनन्तरं तस्मिन्मद्ये शिवयोः शिवायाः शिवस्य च सामरस्यमैकरस्यं विभाव्य विचिन्त्य तन्मद्यं पूजयेत् तस्योपरि धूपदीपावपि च दर्शयेत् ॥ ४३ ॥

अकृत्वा श्रीपात्रसंस्कारमिति शेष. ॥ ४४ ॥

ननु घटश्रीपात्रयोर्मध्ये किद्दिं पात्रं स्थापयेत् तत्राह गुरुपात्रमित्यादि ॥ ४५ ॥

श्रीपात्रेण सह नव पात्राणि क्रमात् स्थापयेत् । ननु केन विधिना पात्राणि स्थापयेत् तत्राह सामान्यार्घप्रस्थेत्यादि ॥ ४६ ॥

वामाङ्गुष्ठानामिकाभ्याममृतं पात्रसंस्थितम्।
गृहीत्वा शुद्धिखण्डेन दत्त्वया तत्त्वमुद्रया।
सर्वत्र तर्पणं कुर्य्यात् विधिरेषः प्रकीर्त्तितः॥ ४८॥
श्रीपात्रात् परमं विन्दुं गृहीत्वा शुद्धिसंयुतम्।
आनन्दभैरवं देवं भैरवीञ्च प्रतर्पयेत्॥ ४९॥
गुरुपात्रामृतेनैव तर्पयेद् गुरुसन्ततिम्।
सहस्रारे निजगुरुं सपत्नीक प्रतर्प्य च।
वाग्भवाद्य स्वस्वनाम्ना तद्वद्गुरुचतुष्टयम्॥ ५०॥

कलशस्थेत्यादि। कलशस्थामृतेनैव तेषां पात्राणां त्रिभागं परिपूर्य्य मात्रप्रमाणं शुद्धिखण्डं मात्रादिखण्डं पात्रेषु निवोजयेत् स्थापयेत्॥ ४७॥

वामेत्यादि। वामाङ्गुष्ठानामिकाभ्यां दत्त्वया च तत्त्वमुद्रया शुद्धिखण्डेन सहितं पात्रसंस्थितममृतं गृहीत्वा सर्वत्र तर्पणं कुर्य्यात् सर्वत्र तर्पणे एष विधिः प्रकीर्त्तितः॥ ४८॥

श्रीपात्रादिति। श्रीपात्राच्छुद्धिसंयुतं परमं विन्दुं गृहीत्वा सहस्रदलवरयूम् आनन्दभैरवाय वषट् आनन्दभैरवं तर्पयामि नमः इत्यनेनानन्दभैरवं देवं हृत्पद्मदलवरयीम् आनन्दभैरव्यै वौषट् आनन्दभैरवीं तर्पयामि स्वाहेत्यनेनानन्दभैरवीञ्च प्रतर्पयेत्॥ ४९॥

गुरुपात्रेत्यादि। गुरुपात्रामृतेनैव गुरुसन्ततिं गुरुसमूहं तर्पयेत्। ननु केन मन्त्रेण कुत्र वा स्थाने गुरुसन्ततिं तर्पयेत्तत्राह सहस्रारे इत्यादि। सहस्रारे पद्मे सपत्नीकं निजगुरुं प्रतर्प्य वाग्भवम् ऐं वीजमाद्यं यस्य तथाभूतेन स्वस्वनाम्ना निजगुरुणा सह गुरुचतुष्टयं तद्वन्निजगुरुवत् प्रतर्पयेत् यथा ऐं सपत्नीकमसुकानन्दनाथश्रीगुरु तर्पयामि नमः इत्यनेन निजगुरुम् ऐं सपत्नीकं परमगुरुनाथमामि नमः इति परमम् ऐं सपत्नीकं परापरगुरुनर्पयामि नमः इति

ततः स्वहृदयाम्भोजे भोगपात्रामृतेन च ।
आद्यां कालीं तर्पयामि निजबीजपुरःसरम् ॥ ५१ ॥
स्वाहान्तेन त्रिधा मन्त्री तर्पयेदिष्टदेवताम् ।
शक्तिपात्रामृतैस्तद्वदङ्गावरणतर्पणम् ॥ ५२ ॥
योगिनीपात्रसंस्थेन सायुधां सपरीकराम् ।
सन्तर्प्य कालिकामाद्यां वटुकेभ्यो बलिं हरेत् ॥ ५३ ॥
स्ववामभागे सामान्यं मण्डलं रचयेत् सुधीः ।
सम्मृज्य स्थापयेत्तत्र सामिषान्नं सुधान्वितम् ॥ ५४ ॥
वाङ् मायाकमलावच्च वटुकाय नमः पदम् ।

परापरगुरुम् ओं सपत्नीकं परमेष्ठिगुरून्तर्पयामि नम इति परमेष्ठिगुरुं तर्पयेदिति ॥ ५० ॥

तत इत्यादि। ततोऽनन्तरं निजबीजपुरःसरं यथाशक्त्या स्वाहान्तेन स्वाहारूपेणान्तेन सद्यां कालीन्तर्पयामीत्युच्चरन्मन्त्री साधको भोगपात्रामृतेन स्वहृदयाम्भोजे इष्टदेवतां त्रिधा त्रिवारन्तर्पयेत् ह्रीं श्रीं क्रीं परमेश्वरि स्वाहाद्या कालीन्तर्पयामि स्वाहेति मन्त्रेण तर्पयेदित्यर्थः ततः शक्तिपात्रामृतैस्तद्वदेवाङ्गावरणतर्पणं कुर्यात् अङ्गदेवतास्तर्पयामि स्वाहेत्यनेनाङ्गदेवताः आवरणदेवतास्तर्पयामि स्वाहेत्यनेनावरणदेवताश्च तर्पयेदित्यर्थः ५१ । ५२ ॥

योगिनीत्यादि । योगिनीपात्रसंस्थेनामृतेन ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा सायुधां सपरीकरामाद्यां कालीं तर्पयामि स्वाहेति मन्त्रेण सायुधामायुधविशिष्टां सपरीकरां परिवारसहितामाद्यां कालिकां सन्तर्प्य वटुकेभ्यो बलिं हरेत् दद्यात् ॥ ५३ ॥

वटुकादिभ्यो बलिदानस्य विधिमाह स्ववामभागे इत्यादि। सुधीः धीरः स्ववामभागे सामान्यमुक्तलक्षणं मण्डलं रचयेत् तन्मण्डलं सम्मृज्य तत्र मण्डले चतुर्दिक्षु तन्मध्ये च सुधान्वितं सुरासयुक्तं सामिषान्नं मांसादिसहितमन्नं स्थापयेत् ॥ ५४ ॥

सम्मूज्य पूर्वभागे च वटुकस्य बलिं हरेत् ॥ ५५ ॥
ततस्तु यां योगिनीभ्यः स्वाहा याम्यां हरेद्बलिम् ॥ ५६ ॥
षड्दीर्घयुक्तं सम्वर्त्तं चेत्रपालाय हृन्मनुः ।
अनेन चेत्रपालाय बलिं दद्यात्तु पश्चिमे ॥ ५७ ॥
खान्तबीजं समुद्धृत्य षड्दीर्घस्वरसंयुतम् ।
ङेऽन्तं गणपतिं चोक्ता वह्निजायान्ततो वदेत् ॥ ५८ ॥
उत्तरस्यां गणेशाय बलिमेतेन कल्पयेत् ।
मध्ये तथा सर्वभूतबलि दद्याद् यथाविधि ॥ ५९ ॥

वाङ्मायेत्यादि । वाङ्मायाकमलावञ्च ऐ ह्री श्रीं सहितं वह्निरिति बीजमुक्ता वटुकाय नम इति पदं वदेत् योजनया ऐ ह्री श्री वं वटुकाय नम इति मन्त्रो जात. अनेनैव मन्त्रेण मण्डलस्य पूर्व्व भागे वटुकं सम्पूज्य तत्रैव एष. सुधामिश्रान्विताञ्चबलि. ऐं ह्रीं श्रीं व वटुकाय नम इति मन्त्रेण वटुकस्य बलि हरेत् दद्यात् ॥ ५५ ॥

ततस्त्विति । ततोऽनन्तरम् एष. सुधामिश्रान्विताञ्चबलिर्या योगिनीभ्यः स्वाहेति मन्त्रेण याम्या मण्डलस्य दक्षिणे भागे योगिनीभ्यो बलिं हरेत् ॥ ५६ ॥

षड्दित्यादि । षड्दीर्घयुक्त सम्वर्त्त चकारमुक्ता ततः चेत्रपालायेत्युक्ता ततो हृत् नम इति वदेत् सर्व्वपदयोजनया चां ची चुं चै चौं च चेत्रपालाय नम इति मनुर्जात. एष. सुधामिश्रान्विताञ्चबलिरित्याद्येनानेनैव मनुना मण्डलस्य पश्चिमे भागे चेत्रपालाय बलि दद्यात् ॥ ५७ ॥

खान्तेत्यादि । षड्दीर्घस्वरसंयुतं खान्तबीज स्वखान्तो गकारस्तद्रूपं बीज समुद्धृत्य ततो ङेऽन्तं गणपतिमुक्ता ततो वह्निजायां स्वाहेति वदेत् योजनया गा गी गु गैं गौ ग गणपतये स्वाहेति मन्त्रो जात. एष. सुधामिश्रान्विताञ्चबलिरित्याद्येनानेनैव मन्त्रेण उत्तरस्यां मण्डलस्योत्तरे भागे गणेशाय बलि कल्पयेद्दद्यात् तथैव मण्डलस्य मध्ये यथाविधि विधिवत् सर्व्वभूतबलि दद्यात् ॥ ५८ । ५९ ॥

ह्रीं श्रीं सर्वपदश्चोक्त्वा विघ्नकङ्कालस्ततो वदेत् ।
सर्वभूतेभ्य इत्युक्त्वा ह्रूं फट् स्वाहा मनुर्मतः ॥ ६० ॥
ततः शिवायै विधिवद्बलिमेकं प्रकल्पयेत् ।
गृह्ण देवि! महाभागे! शिवे! कालाग्निरूपिणि ! ॥ ६१ ॥
शुभाशुभं फलं व्यक्तं ब्रूहि गृह्ण बलिं तव ।
मूलमेष बलिः पश्चात् शिवायै नम इत्यपि ।
चक्रानुष्ठानमेतत्तु तवाग्रे कथितं शिवे ! ॥ ६२ ॥
चन्दनागुरुकस्तूरिवासितं सुमनोहरम् ।
पुष्पं गृहीत्वा पाणिभ्यां करकच्छपमुद्रया ॥ ६३ ॥
नीत्वा स्वहृदयाम्भोजे ध्यायेदाद्यां परात्पराम् ॥ ६४ ॥
सहस्रारे महापद्मे सुषुम्ना ब्रह्मवर्त्मना ।

सर्वभूतेभ्यो बलिदानस्य मन्त्रमाह एकेन श्लोकेति । ह्रीं श्रीं सर्वपदमुक्त्वा ततो विघ्नकङ्कालः इति वदेत् ततः सर्वभूतेभ्य इत्युक्त्वा ह्रूं फट् स्वाहेति वदेत् योजनया ह्रीं श्रीं सर्वविघ्नकङ्कालः सर्वभूतेभ्यो ह्रूं फट् स्वाहेति मनुर्जातः एष सुधाभिषान्वितान्नबलिरित्याद्योऽयमेव मनुः सर्वभूतेभ्यो बलिदाने मतः ॥ ६० ॥

तत इति । ततोऽनन्तरं शिवायै फेत्कारिकायै विधिवदेकं बलिं प्रकल्पयेत् दद्यात् शिवायै बलिदानस्य मन्त्रमाह सार्द्धेन । गृह्णेति गृह्ण देवि ! महाभागे ! इत्याद्युक्त्वा मूलमन्त्रं वदेत् ततः एष बलिरित्युक्त्वा पश्चात् शिवायै नम इत्यपि वदेत् सकलपदयोजनया गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा एष बलिः शिवायै नम इति मन्त्रोज्ञातः अनेनैव शिवायै बलिं दद्यात् ॥ ६१ । ६२ ॥

चन्दनेत्यादि । ततश्चन्दनागुरुकस्तूरिवासितं सुमनोहरं पुष्पं पाणिभ्यां गृहीत्वा करकच्छपमुद्रया हृदि नीत्वा च स्वहृदयाम्भोजे परात्परामाद्यां कालीं ध्यायेत् ॥ ६३ । ६४ ॥

नीत्वा सानन्दितां कृत्वा हृहन्निश्वासवर्त्मना ।
दीपाद्दीपान्तरमिव तत्र पुष्पे नियोज्य च ॥ ६५ ॥
यन्त्रे निधापयेन्मन्त्री दृढभक्तिसमन्वितः ।
कृताञ्जलिपुटो भूत्वा प्रार्थयेदिष्टदेवताम् ॥ ६६ ॥
देवेशि ! भक्तिसुलभे ! परिवारसमन्विते ! ।
यावत त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ॥ ६७ ॥
क्रौमाद्ये ! कालिके ! देवि ! परिवारादिभिः सह ।
इहागच्छ द्विधा प्रोक्ता इह तिष्ठ द्विधा पुनः ॥ ६८ ॥
इह शब्दात् सन्निधेहि इह सन्निपदात्ततः ।
रुध्यस्व पदमाभाष्य मम पूजां गृहाण च ॥ ६९ ॥
इत्यमावाहनं कृत्वा देव्याः प्राणान् प्रतिष्ठयेत् ॥ ७० ॥

सहस्रारे इति । स्वहृदयाम्भोजे ध्यात्वा चाद्यां कालीमत· सुषुम्ना या नाड़ी तद्रूपेण ब्रह्मवर्त्मना सहस्रारे सहापद्मे नीत्वा प्रापय्य सुधयामलया सानन्दितामानन्दयुताञ्च कृत्वा दीपाद्दीपान्तरमिवान्यं दीपमिव तस्मादेव कालीमत· सकाशादपरामाद्यां कालीं दृहन्निश्वास-वर्त्मना नासापुटेन बहिरानीय तत्र पाणिसंस्थे पुष्पे नियोज्य संस्थाप्य च दृढभक्तिसमन्वितो मन्त्री हस्तस्थपुष्पस्थापिता देवीं यन्त्रे निधापयेत् स्थापयेत् ततः कृताञ्जलिपुटो भूत्वेष्टदेवतां प्रार्थयेत् ॥ ६५ । ६६ ॥
किं प्रार्थयेत्तत्राह देवेशीत्यादि ॥ ६७ ॥

क्रौमाद्ये इत्यादि । क्रौमाद्ये कालिके देवि परिवारादिभिः सहेति प्रोच्य ततो द्विधा द्विवारमागच्छेति च प्रोच्य तत· पुनर्द्विधा इह तिष्ठेति प्रोच्य तत पुनरिह शब्दात् सन्निधेहीति प्रोच्य तत इह सन्नीतिपदात् रुध्यस्वेतिपदमाभाष्य ततो मम पूजां गृहाणेति वदेत् सकलपदयोजनया क्रौमाद्ये कालिके देवि परिवारादिभि· सहेहा-गच्छागच्छेह तिष्ठ तिष्ठेह सन्निधेहि इह सन्निरुध्यस्व मम पूजा गृहा-

आं ह्रीं क्रों श्रीं वह्निजायाप्रतिष्ठामन्त्र ईरितः ।
अमुष्या देवतायाश्च प्राणा इह ततः परम् ।
प्राणा इति ततः पञ्च बीजानि तदनन्तरम् ॥ ७१ ॥
अमुष्या जीव इह च स्थित इत्युच्चरेत् पुनः ।
पञ्चबीजान्यमुष्याश्च सर्वेन्द्रियाणि कीर्त्तयेत् ॥ ७२ ॥
पुनस्तत् पञ्च बीजानि अमुष्या वचनान्ततः ।
वाङ्मनोनयनघ्राणश्रोत्रत्वक्पदतो वदेत् ॥ ७३ ॥
प्राणा इहागत्य सुखं चिरन्तिष्ठन्तु ठद्वयम् ॥ ७४ ॥
इति विधा यन्त्रमध्ये लेलिहानाख्यमुद्रया ।

श्रीमिति मन्त्रो जातः इत्यमनेन प्रकारेणानेन मन्त्रेण देव्या आवाहनं कृत्वा तस्यामेव प्राणान् प्रतिष्ठयेत् प्राणप्रतिष्ठां कुर्यादित्यर्थः ॥ ६८—७० ॥

नन्वत्र केन मन्त्रेण देव्याः प्राणान् प्रतिष्ठयेदित्यपेक्षायां प्राणप्रतिष्ठामन्त्रमाह चतुर्भिः आमित्यादि । आं ह्रीं क्रों श्रीमित्युक्त्वा वह्निजाया स्वाहा वक्तव्या ततोऽमुष्या देवतायाः प्राणा इहेत्युक्त्वा ततः परं प्राणा इत्युच्चरेत् ततः आं ह्रीमित्यादीनि पञ्चबीजानि वदेत् ततोऽमुष्याः सर्वेन्द्रियाणीति वदेत् पुनस्तानि पञ्चबीजानि वदेत् तदनन्तरममुष्याजीव इह स्थित इत्युच्चरेत् पुनः तान्येव पञ्चबीजानि वदेत् ततोऽमुष्याः सर्वेन्द्रियाणीति वदेत् पुनस्तानि पञ्चबीजानि वदेत् ततोऽमुष्यावचनात् कथनात् परं वाङ्मनोनयनघ्राणश्रोत्रत्वक् पदं वदेत् तस्माच्च पदात् प्राणा इहागत्य सुखं चिरन्तिष्ठन्त्विति वदेत् ततः ठद्वयं स्वाहेति वदेत् सकलपदयोजनया आं ह्रीं क्रों श्रीं स्वाहा आद्याकालीदेवतायाः प्राणा इह प्राणाः आं ह्रीं क्रों श्रीं स्वाहा आद्याकालीदेवतायाः जीव इह स्थित. आं ह्रीं क्रों श्रीं स्वाहा आद्याकालीदेवतायाः सर्वेन्द्रियाणि आं ह्रीं क्रों श्रीं स्वाहा आद्याकालीदेवतायाः वाङ्मनोनयनघ्राणश्रोत्रत्वक् प्राणाः इहागत्य सुखं चिरन्तिष्ठन्तु स्वाहेति प्राणप्रतिष्ठामन्त्र ईरितः ॥ ७१—७४ ॥

संस्थाप्य विधिवत् प्राणान् कृताञ्जलिपुटो वदेत् ॥७५॥
आद्ये ! कालि ! स्वागतन्ते सुस्वागतमिदन्तव ।
आसनञ्चेदमत्र त्वयास्यतां परमेश्वरि ! ॥ ७६ ॥
ततो विशेषार्घ्यजलैस्त्रिधा मूलं समुच्चरन् ।
प्रोक्षयेद्देवशुद्ध्यर्थं षड्भैः सकलीकृतिः ।
ततः सम्पूजयेद्देवीं षोड़शैरुपचारकैः ॥ ७७ ॥
पाद्यार्घ्याचमनीयञ्च स्नानं वसनभूषणे ।
गन्धपुष्पे धूपदीपौ नैवेद्याचमने तथा ॥ ७८ ॥
अमृतञ्चैव ताम्बूलं तर्पणञ्च नतिक्रिया ।
प्रयोजयेदर्चनायामुपचारांश्च षोड़श ॥ ७९ ॥

इतीति। इत्यनेनैव प्राणप्रतिष्ठामन्त्रेण त्रिधा वारत्रय गुरूपदिष्टया लेलिहानाख्यमुद्रया यन्त्रमध्ये देव्या. प्राणान् विधिवत् संस्थाप्य कृताञ्जलिपुटः सन् वदेत् लेलिहानाख्यमुद्रया यथा दक्षिणामूर्त्तिसंहितायाम्। तर्जनीमध्यमानामाः समं कृत्वाऽधोमुखम्। अनामायां त्रिभेद्वङ्गामृजु कृत्वा कनिष्ठिकाम्। लेलिहानाम मुद्रेयं जीवन्यासे प्रकीर्त्तितेति ॥ ७५ ॥

किं वदेदित्यपेक्षायामाह आद्ये इत्यादि। सुष्ठु आगतं स्वागतम् ॥ ७६ ॥

तत इत्यादि। ततो मूलं मन्त्रं त्रिधा समुच्चरन् देवशुद्ध्यर्थं विशेषार्घ्यजलैर्देवीं प्रोक्षयेत् अभिषिञ्चेत् षड्भैः ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहा ह्रूं शिखायै वषट् ह्रैं कवचाय हुम् ह्रौं नेत्रत्रयाय वौषट् ह्रः अस्त्राय फट् इति मन्त्रैर्देव्या. सकलीकृतिः समस्तीकरणं विधेयम् सकलीकरणं यथा देवताङ्गे षड्ङ्गानां न्यासः स्यात सकलीकृतिरिति ॥ ७७ ॥

तानेव षोड़शोपचारान् दर्शयति पाद्येत्यादिना ॥ ७८ ॥

अमृतं मद्यम् प्रयोजयेत् निवेदयेत् ॥ ७९ ॥

आद्यावीजमिदं पाद्यं देवतायै नमः पदम् ।
देवताङ्गे षड़ङ्गानां न्यासः स्यात् सकलोक्तिः ।
पाद्यञ्चरणयोर्दद्यात् शिरस्यर्घ्यं निवेदयेत् ॥ ८० ॥
स्वाहापदेन, मतिमान् स्वधेत्याचमनीयकम् ।
मुखे नियोजयेन्मन्त्री मधुपर्कं मुखाम्बुजे ।
वं स्वधेति समुच्चार्य्य पुनराचमनीयकम् ॥ ८१ ॥
स्नानीयं सर्वगात्रेषु वसनं भूषणानि च ।
निवेदयामि मनुना दद्यादेतानि देशिकः ॥ ८२ ॥

अथ क्रमतः पाद्यादिषोड़शोपचारसमर्पणविधिमाह आद्यावीजमित्यादिभिः । आद्यावीजमुक्त्वा इदं पाद्यं देवतायै नम इति पदं वदेत् योजनया ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेदं पाद्यमाद्याकालीदेवतायै नम इति मन्त्रो जात अनेन मन्त्रेण देव्याश्चरणयोः पाद्य दद्यात् स्वाहा पदेन स्वाहापदघटितेन ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेदमर्घ्यमाद्यायै काल्यै स्वाहेति मन्त्रेण देव्याः शिरस्यर्घ्यं निवेदयेत् ॥ ८० ॥

स्वाहेत्यादि । स्वाहापदेनेति पूर्वान्वयि । मतिमान्मन्त्री स्वधेतिपदघटितेन ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेदमाचमनीयमाद्यायै काल्यै स्वधेति मन्त्रेण देव्या मुखे आचमनीयकं नियोजयेद्दद्यात् ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा एष मधुपर्क आद्यायै काल्यै स्वधेति मन्त्रेण देव्या मुखाम्बुजे मधुपर्कं नियोजयेत् ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेदमाचमनीयमाद्यायै काल्यै वं स्वधेति समुच्चार्य्य पुनर्देव्या मुखे आचमनीयकं नियोजयेत् ॥ ८१ ॥

स्नानीयमित्यादि । ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेदं स्नानीयमिदं वसनमेतानि भूषणानि चाद्यायै कालिकायै निवेदयामीति मनुना एतानि स्नानीयादीनि देव्याः सर्वगात्रेषु देशिकः साधको दद्यात् ॥ ८२ ॥

मध्यमानामिकाभ्याञ्च गन्धन्दद्याद्धृदम्बुजे ।
नमोऽन्तेन च मन्त्रेण वौषड्न्तेन पुष्पकम् ॥ ८३ ॥
धूपदीपौ च पुरतः संस्थाप्य प्रोक्षणादिभिः ।
निवेदयामि मन्त्रेण उत्सृज्य तदनन्तरम् ॥ ८४ ॥
जयध्वनि मन्त्रमातः स्वाहेति मन्त्रपूर्वकम् ।
सम्मृज्य घण्टां वामेन वादयन् दक्षिणेन तु ॥ ८५ ॥
धूपं गृहीत्वा मतिमान् नासिकाधो नियोजयेत् ।
दीपन्तु दृष्टिपर्य्यन्तं दशधा भ्रामयेत् पुरः ॥ ८६ ॥
ततः पानञ्च शुद्धिञ्च समादाय करद्वये ।
मूलं समुच्चरन् मन्त्री यन्त्रमध्ये निवेदयेत् ॥ ८७
परमं वारुणीकल्पं कोटिकल्पान्तकारिणि ! ।
गृहाण शुद्धिसहितं देहि मे मोक्षमव्ययम् ॥ ८८

मध्यमेत्यादि । नमोऽन्तेन ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा एतै गन्धं कालायै नम इति मन्त्रेण देव्या हृदम्बुजे मध्यमानामिकाभ्यां गन्धं दद्यात् वौषड्न्तेन ह्रीं श्रीं क्रीं परमेश्वरि स्वाहेदं पुष्पमाद्यायै कालै वौषडिति मन्त्रेण देव्यै पुष्पं दद्यात् ॥ ८३ ॥

धूपेत्यादि । पुरतो देव्यग्रे धूपदीपौ संस्थाप्य प्रोक्षणादिभिः संशोध्य च ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा एतौ धूपदीपावाद्यायै कालै निवेदयामीति मन्त्रेणोत्सृज्य देव्यै समर्प्य च तदनन्तरम् एते गन्धपुष्पे जयध्वनिमन्त्रमातः स्वाहेति मन्त्रपूर्वकं घण्टां सम्मृज्य वामेन हस्तेन तां घण्टां वादयन् सन् दक्षिणेन हस्तेन धूपं गृहीत्वा मतिमान् साधको देव्या नासिकाया अधो नियोजयेन्निवेदयेत् दीपन्तु पुरो देव्यग्रे पादमारभ्य दृष्टिपर्य्यन्तं दशधा दशवारं भ्रामयेत् ॥ ८३—८६ ॥

तत इत्यादि । ततोऽनन्तरं पानपात्रं शुद्धिं मांसादिकञ्च करद्वये समादाय गृहीत्वा मूलं मन्त्रं तदग्रे इदं सद्यमिमं शुद्धिञ्चाद्यायै कालै निवेदयामीति च सञ्चरन् मन्त्री यन्त्रमध्ये देव्यै निवेदयेत् ॥ ८७ ॥

ततः सामान्यविधिना पुरतो मण्डलं लिखेत् ।
तस्योपरि न्यसेत् पात्रं नैवेद्यपरिपूरितम् ॥ ८८ ॥
प्रोक्षणञ्चावगुण्ठञ्च रक्षणञ्चामृतीकृतम् ।
मूलेन सप्तधामन्त्र्य अर्घ्यार्हैर्विनिवेदयेत् ॥ ८० ॥
मूलमेतत्तु सिद्धान्नं सर्वोपकरणान्वितम् ।
निवेदयामीष्टदेव्यै जुषाणेदं हवि. शिवे ! ॥ ८१ ॥
ततः प्राणादिमुद्राभिः पञ्चभि प्राशयेद्धविः ॥ ८२ ॥
वामे नैवेद्यमुद्राञ्च विकचोत्पलसन्निभाम् ।
दर्शयेन्मूलमन्त्रेण पानार्थं तीर्थपूरितम् ॥ ८३ ॥

ततः प्रार्थनावाक्यमाह परमेत्यादि । वारुणीकल्पम् मद्यम् ॥८८॥
तत इति । ततोऽनन्तरं सामान्यविधिना साधारणविधानेन पुरतोऽग्रे त्रिकोणञ्चतुष्कोणं वा मण्डलं लिखेत् तस्य मण्डलस्योपरि नैवेद्यपरिपूरितं पात्रं न्यसेत् स्थापयेत् ॥ ८९ ॥

प्रोक्षणमिति । तत्पात्रस्यस्य नैवेद्यस्य परितः प्रोक्षणं ह्रं बीजेनावगुण्ठनं वेष्टनं परितश्चैव रक्षणं धेनुमुद्रया वा बीजेनामृतीकृतममृतीकरणञ्च विदध्यात् ततो मूलमन्त्रेण सप्तधा तन्नैवेद्यमामन्त्र्यार्घ्यार्हैरर्घ्यप्रजपैर्देव्यै निवेदयेत् ॥ ९० ॥

नैवेद्यनिवेदनमन्त्रमाह मूलेन । मूलमिति पूर्वं मूलं वदेत् ततः एतत् सर्वोपकरणान्वितं सिद्धान्नमिष्टदेवतायै निवेदयामीति वदेत् ततः शिवे ! हविरिदं जुषाणेति वदेत् योजनया ह्रीं श्रीं क्रीं परमेश्वरि स्वाहा एतत् सर्वोपकरणान्वितं सिद्धान्नमिष्टदेवतायै निवेदयामि शिवे हविरिदं जुषाणेति मन्त्रो नैवेद्यसमर्पणायासीत् सिद्धान्नमित्यामान्नस्वाद्युपलक्षणम् ॥ ९१ ॥

अत इत्यादि । ततोऽनन्तरमाणाय स्वाहा, अपानाय स्वाहा, समानाय स्वाहा, उदानाय स्वाहा, व्यानाय स्वाहेति मन्त्रैर्युक्तैरुपदिष्टाभिः पञ्चभिः प्रत्यादिमुद्राभिर्देवीं हविः प्राशयेत् भोजयेत् ॥ ९२ ॥

जलमं विनिवेद्याथ पुनराचमनीयकम् ।
तत: श्रीपात्रसस्थेनामृतेन तर्पयेत् त्रिधा ॥ ९४ ॥
उत्तमाङ्गे हृदाधारपादसर्वाङ्गकेषु च ।
पञ्चपुष्पाञ्जलीन्दत्वा मूलमन्त्रेण देशिकः ॥ ९५ ॥
कृताञ्जलिपुटो भूत्वा प्रार्थयेदिष्टदेवताम् ।
तवावरणदेवांश्च पूजयामि नमो वदेत् ॥ ९६ ॥
अग्निनिर्ऋतिवायव्यैशपुरतः पृष्ठतः क्रमात् ।
षडङ्गानि च सम्पूज्य गुरुपङ्क्तीः समर्चयेत् ॥ ९७ ॥
गुरुञ्च परमादिञ्च परापरगुरुन्तथा ।
परमेष्ठिगुरुञ्चैव यजेत् कुलगुरूनिमान् ॥ ९८ ॥

वाम इति । वामे हस्ते विकचोत्पलसन्निभां प्रफुल्लपङ्कजतुल्यां नैवेद्यमुद्राञ्च देवीं दर्शयेत् ततो मूलमन्त्रेण तीर्थपूरितं मद्येन पूरितं जलमं पानार्थं देव्यै निवेद्य पुनराचमनीयक दद्यात् । ततोऽनन्तर श्रीपात्रसस्थेनामृतेन सुरया त्रिधा त्रिवारं पूर्ववद्देवी तर्पयेत् ॥ ९३ ॥ ॥ ९४ ॥

उत्तमाङ्गेत्यादि । ततो देशिकः साधको देव्याः उत्तमाङ्गे मस्तके हृदये आधारदेशे पादयो सर्वाङ्गेषु च मूलमन्त्रेण पञ्च पुष्पाञ्जलीन् दत्वा कृताञ्जलिपुटो भूत्वेष्टदेवता प्रार्थयेत् । यत् प्रार्थयेत्तदाह्यार्द्धेन तवेति । त्वावरणदेवानित्युक्त्वा पूजयामि नम इति पदं वदेत् योजनया इष्टदेवते तवावरणदेवान् पूजयामि नम इति प्रार्थनावाक्यमासीत् ॥ ९५ ॥ ९६ ॥

आवरणदेवानां पूजायाः प्रकारं दर्शयति अग्नीत्यादिभिः । अग्निनिर्ऋतिवायव्यैशपुरत पृष्ठतः यन्त्रस्याग्निकोणे नैर्ऋत्यकोणे वायुकोणेऽैशानकोणे पुरतोऽग्रे पृष्ठतः पश्चाद्भागे च क्रमतः ह्रां नमः ह्रीं नम. ह्रूं नम. ह्रैं नमः ह्रौं नम. ह्र नम इति मन्त्रैः षडङ्गानि षडङ्गदेवतानि सम्पूज्य गुरुपङ्क्तीर्गुरुश्रेणीः समर्चयेत् ॥ ९७ ॥

गुरुपात्रामृतेनैव त्रिस्त्रिस्तर्पणमाचरेत् ।
ततोऽष्टदलमध्ये तु पूजयेदष्टनायिकाः ॥ ९९ ॥
मङ्गला विजया भद्रा जयन्ती चापराजिता ।
नन्दिनी नारसिंही च कौमारीत्यष्टमातरः ॥ १०० ॥
दलाग्रेषु यजेदष्टभैरवान् साधकोत्तमः ॥ १०१ ॥
असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तो भयङ्करः ।
कपाली भीषणश्चैव संहारोऽष्टौ च भैरवाः ॥ १०२ ॥
इन्द्रादिदशदिक्पालान् भूपुरान्तः प्रपूजयेत् ।
तेषामस्त्राणि तद्बाह्ये पूजयेत् तर्पयेत्ततः ॥ १०३ ॥

गुरुपङ्क्तीरेव दर्शयन्नाह गुरुञ्चेत्यादि । ओं गुरवे नमः ओं परमगुरवे नमः ओं परापरगुरवे नमः ओं परमेष्टिगुरवे नमः इति मन्त्रैर्गन्धपुष्पादिभिर्यन्त्रमध्ये गुरुं परमादिं परम आदिर्यस्य तथाभूतं गुरुन्तथैव परापरगुरुं परमेष्टिगुरुञ्चापीमान् कुलगुरून् क्रमतो यजेत् ॥ ९८ ॥

गुर्वित्यादि । गुरुपात्रामृतेनैव त्रिस्त्रिस्त्रिवारं त्रिवारं क्रमतो गुरूणां तर्पणमाचरेत् कुर्यात् ततोऽनन्तरमष्टदलमध्येऽष्टपत्राणामभ्यन्तरे ॐ मङ्गलायै नम इत्येवं प्रणवादिनमोऽन्तेन नाममन्त्रेण गन्धपुष्पादिभिरष्टनायिकाः पूजयेत् ॥ ९९ ॥

पूज्याः अष्टनायिका आह । मङ्गलेत्याद्येकेन ॥ १०० ॥

दलेत्यादि । दलाग्रेषु पत्राग्रेषु ओं असिताङ्गाय भैरवाय नम इत्येवं प्रणवादिनमोऽन्तेन नाममन्त्रेण गन्धपुष्पादिभिरष्टभैरवान् साधकोत्तमो यजेत् ॥ १०१ ॥

पूज्यानष्टभैरवानाह । असिताङ्ग इत्याद्येकेन ॥ १०२ ॥

इन्द्रेत्यादि । ततः प्रणवादिनमोऽन्तेन नाममन्त्रेण गन्धपुष्पादिभिरिन्द्रादिदशदिक्पालान् भूपुराभ्यन्तरे प्रपूजयेत् तेषामिन्द्रादीनामस्त्राणि वज्रादीनि प्रणवादिनमोऽन्तनाममन्त्रेण तद्बाह्ये भूपुराद्बहिः

सर्वोपचारैः सम्पूज्य बलिं दद्यात् समाहितः ॥ १०४॥
मृगश्छागश्च मेषश्च लुलापः शूकरस्तथा ।
शल्लकी शशको गोधा कूर्मः खड्गी दश स्मृताः ॥१०५॥
अन्यानपि पशून् दद्यात् साधकेच्छानुसारतः ॥१०६॥
सुलक्षणं पशुं देव्या अग्रे संस्थाप्य मन्त्रवित् ।
अर्घोदकेन सम्प्रोक्ष्य धेनुमुद्राप्रदर्शितम् ॥ १०७ ॥
कृत्वा छागाय पशवे नम इत्यमुना सुधीः ।
सम्पूज्य गन्धसिन्दूरपुष्पनैवेद्यपायसा ।
गायत्रीमुच्चरन् कर्णे जपेत् पाशविमोचनीम् ॥ १०८ ॥
पशुपाशं य प्रच्छाल्य विमुञ्चे [illegible] ।
विघ्नकर्मणि च पदात् धीमहीति पदं वदेत् ॥ १०९ ॥

पूजयेत् ततः परम् ओं इन्द्रमित्यादि नम इत्येव प्रणवादिना तुर्यन्तेन नामसम्बन्धेन इन्द्रादिदशदिक्पालांस्तर्पयेत् ॥१०३॥

सर्वेत्यादि । पाद्यादिभिः सर्वोपचारैर्देवीं सम्पूज्य समाहितः सावधानो भूत्वा देव्यै बलिं दद्यात् ॥ १०४ ॥

नन्वत्र बलिदानविधौ क. क. पशुः प्रशस्तः स्यात्तत्राह मृगमित्यादि । लुलापो महिषः मृगादयो दश बलिदानविधौ प्रशस्ताः स्मृता ॥१०५॥

अन्यानपीति । न तु मृगादय एव बलिदानविधौ प्रशस्ताः किन्तु साधकेच्छानुसारतोऽन्यानपि पशून् देव्यै दद्यात् ॥ १०६ ॥

अथ बलिदानविधिमाह सुलक्षणमित्यादिभिः । मन्त्रवित् मन्त्रज्ञः सुधीः धीरः साधकः सुलक्षणं रोगादिभूयं पशुं देव्या अग्रे संस्थाप्य विघ्नेशार्घोदकेन फट् मन्त्रेण संप्रोक्ष्याभिषिञ्चन् धेनुमुद्रया वं बीजेनामृतीकृतं कृत्वा छागाय पशवे नम इत्यमुना मन्त्रेण गन्धसिन्दूरपुष्पनैवेद्यपायसा सम्पूज्य च छागस्य दक्षिणे कर्णे पशुपाशविमोचनीं गायत्रीं जपेत् छागादीति मृगादीनामप्युपलक्षणं पाशो जलम् ॥ १०७ ॥१०८॥

पशुपाशविमोचनीं गायत्रीमाह पशुपाशेत्यादिना । मन्त्री साधकः

ततश्चोदीरयेन् मन्त्री तन्नोजीवः प्रचोदयात् ।
एषा तु पशुगायत्री पशुपाशविमोचनी ॥ ११० ॥
ततः खड्गं समादाय कूर्चबीजेन पूजयेत् ।
तदग्रमध्यमूलेषु क्रमतः पूजयेदिमान् ॥ १११ ॥
वागीश्वरीञ्च ब्रह्माणं लक्ष्मीनारायणौ ततः ।
उमामहेश्वरौ मूले पूजयेत् साधकोत्तमः ॥ ११२ ॥
अनन्तरं ब्रह्मविष्णुशिवशक्तियुताय च ।
खड्गाय नम इत्यन्तमनुना खड्गपूजनम् ॥ ११३ ॥
महावाक्येन चोत्सृज्य कृताञ्जलिपुटो वदेत् ।
यथोक्तेन विधानेन तुभ्यमस्तु ममर्पितम् ॥ ११४ ॥

पशुपाशायेति शब्दस्थाने विद्महे इति पदमुच्चरेत् ततो विश्वकर्मणे इति पदात् धीमहीति पदं वदेत् ततः परं तन्नो जीवः प्रचोदयात् इत्युदीरयेदुच्चरेत् योजनया पशुपाशाय विद्महे विश्वकर्मणे धीमहि तन्नोजीवः प्रचोदयात् इति गायत्री जाता ॥ १०९ ॥ ११० ॥

तत इत्यादि । कूर्चबीजेन हुमिति बीजेन तदग्रमध्यमूलेषु खड्गाग्रमध्यमूलेषु । यान् पूजयेत्तानाह्नैकेन वागीश्वरीमिति । ओं वागीश्वरीब्रह्मभ्यां नम इत्येव प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभिः खड्गाग्रे वागीश्वरीं सरस्वतीं ब्रह्माणञ्च ततः खड्गमध्ये लक्ष्मीनारायणौ ततः खड्गमूले उमामहेश्वरौ साधकोत्तमः पूजयेत् ॥१११॥११२॥

अनन्तरमिति । ततोऽनन्तरं ब्रह्मविष्णुशिवशक्तियुताय खड्गाय नम इत्यन्तमनुना खड्गपूजनं कुर्यात् ॥ ११३ ॥

महावाक्येनेति । ततो महावाक्येन विष्णुरोम् तत्सत् ओम् अद्यामुकमासामुकपक्षेऽमुकतिथावमुकराशिस्थिते भास्करे समस्ताभीप्सितपरार्थसिद्धिकामोऽमुकगोत्रोऽमुकनामाऽहमिमं खड्गदेवतायै पशुमिमं सम्प्रदद्ये इति सङ्कल्प्य मावाक्येन खड्गमुत्सृज्य देव्यै समर्प्य कृताञ्जलिपुटो भूत्वा वदेत् किं वदेत्तदाह यथेत्यादि ॥ ११३ ॥

इत्थं निवेद्य च पशुं भूमिरंशस्तु कारयेत् ॥ ११५ ॥
देवीभावपरो भूत्वा हन्यात्तीव्रप्रहारतः ।
स्वयं वा भ्रातृपुत्रैर्वा भ्रात्रा वा सुहृदैव वा ।
सपिण्डेनाथ वा क्षेत्र्यो नारिपक्षं नियोजयेत् ॥ ११६ ॥
ततः कवोष्णरुधिरं वटुभ्यो बलिं हरेत् ।
सप्रदीपमधूर्षबलिर्नमो ऽन्तैः निवेदयेत् ॥ ११७ ॥
एवं बलिविधिः प्रोक्तः कौलिकानां कुलार्चने ।
अन्यथा देवताप्रीतिर्जायते न कदाचन ॥ ११८ ॥
ततो होमं प्रकुर्वीत तद्विधानं शृणु प्रिये ! ॥ ११९ ॥
स्वदक्षिणे वालुकाभिर्कृतं चतुरस्रकम् ।
चतुर्हस्तपरिमितं कृत्वा मूलेन वीक्षणम् ।
अस्त्रेण ताडयित्वा च तेनैव प्रोक्षणं चरेत् ॥ १२० ॥
कूर्चबीजेनावगुण्ठ्य देवतानामपूर्वकम् ।
स्वण्डिलाय नम इति यजेत् साधकसत्तमः ॥ १२१ ॥

पशुं छागादिम् ॥ ११५ ॥

स्वयं वा आत्मनैव वा पशुहननेऽरिपक्षं न नियोजयेत् प्रवर्त्तयेत् ॥ ११६ ॥

तत इति । ततः परं एष कवोष्णरुधिरबलिः ओं वटुकेभ्यो नम इति मन्त्रेण कवोष्णमीषदुष्णं रुधिरबलिं निवेदयेत् ॥ ११७ ॥

अन्यथा बलिविधेरभावात् ॥ ११८ ॥ ११९ ॥

अथ होमविधानमाह स्वदक्षिणे इत्यादिभि । स्वदक्षिणे देशे वालुकाभिश्चतुर्हस्तपरिमितं चतुरस्रकञ्चतुष्कोणं मण्डलं कृत्वा मूलेन मन्त्रेण तस्य वीक्षणं विलोकनञ्च कृत्वा अस्त्रेण फट् मन्त्रेण कुशेन ताडयित्वा च तेनैव फट्टैव मन्त्रेण मण्डलस्य प्रोक्षणं सेकञ्चरेत् ॥ १२० ॥

कूर्चेत्यादि । कूर्चबीजेन क्लीमिति बीजेन तन्मन्त्रेणावगुण्ठ्य वेष्ट-

प्रागग्या उदगग्राश्च रेखाः प्रादेशसम्मिता ।
तिस्रस्तिस्रो विधातव्यास्तत्र सम्पूजयेदिमान् ॥ १२२ ॥
प्रागग्यासु च रेखासु मुकुन्देशपुरन्दरान् ।
ब्रह्मवैवस्वतेन्दूंश्च उत्तरायासु पूजयेत् ॥ १२३ ॥
ततः स्यखिलमध्ये तु हसौः गर्भं त्रिकोणकम् ।
षट्कोणं तद्बहिर्वृत्तं ततोऽष्टदलपङ्कजम् ।
भूपुरन्तद्बहिर्विद्वान् विलिखेत्यन्त्रमुत्तमम् ॥ १२४ ॥
मूलेन पुष्पाञ्जलिना संपूज्य प्रणवेन तु ।
होमद्रव्याणि सम्प्रोक्ष्य कर्णिकायां यजेत् सुधीः ।

यित्व. देवतानामपूर्वक स्यखिलाय नम इत्युच्चरन् साधकस्तत्तो यजेत् अमुकदेवतास्यखिलाय नम इति मन्त्रेण गन्धपुष्पादिभि स्यखिल पूजयेदित्यर्थ. ॥ १२१ ॥

प्रागग्या इति । प्राक् प्राच्यान्दिश्यग्राणि यासां ता प्रागग्या' उदक् उदीच्यान्दिश्यग्राणि यासां ता उदगग्राश्च प्रादेशसम्मिताः प्रादेशेन परिमितास्तिस्रस्तिस्रो रेखा स्यखिडले विधातव्या· तत्र तासु रेखासु इमान् सम्पूजयेत् तर्जनीयुक्ते विस्तृतेऽङ्गुष्ठे प्रादेश· स्यात् । तत्रै-वामरसिंह. प्रादेशतालगोकर्णस्तर्जन्यादियुते ततें । अङ्गुष्ठे सक्तनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुल इति ॥ १२२ ॥

तासु रेखासु यान् पूजयेत्तान् दर्शयन्नाह प्रागग्यासिति । प्राग-ग्यासु रेखासु प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभि मुकुन्देश-पुरन्दरान् विष्णुशिवेन्द्रान् क्रमत पूजयेत् । उत्तरायासु रेखासु तु ब्रह्मवैवस्वतेन्दून् ब्रह्मयमचन्द्रान् पूजयेत् ॥ १२३ ॥

तत इति । ततोऽनन्तर स्यखिलमध्ये हसौ मिलिता एव ह-कारसकारौकारविसर्गा गर्भे यस्य तथाभूत त्रिकोणकं तद्बहि षट्कोणं तद्बहिर्वृत्तं च मण्डलं ततो बहिरष्टदलपङ्कजं ततोऽपि बहिश्चतुष्कोण-ञ्चतुर्द्वार भूपुरञ्च विद्वान् विलिखेत् ॥ १२४ ॥

आधारमाधारशक्त्यादीन् प्रत्येकं वा प्रपूजयेत् ॥ १२५ ॥
अग्न्यादिकोणे धर्मञ्च ज्ञानं वैराग्यमेव च ।
ऐश्वर्यं पूजयित्वा तु पूर्वादिषु दिशां क्रमात् ॥१२६॥
अधर्ममज्ञानमिति अवैराग्यमनन्तरम् ।
अनैश्वर्यं यजेन्मन्त्री मध्येऽनन्तञ्च पङ्कजम् ॥ १२७ ॥
कलासहितसूर्यस्य तथा सोमस्य मण्डलम् ।
प्रागादिकेशरेष्वेषु मध्ये चैताः प्रपूजयेत् ॥ १२८ ॥
धूम्रा श्वेतारुणा कृष्णा धूम्रा तीव्रा तथैव च ।
स्फुलिङ्गिनी च रुचिरा ज्वलिनीति तथा क्रमात् ॥१२९॥
प्रणवादिनमोऽन्तेन सर्वत्र पूजनं चरेत् ।
रं वह्निरासनायेति नमोऽन्तेन प्रपूजयेत् ॥ १३० ॥

मूलेनेति । एवं लिखितसुत्तम यन्त्रं मूलेन मन्त्रेण पुष्पाञ्जलिना संपूज्य प्रणवेन होमद्रव्याणि च संप्रोक्ष्याष्टदलपद्मजस्य कर्णिकायां बीजकोणे समुदितानेवाधारशक्त्यादीन् माया ह्रीं बीजसहितान् सुधीः साधको यजेत् ह्रीमाधारशक्त्यादिभ्यो नम इति मन्त्रेण गन्धपुष्पादिभिः पूजयेदित्यर्थः. अथवा आधारशक्त्यादिक प्रत्येकमेव प्रपूजयेत् ॥ १२५ ॥

अग्नीत्यादि । प्रणवादिनमोऽन्तनामसमन्त्रेण गन्धपुष्पादिभिर्यन्त्रस्याग्न्यादिकोणे क्रमतो धर्मं ज्ञानं वैराग्यमैश्वर्यञ्च पूजयित्वा दिशा क्रमात् पूर्वादिषु दिक्षु अधर्ममज्ञानमवैराग्य एतदनन्तरमनैश्वर्यञ्च मन्त्री यजेत् यन्त्रस्य मध्येऽनन्तं पद्मकञ्च यजेत् ॥ १२६ ॥ १२७ ॥

कलेत्यादि । पूर्वोक्ताभ्यामेव मन्त्राभ्यां गन्धपुष्पादिभिः कलासहितसूर्यस्य तथा कलासहितस्य सोमस्य च मण्डलं यन्त्रमध्ये एव प्रपूजयेत् । एषु प्रागादिकेशरेषु मध्ये च क्रमेणैताः प्रपूजयेत् ॥ १२८ ॥

वा प्रपूजयेत्ता आह धूम्रेत्याद्येकेन । धूम्राश्वेतादीना मध्ये ज्वलिनी मध्ये प्रजयेत् ॥ १२९ ॥

वागीश्वरीसतुल्यातां नीलेन्दीवरलोचनाम् ।
वागीश्वरेण सयुक्तां ध्यात्वा मन्त्री तदासने ॥ १३१ ॥
मायया तौ प्रपूज्याथ विधिवद्वह्निमानयेत् ।
मूलेन वीक्षणं कृत्वा फटावाहनमाचरेत् ॥ १३२ ॥
प्रणव च ततो वह्नेर्योगपीठाय हृन्मनुः ।
यन्त्रे पीठं पूजयित्वा दिक्षु चैताः प्रपूजयेत् ।
वामा ज्येष्ठा तथा रौद्री अम्बिकेति यथाक्रमात्॥१३३॥
ततोऽमुक्या देवतायाः स्थण्डिलाय नमः पदम् ।
इति स्थण्डिलमापूज्य तन्मध्ये मूलरूपिणीम् ॥ १३४ ॥
ध्यात्वा वागीश्वरीं देवीं वह्निबीजपुरःसरम् ।
वह्निमुद्धृत्य मूलान्ते कूर्चमन्त्रं समुच्चरन् ॥ १३५ ॥

प्रणवादीत्यादि । सर्वत्र देये नमोऽन्तेन रं वह्नेरासनायेति मन्त्रेण यन्त्रमध्ये वह्नेरासनं प्रपूजयेत् ॥ १३० ॥

वागीश्वरीमिति । ततो वागीश्वरेण ब्रह्मणा सयुक्तां नीलेन्दीवरलोचनां श्यामपङ्कजनेत्राम् कृतस्नातां वागीश्वरीं ध्यात्वा मन्त्री साधकस्तदासने तस्मिन् वह्निपीठे तौ वागीश्वरीब्रह्माणौ मायया ह्रीं बीजाद्येन नमोऽन्तेन नामसन्त्रेण प्रपूज्याथानन्तरं विधिवत् शरावेण कांस्यपात्रेण वा गुह्यनिगमानयेत् मूलेन मन्त्रेण वह्नेर्वीक्षणं कृत्वा फटा मन्त्रेण तस्यैवावाहनञ्चरेत् ॥ १३१ ॥ १३२ ॥

प्रणवमिति । पूर्वं प्रणवं वदेत् ततो वह्नेर्योगपीठायेति वदेत् ततो हृत् नम इति वदेत् योजनया ॐ वह्नेर्योगपीठाय नम इति मनुर्जातः अनेनैव मनुना यन्त्रे वह्नेः पीठं पूजयित्वा पीठात् पूर्वादिषु चतसृषु दिक्षु प्रणवादिनमोऽन्तनामसन्त्रेण ब्रह्मपुष्पादिभिरेताश्च प्रपूजयेत् पूर्वादिदिक्षु याः प्रपूजयेत्ता आह वामेत्यादयश्चतस्रः ॥१३३॥

तत इति । ततोऽनन्तरम् अमुक्या देवतायाः स्थण्डिलाय नम इति सर्वं मन्त्रपदमुच्चरन् गन्धपुष्पादिभिः स्थण्डिलमापूज्य तन्मध्ये

क्रव्यादेभ्यो वह्निजायां क्रव्यादांशं परित्यजेत् ।
अस्त्रेण वह्निं सवीक्ष्य कूर्चेनैवावगुण्ठयेत् ॥ १३६ ॥
धेन्वा चैवामृतीकृत्य हस्ताभ्यामग्निमुद्धरेत् ।
प्रादक्षिण्यक्रमेणाग्निं भ्रामयन् स्वखिलोपरि ॥ १३७॥
त्रिधा जानुसृष्टभूमिः शिववीजं विचिन्तयन् ।
आत्मनोऽभिमुखो कृत्य योनियन्त्रे नियोजयेत् ॥१३८॥
ततो मायां समुच्चार्य वह्निमूर्त्तिञ्च ङेयुताम् ।
नमोऽन्तेन प्रपूज्याथ रं वह्निपरतः सुधीः ।
चैतन्याय नमो वह्नेश्चैतन्यं परिपूजयेत् ॥ १३९ ॥

मूलहेतालक्षणिणो वामोरौ देवीं ध्यात्वा वह्निबीजं पुरःसरं यत्र वह्नि-बीजपुरःसर यथालाभेन वह्निमुद्धृत्य र बीजेन वह्निसंस्थापनेत्यर्थः मूलान्ते कूर्च्चं ह्रूं बीजमन्त्र फडिति च बीज समुच्चरन् तदन्ते क्रव्यादेभ्य इत्युच्चरन् तदन्ते वह्निजाया स्वाहेत्युच्चरेत् योजनया ह्रीं श्रीं क्रौं परमेश्वरि स्वाहा ह्रूं फट् क्रव्यादेभ्यः स्वाहेति मन्त्रो जातः अनेनैव मन्त्रेण वह्नितोऽग्निरूपं क्रव्यादांशं राक्षसभागं दक्षिणस्था दिशि परित्यजेत् ततोऽस्त्रेण फट् वह्निं सवीक्ष्य दृष्ट्वा कूर्चेनैव ह्रूं बीजेनैवावगुण्ठयेद्वह्निं वेष्टयेत् ॥ १३४—१३६ ॥

धेन्वेति । धेन्वा मुद्रया चामृतीकृत्य हस्ताभ्यां पुनरग्निमुद्धरेत् उत्थापयेत् उत्थाप्य च प्रादक्षिण्यक्रमेण स्वखिलोपरि त्रिधा त्रिवारमग्निं भ्रामयन् शिववीज शम्भुवीर्य्यरूपमग्नि विचिन्तयंश्च साधको जानुसृष्टभूमिः सन्नात्मनोऽभिमुखीकृत्य योनियन्त्रे त्रिकोणमण्डले नियोजयेत् स्थापयेत् ॥ १३७ । १३८ ॥

ततइति । ततोऽनन्तरं मायां ह्रीं बीजं समुच्चार्य नमोऽन्तेन नमस्कारान्तेन सह ङेयुतां वह्निमूर्त्तिं समुच्चरेत् योजनया ह्रीं वह्निमूर्त्तये नमः इति मन्त्रो जातः अनेन मन्त्रेण वह्निमूर्त्तिं प्रपूज्याथानन्तरं सुधीः

नमसा वह्निमूर्त्तिञ्च चैतन्यं परिकल्प्य च ।
प्रज्वालयेत्ततो वह्निं मन्त्रेणानेन मन्त्रवित् ॥ १४० ॥
प्रणवं पूर्वमुद्धृत्य चित्पिङ्गलपदन्तथा ।
हनद्वयं दह दह पच पचेति ततो वदेत् ॥ १४१ ॥
सर्व्वज्ञा ज्ञापय स्वाहा वह्निप्रज्वालने मनुः ।
ततः कृताञ्जलिर्भूत्वा प्रकुर्य्यादग्निवन्दनम् ॥ १४२ ॥
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममल समिद्धं सर्व्वतोमुखम् ॥ १४३ ॥
इत्युपस्थाप्य दहनं क्षादयेत् स्थण्डिलं कुशैः ।
स्वेष्टनाम्ना वह्निनाम कृत्वाभ्यर्च्चनमाचरेत् ॥ १४४ ॥

साधको रं वह्नेः परतः चैतन्याय नम इति वदेत् योजनया रं वह्नि-चैतन्याय नम इति मन्त्रजातः अनेनैव मन्त्रेण वह्नेः चैतन्यं परिमृज-येत् ॥ १३९ ॥

नमसेति । नमसा मन्त्रेण वह्निमूर्त्तिं वह्नेः चैतन्यञ्च परिकल्प्य मनसा विरच्य ततोऽनेनानन्तरमेव वक्ष्यमाणेन मन्त्रेण मन्त्रवित् साधको वह्निं प्रज्वालयेद्दीपयेत् ॥ १४० ॥

वह्निप्रज्वालनमन्त्रमेवाह प्रणवमित्यादिना सार्द्धेन । पूर्वं प्रणव मुद्धृत्य उक्त्वा ततः परं चित्पिङ्गलपद वदेत् ततो हनद्वयं ततो दहद-हेति ततः पचपचेति च वदेत् तत. सर्व्वज्ञा ज्ञापय स्वाहेति वदेत् योजनया ओं चित्पिङ्गल हन हन दह दह पच पच सर्व्वज्ञा ज्ञापय स्वाहेति मन्त्रो जातः अयं मनुर्वह्निप्रज्वालने स्मृतः ॥ १४१ । १४२ ॥

अग्निवन्दनमन्त्रमाह अग्निं प्रज्वलितं वन्दे इति ॥ १४३

इतीति । इत्यनेनैव मन्त्रेण दहनं वह्निमुपस्थाप्याभिवन्द्य स्थण्डिलं क्षादयेत् ततः स्वेष्टनाम्ना वह्निनाम कृत्वा इतोऽनन्त वक्ष्यमाणेन मन्त्रेण वह्नेरभ्यर्च्चनमाचरेत् ॥ १४४ ॥

तारो वैश्वानरपदात् जातवेदपदं वदेत् ।
इहावहावहेत्युक्त्वा लोहिताक्षपदान्तरम् ॥ १४५ ॥
सर्वकर्माणि पदतः साधयान्ते ऽग्निवल्लभा ।
इत्यभ्यर्च्य हिरण्यादिसप्तजिह्वाः प्रपूजयेत् ॥ १४६ ॥
सहस्रार्चि.पदं ङेऽन्तं हृदयाय नमो वदेत् ।
षड़ङ्गं पूजयेद्वह्नेस्ततो मूर्त्तीर्यजेत् सुधीः ॥ १४७ ॥
जातवेदप्रभृतयो मूर्त्तयोऽष्टौ प्रकीर्त्तिताः ॥ १४८ ॥
ततो यजेदष्टशक्तीर्ब्राह्म्याद्यास्तदनन्तरम् ।
पद्माद्यष्टनिधीनिष्टा यजेदिन्द्रादिदिक्पतीन् ॥ १४९ ॥

वह्निप्रभ्यर्चनमन्त्रमेवाह तार इत्यादिना सार्द्धेन । पूर्वं तारः प्रणवो वाच्य ततो वैश्वानरपदात् पर जातवेदपदं वदेत् तत इहावहावहेत्युक्त्वा लोहिताक्षरूपपदान्तर वदेत् तत सर्वकर्माणीति पदात्पर साधयेति पदं वदेत् तदन्ते चाग्निवल्लभा स्वाहा वाच्या योजनया ओं वैश्वानरजातवेद इहावहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहेति मनुरासीत् इत्यनेनैव मनुना स्वेष्टदेवतानामानं वह्निमभ्यर्च्य ओं वह्नेर्हिरण्यादिसप्तजिह्वाभ्यो नमः इति मन्त्रेण वह्नेर्हिरण्यादिसप्तजिह्वा गन्धपुष्पादिभिः पूजयेत् ॥ १४५ । १४६ ॥

सहस्रेत्यादि । ङेऽन्तं सहस्रार्चि पदन्ततो हृदयाय नम इति च पदं वदन् सहस्रार्चिषे हृदयाय नम इति मन्त्र समुच्चरन् साधको वह्नेर्हृदयं पूजयेत् ततो वह्नेः षड़ङ्गेभ्यो नम इति मन्त्रेण गन्धपुष्पादिभिर्वह्नेः षड़ङ्गं पूजयेत् ततो वह्निमूर्त्तिभ्यो नमः इति मन्त्रेण वह्नेर्मूर्त्तीः सुधीर्यजेत् ॥ १४७ ॥

ननु वह्नेः कति मूर्त्तयः सन्तीत्यपेक्षायामाह जातवेदेत्यादि । जातवेदप्रभृतयो वह्नेरष्टौ मूर्त्तयः प्रकीर्त्तिताः पूर्वसूत्राः ॥ १४८ ॥

ततइति । ततोऽनन्तरं ततो ब्राह्म्यादिभ्योऽष्टशक्तिभ्यो नम इति मन्त्रेण गन्धपुष्पादिभिर्ब्राह्म्याद्याः अष्ट शक्तीर्यजेत् तदनन्तरं पद्माद्य-

वज्राद्यस्त्राणि सम्पूज्य प्रादेशपरिमाणकम् ।
कुशपत्रद्वयं नीत्वा घृतमध्ये निधापयेत् ॥ १५० ॥
वामे ध्यायेदिडां नाड़ीं दक्षिणे पिङ्गलान्तथा ।
मध्ये सुषुम्नां सञ्चिन्त्य दक्षभागात् समाहितः ॥ १५१ ॥
आज्यं गृहीत्वा मतिमान् दक्षनेत्रे हुताशितुः ।
मन्त्रेणानेन जुहुयात् प्रणवान्तेऽग्नये पदम् ॥ १५२ ॥
स्वाहान्तो मनुराख्यातो वामभागाद्धविर्हरेत् ।
वामनेत्रे हुनेद्ब्रह्मरों सोमाय द्विठो मनुः ॥ १५३ ॥
मध्यादाज्यं समानीय ललाटे हवनं चरेत् ।
अग्नीषोमौ सप्रणवौ तूर्य्यं हिवचुनान्वितौ ॥ १५४ ॥

इनिधिभ्यो नम इति मन्त्रेण गन्धपुष्पादिभिः पद्मादयष्टनिधीनिद्वा सम्पूज्य इन्द्रादिदिक्पतीन् यजेत् ॥ १४९ ॥

वज्रेत्यादि । तत इन्द्रादीनाञ्च वज्राद्यस्त्राणि सम्पूज्य प्रादेशपरिमाणकं कुशपत्रत्रयं नीत्वा गृहीत्वा घृतमध्ये वामे दक्षिणे निधापयेत् स्थापयेत् ॥ १५० ॥

वामे इत्यादि । घृतस्य वामे भागे इड़ां नाड़ीं ध्यायेत् दक्षिणे भागे पिङ्गलां नाड़ीं ध्यायेत् मध्ये च सुषुम्नां नाड़ीं सञ्चिन्त्य समाहितः सन् दक्षभागादाज्यं घृतं गृहीत्वा हुताशितुरग्नेर्दक्षनेत्रेऽनेनानन्तरमेव वक्ष्यमाणेन मन्त्रेण मतिमान् साधको जुहुयात् । दक्षनेत्रे हवनस्य मन्त्रमाह प्रणवान्ते इत्यादिना । प्रणवस्यान्तेऽग्नये इति पदं वाच्यम् योजनया ओं अग्नये इति मनुर्जातः अयञ्च मनुः स्वाहान्त आख्यातः ततो वामभागाद्धविर्हवनीयं घृतं हरेत् गृह्णीयात् गृहीत्वा च हविर्वह्नेर्वामनेत्रे वक्ष्यमाणमन्त्रेण हुनेत् जुहुयात् । वामनेत्रे हवनस्य मन्त्रमाह । ओं सोमाय द्विठः ओं सोमाय स्वाहेति मनुः प्रोक्त इति ॥ १५१—१५३ ॥

मध्यादिति । ततो मध्यादाज्यं समानीय गृहीत्वा वक्ष्यमाण-

स्वाहान्तोऽयं मनुः प्रोक्तः पुनर्दक्षिणतो हविः।
गृहीत्वा नमसा मन्त्री प्रणवं पूर्वमुद्धरेत् ॥ १५५ ॥
अग्नये च स्विष्टिकृते वह्निकान्तां ततो वदेत्।
अनेन वह्निवदने जुहुयात् साधकोत्तमः।
भूर्भुवः स्वर्द्विठान्तेन व्याहृत्या होममाचरेत् ॥ १५६ ॥
तारो वैश्वानरपदात् जातवेद इहावह।
वहलोहि पदान्ते च तान्तसर्वपदं वदेत्।
कर्माणि साधय स्वाहा त्रिधानेनाहुतीर्हरेत् ॥ १५७ ॥
ततोऽग्नौ स्वेष्टमावाह्य पीठाद्यैः सह पूजनम्।
कृत्वा स्वाहान्तमनुना मूलेन पञ्चविंशतीः ॥ १५८ ॥

मन्त्रेण वह्निर्ललाटे हवनं चरेत्। ललाटे हवनस्य मन्त्रमाह अग्नी-त्यादिना। तूर्यद्विवचनान्वितौ चतुर्थीद्विवचनयुक्तौ सप्रणवौ ओ-ङ्कारसहितौ अग्नीषोमौ वक्तव्यौ ततश्च ओं अग्नीषोमाभ्यामिति मनु-र्जात अयं मनुः स्वाहान्तः प्रोक्तः. मन्त्री साधको नमसा मन्त्रेण पुनर्दक्षिणतो हविः गृहीत्वा पूर्वं प्रणवमुद्धरेत् वदेत् ततोऽग्नये इति ततः स्विष्टिकृते इति ततो वह्निकान्ताञ्च वदेत् योजनया ओं अग्नये स्विष्टिकृते स्वाहेति मनुर्जात अनेन मनुना साधकोत्तमो वह्निवदनेऽ-ग्निमुखे जुहुयात् शोभनेष्टिं स्विष्टिं तां करोतीति स्विष्टिकृत् तस्मै क्रमात् ततो द्विठान्तेन स्वाहान्तेन भूरिति भुवरिति स्वरिति च व्याहृत्या होममाचरेत् ॥ १५४—१५६ ॥

तार इत्यादि। पूर्वं तारः प्रणवो वक्तव्यः ततो वैश्वानरेति पदात् पर जातवेद इहावहावह लोहि इति वदेत् तत्पदान्ते च तान्तसर्वेति पद वदेत् ततः कर्माणि साधय स्वाहेति वदेत् योजनया ओं वैश्वानर जातवेद इहावहावह लोहितान्त सर्वकर्माणि साधय स्वाहेति मनुर्जातः. अनेन मनुना त्रिधा वारत्रयमाहुतीर्हरे-द्दद्यात् ॥ १५७ ॥

हुत्वा वक्त्रात्मनोर्दैव्या ऐक्यं सम्भावयन् धिया
एकादशाहुतीर्हुत्वा मूलेनैवाङ्गदेवताः ॥ १५८ ॥
हुत्वा स्वकाममुद्दिश्य तिलाज्यमधुमिश्रितैः ॥ १६० ॥
पुष्पैर्विल्वदलैर्वापि यथाविहितवस्तुभिः ।
यथाशक्त्याहुतिं दद्यान्नाष्टन्यूनां प्रकल्पयेत् ॥ १६१ ॥
ततः पूर्णाहुतिन्दद्यात् फलपत्रसमन्विताम् ।
स्वाहान्तमूलमन्त्रेण ततः सहारमुद्रया ।
तस्माद्देवीं समानीय स्थापयेत् हृदयाम्बुजे ॥ १६२ ॥
त्वमग्ने इति च मन्त्रेण विसृजेत्तं हुताशनम् ।
क्षतदक्षिणको मन्त्री अच्छिद्रमवधारयेत् ॥ १६३ ॥
हुतशेषं भ्रुवोर्मध्ये धारयेत् साधकोत्तमः ॥ १६४ ॥

तत इत्यादि । ततोऽनन्तरमन्त्री स्वेष्ट देवताभावाद्य पूर्वोक्त-मन्त्रेण पीठाद्यै· सह तस्य पूजनञ्च कृत्वा मूलरूपेण स्वाहान्तमनुना पञ्चविंशतिमाहुतिर्वह्नौ हुत्वा प्रक्षिप्य वक्त्रात्मनो वह्नेरात्मनश्च देव्याश्चैक्यं धिया सम्भावयंश्चिन्तयन् मूलेनैवैकादशाहुतो हुत्वा ओम् अङ्गदेवताभ्य स्वाहेति मन्त्रेणाङ्गदेवताश्चोद्दिश्य हुत्वा विष्णुरों तत्सत् ओम् अद्यामुकमासमुकपक्षेऽमुकतिथावमुकराशिस्थिते भास्करे-ऽमुकाभीष्टार्थसिद्धिकामोऽमुकगोत्र· श्रीमदमुकशर्म्मा तिलाज्यादिमि-श्रितै· पुष्पैर्विल्वपत्रादिभिर्वा सार्द्धं वह्नावाहुतिमहं ददे इति वाक्येन स्वकाममुद्दिश्य स्वाहान्तमूलमन्त्रेण तिलाज्यमधुमिश्रितै· पुष्पैरथवा विल्वदलैर्यथाविहितवस्तुभिर्वा सह यथाशक्ति वह्नावाहुतिं दद्यात् अष्टन्यूनामाहुतिं न प्रकल्पयेत् ॥ १५८—१६१ ॥

तत इति । ततोऽनन्तरं स्वाहान्तमूलमन्त्रेण फलपत्रसमन्वितां फलताम्बूलयुतां पूर्णाहुतिं वह्नौ दद्यात् ततः परं संहारमुद्रया तस्माद्देवीं समानीय हृदयाम्बुजे स्थापयेत् ॥ १६२ ॥

त्वमग्ने इति । तत. अग्ने त्वमग्ने इति मन्त्रेण त हुताशनमग्निं

एष होमविधिः प्रोक्तः सर्वत्रागमकर्मणि ।
होमकर्म समाप्यैवं साधको जपमाचरेत् ॥ १६५ ॥
विधानं शृणु देवेशि । येन विद्या प्रसीदति ।
देवतागुरुमन्त्राणामैक्यं सम्भावयेद्धिया ॥ १६६ ॥
मन्त्रार्णा देवता प्रोक्ता देवता गुरुरूपिणी ।
अभेदेन यजेद्यस्तु तस्य सिद्धिरनुत्तमा ॥ १६७ ॥
गुरुं शिरसि सञ्चिन्त्य देवतां हृदयाम्बुजे ।
रसनायां मूलविद्यां तेजोरूपां विचिन्त्य च ।
त्रयाणान्तेजसात्मानमेकीभूतं विचिन्तयेत् ॥ १६८ ॥
तारेण सम्पुटीकृत्य मूलमन्त्रञ्च सप्तधा ।
जप्त्वा तु साधकः पश्चान्मातृकापुटितं स्मरेत् ॥ १६९ ॥
मायाबीजं स्वशिरसि दशधा प्रजपेत् सुधीः ।
वदने प्रणवं तद्वत् पुनर्मायां हृदम्बुजे ।

विसृजेत्तस्य विसर्जनं कुर्यात् ततः कृता दक्षिणा येन स कृतदक्षिणको मन्त्री साधकः कृतमिदं होमकर्माच्छिद्रमस्त्वित्यवधारयेत् ततो हुतशेषं भ्रुवोर्मध्यदेशे धारयेत् ॥ १६३ ॥ १६४ ॥

जपाचरणविधानमेवाह देवतेत्यादिभिः । सम्भावयेत् सम्यक् विचिन्तयेत् ॥ १६५ ॥ १६६ ॥

देवताद्यैक्यसम्भावनप्रकारान्तरफलञ्च दर्शयति मन्त्रेत्यादिना । मन्त्रार्णाः मन्त्रवर्णाः अभेदेन ऐक्यभावेन ॥ १६७ ॥

मूलविद्याम् मूलमन्त्रात्मिका विद्याम् त्रयाणाम् गुरुदेवता मूलमन्त्राणाम् ॥ १६८ ॥

तारेणेत्यादि । तारेण सम्पुटीकृत्य आदावन्ते च अकारादिक्षकारान्तैरेकपञ्चाशता वर्णैः सयुक्तं मूलमन्त्रं सप्तधा स्मरेत् जपेत् आगमजस्त्रानित्यत्वात् जप्त्वेत्यत्र नेड्आगमः ॥ १६९ ॥

प्रजप्य सप्तधा मन्त्री प्राणायामं समाचरेत् ॥ १७० ॥
ततो मालां समादाय प्रवालादिसमुद्भवाम् ।
माले माले महाभागे सर्वशक्तिस्वरूपिणि ! ॥ १७१ ॥
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ।
इति सम्पूज्य मालान्तां श्रीपात्रस्थामृतेन च ॥ १७२ ॥
त्रिधा मूलेन सन्तर्प्य स्थिरचित्तो जपञ्चरेत् ।
अष्टोत्तरसहस्रं वाप्यथवाष्टोत्तरं शतम् ॥ १७३ ॥
प्राणायामन्ततः कृत्वा श्रीपात्रजलपुष्पकैः ।
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥१७४॥
सिद्धिर्भवतु मे देवि ! त्वत्प्रसादान्महेश्वरि ! ।
इति मन्त्रेण मतिमान् देव्या वामकराम्बुजे ॥ १७५ ॥

मायेति । ततः सुधीः साधकः स्वशिरसि मायाबीजं ह्रीं बीजं दशधा प्रजपेत् ततो वदने स्वमुखे प्रणवं तद्वद्दशधा जपेत् हृदम्बुजे पुनर्माया ह्रीं बीजं सप्तधा प्रजप्य मन्त्री प्राणायाम पूर्ववत् समाचरेत् कुर्यात् ॥ १७० ॥

तत इति । ततोऽनन्तरं प्रवालादिसमुद्भवा विद्रुमादिसम्भवां माला समादाय गृहीत्वा माले माले इत्यादिना सिद्धिदा भवेत्यन्तेन मन्त्रेण तां मालां सम्पूज्य श्रीपात्रस्थामृतेन मालां सन्तर्पयामि स्वाहेत्यन्तेन मूलमन्त्रेण त्रिधा सन्तर्प्य च स्थिरचित्तो भूत्वाऽष्टोत्तरसहस्रमष्टोत्तरशत वा मूलमन्त्रस्य जपञ्चरेत् कुर्यात् ॥१७१॥१७२॥ १७३ ॥

प्राणेत्यादि । ततः परं प्राणायामं कृत्वा श्रीपात्रजलपुष्पकैः गुह्यातिगुह्येत्यादिना महेश्वरि इत्यन्तेन मन्त्रेण मतिमान् साधकस्तेनोक्तरूपं जपफलं देव्या वामकराम्बुजे समर्प्य भुवि दण्डवन्निपत्य देवीं प्रणमेत् ॥ १७४ ॥ १७५ ॥ १७६ ॥

आत्मसमर्पणमन्त्रमाह तत इत्यादिभि सार्द्धैश्चतुर्भि । ततः पूर्वं प्राणप्रतिष्ठादेवतार्चाधिकारतः आत्मन्यस्यप्रसङ्गप्राप्तं न्यासमाह ततो इति प्र-

तेजोरूपं जपफलं समर्प्य प्रणमेद्भुवि।
ततः कृताञ्जलिर्भूत्वा स्तोत्रञ्च कवचं पठेत् ॥ १७६ ॥
तत प्रदक्षिणीकृत्य विशेषार्घ्येण साधकः।
विलोमार्घ्यप्रदानेन कुर्यादात्मसमर्पणम् ॥ १७७ ॥
इत पूर्वं प्राणबुद्धिदेहधर्माधिकारतः।
जाग्रत्स्वप्नसुषुप्त्यन्ते अवस्थासु प्रकीर्त्तयेत ॥ १७८ ॥
मनसान्ते वदेद्वाचा कर्म्मणा तदनन्तरम्।
हस्ताभ्यां पदतः पद्भ्यामुदरेण ततः परम् ॥ १७९ ॥
शिश्नया यत् कृतञ्चोक्ता यत् स्मृतं पदतो वदेत्।
यदुक्तं तत् सर्वमिति ब्रह्मार्पणमुदीरयेत्।
भवत्वन्ते मां मदीय सकलं तदनन्तरम् ॥ १८० ॥
आद्याकालीपदाम्भोजे अर्पयामि पदं वदेत्।
प्रणवं तत्सदित्युक्ता कुर्यादात्मसमर्पणम् ॥ १८१ ॥
ततः कृताञ्जलिर्भूत्वा प्रार्थयेदिष्टदेवताम्।

कीर्त्तयेत् ततो मनसान्ते वाचा तदनन्तरं कर्म्मणा तदनन्तर हस्ताभ्यामिति वदेत् तस्माच्च पदात् पद्भ्राम् तत परमुदरेणेति च वदेत् तत पर शिश्नया यत् कृतञ्चोक्ता यत् स्मृतमिति वदेत् ततश्च पदात् पर यदुक्तं तत्सर्वमिति वदेत् ततो ब्रह्मार्पणमुदीरयेत् ततो भवत्वित्यन्ते मां मदीय सकलमित्युदीरयेत् तदनन्तरमाद्याकालीपदाम्भोजेऽर्पयामीति पदं वदेत् तत· प्रणव तत्सदिति च वदेत् सकलपदयोजनया इत· पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तावस्थासु मनसा वाचा कर्मणा हस्ताभ्या पद्भ्रामुदरेण शिश्नया यत् कृतं यत् स्मृत यदुक्त तत् सर्वं ब्रह्मार्पण भवतु मां मदीय सकलमाद्याकालीपदाम्भोजेऽर्पयामि ओं तत्सदिति मन्त्रो जात इम मन्त्रमुक्ता काल्यै आत्मसमर्पण कुर्यात् ॥१७७॥१७८॥१७९ ॥ १८० ॥१८१॥

मायाबीजं समुच्चार्य्य श्रीआद्ये कालिके ! वदेत् ॥१८२॥
पूजितासि यथाशक्त्या त्वमस्त्वेति विसृज्य च ।
संहारमुद्रया पुष्पमाघ्राय स्थापयेत् हृदि ॥ १८३ ॥
ऐशान्यां मण्डलं कृत्वा त्रिकोणं सुपरिष्कृतम् ।
तत्र संपूजयेद्देवीं निर्म्माल्यपुष्पवासिनीम् ।
ह्रीं निर्म्माल्यपदञ्चोक्त्वा वासिन्यै नम इत्यपि ॥१८४॥
ब्रह्मविष्णुशिवादिभ्य सर्व्वदेवेभ्य एव च ।
नैवेद्यं वितरेत् पश्चात् गृह्णीयात् शक्तिसाधकः ॥१८५॥
स्वीयशक्तिं वामभागे संस्थाप्य पृथगासने ।
एकासनोपविष्टो वा पात्रं कुर्य्यात् मनोरमम् ॥ १८६ ॥

तत इत्यादि । तत परं कृताञ्जलिर्भूत्वेष्टदेवतां प्रार्थयेत् किं प्रार्थयेदित्यपेक्षायामाह मायाबीजमित्यादि । मायाबीजं ह्रीं बीज समुच्चार्य्य श्रीआद्ये कालिके इति वदेत् ततो यथाशक्त्या पूजितासि त्वमस्त्वेति प्रार्थनावाक्यमासीत् अनेनैव वाक्येनेष्टदेवता विसृज्य च संहारमुद्रया पुष्पमादाय आघ्राय च स्वहृदि स्थापयेत् ॥१८२॥१८३॥

ऐशान्यामिति । तत ऐशान्या दिशि सुपरिष्कृत त्रिकोणं मण्डल कृत्वा तत्र मण्डले वक्ष्यमाणमन्त्रेण निर्माल्यपुष्पवासिनीं निर्माल्यवासिनीं देवीं संपूजयेत् निर्माल्यवासिन्या पूजनस्य मन्त्रमाह ह्रीमित्याद्यर्द्धेन । ह्रीं निर्माल्यपदमुक्त्वा वासिन्यै नम इति वदेत् योजनया ह्रीं निर्माल्यवासिन्यै नम इति मनुर्जात ॥ १८४ ॥

नैवेद्यं देव्यर्पितान्नादि वितरेत् दद्यात् शक्तिसाधक शक्तिसहित. साधक ॥ १८५ ॥

देवीनैवेद्यग्रहणविधानमाह स्वीयशक्तिमित्यादिभि । वामभागे पृथगासने स्वीयां शक्तिं संस्थाप्य स्वीयशक्त्या सहैकासने एवोपविष्टो वा साधकः प्रानभोजनार्थं मनोरमं रम्यं पात्र कुर्य्यात् ॥ १८६ ॥

पानपात्रं प्रकुर्वीत न पञ्चतोलकाधिकम्।
तोलकत्रितयाऽन्यूनं स्वार्णं राजतमेव च ॥ १८७ ॥
अथवा काचजनितं नारिकेलोद्भवञ्च वा।
आधारोपरि संस्थाप्य शुद्धिपात्रस्य दक्षिणे ॥ १८८ ॥
महाप्रसादमानीय पात्रेषु परिवेशयेत्।
स्वयं वा भ्रातृपुत्रैर्वा ज्येष्ठानुक्रमतः सुधीः ॥ १८९ ॥
पानपात्रे सुधा देया गौड्रे शुद्धादिकानि च।
ततः सामयिकैः सार्द्धं पानभोजनमाचरेत् ॥ १९० ॥
आदावास्तरणार्थाय गृह्णीयात् शुद्धिमुत्तमाम्।
ततोऽतिहृष्टमनसा समस्तः कुलसाधकः ॥ १९१ ॥
स्व स्व पात्रं समादाय परमामृतपूरितम्।
मूलाधारादिजिह्वान्तां चिद्रूपां कुलकुण्डलीम् ॥१९२॥
विभाव्य तन्मुखाम्भोजे मूलमन्त्रं समुच्चरन्।
परस्परान्नमादाय जुहुयात् कुण्डलीमुखे ॥ १९३ ॥

पानेत्यादि। पञ्चतोलकादधिकं तोलकत्रितयन्यूनञ्च पानपात्रं न प्रकुर्वीत तच्च स्वार्णं सुवर्णोद्भवं राजतं रजतोद्भवमथवा काचजनितं नारिकेलोद्भवं वा पानपात्रं शुद्धिपात्रस्य दक्षिणे देशे आधारोपरि संस्थाप्य सुधी धीरः साधको महाप्रसादमानीय स्वयं वा भ्रातृपुत्रैर्वा ज्येष्ठानुक्रमत एव पात्रेषु परिवेशयेत् जन्मतोऽत्र ज्यैष्ठ्यं न ग्राह्यं क्रियाभिषेकतं इति बोध्यम् ॥ १८७ ॥ १८८ ॥ १८९ ॥

पानेत्यादि। पानपात्रे सुधा मदिरा देया गौड्रे शुद्धिपात्रे शुद्धादिकानि मांसमत्स्यादीनि च देयानि ततं परं सामयिकैर्दिव्यवीर-समयाधिगतैर्जनैः सार्द्धं पानभोजनमाचरेत् ॥ १९० ॥

आदाविति। आदौ प्रथमतो मद्यंस्थापनार्थायास्तरणार्थायोत्तमां शुद्धिं गृह्णीयात् ततोऽतिहृष्टमनसा समस्तः सर्वः कुलसाधकः परमा-

अलिपानं कुलस्त्रीणां गन्धस्त्रीकारलक्षणम् ।
साधकानां गृहस्थानां पञ्चपात्रं प्रकीर्त्तितम् ॥१९४॥
अतिपानात् कुलीनानां सिद्धिहानिः प्रजायते ॥ १९५॥
यावन्न चालयेद् दृष्टिं यावन्न चालयेन्मनः ।
तावत् पानं प्रकुर्वीत पशुपानमतः परम् ॥ १९६ ॥
पाने भ्रान्तिर्भवेद्यस्य घृणी च शक्तिसाधके ।
स पापिष्ठः कथं ब्रूयादाद्यां कालीं भजाम्यहम् ॥१९७॥
यथा ब्रह्मार्पितेऽन्नादौ स्पृष्टदोषो न विद्यते ।
तथा तव प्रसादेऽपि जातिभेदं विवर्जयेत् ॥ १९८ ॥
एवमेव विधानेन कूर्य्यात् पानञ्च भोजनम् ।
हस्तप्रक्षालनं नास्ति तव नैवेद्यसेवने ।
लेपावनोदनं कुर्य्याद्दक्षेण पाथसापि वा ॥ १९९ ॥

कृतपूरितसुरसमद्यपूरितं स्वस्वपात्रं समादाय गृहीत्वा मूलाधारादि-जिह्वान्तं व्याप्य स्थितां चिद्रूपाञ्चैतन्यस्वरूपां कुलकुण्डलिनीं विभाव्य विचिन्त्य तन्मुखाम्भोजे मूलमन्त्रं सप्तधारन् सन् परस्परस्थात्मामादाय कुण्डलीमुखे जुहुयात् परमामृतं दद्यात् ॥ १९१ ॥ १९२ ॥ १९३ ॥

अलीत्यादि । कुलस्त्रीणां गन्धस्त्रीकारलक्षणं मद्यसम्बन्धिगन्धाङ्गी-करणस्वरूपमेवालिपानं मद्यपानं प्रकीर्त्तितम् गृहस्थैः साधकैः पञ्च-पात्रपरिमितमेव मद्यं पातव्यमित्यर्थः गृहस्थानामित्यनेन पञ्चपात्र-परिमितादधिकमपि मद्यं पिबता तज्ज्ञानां न दोष इति सूचितं ननु पञ्चपात्रपरिमितादधिकं मद्यं पिबता गृहस्थसाधकानां को दोष-स्तत्राह अतिपानादित्यादि ॥ १९४ ॥ १९५ ॥

चालयेत् घूर्णयेत् ॥ १९६ ॥

घृणी जुगुप्सावान् जुगुप्साकरणे घृणे इत्यमरः ॥ १९७॥१९८॥

लेपावनोदनम् हस्तलेपापनयनम् ॥ १९९॥

ततो निर्माल्यकुसुमं विधृत्य शिरसा सुधीः ।
यन्त्रलेपं कूर्चदेशे विहरेद्देववद्भुवि ॥ २०० ॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णयसारे श्रीमदाद्यासदाशिवसंवादे श्रीपात्रस्थापनहोमचक्रानुष्ठान-कथन नाम षष्ठोल्लासः ।

कूर्चदेशे भ्रुवोर्मध्यदेशे कूर्चमस्त्री भ्रुवोर्मध्यमित्यमरः ॥ २०० ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां षष्ठोल्लासः ।

सप्तमोल्लासः ।

श्रुत्वाद्याकालिकादेव्या मन्त्रोद्धारं महाफलम् ।
सौभाग्यमोक्षजननं ब्रह्मज्ञानैकसाधनम् ॥ १ ॥
प्रातःकृत्यं तथा स्नानं सन्ध्यां सम्विद्विशोधनम् ।
न्यासपूजाविधानञ्च बाह्याभ्यन्तरभेदतः ॥ २ ॥
बलिप्रदानं होमञ्च चक्रानुष्ठानमेव च ।
महाप्रसादस्वीकारं पार्वती हृष्टमानसा ।
विनयावनता देवी प्रोवाच शङ्करं प्रति ॥ ३ ॥

श्रीदेव्युवाच ।

सदाशिव ! जगन्नाथ ! जगतां हितकारक ! ।
कृपया कथितं देव ! पराप्रकृतिसाधनम् ॥ ४ ॥
सर्वप्राणिहितकरं भोगमोक्षैककारणम् ।
विशेषतः कलियुगे जीवानामाशु सिद्धिदम् ॥ ५ ॥
तव वागमृताम्भोधौ निमज्जन्मम मानसम् ।
नोत्थातुमीहते स्वैरं भूयः प्रार्थयतेऽचिरात् ॥ ६ ॥
पूजाविधौ महादेव्याः सूचितं न प्रकाशितम् ।
स्तोत्रञ्च कवचं देव ! तदिदानीं प्रकाशय ॥ ७ ॥

श्रुत्वेत्यादि । महाफलम् महत् फलं यस्य तथाभूतम् ॥१॥२॥३॥
पार्वती शङ्करं प्रति किं प्रोवाचेत्यत्राशङ्काह सदाशिवेत्यादि ॥४॥
५ ॥

तवेत्यादि । तव वागमृताम्भोधौ त्वदीयवाग्रूपसुधासमुद्रे निमज्जत् मम मानस हृदयन्ततः स्वैरं स्वच्छन्दमुत्थातु नेहते न वाञ्छति किन्तु भूयः पुनरप्यचिरादतिशीघ्रमेव त्वद्वागमृतं प्रार्थयते ॥ ६ ॥ ७ ॥

श्रीसदाशिव उवाच ।

शृणु देवि ! जगद्वन्द्ये ! स्तोत्रमेतदनुत्तमम् ।
पठनात् श्रवणाद्यस्य सर्वसिद्धीश्वरो भवेत् ॥ ८ ॥
असौभाग्यप्रशमनं सुखसम्पद्विवर्द्धनम् ।
अकालमृत्युहरणं सर्वापद्विनिवारणम् ॥ ९ ॥
श्रीमदाद्याकालिकायाः सुखसान्निध्यकारणम् ।
स्तवस्यास्य प्रसादेन त्रिपुरारिरहं शिवे ! ॥ १० ॥
स्तोत्रस्यास्य ऋषिर्देवि ! सदाशिव उदाहृतः ।
छन्दोऽनुष्टुब्देवताद्या कालिका परिकीर्त्तिता ।
धर्मकामार्थमोक्षेषु विनियोगः प्रकीर्त्तितः ॥ ११ ॥
क्रीं काली श्रीं कराली च क्रीं कल्याणी कलावती ।
कमला कलिदर्पघ्नी कपर्दीशक्तपान्विता ॥ १२ ॥
कालिका कालमाता च कालानलसमद्युतिः ।
कपर्दिनी करालास्या करुणामृतसागरा ॥ १३ ॥
कृपामयी कृपाधारा कृपापारा कृपागमा ।

पार्वत्यैवं प्रार्थितः सन् श्रीसदाशिव उवाच शृणुखित्यादि । अनुत्तमम् न उत्तमं यस्मात्तथाभूतम् ॥ ८ ॥ ९ ॥

त्रिपुरारिः त्रीणि स्वर्गभूमिपातालात्मकानि पुराणि यस्य सः त्रिपुरोऽसुरविशेषः तस्यारि शत्रुः ॥ १० ॥

अथास्य स्तोत्रस्य ऋष्यादिकमाह स्तोत्रस्येत्यादिना सार्द्धेन ॥ ११ ॥

अथाद्याकालीस्वरूपाख्य शतनामस्तोत्रं कथयति क्रीं कालीत्यादि । कपर्दीशक्तपान्विता कपर्दो जटाजुटोऽस्यास्तीति कपर्दी सदासावीशो जगत्प्रभुश्चेति कपर्दीशस्तस्य या कृपा तयान्विता युक्ता ॥ १२ ॥

करालास्या करालं दन्तुरमास्यं मुखं यस्याः सा । करालो दन्तुरे मुक्ते दन्त्यमरः ॥ १३ ॥

क्रमागतः कपिला कृष्णा कृष्णानन्दविवर्द्धिनी ॥ १४ ॥
कालरात्रिः कामरूपा कामपाशविमोचनी ।
कादम्बिनी कलाधारा कलिकल्मषनाशिनी ॥ १५ ॥
कुमारीपूजनप्रीता कुमारीपूजकालया ।
कुमारीभोजनानन्दा कुमारीरूपधारिणी ॥ १६ ॥
कदम्बवनसञ्चारा कदम्बवनवासिनी ।
कदम्बपुष्पसन्तोषा कदम्बपुष्पमालिनी ॥ १७ ॥
किशोरी कलकण्ठा च कलनादनिनादिनी ।
कादम्बरीपानरता तथा कादम्बरीप्रिया ॥ १८ ॥
कपालपात्रनिरता कङ्कालमाल्यधारिणी ।
कमलासनसन्तुष्टा कमलासनवासिनी ॥ १९ ॥
कमलालयमध्यस्था कमलामोदमोदिनी ।
कलहंसगतिः क्लैव्यनाशिनी कामरूपिणी ॥ २० ॥
कामरूपक्षेत्रवासा कामपीठविलासिनी ।
कमनीया कल्पलता कमनीयविभूषणा ॥ २१ ॥
कमनीयगुणाराध्या कोमलाङ्गी कृशोदरी ।
कारणामृतसन्तोषा कारणानन्दसिद्धिदा ॥ २२ ॥
कारणानन्दजापेष्टा कारणार्च्चनहर्षिता ।
कारणार्णवसम्मग्ना कारणव्रतपालिनी ॥ २३ ॥
कस्तूरीसौरभामोदा कस्तूरीतिलकोज्ज्वला ।

क्रमागमा क्रमया स्वकारुण्येनैव गम्यते ज्ञायते या सा तथा अहृदृष्टनिश्चिगम इति कर्मण्यम् ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

कलकण्ठा कलो गम्भीरशब्दयुक्तः कण्ठो यस्याः सा ॥ १८ ॥

कङ्कालमाल्यधारिणी शरीरास्थिमालाधारणशीला स्वाक्करी-

कस्तूरीपूजनरता कस्तूरीपूजकप्रिया ॥ २४ ॥
कस्तूरीदाहजननी कस्तूरीमृगतोषिणी ।
कस्तूरीभोजनप्रीता कर्पूरामोदमोदिता ।
कर्पूरमालाभरणा कर्पूरचन्दनोचिता ॥ २५ ॥
कर्पूरकारणाह्लादा कर्पूरामृतपायिनी ।
कर्पूरसागरस्नाता कर्पूरसागरालया ॥ २६ ॥
कूर्चबीजजपप्रीता कूर्चजापपरायणा ।
कुलीना कौलिकाराध्या कौलिकप्रियकारिणी ॥ २७ ॥
कुलाचारा कौतुकिनी कुलमार्गप्रदर्शिनी ।
काम्येश्वरी कष्टहर्त्री काम्येश्वरवरदायिनी ॥ २८ ॥
काम्येश्वरकृतामोदा काम्येश्वरमनोरमा ॥ २९ ॥
कलमञ्जीरचरणा क्वणत्काञ्चीविभूषणा ।
काञ्चनाद्रिकृतागारा काञ्चनाचलकौमुदी ॥ ३० ॥
कामबीजजपानन्दा कामबीजस्वरूपिणी ।
कुमतिघ्नी कुलीनार्त्तिनाशिनी कुलकामिनी ॥ ३१ ॥
क्रीं क्रीं श्रीं मन्त्रवर्णेन कालकण्टकघातिनी ।
इत्याद्या कालिकादेव्याः शतनाम प्रकीर्त्तितम् ॥ ३२ ॥
ककारकूटघटितं कालीरूपस्वरूपकम् ॥ ३३ ॥

रात्रि कङ्काल इत्यन्तैः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

कूर्चजापपरायणा ह्रूं बीजजपतत्परा ॥ २७ ॥ २८ ॥ २९ ॥
कलमञ्जीरचरणा कलौ गम्भीरशब्दयुतौ मञ्जीरौ चरणयोर्यस्याः सा ॥३०॥
कामबीजजपानन्दा कामबीजस्य क्लीमित्यस्य जपे आनन्दो यस्याः सा ॥ ३१ ॥ ३२ ॥

पूजाकाले पठेद्यस्तु कालिकाकृतमानसः ।
मन्त्रसिद्धिर्भवेदाशु तस्य काली प्रसीदति ॥ ३४ ॥
बुद्धिं विद्यां च लभते गुरोरादेशमात्रतः ।
धनवान् कीर्त्तिमान् भूयाद्दानशीलो दयान्वितः ॥ ३५ ॥
पुत्रपौत्रसुखैश्वर्य्यैर्मोदते साधको भुवि ॥ ३६ ॥
भौमावास्यानिशाभागे मपञ्चकसमन्वितः ।
पूजयित्वा महाकालीमाद्यां त्रिभुवनेश्वरीम् ॥ ३७ ॥
पठित्वा शतनामानि साक्षात् कालीमयो भवेत् ।
नासाध्यं विद्यते तस्य त्रिषु लोकेषु किञ्चन ॥ ३८ ॥
विद्यायां वाक्पतिः साक्षात् धने धनपतिर्भवेत् ।
समुद्र इव गाम्भीर्य्ये बले च पवनोपमः ॥ ३९ ॥
तिग्मांशुरिव दुष्प्रेक्ष्यः शशिवत् शुभदर्शनः ।
रूपे मूर्त्तिधरः कामो योषितां हृदयङ्गमः ॥ ४० ॥
सर्वत्र जयमाप्नोति स्तवस्यास्य प्रमादतः ।
यं यं कामं पुरस्कृत्य स्तोत्रमेतदुदीरयेत् ॥ ४१ ॥
तं तं काममवाप्नोति श्रीमदाद्याप्रसादतः ।
रणे राजकुले द्यूते विवादे प्राणसङ्कटे ॥ ४२ ॥
दस्युग्रस्ते ग्रामदाहे सिंहव्याघ्रावृते तथा ॥ ४३ ॥

ककारकूटघटितम् ककाररात्रिसम्मिलितम् ॥ ३३ ॥

अथैतत्स्तोत्रपाठस्य फलमाह पूजाकाले इत्यादिभिः ॥ ३४–३६ ॥

भौमेत्यादि । भौमावास्यानिशाभागे मङ्गलवारयुक्तामावास्यास-म्बन्धिमहानिशायामित्यर्थः पृषोदरादित्वाद्भौमावास्येत्यत्र मालोप, मपञ्चकसमन्वितः मद्यादिपञ्चकयुक्त ॥ ३७ ॥ ३८ ॥ ३९ ॥

तिग्मांशुरिव सूर्य्य इव दुष्प्रेक्ष्यो दुःखेन द्रष्टव्यः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

अरण्ये प्रान्तरे दुर्गे ग्रहराजभयेऽपि वा ।
ज्वरदाहे चिरव्याधौ महारोगादिसङ्कुले ॥ ४४ ॥
बालग्रहादिरोगे च तथा दुःस्वप्नदर्शने ।
दुस्तरे सलिले वापि पोते वातविपद्गते ॥ ४५ ॥
विचिन्त्य परमां मायामाद्यां कालीं परात्परम् ।
यः पठेच्छतनामानि दृढ़भक्तिसमन्वितः ॥ ४६ ॥
सर्वापद्भ्यो विमुच्येत देवि ! सत्यं न संशयः ।
न पापेभ्यो भयन्तस्य न रोगेभ्यो भयं क्वचित् ॥ ४७ ॥
सर्वत्र विजयस्तस्य न क्वापि पराभवः ।
तस्य दर्शनमात्रेण पलायन्ते विपद्गणाः ॥ ४८ ॥
स वक्ता सर्वशास्त्राणां स भोक्ता सर्वसम्पदाम् ।
स कर्त्ता जातिधर्माणां ज्ञातीनां प्रभुरेव सः ॥ ४९ ॥
वाणी तस्य वसेद्वक्त्रे कमला निश्चला गृहे ।
तन्नाम्ना मानवाः सर्वे प्रणमन्ति ससम्भ्रमाः ॥ ५० ॥
दृष्ट्या तस्य क्षणायन्ते क्षणिमाद्यष्टसिद्धयः ।
आद्याकालीस्वरूपाख्यं शतनाम प्रकीर्त्तितम् ॥ ५१ ॥
अष्टोत्तरशताढ्या पुरश्चर्य्यास्य गीयते ।
पुरस्क्रियान्वितं स्तोत्रं सर्वाभीष्टफलप्रदम् ॥ ५२ ॥
शतनामस्तुतिमिमामाद्याकालीस्वरूपिणीम् ।
पठेद्वा पाठयेद्वापि शृणुयाच्छ्रावयेदपि ॥ ५३ ॥
सर्वपापविनिर्मुक्तो ब्रह्मसायुज्यमाप्नुयात् ॥ ५४ ॥

प्रान्तरे तरुजलादिशून्ये स्थानेऽतो दूरेऽध्वनि ॥ ४६ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

ससम्भ्रमाः सभयाः सादरा वा ॥ ५१ ॥

श्रीसदाशिव उवाच।

कथितं परमं ब्रह्म प्रकृतेः स्तवनं महत्।
आद्यायाः श्रीकालिकाया कवचं शृणु साम्प्रतम् ॥५५
त्रैलोक्यविजयस्यास्य कवचस्य ऋषिः शिव।
छन्दोऽनुष्टुप् देवता च आद्या कालो प्रकीर्त्तिता ॥ ५६॥
मायाबीज बीजमिति रमा शक्तिरुदाहृता।
क्रीं कीलकं काम्यसिद्धौ विनियोगः प्रकीर्त्तितः ५७ ॥
ह्रीमाद्या मे शिरः पातु श्रीं काली वदनं मम।
हृदयं क्रीं परा शक्तिः पायात् कण्ठं परात्परा ॥५८ ॥
नेत्रे पातु जगद्धात्री कर्णौ रक्षतु शङ्करी।
घ्राणं पातु महामाया रसनां सर्वमङ्गला ॥ ५९ ॥
दन्तान् रक्षतु कौमारी कपोलौ कमलालया।
ओष्ठाधरौ चमा रक्षेत् चिबुकं चारुहासिनी ॥ ६० ॥
ग्रीवां पायात् कुलेशानी ककुत् पातु कृपामयी।
द्वौ बाहू बाहुदा रक्षेत् करौ कैवल्यदायिनी ॥ ६१ ॥
स्कन्धौ कपर्द्दिनी पातु पृष्ठं त्रैलोक्यतारिणी।
पार्श्वे पायादपर्णा मे कटिं मे कमठासना ॥ ६२ ॥
नाभौ पातु विशालाक्षी प्रजास्थान प्रभावती।
ऊरू रक्षतु कल्याणी पादौ मे पातु पार्वती ॥ ६३ ॥

अस्य शतनामस्तोत्रस्य ॥ ५२ ॥ ५३ ॥ ५४ ॥

कवचं कथयित्वा पार्वत्या पूर्वमेव प्रेरितः श्रीसदाशिव उवाच कथितमित्यादि ॥ ५५ ॥ ५६ ॥

मायाबीजं ह्रीमिति बीजम् रमा श्रीबीजम् ॥ ५७ ॥ ५८ ॥५९॥

चिबुकम् ओष्ठाधराधोभागम् ॥ ६० ॥ ६१ ॥ ६२ ॥

जयदुर्गावतु प्राणान् सर्वाङ्ग सर्वसिद्धिदा ।
स्थानहीनन्तु यत् स्थानं वर्जितं कवचेन च ॥ ६४ ॥
तत् सर्वं मे सदा रक्षेदाद्या काली सनातनी ।
इति ते कथितं दिव्यं त्रैलोक्यविजयाभिधम् ॥ ६५ ॥
कवचं कालिकादेव्या आद्यायाः परमाद्भुतम् ।
पूजाकाले पठेद्यस्तु आद्याधिक्रृतमानसः ॥ ६६ ॥
सर्वान् कामानवाप्नोति तस्याद्या सुप्रसीदति ।
मन्त्रसिद्धिर्भवेदाशु किङ्कराः क्षुद्रसिद्धयः ॥ ६७ ॥
अपुत्रो लभते पुत्रं धनार्थी प्राप्नुयाद्धनम् ।
विद्यार्थी लभते विद्यां कामी कामानवाप्नुयात् ॥ ६८ ॥
सहस्राद्दत्तपाठेन वर्म्मणोऽस्य पुरस्क्रिया ।
पुरश्चरणसम्पन्नं यथोक्तफलद भवेत् ॥ ६९ ॥
चन्दनागुरुकस्तूरीकुङ्कुमैरक्तचन्दनैः ।
भूर्ज्जं विलिख्य गुटिकां स्वर्णस्थां धारयेद् यदि ॥७०॥
शिखायां दक्षिणे बाहौ कण्ठे वा साधकः कटौ ।
तस्याद्या कालिका वश्या वाञ्छितार्थं प्रयच्छति ॥७१॥
न कुत्रापि भयं तस्य सर्वत्र विजयी कविः ।
अरोगी चिरजीवी स्यात् बलवान् धारणक्षमः ॥७२॥
सर्वविद्यासु निपुणः सर्वशास्त्रार्थतत्त्ववित् ।
वशे तस्य महीपाला भोगमोक्षौ करस्थितौ ॥ ७३ ॥

-प्रजास्थानम् उपस्थम् ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥

अथ त्रैलोक्यविजयाभिधकवचपाठस्य फलमाह । सर्वान् इत्यादिभि ॥ ६७ ॥ ६८ ॥

वर्म्मणः कवचस्य ॥ ६९ ॥ ७० ॥

कलिकल्मषयुक्तानां निःश्रेयसकरं परम् ॥ ७४ ॥

श्रीदेव्युवाच ।

कथितं कृपया नाथ ! स्तोत्रं कवचमेव च ।
अधुना श्रोतुमिच्छामि पुरश्चर्य्या विधिं विभो ! ॥ ७५ ॥

श्रीसदाशिव उवाच ।

यो विधिर्ब्रह्ममन्त्राणां पुरश्चरणकर्म्मणि ।
स एवाद्या कालिकाया मन्त्राणां विधिरिष्यते ॥ ७६ ॥
अशक्ते साधके देवि ! जपपूजाहुतादिषु ।
पूजां सङ्क्षेपतः कुर्य्यात् पुरश्चरणमेव च ॥ ७७ ॥
यतो हि निरनुष्ठानात् स्वल्पानुष्ठानमुत्तमम् ।
संक्षेपपूजनं भद्रे ! तत्रादौ शृणु कथ्यते ॥ ७८ ॥
आचम्य मूलमन्त्रेण ऋष्यादिन्यासं समाचरेत् ।
करशुद्धिं ततः कुर्य्यात् न्यासञ्च करदेहयो ॥ ७९ ॥
सर्वाङ्गव्यापकं कृत्वा प्राणायामं चरेत् सुधीः ।
ध्यानं पूजां जपञ्चेति संक्षेपपूजने विधिः ॥ ८० ॥
पुरश्क्रियायां मन्त्राणां यत्र यो विहितो जपः ।

प्रयच्छति ददाति ॥ ७१ ॥ ७२ ॥

निपुण. प्रवीण. ॥ ७३ ॥ ७४ ॥

अथाद्याकालीमन्त्राणां पुरश्चरणविधिं शुश्रूषुः श्रीदेव्युवाच कथितमित्यादि ॥ ७५ ॥

श्रीदेव्यैवं प्रेरित सन् श्रीसदाशिव उवाच यो विधिरित्यादि ॥ ७६ ॥

पुरश्चरणमेव च पुरश्चरणमपि च सङ्क्षेपतः कार्य्यम् ॥ ७७ ॥

संक्षेपपूजादिकरणे हेतुमाह । यतो हीति ॥ ७८ ॥

सङ्क्षेपपूजनमेवाह । आचम्येत्यादिभिः ॥ ७९ ॥

सर्वाङ्गव्यापकम् न्यासम् ॥ ८० ॥

तस्माच्चतुर्गुणजपात् पुरश्चर्या विधीयते ॥ ८१ ॥
अथ वान्यप्रकारेण पुरश्चरणमुच्यते ।
कृष्णां चतुर्दशीं प्राप्य कौजे वा शनिवासरे ।
पञ्चतत्त्वं समानीय पूजयित्वा जगन्मयीम् ॥ ८२ ॥
नक्तानिशायामयुतं जपेन्मन्त्रमनन्यधीः ।
भोजयित्वा ब्रह्मनिष्ठान् पुरश्चरणकृद्भवेत् ॥ ८३ ॥
कुजवासरमारभ्य यावन्मङ्गलवासरम् ।
प्रत्यहं प्रजपेन्मन्त्रं सहस्रपरिसंख्यया ॥ ८४ ॥
वसुसंख्याजपेनैव भवेन्मन्त्रपुरस्क्रिया ॥ ८५ ॥
श्रीआद्याकालिकामन्त्रा. सिद्धमन्त्राः सुसिद्धिदाः ।
सदा सर्वयुगे देवि । कलिकाले विशेषतः ॥ ८६ ॥
कालीरूपाणि बहुधा कलौ जाग्रति पार्वति ।
प्रबले कलिकाले तु रूपमेतत् जगद्धितम् ॥ ८७ ॥
नात्र सिद्धाद्यपेक्षास्ति नारिमित्रादिदूषणम् ।
नियमानियमे नापि जपन्नाद्यां प्रसादयेत् ॥ ८८ ॥
ब्रह्म ज्ञानमवाप्नोति श्रीमदाद्याप्रसादतः ।
ब्रह्मज्ञानयुतो मर्त्यो जीवन्मुक्तो न संशयः ॥ ८९ ॥
न च प्रयासबाहुल्य कायक्लेशोऽपि न प्रिये ।

अथ सक्षेपपुरश्चरणमाह पुरस्क्रियायामित्यादिभि ॥ मन्त्राणा यत्र पुरस्क्रियाया यो जपो विहितस्तस्माच्चतुर्गुणजपात् होमादिकं विनैव पुरश्चर्या विधीयते ॥ ८१ ॥ ८२ ॥

अयुतम् दशसहस्रम् ॥ ८३ ॥

अथ तृतीयं पुरश्चरणमाह । कुजेत्यादिना सार्द्धेन । यावन्मङ्गलवासरम् द्वितीयमङ्गलवारपर्य्यन्तमित्यर्थ ॥ ८४ ॥ ८५ ॥ ८६ ॥

एतद्रूपम् आद्यायाः कालिकायाः रूपम् ॥ ८७ ॥

आद्याकालीसाधकानां साधनं सुखसाधनम् ॥ ९० ॥
चित्तसंशुद्धिरेवात्र मन्त्रिणां फलदायिनी ॥ ९१ ॥
यावन्न चित्तकलिलं हातुमुत्सहते व्रती ।
तावत् कर्म प्रकुर्वीत कुलभक्तिसमन्वितः ॥ ९२ ॥
यथावद्विहितं कर्म चित्तशुद्धेर्हि कारणम् ।
आदौ मन्त्रं गुरोर्लब्ध्वा गृह्णीयात् ब्रह्ममन्त्रवत्॥९३॥
प्रातःकृत्यादिनियमान् कृत्वा कुर्य्यात् पुरस्क्रियाम् ।
चित्ते शुद्धे महेशानि । ब्रह्मज्ञान प्रजायते ।
ब्रह्मज्ञाने समुत्पन्ने कृत्याकृत्यं न विद्यते ॥ ९४ ॥

श्रीपार्वत्युवाच ।

कुलं किं परमेशान । कुलाचारश्च किं विभो ! ।
लक्षणं पञ्चतत्त्वस्य श्रोतुमिच्छामि तत्त्वतः ॥ ९५ ॥

श्रीसदाशिव उवाच ।

सम्यक् पृष्टं कुलेशानि । साधकानां हितैषिणि ।
कथयामि तव प्रीत्यै यथावद्वधारय ॥ ९६ ॥
जीवः प्रकृतितत्त्वञ्च दिक्कालाकाशमेव च ।
चित्यप्तेजोवायवश्च कुलमित्यभिधीयते ॥ ९७ ॥

अत्र आद्याकालीमन्त्रे ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥

यावदिति । यावत् कालपर्य्यन्तं चित्तकलिलञ्चेतसः कालुष्यं हातुं त्यक्तुं नोत्सहते न शक्नोति तावदेव कुलभक्तिसमन्वितो भूत्वा व्रती नियमवान् साधकः कर्म प्रकुर्वीत न तु तत परम् तत्र कारणमाह यथावदिति हि यतः ॥ ९२ ॥ ९३ ॥ ९४ ॥

कुलकुलाचारादिकं जिज्ञासुः श्रीपार्वत्युवाच कुलं किमित्यादि ॥ ९५ ॥

एवं प्रेरितः सन् श्रीसदाशिव उवाच सम्यक् पृष्टमित्यादि ॥ ९६ ॥

ब्रह्मबुद्ध्या निर्विकल्पमेतेष्वाचरणञ्च यत् ।
कुलाचार स एवाद्ये धर्मकामार्थमोक्षदः ॥ ९८ ॥
बहुजन्मार्जितैः पुण्यैस्तपोदानदृढ़व्रतैः ।
क्षीणाघानां साधकानां कुलाचारे मतिर्भवेत् ॥ ९९॥
कुलाचारगता बुद्धिर्भवेदाशु सुनिर्मला ।
तदाद्याचरणाम्भोजे मतिस्तेषां प्रजायते ॥ १०० ॥
सद्गुरोः सेवया प्राप्य विद्यामेनां परात्परम् ।
कुलाचाररता भूत्वा पञ्चतत्त्वैः कुलेश्वरीम् ॥ १०१ ॥
यजन्तः कालिकामाद्यां कुलज्ञाः साधकोत्तमाः ।
इह भुक्त्वाखिलान् भोगान् व्रजन्त्यन्ते निरामयम् ॥१०२
महौषधं यज्जीवानां दुःखविस्मारकं महत् ।
आनन्दजनकं यच्च तदाद्यतत्त्वलक्षणम् ॥ १०३ ॥
असंस्कृतञ्च यत्तत्त्वं मोहदं भ्रमकारणम् ।
विवादरोगजननन्त्याज्यं कौलैः सदा प्रिये ! ॥ १०४ ॥

प्रथमतस्तत्र कुलं निर्वक्ति जीव इत्याद्येकेन । जीवादयो नव कुलमित्यभिधीयते कथ्यते ॥ ९७ ॥

अथैकेन कुलाचार निर्वक्ति ब्रह्मबुद्ध्रेति । हे आद्ये ! एतेषु जीव-प्रकृत्यादिषु ब्रह्मबुद्ध्या निर्विकल्पं नानाविधकल्पनाशून्य यदाचरणं स एव धर्मकामार्थमोक्षदः कुलाचारोऽभिधीयते ॥ ९८ ॥

अथ कुलाचारस्य सुदुर्लभत्वमाह । बहुजन्मार्जितैरित्यादिना ॥९९॥

अथ कुलाचारस्य पुण्यफलत्वमाह । कुलाचारगतेत्यादिभि. ॥१००॥

विद्यामेनाम् मन्त्ररूपाम् ॥ १०१ ॥

निरामयम् सर्वोपद्रवरहितं मोक्षपदम् ॥ १०२ ॥

अथ क्रमतो मद्यादिपञ्चतत्त्वानां लक्षणमाह महौषधमित्यादिभिः ॥ १०३ ॥

ग्राम्यवायव्यवन्यानामुद्भूतं पुष्टिवर्द्धनम् ।
बुद्धितेजोबलकरं द्वितीयतत्त्वलक्षणम् ॥ १०५ ॥
जलोद्भवं यत् कल्याणि । कमनीयं सुखप्रदम् ।
प्रजाहृद्धिकरञ्चापि तृतीय तत्त्वलक्षणम् ॥ १०६ ॥
सुलभ भूमिजातञ्च जीवानां जीवनञ्च यत् ।
आयुर्म्मूल त्रिजगतां चतुर्थतत्त्वलक्षणम् ॥ १०७ ॥
महानन्दकर देवि । प्राणिनां सृष्टिकारणम् ।
अनाद्यन्तजगन्मूलं शेषतत्त्वस्य लक्षणम् ॥ १०८ ॥
आद्यतत्त्वं विद्धि तेजो द्वितीयं पवनं प्रिये ! ।
अपस्तृतीयं जानीहि चतुर्थं पृथिवीं शिवे ! ॥१०९॥
पञ्चमं जगदाधारा विद्धि वरानने ! ॥ ११० ॥
इत्थं ज्ञात्वा कुलेशानि । कुलतत्त्वानि पञ्च च ।
आचारं कुलधर्म्मस्य जीवन्मुक्तो भवेन्नरः ॥ १११ ॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णयाधारे श्रीमदाद्यासदाशिवसंवादे स्तोत्रकवच कुलतत्त्व लक्षण कथन नाम सप्तमोल्लास ।

तत्त्वम् आद्यतत्त्वम् ॥ १०४ ॥

ग्राम्येत्यादि । ग्राम्या ग्रामोद्भवाश्छागादयश्च वायव्या वायूद्भवास्तित्तिरिहारीतादयश्च वन्या वनोद्भवा हरिणादयश्च ते तेषाम् ॥१०५॥

कमनीयमाकाङ्क्षणीयम् ॥ १०६ ॥ १०७ ॥१०८॥१०९॥११०॥१११॥

इति श्रीमहानिर्वाणतन्त्रटीकायां सप्तमोल्लास. ।

अष्टमोल्लासः ।

श्रुत्वा धर्म्मान बहुविधान् भवानी भवमोचनी ।
हिताय जगतां माता भूयः शङ्करमब्रवीत् ॥ १ ॥

श्रीदेव्युवाच ।

श्रुतं बहुविधं धर्म्ममिदानीं मूल सूत्रतः ।
धर्म्मार्थकाममोक्षाणां विज्ञानं निश्चितं मम ॥ २ ॥
साम्प्रतं श्रोतुमिच्छामि ब्रूहि वर्णाश्रमान् विभो ! ।
तत्र ये विहिताचाराः कृपया वद तानपि ॥ ३ ॥

श्रीसदाशिव उवाच ।

चत्वारः कथिता वर्णाः आश्रमा अपि सुव्रते ! ।
आचाराश्चापि वर्णानामाश्रमाणां पृथक् पृथक् ॥४॥
कृतादौ कलिकाले तु वर्णाः पञ्च प्रकीर्त्तिताः ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रः सामान्य एव च ॥ ५ ॥

श्रुत्वेत्यादि । भवमोचनी भक्तसंसारभञ्जनशीला । जगतामिति काकाक्षिगोलकन्यायेन पूर्वोत्तराभ्यां पदाभ्यां सम्बध्यते ॥ १ ॥

किमब्रवीदित्यपेक्षायामाह श्रुतमित्यादि ॥ २ ॥

तत्र वर्णाश्रमेषु ॥ ३ ॥

एवं प्रेरितः सन् श्रीसदाशिव उवाच चत्वार इत्यादि । हे सुव्रते ! कृतादौ सत्यत्रेतादौ वर्णा आश्रमा अपि चत्वारः कथिता. वर्णानामाश्रमाणाञ्चाचाराश्चापि पृथक् पृथक् कथिता कलिकाले तु वर्णाः षड्राश्च ॥ ४ ॥ ५ ॥

एतेषां सर्व्ववर्णानामाश्रमौ द्वौ महेश्वरि ! ।
तेषामाचारधर्मांश्च शृणुष्वाद्ये ! वदामि ते ॥ ६ ॥
पुरैव कथितं तावत् कलिसम्भवचेष्टितम् ।
तपःस्वाध्यायहीनानां नृणामल्पायुषामपि ।
क्लेशप्रयासाशक्तानां कुतो देहपरिश्रमः ॥ ७ ॥
ब्रह्मचर्य्याश्रमो नास्ति वानप्रस्थोऽपि न प्रिये ! ।
गार्हस्थ्यो भैक्षुकश्चैव आश्रमौ द्वौ कलौ युगे ॥ ८ ॥
गृहस्थस्य क्रियाः सर्व्वा आगमोक्ताः कलौ शिवे ! ।
नान्यमार्गैः क्रियासिद्धिः कदापि गृहमेधिनाम् ॥ ९ ॥
भैक्षुकेऽप्याश्रमे देवि ! वेदोक्तं दण्डधारणम् ।
कलौ नास्त्येव तत्त्वज्ञे ! यतस्तत् श्रौतसंस्कृतिः ॥ १० ॥

एतेषामिति । हे आद्ये ! महेश्वरि ! एतेषां ब्राह्मणादीनां सर्व्ववर्णानां द्वावाश्रमौ तेषां वर्णाश्रमाणामाचाररूपान् धर्म्मांश्च ते तवाग्येऽहं वदामि त्वं शृणुष्वेत्यन्वयः ॥ ६ ॥

कलियुगे वर्त्तमानौ द्वावाश्रमावभिधास्यन्नादावेव पूर्व्वाश्रमद्वयाभावे हेतुं दर्शयति पुरैवेत्यादिना सार्द्धेन । कलौ सम्भव उत्पत्तिर्येषां ते कलिसम्भवाः तेषां चेष्टितं पुरैव कथितम् तावदित्यवधारणे । किञ्च तपइत्यादि । तपःस्वाध्यायहीनानां तपः कृच्छ्रादिकर्म्म स्वाध्यायो वेदपाठः ताभ्यां रहितानां क्लेशप्रयासाशक्तानां क्लेशः उपतापः प्रयासः परिश्रमः तयोर्निर्बलत्वादसमर्थानाम् किं त्वल्पायुषामपि एवं भूतानां नृणां देहपरिश्रमः कुतो भवेत् न केनापि प्रकारेण भवेदित्यर्थः ॥ ७ ॥

ब्रह्मचर्य्येत्यादि । हे प्रिये ! अतः कलौ युगे ब्रह्मचर्य्याश्रमो नास्ति वानप्रस्थोऽपि नास्ति किन्तु गार्हस्थ्यभैक्षुकरूपौ द्वावेवाश्रमौ कलौ स्तः ॥ ८ ॥

न केवलं कलौ युगे द्वयोराश्रमयोरेवाभावोऽस्ति किन्तु सर्व्वेषां

शैवसंस्कारविधिनावधूताश्रमधारणम्।
तदेव कथितं भद्रे! संन्यासग्रहणं कलौ॥ ११॥
विप्राणामितरेषाञ्च वर्णानां प्रबले कलौ।
उभयत्राश्रमे देवि! सर्वेषामधिकारिता॥ १२॥
सर्वेषामेव संस्काराः कर्माणि शैववर्त्मना।
विप्राणामितरेषाञ्च कर्मलिङ्गं पृथक् पृथक्॥ १३॥
जातमात्रो गृहस्थः स्यात् संस्कारादाश्रमी भवेत्।
गार्हस्थ्यं प्रथमं कुर्य्यात् यथाविधि महेश्वरि॥ १४॥

वैदिकक्रियाणामपीत्याह गृहस्थस्येत्यादिना। गृहमेधिनाम् गृहमङ्गीकृतवता गृहस्थानामित्यर्थः॥ ९॥

कलौ युगे गार्हस्थ्याश्रम एव वैदिकाः सर्वाः क्रियानिषिद्धानन्यपि तु भैक्षुकाश्रमेऽपीत्याह भैक्षुकेऽपीत्यादि। तत् वेदोक्तं दण्डधारणम् औतसंस्कृतं वैदिकं संस्कारं॥ १०॥

यद्येवं तर्हि कलौ किन्नाम सन्यासग्रहणं तत्राह शैवेत्यादि। हे भद्रे! शैवसंस्कारविधिना शिवप्रोक्तेन संस्कारविधानेनावधूताश्रमधारणं यत्तदेव कलौ युगे सन्यासग्रहणं कथितम्॥ ११॥

ननु कलौ युगे ब्राह्मणादीनां सर्वेषामपि वर्णानां सन्यासाश्रमाधिकारित्वं सत्यादाविव ब्राह्मणक्षत्रियविशामेव वा तत्राह विप्राणामित्यादि॥ १२॥

ननु प्रबले कलौ किं ब्राह्मणादयः सर्वे वर्णा एकाचारा भवेयुः पृथक् पृथगाचारा वा तत्राह सर्वेषामेवेत्यादि। विप्रादीनां सर्वेषामेव वर्णानां सर्वे संस्कारा अन्यानि च सर्वाणि कर्माणि एकेन शैववर्त्मनैव साधनीयानि शाम्भवैकवर्त्मसाध्यत्वेन सर्वेषामेव वर्णानां सर्वाणि कर्माणि कलौ समानान्येवेत्यर्थः. परन्तु विप्राणामितरेषां विप्रभिन्नानाञ्च कर्मलिङ्गं कर्मचिह्नं कलावपि पृथक् पृथगेवास्ति॥ १३॥

ननु गार्हस्थ्याश्रमशालित्वं किं जन्मनैव भवेत् संस्कारेण वा

तत्त्वज्ञाने समुत्पन्ने वैराग्यं जायते यदा ।
तदा सर्वं परित्यज्य सन्यासाश्रममाचरेत् ॥ १५ ॥
विद्यामुपार्जयेत् बाल्ये धनं दारांश्च यौवने ।
प्रौढ़े धर्म्याणि कर्माणि चतुर्थे प्रव्रजेत् सुधीः ॥ १६ ॥
मातरं पितरं वृद्धं भार्य्यांचैव पतिव्रताम् ।
शिशुञ्च तनयं हित्वा नावधूताश्रमं व्रजेत ॥ १७ ॥
मातृः पितॄन् शिशून् दारान् स्वजनान् बान्धवानपि ।
यः प्रव्रजति हित्वैतान् स महापातकी भवेत् ॥ १८ ॥
मातृहा पितृहा स स्यात् स्त्रीबधी ब्रह्मघातकः ।
असन्तर्प्य स्वपित्रादीन् यो गच्छेदितरामये ॥ १९ ॥
ब्राह्मणो विप्रमिश्रेण स्वस्ववर्णोक्तसंक्रियाम् ।
श्रौतेन वर्त्मना कुर्य्यादेष धर्म कलौ युगे ॥ २० ॥

तत्त्वाच्च जातत्वाच्च इत्यादि । ननु गार्हस्थ्यमैक्षुकयोर्मध्ये प्रथम कस्मादाश्रमाणामेतत्वाच्च गार्हस्थ्यमित्यादि ॥ १४ ॥

तत्त्वज्ञाने ब्रह्मज्ञाने ॥ १५ ॥

ननु कस्मादवस्थाया गार्हस्थ्याश्रम आश्रयणीय सन्यासस्य कस्मादवस्थाया अकरणीयस्तत्वाह विद्यामित्यादि । बाल्ये शैशवे विद्यामुपार्जयेत् यौवने धनं वित्तं दारान् भार्य्यांश्चोपार्जयेत् प्रौढे तृतीये वयसि धर्म्याणि धर्मादनपेतानि कर्माणि कुर्यात् सुधीर्विद्वांश्चतुर्थे वयसि प्रव्रजेत् संन्यसेत् ॥ १६ ॥ १७ ॥

मात्रादीन् परित्यज्य प्रव्रजतो मनुष्यस्य महापातकं भवेदित्याह मातरित्यादि द्वाभ्याम् । बहुवचनस्य बहुपलक्षकत्वात् पितॄन् पित्रादीनित्यर्थः स्वजनान् स्वेनैव भर्त्तव्यानात्मीयान् जनान् बान्धवान् अकृतभर्त्तव्यान् भ्रात्रादीन् ॥ १८ ॥ १९ ॥ २० ॥

श्रीदेव्युवाच ।

को वा धर्मो गृहस्थस्य भिक्षुकस्य च किं विभो ! ।
विप्रस्य विप्रभिन्नानां संस्कारादीनि मे वद ॥ २१ ॥

श्रीसदाशिव उवाच ।

गार्हस्थ्यं प्रथमं धर्म्यं सर्वेषां मनुजन्मनाम् ।
तदेव कथयाम्यादौ शृणु कौलिनि ! तत्त्वतः ॥२२॥
ब्रह्मनिष्ठो गृहस्थः स्यात् ब्रह्मज्ञानपरायणः ।
यद्यत् कर्म प्रकुर्वीत तदब्रह्मणि समर्पयेत् ॥ २३ ॥
न मिथ्याभाषणं कुर्यात न च मार्दवं समाचरेत् ।
देवतातिथिपूजासु गृहस्थो निरतो भवेत् ॥ २४ ॥
मातरं पितरञ्चैव साक्षात् प्रत्यक्षदेवताम् ।
मत्वा गृही सेवेत सदा सर्वप्रयत्नतः ॥ २५ ॥
तुष्टायां मातरि शिवे ! तुष्टे पितरि पार्वति ! ।
तव प्रीतिर्भवेद्देवि ! परब्रह्म प्रसीदति ॥२६॥
त्वमाद्ये जगतां माता पिता ब्रह्म परात्परम् ।
युवयोः प्रीणनं यस्मात् तस्मात् किं गृहिणां तपः ? ॥२७॥

ब्राह्मणादीन् सच्चवर्णान् तेषां द्वावाश्रमौ सामान्यं धर्मञ्च श्रुत्वेदानीं तेषामसाधारणान् विशेषान् धर्मान् श्रोतुमिच्छन्ती श्रीदेव्युवाच को वा इत्यादि । किम् धर्मम् ॥ २१ ॥

श्रीदेव्यैव प्रेरित सन् श्रीसदाशिव उवाच गार्हस्थ्यमित्यादि । हे कौलिनि ! यतः सर्वेषां मनुजन्मना मनुष्याणां गार्हस्थ्यं कर्म प्रथमं धर्म्यं भवत्यतस्तमेव धर्ममादौ कथयामि त्वं तत्त्वतः शृणु इत्यन्वयः ॥२२॥

गार्हस्थ्य धर्ममेवाह ब्रह्मनिष्ठ इत्यादिभिः । ब्रह्मणि निष्ठा यस्य स ब्रह्मनिष्ठः ॥ २३ ॥

मार्दवम् अनार्जवम् ॥ २४ ॥ २५ ॥ २६ ॥

आसनं शयनं वस्त्र पानभोजनमेव च ।
तत्तत् समयमाज्ञाय मात्रे पित्रे नियोजयेत् ॥ २८ ॥
आवयेन्मृदुलां वाणीं सर्वदा प्रियमाचरेत् ।
पित्रोराज्ञानुसारी स्यात् सत्पुत्रः कुलपावनः ॥ २९ ॥
औद्धत्य परिहासञ्च तर्ज्जन परिभाषणम् ।
पित्रोरग्रे न कुर्वीत यदीच्छेदात्मनो हितम ॥ ३० ॥
मातरं पितर वीक्ष्य नत्वोत्तिष्ठेत् ससम्भ्रमः ।
विनाज्ञया नोपविशेत् संस्थितः पितृशासने ॥ ३१ ॥
विद्याधनमदोन्मत्तो यः कुर्य्यात् पितृहेलनम् ।
स याति नरकं घोरं सर्वधर्मबहिष्कृतः ॥ ३२ ॥
मातरं पितरं पुत्रं दारानतिथिसोदरान् ।
हित्वा गृही न भुञ्जीयात् प्राणैः कण्ठगतैरपि ॥ ३३ ॥
वञ्चयित्वा गुरून् बन्धून् यो भुङ्क्ते स्वोदरम्भरः ।
इहैव लोके गर्ह्योऽसौ परत्र नारको भवेत् ॥ ३४ ॥
गृहस्थो गोपयेदारान् विद्यामभ्यासयेत् सुतान् ।
पोषयेत् स्वजनान् बन्धूनेष धर्मः सनातन. ॥ ३५ ॥

यस्मात् मातुः पितुश्च तोषणात् ॥ २७ ॥

आसनमित्यादि । शय्यतेऽस्मिन्निति शयनम् शय्याम् क्रीयते यत्तत् पानम् पेयं जलादिकमित्यर्थं भोजनम् भोज्यं वस्तु । तत्तत् समयम् आसनादिसमर्पणसमयम् नियोजयेत् समर्पयेत् ॥ २८ ॥ २९ ॥

औद्धत्यम् अविनीतत्वम् तर्जनम् भर्त्सनादीना भर्त्सनम् ॥ ३० ॥

ससम्भ्रमः सादरः ॥ ३१ ॥

पितृहेलनम् मातापित्रोरुक्तिरुल्लङ्घनम् ॥ ३२ ॥ ३३ ॥

गुरून् पित्रादीन् भोजनार्हौ जनानिच्छन् ॥ ३४ ॥ ३५ ॥

जनन्या वर्द्धितो देहो जनकेन प्रयोजितः ।
स्वजनैः सिञ्चितः प्रीत्या सोऽधमस्तान् परित्यजेत् ॥ ३६
एषामर्थे महेशानि ! कृत्वा कष्टशतान्यपि ।
प्रीणयेत् सतत शक्त्या धर्मो ह्येष सनातनः ॥ ३७ ॥
स धन्य पुरुषो लोके स कृती परमार्थवित् ।
ब्रह्मनिष्ठः सत्यसन्धो यो भवेद्भुवि मानवः ॥ ३८ ॥
न भार्यात्याडं त् क्वापि लालवत् पालयेत् सदा ।
न त्यजेत् घोरकष्टेऽपि यदि साध्वी पतिव्रता ॥ ३९ ॥
स्त्रीतेषु स्वोदरेषु स्त्रियमन्या न समुद्वहेत् ।
दुष्टेन चेतसा विद्वानन्यथा नारको भवेत् ॥ ४० ॥
विरले शयनं वास त्यजेत् प्राज्ञः परस्त्रिया ।
अयुक्तभाषणञ्चैव स्त्रियं शौर्य्यं न दर्शयेत् ॥ ४१ ॥
धनेन वाससा प्रेम्णा अन्नयामृदुभाषणैः ।
सतत तोषयेदारान् नाप्रियं क्वचिदाचरेत् ॥ ४२ ॥
उत्सवे लोकयात्राया तीर्थेष्वन्यनिकेतने ।
न पत्नीं प्रेषयेत् प्राज्ञः पुत्रामात्यविवर्जिताम् ॥ ४३ ॥
यस्मिन्नरे महेशानि ! तुष्टा भार्य्या पतिव्रता ।
सर्वो धर्मः कृतस्तेन भवतीप्रिय एव सः ॥ ४४ ॥

स्वजनै बन्धुभि ॥ ३६ ॥
एषां जनन्यादीनाम् प्रीणयेत् जनन्यादीन् तोषयेत् ॥ ३७ ॥
धन्य . सुकृती कृती विचक्षणः सत्यसन्धः सत्यप्रतिज्ञ. ॥३८॥३९॥
दुष्टेन चेतसा विकृतेन मनसा ॥ ४० ॥
विरले निर्जनस्थाने ॥ ४१ ॥ ४२ ॥
अन्यनिकेतने परगृहे ॥ ४३ ॥ ४४ ॥

चतुर्वर्षावधि सुतान् लालयेत् पालयेत् पिता ।
ततः षोड़शपर्य्यन्तं गुणान् विद्याञ्च शिक्षयेत् ॥ ४५ ॥
विंशत्यब्दाधिकान् पुत्रान् प्रेरयेद् गृहकर्मसु ।
ततस्तासुत्थभावेन मत्वा स्नेहं प्रदर्शयेत् ॥ ४६ ॥
कन्याप्येवं पालनीया शिक्षणीयातियत्नतः ।
देया वराय विदुषे धनरत्नसमन्विता ॥ ४७ ॥
एव क्रमेण भ्रातुश्च स्वस्रभ्रातृसुतानपि ।
ज्ञातीन् मित्राणि भृत्यांश्च पालयेत्तोषयेद् गृही ॥ ४८ ॥
ततः स्वधर्मनिरतानेकग्रामनिवासिनः ।
अभ्यागतानुदासीनान गृहस्थः परिपालयेत् ॥ ४९ ॥
यद्येवं नाचरेद्देवि ! गृहस्थो विभवे सति ।
पशुरेव स विज्ञेयः स पापी लोकगर्हितः ॥ ५० ॥
निद्रालस्यं देहयत्नं केशविन्यासमेव च ।
आसक्तिमशने वस्त्रे नातिरिक्तं समाचरेत् ॥ ५१ ॥
युक्ताहारो युक्तनिद्रो मितवाङ्मितमैथुनः ।
स्वच्छो नम्रः शुचिर्दक्षो युक्तः स्यात् सर्वकर्मसु ॥५२॥

ततः चतुर्थो वर्षेभ्य ऊर्द्धम् ॥ ४५ ॥

प्रेरयेत् प्रवर्त्तयेत् तान् विंशत्यब्दाधिकान् पुत्रान् ॥ ४६ ॥

एवम् पुत्रवत् ॥ ४७ ॥ ४८ ॥

ततः भ्रात्रादीना पालनात्तोषणाच्चोर्द्धम् उदासीनान् मित्रामित्रभिन्नान् ॥ ४९ ॥

धने सत्येवमकुर्वतो गृहस्थस्य पातकाश्रयत्वं लोकगर्हितत्वञ्च स्यादित्याह यदीत्यादिना ॥ ५० ॥

आसक्तिम् आसङ्गम् अतिरिक्तम् अधिकम् ॥ ५१ ॥

युक्ताहारः परिमितभोजन [illegible] यदादिशून्यः शुचिः बाह्या-

शूर. शक्तो विनीत. स्यात् बान्धवे गुरुसन्निधौ ।
जुगुप्सितान् न मन्येत नावमन्येत मानिन ॥ ५३ ॥
सौहार्दं व्यवहारांश्च प्रकृतिं प्रकृतिं नृणाम् ।
सहवासेन तर्कैश्च विदित्वा विश्वसेत्तत. ॥ ५४ ॥
त्रसेद्द्वेष्टुरपि क्षुद्रात् समर्थ वीक्ष्य बुद्धिमान् ।
प्रदर्शयेदात्मभावान्नैव धर्मं विलङ्घयेत् ॥ ५५ ॥
स्वीयं वयः पौरुषञ्च गुप्तये कथितञ्च यत् ।
कृतं यदुपकाराय धर्मज्ञो न प्रकाशयेत् ॥ ५६ ॥
जुगुप्सितप्रवृत्तौ च निश्चितिर्यत्र परत्रजे ।
गुरुणा लघुना चापि दम्भज्ञो न विवादयेत् ॥ ५७ ॥
विद्याधनयशो धर्मान् यतमान उपार्जयेत् ।
व्यसनञ्चामतां सङ्गं निर्व्याहीहं परित्यजेत् ॥ ५८ ॥
अवस्थानुगताश्चेष्टाः समयानुगता क्रिया ।
तस्मादवस्थां समय वीक्ष्य कर्म समाचरेत् ॥ ५९ ॥
योगक्षेमरतो दक्षो धार्मिक प्रियबान्धवः ।
मितवाग्मितहास स्यात्मात्मार्थे तु विशेषतः ॥ ६० ॥

व्यत्तरशौचसम्पन्न दक्ष निरालस्ययुक्त उद्योगवान् ॥ ५२ ॥

शूर विक्रान्त नावमन्येत न अवसादयेत ॥ ५३ ॥

तर्कैः पर्यालोचनैः ॥ ५४ ॥

त्रसेत् बिभीयात् द्वेष्टु शक्तो क्षुद्रात् लघो आत्मभावान् स्व-प्रभावान् आत्मन कोशदण्डजानि तेजांसि । सप्रताप प्रभावश्च यत्नेज कोशदण्डजमित्यमर. ॥ ५५ ॥ ५६ ॥ ५७ ॥

यतमान यत्न कुर्वाण ॥ ५८ ॥ ५९ ॥

योगक्षेमरत. योगोऽप्राप्तस्वीकार प्राप्तस्य परिपालन क्षेम तयो रतुरक्त ॥ ६० ॥

जितेन्द्रियः प्रसन्नात्मा सुचिन्त्यः स्याद्दृढ़व्रतः ।
अप्रमत्तो दीर्घदर्शी मात्रास्मर्यान् विचारयेत् ॥ ६१ ॥
सत्यं मृदु प्रियं धीरो वाक्यं हितकरं वदेत् ।
आत्मोत्कर्षं तथा निन्दां परेषां परिवर्जयेत् ॥ ६२ ॥
जलाशयाश्च वृक्षाश्च विश्रामगृहमध्वनि ।
सेतुः प्रतिष्ठितो येन तेन लोकत्रयं जितम् ॥ ६३ ॥
सन्तुष्टौ पितरौ यस्मिन्ननुरक्ता सुहृज्जना ।
गायन्ति यद्यशो लोकास्तेन लोकत्रयं जितम् ॥ ६४ ॥
सत्यमेव व्रतं यस्य दया दीनेषु सर्वथा ।
कामक्रोधौ वशे यस्य तेन लोकत्रयं जितम् ॥ ६५ ॥
विरक्तं परदारेषु निष्पृहं परवस्तुषु ।
दम्भमात्सर्य्यहीनो यस्तेन लोकत्रयं जितम् ॥ ६६ ॥
न बिभेति रणाद्यो वै संग्रामेऽप्यपराङ्मुखः ।
धर्मयुद्धे मृतोवापि तेन लोकत्रयं जितम् ॥ ६७ ॥
असशयात्मा सुयज्ञः शाम्भवाचारतत्परः ।
मच्छासने हितो यस्य तेन लोकत्रयं जितम् ॥ ६८ ॥
ज्ञानिना लोकयात्रायै सर्वत्र समदृष्टिना ।
क्रियन्ते येन कर्माणि तेन लोकत्रयं जितम् ॥ ६९ ॥
शौचन्तु द्विविधन्देवि । बाह्याभ्यन्तरभेदतः ।
ब्रह्मणात्मार्पणं यत्तत् शौचमान्तरिकं स्मृतम् ॥ ७० ॥

जितेन्द्रिय इत्यादि । सुचिन्त्य सुष्ठु चिन्त्यं स्मरणीयं शास्त्रादि यस्य सः मात्रास्मर्यान् मीयन्ते विषया एताभिरिति मात्रा इन्द्रियवृत्तयस्तासां स्मर्यान् विषयेषु सम्बन्धान् ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥

निस्पृहः निराकाङ्क्षः ॥ ६६ ॥ ६७ ॥ ६८ ॥

अद्भिर्वा भस्मना वापि मलानामपकर्षणम् ।
देहशुद्धिर्भवेद्यत्र वह्निःशौचं तदुच्यते ॥ ७१ ॥
गङ्गा नद्यो ह्रदावाप्यस्तथा कूपाश्च चुल्लकाः ।
सर्वं पवित्रजननं स्वर्णदी क्रमतः प्रिये ! ॥ ७२ ॥
भस्मान्न याज्ञिकं श्रेष्ठं मृत्स्ना तु मलवर्जिता ।
वासोऽजिनतृणादीनि मृद्वज्जानीहि सुव्रते ! ॥ ७३ ॥
किमत्र बहुनोक्तेन शौचाशौचविधौ प्रिये ! ।
मनःपूतं भवेद्यत्र गृहस्थस्तत्समाचरेत् ॥ ७४ ॥
निद्रान्ते मैथुनस्यान्ते त्यागान्ते मलमूत्रयोः ।
भोजनान्ते मले स्पृष्टे वह्निःशौचं विधीयते ॥ ७५ ॥
सन्ध्या त्रैकालिको कार्य्या वैदिको तान्त्रिको क्रमात् ।
उपासनाया भेदेन पूजां कुर्य्याद् यथाविधि ॥ ७६ ॥
ब्रह्ममन्त्रोपासकानां गायत्रीं जपतां प्रिये ! ।
ज्ञानात् ब्रह्मेति तद्वाच्यं सन्ध्या भवति वैदिकी ॥७७॥

सर्वत्र शतृ ङित्वादौ ॥ ६९ ॥ ७० ॥

अद्भिरिति अद्भिर्जलैर्वा भस्मना वा येन देहशुद्धिर्भवेत्तेन मृत्तिका-वस्त्रचर्मणादिरूपवस्तुनावापि मलानामपकर्षणं दूरीकरणं यत्तत् वह्निःशौचमुच्यते इत्यन्वयः ॥ ७१ ॥

चुल्लका स्वल्पजलाशया. स्वल्पेऽपि चुल्लकक्षिप्तित्वसरः सर्वम् गङ्गाजलादि ॥ ७२ ॥

भस्मेत्यादि। अत्र वह्निःशौचविधौ हे सुव्रते ! वासोऽजिनतृणा-दीन्यपि मृद्वन्मृत्तिकावन्मलवर्जितान्येव श्रेष्ठानि जानीहि ॥७३–७६॥

उपासनाभेददर्शनपूर्वकं सन्ध्याभेदन्दर्शयति द्वाभ्याम् ब्रह्मेत्यादि । ब्रह्ममन्त्रोपासकानां गायत्र्या जपनात् तद्वाच्यं गायत्री प्रतिपाद्यं ब्रह्म भवतीति ज्ञानाच्च वैदिकी सन्ध्या भवति ॥ ७७ ॥

अन्येषां वैदिकी सन्ध्या सूर्य्योपस्थानपूर्व्वकम् ।
अर्घ्यदानन्दिनेशाय गायत्रीजपनन्तथा ॥ ७८ ॥
अष्टोत्तर सहस्रं वा शतं वा दशधापि वा ।
जपानां नियमो भद्रे । सर्व्वतान्त्रिककर्म्मणि ॥ ७९ ॥
शूद्रसामान्यजातीनानधिकारोऽस्ति केवलम् ।
आगमोक्तविधौ देवि । सर्व्वसिद्धिस्ततो भवेत ॥ ८० ॥
प्रातः सूर्य्योदय काली मध्याह्नस्तदनन्तरम् ।
सायं सूर्य्यास्तमयस्त्रिकालानामयं क्रमः ॥ ८१ ॥

श्रीदेव्युवाच ।

विप्रादिसर्व्ववर्णानां विहिता तान्त्रिकी क्रिया ।
त्वयैव कथिता नाथ । सम्प्राप्ते प्रबले कलौ ॥ ८२ ॥
तद्दिदानीं कथं देव । विप्रान् वैदिककर्म्मणि ।
नियोजयसि तत्सर्व्वं विशेषाद्वक्तुमर्हसि ॥ ८३ ॥

अन्येषामिति अन्येषां ब्रह्ममन्त्रोपासकभिन्नानान्तु सूर्य्योपस्थानपूर्व्वकं दिनेशाय सूर्य्यायार्घ्यदानन्तथा गायत्रीजपन वैदिकी सन्ध्या भवति ॥ ७८ ॥

अथाङ्गिककर्म्मणि मन्त्रजपानां नियममाह अष्टोत्तरमित्यादिना । शतमपि अष्टोत्तरमेव सर्वत्र वैदिके तान्त्रिके च ॥ ७९ ॥

तत आगमोक्तविधित ॥ ८० ॥

अथ सन्ध्याविध्यपेक्षितत्रिकालक्रममाह प्रातरित्यादिना । सूर्य्योदयो यत्र स सूर्य्योदय काल ॥ ८१ ॥

पूर्वं श्रीसदाशिवेन सर्वेषां ब्राह्मणादिवर्णानां प्रबले कलौ युगे तान्त्रिक एव कर्मण्यधिकारोऽस्तीत्युक्तम् सम्प्रति तु ब्राह्मणक्षत्रिय-वैश्यानां वैदिक्यामपि सन्ध्यायामधिकारोऽस्तीत्युच्यते एतदयुक्तं मन्वाना श्रीदेव्युवाच विप्रादीत्यादि ॥ ८२ ॥

नियोजयसि प्रवर्त्तयसि ॥ ८३ ॥

श्रीसदाशिव उवाच ।

सत्यं ब्रवीषि तत्त्वज्ञे ! सर्व्वेषां तान्त्रिकी क्रिया ।
लोकानां भोगमोक्षाय सर्व्वकर्म्मसु सिद्धिदा ॥ ८४ ॥
इयन्तु ब्रह्ममाविद्धी यथा भवति वैदिकी ।
तथैव तान्त्रिकी ज्ञेया प्रशस्तीभयकर्म्मणि ॥ ८५ ॥
अतोऽत्र कथितं देवि ! द्विजानां प्रबले कलौ ।
गायत्र्यामधिकारोऽस्ति नान्यत्रान्येषु कर्हिचित् ॥ ८६ ॥
तारार्द्या कमलाद्या च दाम्भनाद्या प्रणाक्रमात् ।
ब्राह्मणक्षत्रियविशां गायत्री कथिता कलौ ॥ ८७ ॥
द्विजादीनां प्रभेदार्थं शूद्रेभ्यः परमेश्वरि ! ।
सन्ध्येयं वैदिकी प्रोक्ता पार्श्वाद्धिकर्म्मणाम् ॥ ८८ ॥
अन्यथा शाम्भवैर्मन्त्रैः क्रियते सिद्धिभाग्भवेत् ।
सत्यं सत्यं पुनः सत्यं मयैतान्न संशयः ॥ ८९ ॥
कालात्ययेऽपि सन्ध्येयं कर्त्तव्या देववन्दिते ! ।
ओं तत्सत् ब्रह्म चोचार्य मोक्षेच्छुभिरनातुरैः ॥ ९० ॥

अतोऽत्रं श्रीसदाशिव उवाच सत्यमित्यादिभिः ॥ ८४—८६ ॥

तारार्द्येत्यादि कलौ युगे यथा क्रमेणैव ब्राह्मणक्षत्रिय-विशां तारार्द्या प्रणवाद्या कमलाद्या श्रींबीजाद्या वाग्भवाद्या ए-बीजाद्या सावित्री गायत्री कथिता ॥ ८७ ॥

द्विजादीनामिति । हे परमेश्वरि ! द्विजादीनां ब्राह्मणादीनां शूद्रेभ्य प्रभेदार्थन्तान्त्रिकाणामाह्निककर्म्मणां प्रागेवेयं वैदिकी सन्ध्या करणीया प्रोक्ता ॥ ८८ ॥ ८९ ॥

कालेत्यादि । हे देववन्दिते ! कालात्ययेऽपि सन्ध्याविधानकाल-व्यपगमेऽपि अनातुरैर्जरादिनिमित्तकेनाऽपटुत्वेन शून्यैर्मोक्षेच्छुभिर्मो-

आसनं वसनं पात्रं शय्यां यानं निकेतनम्।
गृह्यकं वसुजातञ्च स्वच्छात् स्वच्छं प्रशस्यते ॥ ९१ ॥
समाप्याह्निककर्म्माणि स्वाध्याय गृहकर्म्म वा।
गृहस्थो नियतं कुर्य्यान्नैव तिष्ठेन्निरुद्यमः ॥ ९२ ॥
पुण्यतीर्थे पुण्यतिथौ ग्रहणे चन्द्रसूर्य्ययोः।
जपं दानं प्रकुर्वाणः श्रेयसां निलयो भवेत् ॥ ९३ ॥
कलावन्नगतप्राणा नोपवासः प्रशस्यते।
उपवासप्रतिनिधावेकं दानं विधीयते ॥ ९४ ॥
कलौ दानं महेशानि। सर्व्वसिद्धिकरं भवेत्।
तत्पात्रं केवलं ज्ञेयो दरिद्रः सत्क्रियान्वितः ॥९५॥
मासवत्सरपक्षाणामारम्भदिनमम्बिके।
चतुर्दश्यष्टमी शुक्ला तथैवैकादशी कुहूः ॥ ९६ ॥
निजजन्मदिनञ्चैव पित्रोर्म्मरणवासरः।
वैधोत्सवदिनञ्चैव पुण्यकालः प्रकीर्त्तितः ॥ ९७ ॥
गङ्गा नदी महानद्यो गुरोः सदनमेव च।
प्रसिद्धं देवताक्षेत्रं पुण्यतीर्थं प्रकीर्त्तितम् ॥ ९८ ॥
त्यक्त्वा स्वाध्ययनं पित्रोः शुश्रूषान्दाररक्षणम्।
नरकाय भवेत्तीर्थं तीर्थाय व्रततां नृणाम् ॥ ९९ ॥

चाकाङ्क्षिभिर्जनैः ओं तत्सद्ब्रह्मेति सदुच्चार्य्यैवं वैदिकी तान्त्रिकी च सन्ध्या कर्त्तव्या ॥ ९० ॥

गृह्यकं वसुजातम् गृहसम्बन्धि सर्वं वसु ॥ ९१ ॥

स्वाध्यायम् वेदाध्ययनम् ॥ ९२–९५ ॥

अथ जपदानविधावपेक्षितं पुण्यकालं पुण्यतीर्थञ्च क्रमत आह कलौत्यादिभिः। कुहूः नष्टचन्द्रकलाऽमावास्या ॥ ९६–९९ ॥

न तीर्थसेवा नारीणां नोपवासादिकाः क्रियाः
नैव व्रतानां नियमो भर्त्तुः शुश्रूषणं विना ॥ १०० ॥
भर्त्तैव योषितां तीर्थं तपो दानं व्रतं गुरुः ।
तस्मात् सर्व्वात्मना नारी पतिसेवां समाचरेत् ॥ १०१ ॥
यत्नु प्रियं सदा कुर्य्यात् वचसा परिचर्य्यया ।
तदाज्ञानुचरी भूत्वा तोषयेत् पतिबान्धवान् ॥ १०२ ॥
नेचेत् पतिं क्रूरदृष्ट्या श्रावयेन्नैव दुर्व्वचः ।
नाप्रियं मनसा वापि चरेद्भर्त्तुः पतिव्रता ॥ १०३ ॥
कायेन मनसा वाचा सर्व्वदा प्रियकर्म्मभिः ।
या प्रीणयति भर्त्तारं सैव ब्रह्मपदं लभेत् ॥ १०४ ॥
नान्यवक्त्रं निरीक्षेत नान्यैः सम्भाषणञ्चरेत् ।
न चाङ्गं दर्शयेदन्यान् भर्त्तुराज्ञानुसारिणी ॥ १०५ ॥
तिष्ठेत् पित्रोर्वशे बाल्ये भर्त्तुः सम्प्राप्तयौवने ।
वार्द्धक्ये पतिबन्धूनां न स्वतन्त्रा भवेत् क्वचित् ॥ १०६ ॥
अज्ञातपतिमर्य्यादामज्ञातपतिसेवनाम् ।
नोद्वाहयेत् पिता बालामज्ञातधर्म्मशासनाम् ॥ १०७ ॥
नरमांसं न भुञ्जीयात् नराकृतिपशूंस्तथा ।
बह्वपकारकान् गाञ्च मांसादान् रसवर्जितान् ॥ १०८ ॥
फलानि ग्राम्यवन्यानि मूलानि विविधानि च ।

अथ स्त्रीधर्म्मानाह न तीर्थेत्यादिभिः सप्तभिः ॥ १०० ॥
सर्व्वात्मना सर्व्वप्रयत्नेन ॥ १०१ ॥
परिचर्य्यया सेवया ॥ १०२—१०५ ॥
स्वतन्त्रा स्वाधीना ॥ १०६ । १०७ ॥
बह्वपकारकानिति गोविशेषणेन तद्भोजननिषेधे हेतुर्दर्शितः मांसा-

भूमिजातानि सर्वाणि भोज्यानि स्वेच्छया शिवे ! ॥१०८
अध्यापन याजनञ्च विप्राणां व्रतमुत्तमम् ।
अशक्तौ क्षत्रियविशां वृत्तैर्निर्वाहमाचरेत् ॥ ११० ॥
राजन्यानाञ्च सद्वृत्त संग्रामो भूमिशासनम् ।
अत्राशक्तौ वणिग्वृत्तं शूद्रवृत्तमथाश्रयेत् ॥ १११ ॥
वाणिज्याशक्तवैश्यानां शूद्रवृत्तमदूषणम् ।
शूद्राणा परमेशानि ! सेवावृत्ति विधीयते ॥ ११२ ॥
सामान्यानान्तु वर्णानां विप्रवृत्त्यन्यवृत्तिषु ।
अधिकारोऽस्ति देवेशि ! देहयात्राप्रसिद्धये ॥ ११३ ॥
अद्वेष्टा निर्मम: शान्त: सत्यवादी जितेन्द्रिय ।
निर्मत्सरो निष्कपटः स्ववृत्तौ ब्राह्मणो भवेत् ॥ ११४॥
अध्यापयेत् पुत्रबुद्ध्या शिष्यान् सन्मार्गवर्त्तिन: ।
सर्वलोकहितैषी स्यात् पक्षपातविनिर्मुख: ॥ ११५ ॥
मिथ्यालापमसूयाञ्च व्यसनाप्रियभाषणम् ।
लोभै: प्रसक्तिं दम्भञ्च सर्वथा ब्राह्मणस्त्यजेत् ॥ ११६ ॥

दान् सासभक्षकान् गृध्रादीन् रसवर्जितान् आखादम्यून्यान् ॥१०८।१०९॥

अथ ब्राह्मणवृत्तमाह अध्यापनमित्यादि ॥ ११० ॥

अथ क्षत्रियवृत्तमाह राजन्यानामित्याद्येकेन । अत्र सग्रामभू-मिशासनरूपे सद्वृत्ते ॥ १११ ॥

अथ वैश्यानां शूद्राणाञ्च वृत्तमाह वाणिज्येत्यादिनैकेन । वैश्या-नामपि वाणिज्यमुत्तमं वृत्तम् ॥ ११२ ॥

अथ वर्णसङ्कराणां वृत्तमाह सामान्यानामित्यादिनैकेन ॥ ११३ ॥

अथ ब्राह्मणधर्म्मानाह अद्वेष्टेत्यादिभि । निर्म्मम देहादिविष-यवासनताम्यून्य; शान्त: संयतचित्त: ॥ ११४ । ११५ ॥

युयुत्सा गर्हिता सन्धौ सम्मानैः सन्धिरुत्तमा ॥
मृत्युर्जयो वा युद्धेषु राजन्यानां वरानने ! ॥ ११७ ॥
अलोभी स्यात् प्रजावित्ते गृह्णीयात् सम्मितङ्करम् ।
स्वसन्नङ्गीकृत धर्मं पुत्रवत् पालयेत् प्रजाः ॥ ११८ ॥
न्यायं युद्धन्तथा सन्धिं कर्माण्यन्यानि यानि च ।
मन्त्रिभिः सह कुर्वीत विचार्य्य सर्वथा नृपः ॥ ११९ ॥
धर्मयुद्धेन योद्धव्य न्यायदण्डपुरस्क्रिया: ।
करणीया यथाशास्त्रं सन्धि कुर्य्याद् यथाबलम् ॥१२०॥
उपायैः साधयेत् कार्य्यं युद्धं सन्धिश्च शत्रुभिः ।
उपायानुगता· सर्वा जयश्चेमविभूतय· ॥ १२१ ॥
स्यान्नीचसङ्गाद्विरतः सदा विद्वज्जनप्रिय ।
धीरो विपत्तौ दक्षश्च शीलवान् सम्मितव्ययी॥ १२२ ॥
निपुणो दुर्गसंस्कारे शस्त्रग्रिचा विचक्षणः ।

मिथ्येत्यादि । असूयाम् गुणेषु सत्स्वपि परस्मिन् दोषारोपणम् व्यसनम् द्यूतादिकर्म्म दम्भम् स्वनिष्ठवञ्चनाभाव्यत्वनिमित्तकचित्त-समुन्नतिम् ॥ ११६ ॥

अथ राजन्यधर्म्मानाह युयुत्सेत्यादिभि. । हे वरानने । अति प्रशस्तनीयवदने राजन्याना क्षत्रियाणा सन्धौ समेलने सति युयुत्सा युद्धेच्छा गर्हिता निन्दिता भवेत् सन्धिस्तु तेषा सम्मानैरेवोत्तमो भवेत् तेषां युद्धेषु तु मृत्युरेव वा जयएव वा उत्तमो भवेत् नतु पलायनादिकमित्यर्थ. ॥ ११७–११९ ॥

पुरस्क्रिया सत्कार यथाबलम् बलमनतिक्रम्य बलपूर्व्वक-मित्यर्थ ॥ १२० । १२१ ॥

विरत. विरक्त. धीरो धैर्य्यवान् दक्षोऽनलस ॥ १२२ ॥

निपुण इत्यादि । दुर्गसस्कारे दु खेन गच्छति विपद्यो यत्र तत्-

स्वसैन्यभावान्वेषी स्यात् शिक्षयेद्रणकौशलम् ॥ १२३ ॥
न हन्यान्मूर्च्छितान् युद्धे त्यक्तशस्त्रान् पराङ्मुखान् ।
बलानीतान् रिपून् देवि । रिपुदारशिशूनपि ॥ १२४ ॥
जयलब्धानि वस्तूनि सन्धिप्राप्तानि यानि च ।
वितरेत्तानि सैन्येभ्यो यथायोग्यविभागतः ॥ १२५ ॥
शौर्यं वृत्तञ्च योद्धॄणां ज्ञेयं राजा पृथग्गतम् ।
बहुसैन्याधिपत्ये तु कुर्य्यादाप्तहिते रतः ॥ १२६ ॥
नैकस्मिन् विश्वसेद्राजा नैव न्याये नियोजयेत् ।
कस्य क्रीड़ोपहासञ्च नीचैः सह विवर्ज्जयेत् ॥ १२७ ॥
बहुश्रुतः स्वल्पभाषी जिज्ञासुर्ज्ञानवानपि ।
बहुमानोऽपि निर्हंभो धीरोदग्रप्रसादयोः ॥ १२८ ॥
स्वयं वा चरदृष्ट्या वा प्रजाभावान् विलोकयेत् ।
एवं स्वजनभृत्यानां भावान् पश्येन्नराधिपः ॥ १२९ ॥
क्रोधाद्दम्भात् प्रमादाद्वा सम्मानं शासनन्तथा ।
सहसा नैव कर्त्तव्यं स्वामिना तत्त्वदर्शिना ॥ १३० ॥
सैन्यसेनाधिपामात्यवनिताऽपत्यसेवकाः ।
पालनीयाः सदोषाश्चेत् दण्ड्या राज्ञा यथाविधि ॥ १३१ ॥

दुर्गम् पर्व्वतपरिखाप्राकारादिभिः दुर्गमं नगरम् तस्य परिसरे ॥ १२३ । १२४ ॥

वितरेत् दद्यात् ॥ १२५—१२७ ॥

बहुश्रुतइत्यादि । बहुमानोऽपि सूरिसम्मानोऽपि राजा निर्हंभोसूरिसम्माननिमित्तकचित्तसङ्कुचितिशून्यो भवेत् ॥ १२८ ॥

स्वयमित्यादि । चरदृष्ट्या अन्यतत्त्वाहुतसम्मानप्रवीणो गूढपुरुषचरः तद्रूपया दृष्ट्या प्रजाभावान् प्रजानामभिप्रायान् चेष्टा वा ॥ १२९ ॥

उन्मत्तानसमर्थांश्च बालांश्च मृतबान्धवान् ।
ज्वराभिभूतान् हृद्यांश्च रक्षयेत् पितृवन्नृपः ॥ १३२ ॥
वैश्यानां कृषिवाणिज्य वृत्तं विद्धि सनातनम् ।
येनोपायेन लोकानां देहयात्रा प्रसिद्धति ॥ १३३ ॥
अतः सर्व्वात्मना देवि ! वाणिज्यकृषिकर्म्मसु ।
प्रमादव्यसनालस्यं मिथ्यासाक्ष्यं विवर्ज्जयेत् ॥ १३४ ॥
निश्चित्य वस्तुतन्मूल्यमुभयोः मन्त्रती शिवे ! ।
परस्परान्नाकरणं क्रयसिद्धिस्ततो भवेत् ॥ १३५ ॥
मन्त्रविच्छिन्नवालानामपरिस्रस्तकर्म्मणां प्रिये ! ।
रोगविश्रान्तवृद्धीनामसिद्धौ क्रयविक्रयौ ॥ १३६ ॥
क्रयसिद्धिरदृष्टानां गुणाद्यन्यतो भवेत् ।
विपर्य्यये तद्गुणानामन्यथा भवति क्रय ॥ १३७ ॥
कुञ्जरोष्ट्रतुरङ्गाणां गुणदोषप्रकाशनात् ।
वर्षातीतेऽपि तत् क्रीयमन्यथा कर्त्तुमर्हति ॥ १३८ ॥
धर्म्मार्थकाममोक्षाणाभाजनं मानवं वपुः ।
अतः कुलेशि ! तत्क्रीयो न सिद्धिमं शासनात् ॥ १३९ ॥

तस्मात् राज्यादिनिमित्तकाच्चित्तस्थैर्यसुखात् ॥ १३० । १३१ ॥
हृतबान्धवान् हृता बान्धवा येषान्तथाभूतान् ॥ १३२ ॥
अथ वैश्याचारान् वक्तुमुपक्रमते वैश्यानामित्यादिभिः । येन कृषिवाणिज्यकर्म्मरूपेणोपायेन देहयात्रा शरीरनिर्व्वाहः ॥ १३३ ॥
सर्व्वात्मना सर्व्वप्रकारेण ॥ १३४ ॥
निश्चित्येत्यादि । निश्चित्य निर्णीय तन्मूल्यम् निश्चितवस्तुमूल्यमपि निश्चित्य उभयो विक्रेतृक्रयकारकयोः ॥ १३५ । १३६ ॥
अदृष्टानाम् वस्तूनाम् विपर्यये वैपरीत्ये ॥ १३७ । १३८ ॥

यवगोधूमधान्यानां लाभो वर्षे गते प्रिये ! ।
युक्तश्चतुर्थो धातूनामष्टमः परिकीर्त्तितः ॥ १४० ॥
ऋणे क्षये च वाणिज्ये तथा सर्व्वेषु कर्म्मसु ।
यद्यदङ्गीकृतं कर्त्तुस्तत्कार्य्यं शास्त्रसम्मतम् ॥ १४१ ॥
दक्षः शुचिः सत्यभाषी जितनिद्रो जितेन्द्रियः ।
अप्रमत्तो निरालस्यः सेवावृत्तौ भवेन्नरः ॥ १४२ ॥
प्रभुर्विष्णुसमोऽमात्यस्तज्जाया जननीसमा ।
मान्यास्तद्बान्धवा भृत्यैरिहामुत्र सुखेप्सुभिः ॥ १४३ ॥
भर्त्तुर्मित्राणि मित्राणि जानीयात्तद्रीनरीन् ।
सखीभिः सर्व्वदा तिष्ठेत् प्रभोराज्ञां प्रतीक्षयन् ॥ १४४ ॥
अपमानं गृहच्छिद्रं गुप्तार्थं कथितञ्च यत् ।
भर्त्तुर्ग्वानिकरं यच्च गोपयेदतियत्नतः ॥ १४५ ॥
अलोभः स्यात् स्वामिधने सदा स्वामिहिते रतः ।
सत्सन्निधावसङ्गाप क्रीड़ां हास्यं परित्यजेत् ॥ १४६ ॥
न पापमनसा पश्येदपि तद्गृहकिङ्करीः ।
विविक्तशय्यां हास्यञ्च ताभिः सह विवर्जयेत् ॥ १४७
प्रभोः शय्यासन यान वसनभाजनानि च ।
उपानद्भूषण स्रक्ष नात्मार्थं विनियोजयेत् ॥ १४८ ॥

तत्क्रेय मानयवपु·क्रेय ॥ १३९ ॥
उत्तमर्णेन मूलधनादधिक ग्राह्य लाभ ॥ १४० । १४१ ॥
अथ सेवकधर्म्मानाह दक्षइत्यादिभि । दक्ष आत्मकार्य्येषु चतुर शुचि स्वच्छ अप्रमत्त निजकार्य्येषु सावधान ॥ २४२—१४६ ॥
न पापेत्यादि । पापमनसा तस्य स्वामिनो गृहकिङ्करीरपि न पश्येत् का वार्त्ता तत्पत्नीपुत्रादीनाम् विविक्तशय्याम् रह शयनम् ताभि· स्वामिगृहकिङ्करीभि ॥ १४७ । १४८ ॥

क्षमां कृतापराधश्चेत् प्रार्थयेदयतः प्रभोः ।
प्रागल्भ्यं प्रौढ़वादञ्च साम्याचारं विवर्जयेत् ॥ १४९ ॥
सर्वे वर्णाः स्वस्ववर्णैर्ब्राह्मोद्वाहन्तथाशनम् ।
कुर्व्वीरन् भैरवीचक्रात्तत्त्वचक्राद्दते शिवे ! ॥ १५० ॥
उभयत्र महेशानि ! शैवोद्वाहः प्रकीर्त्तितः ।
तथादने च पाने च वर्णभेदो न विद्यते ॥ १५१ ॥

श्रीदेव्युवाच ।

किमिदं भैरवीचक्रन्तत्त्वचक्रञ्च कीदृशम् ।
तत्सर्वं श्रोतुमिच्छामि कृपया वक्तुमर्हसि ॥ १५२ ॥

श्रीसदाशिव उवाच ।

कुलपूजाविधौ देवि ! चक्रानुष्ठानमीरितम् ।
विशेषपूजासमये तत् कार्य्यं साधकोत्तमैः ॥ १५३ ॥
भैरवीचक्रविषये न तादृङ्नियमः प्रिये ! ।
यथासमयमासाद्य कुर्य्याच्चक्रमिदं शुभम् ॥ १५४ ॥
विधानमस्य वक्ष्यामि साधकानां शुभावहम् ।
आराधिता येन देवी तूर्णं यच्छति वाञ्छितम् ॥ १५५ ॥

प्रागल्भ्यम् धार्ष्ट्यम् ॥ १४९ ॥
अशनम् भोजनम् कृते विना ॥ १५० ॥
उभयत्र भैरवीचक्रे तत्त्वचक्रे च ॥ १५१ ॥
अथ भैरवीचक्र तत्त्वचक्रयोर्विधान श्रोतुमिच्छन्ती श्रीदेव्युवाच किमिदमित्यादि ॥ १५२ ॥
एवं प्रार्थितः सन् श्रीसदाशिव उवाच कुलपूजेत्यादि तत् कुलपूजाविधावुक्त चक्रानुष्ठानम् ॥ १५३ । १५४ ॥
अस्य भैरवीचक्रस्य येन भैरवीचक्रविधानेन यच्छति ददाति ॥ १५५ ॥

कुलाचार्य्यो रम्यभूमावास्तीर्य्यासनमुत्तमम् ।
कामाद्येनास्त्रबीजेन संशोध्योपविशेत्ततः ॥ १५६ ॥
सिन्दूरेण कुसीदेन केवलेन जलेन वा ।
त्रिकोणञ्चतुरस्रञ्च मण्डलं रचयेत् सुधी ॥ १५७ ॥
विचित्रघटमानीय दध्यक्षतविमिश्रितम् ।
फलपल्लवसंयुक्तं सिन्दूरतिलकान्वितम् ॥ १५८ ॥
सुवासितजलैः पूर्णं मण्डले तत्र साधकः ।
प्रणवेन तु संस्थाप्य धूपदीपौ प्रदर्शयेत् ॥ १५९ ॥
सम्प्रोक्ष्य गन्धपुष्पाभ्यां चिन्तयेदिष्टदेवताम् ।
सक्षेपपूजाविधिना तत्र पूजां समाचरेत् ॥ १६० ॥
विशेषमत्र वक्ष्यामि शृणुष्वामरवन्दिते ।
गुर्वादिनवपात्राणां नात्र स्थापनमिष्यते ॥ १६१ ॥

भैरवीचक्रानुष्ठानमेवाह कुलाचार्य्यइत्यादिभिः । कुलाचार्य्यः कुलगुरुः रम्यभूमौ रमणीयायां भुव्युत्तमासनमास्तीर्य्याच्छाद्य कामाद्येन क्लीं बीजाद्येनास्त्रबीजेन फट्टा संशोध्य च ततस्तत्रासने उपविशेत् ॥ १५६ ॥

सिन्दूरेणेति । ततः सुधीः कोविदः सिन्दूरेण कुसीदेन रक्तचन्दनेन केवलेन जलेन वा त्रिकोणं चतुरस्रञ्चतुष्कोणञ्च मण्डलं तद्बहिश्चतुरस्रञ्चतुष्कोणञ्च मण्डलं रचयेत् ॥ १५७ ॥

विचित्रेत्यादि । ततः परं विचित्राणि विविधानि चित्राण्यालेख्यानि यत्रैवम्भूतं घटमानीय दध्यक्षतविमिश्रितैर्दध्नाक्षतैश्च सम्मृक्तं फलैः पल्लवैश्च संयुक्तं सिन्दूरतिलकैश्चन्दनसंयुतं कर्पूरादिभिः सुवासितैर्जलैः पूर्णञ्च कृत्वा प्रणवेन ओंकारेण तत्र मण्डले संस्थाप्य च साधको धूपदीपौ प्रदर्शयेत् ॥ १५८ । १५९ ॥

सम्प्रोक्ष्येति । ततो गन्धपुष्पाभ्यां घटं संप्रोक्ष्य तत्रेष्टदेवतामिन्तयेत् ।

यथेष्टन्तत्त्वमादाय संस्थाप्य पुरतो व्रती ।
प्रोक्षयेदस्त्रमन्त्रेण दिव्यदृष्ट्यावलोकयेत् ॥ १९२ ॥
अलियन्त्रे गन्धपुष्पं दत्वा तत्र विचिन्तयेत् ।
आनन्दभैरवीं देवीं आनन्दभैरवन्तथा ॥ १९३ ॥
नवयौवनसम्पन्नान्तरुणारुणविग्रहाम् ।
चारुहासामृताभाषोल्लसद्वदनपङ्कजाम् ॥ १९४ ॥
नृत्यगीतकृतामोदां नानाभरणभूषिताम् ।
विचित्रवसनाम्बायेत् वराभयकराम्बुजाम् ॥ १९५ ॥
इत्यानन्दमयीन्ध्यात्वा स्मरेदानन्दभैरवम् ॥ १९६ ॥
कर्पूरपूरधवलं कमलायताक्षम्
दिव्याम्बराभरणभूषितदेहकान्तिम् ।

संचिन्त्य च पूर्वोक्तेन सर्वोपचारपूजाविधिना तत्र कलशे इष्टदेवतायाः पूजां समाचरेत् कुर्यात् ॥ १९० । १९१ ॥

यथेष्टमिति । ततो व्रती साधको यथेष्टन्तत्त्व मद्यादिकमादाय पुरतोऽग्रे संस्थाप्य चास्त्रमन्त्रेण फट् प्रोक्षयेत् जलेन सिञ्चेत् दिव्यदृष्ट्यावलोकयेच्च ॥ १९२ ॥

अलियन्त्रे ततोऽलियन्त्रे मद्यपात्रे गन्धपुष्पन्दत्वा तत्राऽलियन्त्रे एवानन्दभैरवीन्देवीन्तथानन्दभैरवं देवं विचिन्तयेत् ॥ १९३ ॥

आनन्दभैरव्याध्यानमेवाह नवयौवनसम्पन्नामिति । नवयौवनसम्पन्ना नवीनतारुण्य सम्प्राप्ताम् तरुणारुणविग्रहाम् नवीनसूर्यसदृशदेहाम् चारुहासामृताभाषोल्लसद्वदनपङ्कजाम् चारुहासेन मनोहरहसनेनामृतभाषया सुधातुल्यभाषणेन चोल्लसद्दीप्यमान वदनं वदनपङ्कजं मुखकमलं यस्यास्तथाभूताम् नृत्यगीतकृतामोदाम् नृत्यगीताभ्यां कृत आमोद आनन्दो यया तां नानाभरणभूषिताम् अनेकविधभूषणालङ्कृताम् विचित्रवसनाम् विचित्रमद्भुत वसनं वस्त्र यस्यास्ताम् वराभयकराम्बुजाम् वरोऽभयञ्च करांबुजयो र्यस्यास्ताम् ॥ १९४—१९६ ॥

वामेन पाणिकमलेन सुधाढ्यपात्रम्
दक्षेण शुद्धिगुटिकान्दधतं स्मरामि ॥ १६७ ॥
ध्यात्वैवमुभयन्तत्र सामरस्यं विचिन्तयन् ।
प्रणवादिनमोऽन्तेन नाममन्त्रेण देशिकः ।
संपूज्य गन्धपुष्पाभ्यां शोधयेत् कारणं ततः ॥ १६८ ॥
पाशादित्रिकवीजेन स्वाहान्तेन कुलार्चकः ।
अष्टोत्तरशताद्वृत्त्या जपन् हेतुं विशोधयेत ॥ १६९ ॥
गृहकार्य्यैकचित्तानां गृहिणां प्रवले कलौ ।
आद्यतत्त्वप्रतिनिधौ विधेय मधुरत्रयम् ॥ १७० ॥
दुग्धं सिता माक्षिकञ्च विज्ञेयं मधुरत्रयम् ।
अलिरूपमिदं मत्वा देवतायै निवेदयेत् ॥ १७१ ॥

आनन्दभैरवध्यानमेवाह हेमेन कर्पूरपूरधवलमिति । कर्पूरपूरधवल कर्पूरप्रवाहवच्छुभ्र कमलायतास्यम् कमलवदायते विस्तृते अक्षिणी यस्य तम दिव्याम्बराभरणस्रग्विलेपनेन दिव्यैरम्बराभरणैर्वस्त्र-वस्त्रणैर्भूषितोऽनङ्कृतो यो देहस्तत्र कान्तिरधिका दीप्तिर्यस्य तथाभूतम् वामेन पाणिकमलेन सुधाढ्यपात्र मद्यसमन्वित पात्रन्दक्षेण पाणिकमलेन शुद्धिगुटिकाञ्च दधतमानन्दभैरव स्मरामि चिन्तयामि ॥ १६७ ॥

ध्यात्वेति । एवमुभौ ध्यात्वा तत्रालिखन्ते उभयोर्भैरवीभैरवयोः सामरस्यमैक्यञ्च विचिन्तयन् देशिकः साधकः प्रणवादिनमोऽन्तेन नाम-मन्त्रेण गन्धपुष्पाभ्यां तौ संपूज्य ततः कारणं मद्यं शोधयेत् ॥१६८॥

नन्वेन मन्त्रेण मद्यं शोधयेत् तत्राह पाशादीत्यादि । स्वाहा-न्तेन स्वाहान्तो तस्यैवम्भूतेन पाशादित्रिकवीजेन आ ह्रीं क्रोमिति बीजत्रयेण अष्टोत्तरशताद्वृत्त्या इममेव मन्त्रं जपन् कुलार्चको हेतुं मद्यं विशोधयेत् ॥ १६९ । १७० ॥

मधुरत्रयमेवाह दुग्धमित्यादि । अलिरूपं मद्यस्वरूपम् इदं मधुरत्रयम् ॥ १७१ ॥

स्वभावात् कलिजन्मानः कामविभ्रान्तचेतसः ।
तद्रूपेण न जानन्ति शक्तिं सामान्यबुद्धयः ॥ १७२ ॥
अतस्तेषां प्रतिनिधौ शेषतत्त्वस्य पार्वति ! ।
ध्यानं देव्याः पदाम्भोजे स्वेष्टमन्त्रजपस्तथा ॥ १७३ ॥
ततस्तु प्राप्ततत्त्वानि पललादीनि यानि च ।
प्रत्येकं शतधानेन मनुना चाभिमन्त्रयेत् ॥ १७४ ॥
सर्वं ब्रह्ममयं ध्यात्वा निमील्य नयनद्वयम् ।
निवेद्य पूर्ववत् काल्यै पानभोजनमाचरेत् ॥ १७५ ॥
इदन्तु भैरवीचक्रं सर्वतन्त्रेषु गोपितम् ।
तवाग्रे कथितं भद्रे ! सारात् सारं परात्परम् ॥१७६॥
विवाहो भैरवीचक्रे तत्त्वचक्रेऽपि पार्वति ! ।
सर्वथा साधकेन्द्रेण कर्त्तव्यः शैववर्त्मना ॥ १७७ ॥

शक्तिं स्त्रियम् ॥ १७२ ॥

अत इत्यादि । हे पार्वति ! अतो हेतोः तेषां कलिजन्मनां शेषतत्त्वस्य मैथुनस्य प्रतिनिधौ देव्याः पदाम्भोजे ध्यानं विधेयम् तथा स्वेष्टमन्त्रस्य जपो विधेयः ॥ १७३ ॥

ततस्त्विति । ततः परं पललादीनि मांसादीनि यानि प्राप्त-तत्त्वानि तानि प्रत्येकं शतधा जप्यमानेनानेन आं ह्रीं क्रों स्वाहेति मनुनाभिमन्त्रयेत् शोधयेदित्यर्थः ॥ १७४ ॥

सर्वमिति । ततो नयनद्वयं निमील्य सर्वं मद्यादितत्त्वं ब्रह्ममयं ब्रह्मस्वरूपं ध्यात्वा पूर्ववत् काल्यै निवेद्य च पूर्ववदेव पानभोजन-माचरेत् ॥ १७५ ॥

अथ भैरवीचक्रस्य माहात्म्यं वर्णयितुमुपक्रमते इदन्त्वित्यादि ॥ १७६ । १७७ ॥

विना परिणयं वीरः शक्तिसेवां समाचरन् ।
परस्त्रीगामिनां पाप प्राप्नुयान्नात्र संशय ॥ १७८ ॥
सम्प्राप्ते भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः ।
निवृत्ते भैरवीचक्रे सर्वे वर्णाः पृथक् पृथक् ॥ १७९ ॥
नात्र जातिविचारोऽस्ति नोच्छिष्टादिविवेचनम् ।
चक्रमध्यगता वीरा मम रूपा नचान्यथा ॥ १८० ॥
न देशकालनियमो न वा पात्रविचारणम् ।
येन केनाहृतं द्रव्यं चक्रेऽस्मिन् विनियोजयेत् ॥१८१॥
दूरदेशात् समानीतं पक्वं वापक्वमेव वा ।
वीरेण पशुना वापि चक्रमध्यगत शुचिः ॥ १८२ ॥
चक्रारम्भे महेशानि ! विघ्नाः सर्वे भयाकुलाः ।
बिभीतास्ते पलायन्ते वीराणां ब्रह्मतेजसा ॥ १८३ ॥
पिशाचा गुह्यका यक्षा वेताला: क्रूरजातयः ।
श्रुत्वात्र भैरवीचक्रं दूरं गच्छन्ति साध्वसम् ॥ १८४॥
तत्र तीर्थानि सर्वाणि महातीर्थानि कानि च ।
सेन्द्रामरगणाः सर्वे तत्रागच्छन्ति सादरम् ॥ १८५ ॥
चक्रस्थानं महातीर्थं सर्वतीर्थाधिकं शिवे ।
त्रिदशा यत्र वाञ्छन्ति तव नैवेद्यमुत्तमम् ॥ १८६ ॥

परिणयम् विवाहम् ॥ १७८ । १७९ ॥
अत्र भैरवीचक्रे ॥ १८० ॥
द्रव्यं मद्यादि ॥ १८१ — १८३ ॥
साध्वसम् भयम् ॥ १८४ ॥
यत्र चक्रस्थाने ॥ १८५ । १८६ ॥

म्लेच्छेन श्वपचेनापि किरातेनापि हूणुना ।
आमं पक्वं यदानीतं वीरहस्तार्पितं शुचिः ॥ १८७ ॥
दृष्ट्वा तु भैरवीचक्रं मम रूपांश्च साधकान् ।
मुच्यन्ते पशुपाशेभ्यः कलिकल्मषदूषिताः ॥ १८८ ॥
प्रबले कलिकाले तु न कुर्याच्चक्रगोपनम् ।
सर्वत्र सर्वदा वीरः साधयेत् कुलसाधनम् ॥ १८९ ॥
चक्रमध्ये वृथालापं चाञ्चल्यं बहुभाषणम् ।
निष्ठीवनमधोवायुं वर्णभेदं विवर्जयेत् ॥ १९० ॥
क्रूरान् खलान् पशून् पापान् नास्तिकान् कुलदूषकान् ।
निन्दकान् कुलशास्त्राणां चक्राद्दूरतरं त्यजेत् ॥ १९१ ॥
स्नेहाद्वयादानुरक्त्या पशूंश्चक्रे प्रवेशयन् ।
कुलधर्म्मान् परिभ्रष्टो वीरोऽपि नरकं व्रजेत् ॥ १९२ ॥
ब्राह्मणाः क्षत्रिया वैश्या शूद्राः सामान्यजातयः ।
कुलधर्म्माश्रिता ये वै पूज्यास्ते देववत् सदा ॥ १९३ ॥
वर्णाभिमानाच्चक्रे तु वर्णभेदं करोति यः ।
स याति घोरनिरयमपि वेदान्तपारगः ॥ १९४ ॥
चक्रान्तर्गतकौलानां साधूनां शुद्धचेतसाम् ।
मात्राच्छिवस्वरूपाणां प्रापाशङ्का भवेत् कुतः ॥ १९५ ॥
यावद्दसन्ति चक्रेषु विप्राद्याः शैवमार्गिणः ।
तावत्तु शाम्भवाचारांश्चरेयुः शिवशासनात् ॥ १९६ ॥
चक्रादिनिःसृताः सर्व्वे स्वस्ववर्णाश्रमोदितम् ।
लोकयात्राप्रसिद्ध्यर्थं कुर्य्युः कर्म्म पृथक् पृथक् ॥ १९७ ॥

हूणुना जन्मविशेषेण आमम् अपक्वम् ॥ १८७—१८९ ॥
भयादानुरक्त्या भयहेतुकेनानुरागेण ॥ १९२—१९५ ॥

पुरश्चर्य्या शतेनापि शवमुण्डचितासनात् ।
चक्रमध्ये सकृत् जप्त्वा तत् फलं लभते सुधीः ॥ १८८॥
भैरवीचक्रमाहात्म्यं को वा वक्तुं क्षमो भवेत् ।
सकृदेतत् प्रकुर्व्वाणः सर्व्वैः पापैः प्रमुच्यते ॥ १८९ ॥
षण्मास भूमिपालः स्यात् वर्षं मृत्युञ्जयः स्वयम् ।
नित्यं समाचरन् मर्त्यो ब्रह्मनिर्वाणमाप्नुयात् ॥२००॥
बहुना किमिहोक्तेन सत्यं जानीहि कालिके ।।
इहामुत्र सुखावाप्त्यै कुलमार्गो हि नापरः ॥ २०१ ॥
कले प्रावल्यसमये सर्व्वधर्म्मं विवर्ज्जिते ।
गोपनात् कुलधर्म्मस्य कौलोऽपि नारकी भवेत् ॥२०२॥
कथितं भैरवीचक्रं भोगमोक्षैकसाधनम् ।
तत्त्वचक्रं कुलेशानि । साम्प्रतं वच्मि तत् शृणु ॥२०३॥
तत्त्वचक्रं चक्रराजं दिव्यचक्रं तदुच्यते ।
नात्राधिकारः सर्व्वेषां ब्रह्मज्ञान् साधकान् विना ॥२०४॥
परब्रह्मोपासका ये ब्रह्मज्ञा ब्रह्मतत्परा: ।
शुद्धान्तःकरणाः शान्ताः सर्व्वप्राणिहिते रताः ॥२०५॥
निर्व्विकारा निर्व्विकल्पा दयाशीला दृढ़व्रताः ।
सत्यसङ्कल्पका ब्रह्मास्त एवात्राधिकारिणः ॥ २०६ ॥

चरेयु· कुर्य्युः ॥ १८६ । १८७ ॥

पुरश्चर्य्येत्यादि । शवमुण्डचितासनात् शवासनात् मुण्डासनात् चितासनाच्च यत् फल लभते ॥ १८८ । १८९ ॥

षण्मासमिति । षण्मास भैरवीचक्रं समाचरन् मर्त्यो भूमिपालः स्यादित्यवमन्वय· ॥ २००—२०२ ॥

अत्र चक्रराजे तत्त्वचक्रे ॥ २०४ ॥

शान्ताः रागद्वेषादिशून्याः ॥ २०५ ॥

ब्रह्मभावेन तत्त्वज्ञे ! ये पश्यन्ति चराचरम् ।
तेषां तत्त्वविदां पुंसां तत्त्वचक्रेऽधिकारिता ॥ २०७ ॥
सर्व्वं ब्रह्ममयं भावश्चक्रेऽस्मिन् स्तत्त्वमञ्चके ।
येषामुत्पद्यते देवि ! तएव तत्त्वचक्रिणः ॥ २०८ ॥
न घटस्थापनातास्ति न बाहुल्येन पूजनम् ।
सर्व्वत्र ब्रह्मभावेन साधयेत् तत्त्वसाधनम् ॥ २०९ ॥
ब्रह्ममन्त्री ब्रह्मनिष्ठो भवेच्चक्रेश्वरः प्रिये ! ।
ब्रह्मज्ञैः साधकैः सार्द्धं तत्त्वचक्रं समारभेत् ॥ २१० ॥
रम्ये सुनिर्म्मले देशे साधकानां सुखावहे ।
विचित्रासनमानीय कल्पयेद्विमलासनम् ॥ २११ ॥
तत्रोपविश्य चक्रेशः महितो ब्रह्मसाधकैः ।
आसादयेत्तु तत्त्वानि स्थापयेदग्रतः प्रिये ! ॥ २१२ ॥
तारादिप्राणवीजान्तं शतावृत्त्या जपन् मनुम् ।
सर्व्वतत्त्वेषु चक्रेशः इमं मन्त्रमुदीरयेत् ॥ २१३ ॥

अत्र तत्त्वचक्रे ॥ २०६ । २०७ ॥

भावो भावना विचिन्तनेत्यर्थः ॥ २०८ ॥

तत्त्वसाधनम् तत्त्वचक्रसाधनम् ॥ २०९ । २१० ॥

अथ तत्त्वचक्रस्य विधानमाह रम्ये इत्यादिभिः ॥ २११ ॥

तत्र कल्पिते विमलासने आसादयेत् आनयेत् तत्त्वानि मद्यादीनि ॥ २१२ ॥

तारादीत्यादि । ततो मद्यादिषु सर्वतत्त्वेषु तारादिप्राणवीजान्तं तारः प्रणव आदिर्यस्य स तारादि प्राणवीजं हंस इति वीजमन्त्रो यस्य स तारादिप्राणवीजान्तः तारादिश्चासौ प्राणवीजान्तश्च तारादिप्राणवीजान्तस्तं मनुम् ओं हंस इति मन्त्रं शतावृत्त्या जपन् चक्रेशः इमं वक्ष्यमाणं मन्त्रमुदीरयेत् ॥ २१३ ॥

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना ॥ २१४ ॥
सप्तधा वा त्रिधा जप्त्वा तानि सर्व्वाणि शोधयेत् ॥ २१५ ॥
ततो ब्राह्मेण मनुना समर्घ्यं परमात्मने ।
ब्रह्मज्ञैः साधकैः सार्द्धं विदध्यात् पानभोजनम् ॥ २१६ ॥
ब्रह्मचक्रे महेशानि ! वर्णभेदं विवर्जयेत् ।
न देशकालनियमो न पात्रनियमस्तथा ॥ २१७ ॥
ये कुर्व्वन्ति नरा मूढ़ा दिव्यचक्रे प्रमादतः ।
कुलभेदं वर्णभेदं ते गच्छन्त्यधमां गतिम् ॥ २१८ ॥
अतः सर्व्वप्रयत्नेन ब्रह्मज्ञैः साधकोत्तमैः ।
तत्त्वचक्रमनुष्ठेयं धर्म्मकामार्थमुक्तये ॥ २१९ ॥

श्रीदेव्युवाच ।

गृहस्थानामशेषेण धर्म्मानकथयत् प्रभो ! ।
संन्यासविहितान् धर्म्मान् कृपया वक्तुमर्हसि ॥ २२० ॥

श्रीसदाशिव उवाच ।

अवधूताश्रमो देवि ! कलौ सन्यास उच्यते ।
विधिना येन कर्त्तव्यस्तत् सर्व्वं शृणु साम्प्रतम् ॥ २२१ ॥

मन्त्रमेवाह ब्रह्मार्पणमिति ॥ २१४ ॥

सप्तधेति । इमं मन्त्रं सप्तधा त्रिधा वा जप्त्वा सर्व्वाणि तानि मद्यादीनि शोधयेत् ॥ २१५ ॥

ब्राह्मेण मनुना ओं सच्चिदेकं ब्रह्मेति मन्त्रेण ॥ २१६ ॥

ब्रह्मचक्रे तत्त्वचक्रे ॥ २१७–२१९

एवमशेषान् गृहस्थधर्म्मान् श्रुत्वा अधुना सन्यासिधर्म्मान् श्रोतुमिच्छन्ती श्रीदेव्युवाच गृहस्थानामित्यादि ॥ २२० ॥

ब्रह्मज्ञाने समुत्पन्ने विरक्तः सर्व्वकर्म्मणि ।
अध्यात्मविद्यानिपुण सन्यासाश्रममाश्रयेत् ॥ २२२ ॥
विहाय पितरौ पितरौ शिशु भार्य्यां पतिव्रताम् ।
त्यक्त्वासगर्वान् वन्धूंश्च प्रव्रजकारकी भवेत् ॥ २२३ ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रः सामान्य एव च ।
कुलावधूतसंस्कारे पञ्चानामधिकारिता ॥ २२४ ॥
सम्माद्य गृहकर्म्माणि परितोष्य परानपि ।
निर्म्ममो निलयाद्गच्छेन्निष्कामः विजितेन्द्रियः ॥ २२५ ॥
आहूय स्वजनान् बन्धून् अनुज्ञातः प्रतिवासिनः ।
प्रीत्यानुमतिमन्विच्छेत् गृहाद्विनिसृपुर्जनः ॥ २२६ ॥
तेषामनुज्ञामादाय प्रणम्य परदेवताम् ।
ग्राम प्रदक्षिणीकृत्य निरपेक्षो गृहाद्व्रियात् ॥ २२७
मुक्तः ससारपाशेभ्यः परमानन्दनिर्वृतः ।
कुलावधूतं ब्रह्मज्ञं गत्वा सम्प्रार्थयेदिदम् ॥ २२८ ॥
गृहाश्रमे परब्रह्मन् ! ममैतद्विगतं वयः ।

एव प्रेरितः सन् श्रीसदाशिव उवाच अवधूतेत्यादि । तत् विधानम् साम्प्रतमिदानीम् ॥ २२१ ॥

सन्यासग्रहणविधानमेवाह ब्रह्मज्ञाने इत्यादिभिः । अध्यात्मविद्यानिपुण आत्मविद्याभिज्ञ ॥ २२२—२२४ ॥

सम्माद्य साधयित्वा परान् पित्रादिभिन्नान् निर्ममः गृहादिविषयममताशून्य निलयात् गृहात् ॥ २२५ ॥

अनुमतिमन्विच्छेत् अनुज्ञामादद्यात् ॥ २२६ ॥

निरपेक्षः निस्पृहः व्रियात् गच्छेत् ॥ २२७ ॥

परमानन्दनिर्वृतः परमानन्दे निमग्नः ॥ २२८ ॥

प्रसादं कुरु मे नाथ । संन्यासग्रहणं प्रति ॥ २२९ ॥
निवृत्तगृहकर्म्माणं विचार्य्य विधिवद्गुरुः ।
शान्तं विवेकिनं वीक्ष्य द्वितीयाश्रममादिशेत् ॥ २३० ॥
ततः शिष्यः कृतस्नानो यतात्मा विहिताह्निकः ।
ऋणत्रयविमुक्त्यर्थं देवर्षीनर्च्चयेत् पितॄन् ॥ २३१ ॥
देवा ब्रह्मा च विष्णुश्च रुद्रश्च स्वगणैः सह ।
ऋषयः सनकाद्याश्च देवब्रह्मर्षयस्तथा ॥ २३२ ॥
ये च ये पितरः पूज्या वक्ष्यामि शृणु तानपि ॥ २३३ ॥
पिता पितामहश्चैव प्रपितामह एव च ।
माता पितामही देवि । तथैव प्रपितामही ।
मातामहाद्योऽप्येवं मातामह्याद्योऽपि च ॥ २३४ ॥

यत् प्रार्थयेत् तदाह गृहाश्रमे इत्यादिना ॥ २२९ ॥

शान्तम् उपरतचित्तम् ॥ २३० ॥

ततः परं यतात्मा संयतमनाः शिष्यः कृतस्नानो विहिताह्निक स्च भूत्वा ऋणत्रयविमुक्त्यर्थं देवर्षीन् देवान् पितॄंश्चार्च्चयेत् पूजयेत् ॥ २३१ ॥

ऋणविमुक्त्यर्थं ये देवा ऋषयश्च पूज्यास्तानाह देवा इत्यादिना । ब्रह्मा च विष्णुश्च स्वगणैः सह रुद्रश्चैते देवाः सन्ध्यासकर्म्मणि पूज्याः सनक आद्यो येषां ते सनकाद्याः सनकसनन्दनसनातनाद्याः सनकसजातीया ऋषय तथा देवर्षयो नारदादयो ब्रह्मर्षयो भृग्वादयश्च पूज्या ॥ २३२ ॥

अत्र सन्ध्यासकर्म्मणि ॥ २३३ ॥

ऋणविमुक्त्यर्थं पूज्यान् पितॄनेवाह पितेत्यादिसार्द्धेन । एवं पित्रादिवन्मातामहादयोऽपि पूज्या एवमन्वयः आदिना प्रमातामहवृद्धप्रमातामह्यो प्रमातामहीवृद्धप्रमातामह्योश्च ग्रहणम् ॥ २३४ ॥

प्राच्यामृषीन् यजेद्देवान् दक्षिणस्यां पितॄन् यजेत्।
मातामहान् प्रतीच्याञ्च पूजयेत्यासकर्मणि ॥ २३५ ॥
पूर्वादिक्रमतो दद्यादासनानां द्वयं द्वयम्।
देवादीन् क्रमतस्तत्रावाह्य पूजां समाचरेत् ॥ २३६ ॥
समर्च्य विधिवत्तेभ्यः पिण्डान् दद्यात् पृथक् पृथक्।
पिण्डप्रदानविधिना दत्वा पिण्डं यथाक्रमम्।
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् पितृदेवताः ॥ २३७ ॥
तृप्यध्वं पितरो देवा देवर्षिमातृका गणाः
गुणातीतपदे यूयमतृप्तीकुरुताचिरात् ॥ २३८ ॥
इत्यातृप्यमर्थयित्वा प्रणम्य च पुनः पुनः।

ननु कस्यां कस्यां दिशि देवान्ऋषीन् पितॄंश्च पूजयेदित्यपेक्षायामाह प्राच्यामित्यादि। सन्यासकर्मणि देवान्ऋषींश्च प्राच्यां पूर्वस्यां दिशि यजेत् दक्षिणस्यां दिशि पितॄन् पित्रादीन् यजेत् प्रतीच्यां पश्चिमायां दिशि मातामहान्मातामहप्रभृतीन् पूजयेत् ॥ २३५ ॥

अथ सक्षेपतो देवादीना पूजाया विधानमाह पूर्वादिक्रमत इत्यादिभि। पूर्वादिक्रमत पूर्वादिक्रमेण तिसृषु दिक्षासनाना द्वय द्वयं दद्यात् तत्रासनानां द्वये द्वये क्रमतो देवादीनावाह्य तेषा पूजां समाचरेत् कुर्यात् ॥ २३६ ॥

समर्च्येत्यादि। देवर्षिपितॄन् विधिवत् समर्च्य तेभ्यो देवर्षिपितृभ्यः पृथक् पृथक् पिण्डान् विधिवद्दद्यात् वक्ष्यमाणेन पिण्डप्रदानविधिन देवर्षिभ्यो यथाक्रम पिण्डं दत्वा कृताञ्जलिपुटो भूत्वा पितृदेवताः प्रार्थयेत् ॥ २३७ ॥

किं प्रार्थयेत्तत्राह तृप्यध्वमित्यादि। हे पितरो! देवा! देवर्षयो! मातृगणाश्च यूय तृप्यध्व गुणातीतपदे अतिक्रान्तगुणे पदे व्रजन्त मामचिरादतिशीघ्रमेव यूयमतृप्ती कुरुत ॥ २३८। २३९ ॥

ऋणत्रयविनिर्मुक्त आत्मश्राद्धं प्रकल्पयेत् ॥ २३९ ॥
पिताह्यात्मैव सर्व्वेषां तत्पिता प्रपितामहः ।
आत्मन्यात्मार्पणार्थाय कुर्य्यादात्मक्रियां सुधीः ॥२४०॥
उत्तराभिमुखो भूत्वा पूर्व्ववत् कल्पितासने ।
आवाह्यात्मपितॄन् देवि ! दद्यात् पिण्डं समर्चयन् ॥२४१॥
प्रागग्यान् दक्षिणाग्रांश्च पश्चिमाग्रात् यथाक्रमात् ।
पिण्डार्थमास्तरेद्दर्भानुदगग्रान् स्वकर्म्मणि ॥ २४२ ॥
समाप्य श्राद्धकर्म्माणि गुरुदर्शितवर्त्मना ।
यथोक्तचित्तशुद्ध्यर्थमिमं मन्त्रं शतं जपेत् ॥ २४३ ॥
क्रीं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीयमामृतात् ॥२४४॥
उपासनानुसारेण वेद्यां मण्डलपूर्वकम् ।
संस्थाप्य कलसं तत्र गुरु पूजां समारभेत् ॥ २४५ ॥

आत्मश्राद्धकरणे हेतुं दर्शयन्नाह पिता ह्योत्यादि । ह्यि यतः सर्वेषामात्मैव पिता तत्पिता पितामहः प्रपितामहश्च स्यात् अत आत्मनि परमात्मनि आत्मनोऽर्पणार्थाय सुधीर्विद्वान् आत्मक्रिया कुर्य्यात् ॥ २४० ॥

सचैवं आत्मन श्राद्धस्य विधानमाह उत्तराभिमुख इत्यादिना । आत्मपितॄन् आत्मस्वरूपान् पित्रादीन् ॥ २४१ ॥

प्रागग्यानिति । पिण्डार्थं देवर्षिपितृमनुष्यकपिण्डदानार्थं यथाक्रमात् क्रमेणैव प्राक् प्राच्या दिश्यग्राणि येषां तान् प्रागग्यान् दक्षिणाग्रान् पश्चिमाग्राश्च दर्भान् कुशानास्तरेदाच्छादयेत् स्वकर्म्मणि एवात्मश्राद्धक्रियायां तु उदक् उदीच्यामग्राणि येषां तथाभूतान् दर्भानास्तरेत् ॥ २४२ । २४३ ॥

तमेव मन्त्रमाह क्रीं त्र्यम्बकमित्यादिकम् ॥ २४४ ॥

ततस्तु परमं ब्रह्म ध्यात्वा शाम्भववर्त्मना ।
विधाय पूजां ब्रह्मात्मो वह्निस्थापनमाचरेत् ॥ २४६ ॥
प्रागुक्तसंस्कृते वह्नौ स्वकल्पोक्ताहुतिं गुरुः ।
दत्वा शिष्यं समाहूय साकल्पं हावयेत्तु तम् ॥ २४७ ॥
आदौ व्याहृतिभिर्हुत्वा प्राणहोमं प्रकल्पयेत् ।
प्राणापानौ समानश्चोदानव्यानौ च वायवः ॥ २४८ ॥
तत्त्वहोमं ततः कुर्याद्देहात्माध्याससुक्तये ।
पृथिवीसलिलं वह्निर्वायुराकाशमेव च ॥ २४९ ॥
गन्धो रसश्च रूपञ्च स्पर्शः शब्दो यथाक्रमात् ।
ततो वाक्पाणिपादाश्च पायूपस्थौ ततः परम् ॥ २५० ॥

उपासनेत्यादि । तत उपासनाया अनुसारेण रचितायां वेद्यां मण्डनपूर्वकं कलशं संस्थाप्य तत्र कलशे शिष्येणेष्टदेवतायाः पूजां गुरुः समारभेत् ॥ २४५ ॥

ततस्त्विति । ततस्तु शिष्येष्टदेवतापूजनादनन्तरं तु ब्रह्मात्मो गुरुः परमं ब्रह्म ध्यात्वा शाम्भववर्त्मना तस्य पूजां च विधाय वेद्यां वह्निस्थापनमाचरेत् कुर्यात् ॥ २४६ ॥

प्रागुक्तेत्यादि । तत प्रागुक्तेन विधिना संस्कृते वह्नौ स्वकल्पोक्ताहुतिं स्वसकल्पे उक्तामाहुतिं दत्वा गुरुस्तं शिष्यं समाहूय तेन साकल्यमग्नौ हावयेत् ॥ २४७ ॥

आदाविति । आदौ प्रथमतो भूतादिभिर्व्याहृतिभिः साकल्यं हुत्वा ततः प्राणहोमं शरीरस्थप्राणादिपञ्चवायुहोमं प्रकल्पयेत् कुर्यात् । होतव्यान् प्राणादीन् पञ्चवायूनाह प्राणेत्याद्यर्धेन ॥ २४८ ॥

तत्त्वेति । ततः परं देहात्माध्याससुक्तये शरीरनिष्ठात्मतत्त्वज्ञानविमुक्त्यर्थं यथाक्रमं तत्त्वहोमं पृथ्व्याद्यजादिचतुर्विंशतितत्त्वहवनं कुर्यात् । क्रमेणैव हवनीयानि चतुर्विंशतितत्त्वान्याह पृथिवीत्यादिनाहङ्कारपर्यन्तेन किञ्चिदधिकेन समाद्धयेत ॥ २४९ ॥

श्रोत्रं त्वङ्नयनं जिह्वा घ्राणं बुद्धीन्द्रियाणि च ।
मनो बुद्धिश्च चित्तञ्चाहङ्कारो देहजाः क्रिया ॥ २५१ ॥
सर्वाणीन्द्रियकर्म्माणि प्राणकर्म्माणि यानि च ॥ २५२ ॥
एतानि मे पदान्ते च शुद्ध्यन्तां पदमुच्चरेत् ।
क्रीं ज्योतिरहं विरजा विपाप्मा भूयासमित्यपि ॥ २५३ ॥
चतुर्विंशतितत्त्वानि कर्म्माणि दैहिकानि च ।
हुत्वाग्नौ निष्क्रियोदेहं स्मृतवच्चिन्तयेत्ततः ॥ २५४ ॥

गन्ध इत्यादि । पृथिव्यादिपञ्चतत्त्वहवनानन्तरं गन्धादिपञ्चतत्त्वानि यथाक्रमात् होतव्यानि ततो वागादिपञ्चकर्म्मेन्द्रियाणि हवनीयानि तत. पर श्रोत्रादीनि पञ्चबुद्धीन्द्रियाणि होतव्यानि ततो मन आदीनि चत्वारि तत्त्वानि हवनीयानि ततो देहजा· क्रिया· होतव्या ॥ २५० । २५१ ॥

सर्वाणीति । तत सर्वाणीन्द्रियकर्म्माणि यानि च प्राणकर्म्माणि तान्यपि हवनीयानि ॥ २५२ ॥

प्राणादिपञ्चवायूना पृथिव्यादिवत्तुर्विंशतितत्त्वानां देहजक्रियाणां सर्वेषा कर्म्मणा प्राणादिवायुकर्म्मणाञ्च होतव्यमन्त्रमाह एतानीत्यादिना । पूर्व एतानि मे इत्युच्चरेत् । ततपदान्ते च शुद्ध्यन्तामिति पदमुच्चरेत् । ततो ह्रीं ज्योतिरहं विरजा विपाप्मा भूयासमित्युच्चरेत् ततो द्विठ स्वाहेत्युच्चरेत् योजनया एतानि मे शुद्ध्यन्तां ह्रीं ज्योतिरहं विरजा विपाप्मा भूयास स्वाहेति मन्त्रो जात. अनेनैव प्राणादीनि प्राणकर्म्मपर्य्यन्तानि सर्वाणि जुहुयात् यथापानसमानोदानव्याना मे शुद्ध्यन्तां ह्रीं ज्योतिरहं विरजा विपाप्मा भूयास स्वाहेति प्राणादीन् जुहुयादिति एव सर्वत्र योजना ॥ २५३ ॥

चतुर्विंशतीत्यादि । एवं चतुर्विंशतितत्त्वानि दैहिकानि कर्म्माणि चाग्नौ हुत्वा निष्क्रियः क्रियाभ्यो निष्क्रान्तश्च भूत्वा ततो स्मृतवच्चिन्तयेत् ॥ २५४ ॥

विभाव्य स्तवत् कायं रहितं सर्व्वकर्मणा ।
स्मरंस्तत् परमं ब्रह्म यज्ञसूत्र समुद्धरेत् ॥ २५५ ॥
ऐं क्लीं ह्रं इति मन्त्रेण स्कन्धादुत्तार्य्य तत्त्ववित् ।
यज्ञसूत्र करे कृत्वा पठित्वा व्याहृतित्रयम् ।
वह्निजायां समुच्चार्य्य घृताक्तमनले क्षिपेत् ॥ २५६ ॥
हुत्वैवमुपवीतञ्च कामबीजं समुच्चरन् ।
क्षित्वा शिखा करे कृत्वा घृतमध्ये नियोजयेत् ॥ २५७ ॥
ब्रह्मपुत्रि ! शिखे ! त्व हि बालरूपा तपस्विनी ।
दीयते पावके स्थानं गच्छ देवि ! नमोऽस्तु ते ॥ २५८ ॥
काम मायां कूर्चमन्त्र वह्निजायामुदीरयन् ।
तस्मिन् सुसस्कृते वह्नौ शिखाहोमं समाचरेत् ॥ २५९ ॥
शिखामाश्रित्य पितरो देवा देवर्षयस्तथा ।
सर्वाण्याश्रमकर्माणि निवसन्ति शिखोपरि ॥ २६० ॥

विभाव्येति । सर्वकर्म्मणा रहित स्तवच्च काय देह विभाव्य विचिन्त्य तत् जगत्कारणत्वेनातिप्रसिद्धं परम ब्रह्म स्मरन् सन् यज्ञसूत्र यज्ञोपवीतं समुद्धरेत् उरस्थलात् स्कन्धं नयेत् ॥ २५५ ॥

ऐमित्यादि । तत तत्त्ववित् ब्रह्मविज्जन ऐं क्लीं ह्रमिति मन्त्रेण यज्ञसूत्र स्कन्धादुत्तार्य्य करे ह्रस्ते च कृत्वा व्याहृतित्रयं पठित्वा व्याहृतित्रयान्ते च वह्निजाया स्वाहेति पद समुच्चार्य्य घृताक्त घृतसंयुक्त यज्ञसूत्रमनलेऽग्नौ क्षिपेत् ॥ २५६ ॥

हुत्वेति । एवं प्रकारेणोपवीतं यज्ञसूत्रमग्नौ हुत्वा कामबीज क्लीमिति बीज समुच्चरन् सन् शिखा क्षित्वा करे च कृत्वा घृतमध्ये नियोजयेत् स्थापयेत् ॥ २५७ ॥

ब्रह्मेति । ततो ब्रह्मपुत्रि इत्याद्य नमोऽस्तु इत्यन्त मन्त्रमुदीरयन् कीर्त्तयन् तस्मिन् सुसस्कृते वह्नौ शिखाया होमं समाचरेत् कुर्य्यात् ॥ २५८—२६० ॥

अतः सन्तर्प्य ताः सर्वा देवर्षिपितृदेवताः ।
शिखासूत्रपरित्यागाद्धोमो ब्रह्ममयो भवेत् ॥ २६१ ॥
यज्ञसूत्रशिखात्यागात् सन्यासः स्यात् द्विजन्मनाम् ॥२६२॥
शूद्राणामितरेषाञ्च शिखां हुत्वैव संक्रिया ।
ततो मुक्तशिखासूत्रः प्रणमेत दण्डवद् गुरुम् ॥ २६३ ॥
गुरुरुत्थाप्य तं शिष्यं दक्षकर्णे वदेदिदम् ।
तत्त्वमसि महाप्राज्ञ ! हंसः सोऽहं विभावय ।
निर्ममो निरहङ्कारः स्वभावेन सुखं चर ॥ २६४ ॥
ततो घटञ्च वह्निञ्च विसृज्य ब्रह्मतत्त्ववित् ।
आत्मस्वरूपं तं मत्वा प्रणमेच्छिरसा गुरुः ॥ २६५ ॥
नमस्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमो नमः ।
त्वमेव तत् तत्त्वमेव विश्वरूप ! नमोऽस्तु ते ॥ २६६ ॥
ब्रह्ममन्त्रोपासकानां तत्त्वज्ञानां जितात्मनाम् ।

ब्रह्ममयो ब्रह्मस्वरूपः ॥ २६१ ॥

द्विजन्मनाम् ब्राह्मणक्षत्रियवैश्यानाम् इतरेषाम् वर्णसङ्कराणाम् ॥ २६२ । २६३ ॥

ननु गुरु शिष्यस्य दक्षिणे कर्णे किं वदेदित्यपेक्षायामाह तत्त्वमसीत्यादि । हे महाप्राज्ञ महामनीषिन् ! तत् जगत्कारणत्वेनातिप्रसिद्धं पर ब्रह्म त्वमेवासि अतोऽहमेव स परमात्मा स एवाहमस्मीति त्वं विभावय विचिन्तय किञ्च निर्मम पुत्रादिविषयकममताशून्यो निरहङ्कारो विद्यादिनिमित्तकचित्तसमुन्नतिशून्यश्च सन् स्वभावेन सुखं यथा स्यात्तथा चर इतस्ततो गच्छ अहमित्यस्यादेर्लोपस्त्वार्ष ॥ २६४ ॥

तत इति । ततः परं घटं वह्निञ्च विसृज्य ब्रह्मतत्त्ववित् गुरुस्तं शिष्यमात्मस्वरूपं मत्वा वक्ष्यमाणमन्त्रेण शिरसा प्रणमेत् ॥ २६५ ॥

येन मन्त्रेण प्रणमेत् तमेव मन्त्रमाह नमस्तुभ्यमित्यादिकम् ॥२६६॥

स्वमन्त्रेण शिखाच्छेदात् सन्यासग्रहणं भवेत् ॥२६७॥
ब्रह्मज्ञानविशुद्धानां किं यज्ञैः श्राद्धपूजनैः ।
स्वेच्छाचारपराणान्तु प्रत्यवायो न विद्यते ॥ २६८ ॥
ततो निर्द्वन्द्वरूपोऽसौ निष्कामस्थिरमानसः ।
विहरेत् स्वेच्छया शिष्यः साक्षाद् ब्रह्ममयो भुवि॥२६९॥
आब्रह्मस्तम्बपर्य्यन्तं सद्रूपेण विभावयन् ।
विस्मरन्नामरूपाणि ध्यायन्नात्मानमात्मनि ॥ २७० ॥
अनिकेतः क्षमावृत्तो निःशङ्कः सङ्गवर्जितः ।
निर्ममो निरहङ्कारः सन्यासी विहरेत् क्षितौ ॥२७१॥
मुक्तो विधिनिषेधेभ्यो निर्य्योगक्षेम आत्मवित् ।
सुखदुःखसमो धीरो जितात्मा विगतस्पृह ॥ २७२ ॥

ब्रह्ममन्त्रोपासकानान्तु सन्यासग्रहणे विशेषविधिमाह ब्रह्ममन्त्रेत्यादिना । तत्त्वज्ञाना ब्रह्मज्ञानिना जितात्मना जितमनसां ब्रह्ममन्त्रोपासकाना स्वमन्त्रेण शिखाच्छेदादेव सन्यासग्रहण भवेत् ॥ २६७ ॥

ननु यज्ञश्राद्धादिकमकृत्वैव सन्यास गृह्णता ब्रह्ममन्त्रोपासकाना प्रत्यवायभागित्व स्यात्तत्राह ब्रह्मज्ञानेत्यादि ॥ २६८ ॥

निर्द्वन्द्वरूप सुखदु खादियुगलानि द्वन्द्वानि तद्रहितो निर्द्वन्द्वस्तत्स्वरूपः ॥ २७९ ॥

आब्रह्मस्तम्बपर्य्यन्तं ब्रह्मारभ्य तृणादिगुच्छपर्य्यन्तं सद्रूपेण सत्यरूपेण विभावयन् विचिन्तयन् ॥ २७० ॥

अनिकेत इत्यादि । अनिकेतः नियतवासशून्यं क्षमावृत्तः क्षमैव वृत्तं यस्य स निःशङ्क उद्वेगरहितः सङ्गवर्जित क्वचिदप्यनासक्त ॥ २७१ ॥

सङ्ग इत्यादि । निर्योगक्षेमः अप्राप्तस्वीकारो योग प्राप्तपरि-

स्थिरात्मा प्राप्तदुःखोऽपि सुखे प्राप्तेऽपि निष्पृहः ।
सदानन्दः शुचिः शान्तो निरपेक्षो निराकुलः ॥२७३॥
नोद्वेजकः स्याज्जीवानां सदा प्राणिहिते रतः ।
विगतामर्षभीर्दान्तो निःसङ्कल्पो निरुद्यमः ॥ २७४ ॥
शोकद्वेषविमुक्तः स्यात् शत्रौ मित्रे समो भवेत् ।
शीतवातातपसहः समो मानापमानयोः ॥ २७५ ॥
सम शुभाशुभे तुष्टो यदृच्छा प्राप्तवस्तुना ।
निस्त्रैगुण्यो निर्विकल्पो निर्लोभः स्यादसञ्चयी ॥२७६॥
यथासत्यमुपाश्रित्य मृषा विश्वं प्रतिष्ठति ।
आत्माश्रितस्तथा देहो जानन्नेवं सुखी भवेत् ॥ २७७॥

भाजन क्षेम ताभ्यां रहितः सुखदुःखसम सुखदुःखे समे यस्य सः जितात्मा जितदेहः विगतस्पृह उच्चावचेषु दृष्टमात्रेषु वस्तुषु इतस्ततो जिघृक्षा स्पृहा विगता स्पृहा यस्य सः ॥ २७२ ॥

स्थिरेत्यादि । स्थिरात्मा स्थिरचित्त स्थिरस्वभावो वा निष्पृहः भोगाकाङ्क्षाशून्य शुचिः बाह्याभ्यन्तरशौचसम्पन्न शान्त संयतान्तःकरण निरपेक्ष परापेक्षारहित निराकुलः आकुलताशून्य ॥ २७३ ॥

नेत्यादि । नोद्वेजकः न भीतिजनक विगतामर्षभीः अपगतक्रोधभय दान्तः संयतबाह्येन्द्रियः निरुद्यम स्वदेहनिर्वाहार्थव्यापारशून्यः ॥ २७४ ॥

शोकेत्यादि । शत्रौ मित्रे च सम एकरूपः मानापमानयोरपि सम. हर्षविषादशून्य इत्यर्थः ॥ २७५ ॥

सम इत्यादि । निस्त्रैगुण्य त्रयो गुणा यस्मिन् स त्रिगुण सकाम तस्य भावस्त्रैगुण्यम् तस्मान्निष्क्रान्तो निस्त्रैगुण्य निष्काम इत्यर्थः निर्विकल्प नानाविधकल्पनाशून्य निर्लोभ धनाद्यागमे बहुधा जायमानेऽपि पुनर्वर्द्धमानोऽभिलाषो लोभ तद्रहित असञ्चयी तत्तद्वस्तुसञ्चयाभावत्वात् ॥ २७६ ॥

इन्द्रियाण्येव कुर्वन्ति स्व स्व कर्म पृथक् पृथक् ।
आत्मा साक्षी विनिर्लिप्तो ज्ञात्वैव मोक्षभाग् भवेत्॥२७८
धातुप्रतिग्रह निन्दामनृतं क्रीडनं स्त्रिया ।
रेतस्त्यागमसूयाञ्च सन्यासी परिवर्जयेत् ॥ २७९ ॥
सर्वत्र समदृष्टिः स्यात् कीटे देवे तथा नरे ।
सर्वं ब्रह्मेति जानीयात् परिव्राट् सर्वकर्मसु ॥ २८० ॥
विप्रान्नं श्वपचान्नं वा यस्मात्तस्मात् समागतम् ।
देश कालं तथा पात्रमश्नीयादविचारयन् ॥ २८१ ॥
अध्यात्मशास्त्राध्ययनैः सदा तत्त्वविचारणैः ।
अवधूतो नयेत् कालं स्वेच्छाचारपरायणः ॥ २८२ ॥
सन्यासिनां मृत काय दाहयेन्न कदाचन ।
सम्भूय गन्धपुष्पाद्यैर्निखनेद्वाप्सु मज्जयेत् ॥ २८३ ॥

यथेत्यादि । यथा सत्य परमात्मानमेवोपाश्रित्यावलम्ब्य स्थिता मिथ्याभूतमपि विश्व प्रतिष्ठति सत्यवदास्ते तथैवात्मानमाश्रितो मिथ्याभूत एव देह प्रतिष्ठति एव जानन् सन्यासी सुखी भवेत् ॥ २७७ ॥

इन्द्रियाणीति । इन्द्रियाण्येव पृथक् पृथक् स्व स्वं कर्म कुर्वन्ति आत्मा तु साक्षी केवल शुभाशुभकर्मणा द्रष्टा भवति अतएव निर्लिप्त तत्तत्कर्मभिर्बद्धो न भवति एव ज्ञात्वैव सन्यासी मोक्षभाग् भवेत् २७८ ॥

अनृतम् अयथार्थभाषणम् असूयाम् सत्सुपि गुणेषु दोषारोपणम् ॥ २७९-२८१ ॥

अध्यात्मशास्त्राध्ययनैः वेदान्तादिशास्त्रपाठै तत्त्वविचारणै ब्रह्मतत्त्वविवेचनैः ॥ २८२ ॥

निखनेत् शुचौ भूमौ गर्त्तं विधाय तत्रैव निदध्यात् अप्सु जलेषु ॥ २८३ ॥

अप्राप्तयोगमर्त्यानां सदा कामाभिलाषिणाम् ।
स्वभावाज्जायते देवि ! प्रवृत्तिः कर्म्मसङ्कुले ॥ २८४ ॥
तत्रापि ते सानुरक्ता ध्यानार्च्चाजपसाधने ।
श्रेयस्तदेव जानन्तु यत्रैव दृढ़निश्चयाः ॥ २८५ ॥
अतः कर्म्मविधानानि प्रोक्तानि चित्तशुद्धये ।
नामरूपं बहुविध तदर्थं कल्पितं मया ॥ २८६ ॥
ब्रह्मज्ञानादृते देवि ! कर्म्मसन्यसन विना ।
कुर्वन् कल्पशत कर्म्म न भवेन्मुक्तिभाग् जन ॥ २८७ ॥
कुलावधूतस्तत्त्वज्ञो जीवन्मुक्तो नराकृतिः ।
साक्षान्नारायणं मत्वा गृहस्थस्तं प्रपूजयेत् ॥ २८८ ॥
यतेर्दर्शनमात्रेण विमुक्तः सर्वपातकात् ।
तीर्थव्रततपोदानसर्वयज्ञफल लभेत् ॥ २८९ ॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णयसारे श्रीमदाद्यासदाशिवसंवादे वर्णाश्रमाचारधर्मकथन नामाष्टमोल्लासः ।

अप्राप्तयोगमर्त्यानाम् न प्राप्तो योगो ब्रह्मज्ञानसबन्धो यैस्तथाभूतानाम् कर्मसङ्कुले कर्मसमूहे ॥ २८४ ॥

तत्रापि तत्रैवापि अप्राप्तयोगमर्त्याः सानुरक्ता अनुरागवन्तः तदेव अर्च्चादिकर्मैव ॥ २८५ ॥

तदर्थम् अप्राप्तयोगमर्त्यार्थम् ॥ २८६—२८९ ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां अष्टमोल्लासः ।

नवमोल्लासः ।

श्रीसदाशिव उवाच ।

वर्णाश्रमाचारधर्माः कथितास्तव सुव्रते ।।
संस्कारान् सर्ववर्णानां शृणुष्व गदतो मम ॥ १ ॥
संस्कारेण विना देवि ! देहशुद्धिर्न जायते ।
नासंस्कृतोऽधिकारी स्यात् दैवे पैत्रे च कर्मणि ॥ २ ॥
अतो विप्रादिभिर्वर्णैः स्वस्ववर्णोक्तसंक्रिया ।
कर्त्तव्या सर्वथा यत्नैरिहामुत्र हितेप्सुभिः ॥ ३ ॥
जीवसेकः पुंसवनं सीमन्तोन्नयनं तथा ।
जातनाम्ना निष्क्रमणमन्नाशनमतः परम् ।
चूडोपनयनोद्वाहाः संस्काराः कथिता दश ॥ ४ ॥
शूद्राणां शूद्रभिन्नानामुपवीतं न विद्यते ।
तेषां नवैव संस्कारा द्विजातीनां दश स्मृताः ॥ ५ ॥
नित्यानि सर्वकर्माणि तथा नैमित्तिकानि च ।
काम्यान्यपि वरारोहे ! कुर्याच्छास्त्रवर्त्मना ॥ ६ ॥

एवमशेषान् वर्णाश्रमाचारधर्मान् कथयित्वेदानीं सर्ववर्णानामखिलान् संस्कारान् विवक्षन् श्रीसदाशिव उवाच वर्णाश्रमेत्यादि । गदतो मम कथयतो तव ॥ १–२ ॥

ब्राह्मणक्षत्रियवैश्यानां जीवसेकादय उद्वाहान्ता दश संस्काराः सन्ति शूद्राणां वर्णसङ्कराणां चोपनयनाख्यसंस्कारवर्जिता जीवसेकादयो नवैव संस्काराः सन्तीत्याह जीवसेक इत्यादिना सार्द्धद्वयेन ॥ ४ ॥

शूद्रभिन्नानाम् वर्णसङ्कराणाम् ॥ ५ ॥ ६ ॥

यानि यानि विधानानि येषु येषु च कर्म्मसु ।
पुरैव ब्रह्मरूपेण तान्युक्तानि मया प्रिये ! ॥ ७ ॥
संस्कारेषु च सर्व्वेषु तथैवान्येषु कर्म्मसु ।
विप्रादिवर्णभेदेन क्रमान्मन्त्राश्च दर्शिताः ॥ ८ ॥
मत्प्रतेताद्यापरेषु तत्तत्कर्म्मसु कालिके ! ।
प्रणवाद्यांस्तु तान् मन्त्रान् प्रयोगेषु नियोजयेत् ॥ ९ ॥
कलौ तु परमेशानि ! तैरेव मनुभिर्नराः ।
मायाद्यैः सर्व्वकर्म्माणि कुर्य्युः शङ्करशासनात् ॥ १० ॥
निगमागमतन्त्रेषु वेदेषु सहितासु च ।
सर्व्वे मन्त्रा मयैवोक्ता प्रयोगो युगभेदतः ॥ ११ ॥
कलावल्पगतप्राणा मानवा हीनतेजसः ।
तेषां हिताय कल्याणि ! कुलधर्म्मो निरूपितः ॥ १२ ॥
कलिदुर्व्वलजीवानां प्रयासाग्रक्तचेतसाम् ।
संस्कारादिक्रियास्तेषां संक्षेपेणापि वक्ष्मि ते ॥ १३ ॥
सर्व्वेषां शुभकार्य्याणामादिभूता कुशण्डिका ।
तस्मादादौ प्रवक्ष्यामि शृणु तां देववन्दिते ! ॥ १४ ॥
रम्ये परिष्कृते देशे तुषाङ्गारादिवर्जिते ।
हस्तमात्रप्रमाणेन स्थण्डिलं रचयेत् सुधीः ॥ १५ ॥
तिस्रो रेखा विधातव्या प्राग्ग्रास्तत्र मण्डले ।

विधानानि आकाङ्क्षितानीति शेषः ॥ ७—९ ॥

मायाद्यैः माया ह्रीमिति बीज आद्ये येषां मनूनां ते तैः ॥ १०—१३ ॥

तां कुशण्डिकाम् ॥ १४ ॥

कुशण्डिकामेवाह रम्ये इत्यादिभिः । स्थण्डिलम् चत्वरम् ॥ १५ ॥

कूर्चेनाभ्युक्ष्य ताः सर्वा वह्निना वह्निमाहरेत् ॥१६॥
आनीय वह्निं तत्पार्श्वे स्थापयेद्वाग्भवं स्मरन् ॥१७॥
ततस्तस्माज्ज्वलद्दारु गृहीत्वा दक्षपाणिना ।
ह्रीं क्रव्यादेभ्यो नमः स्वाहा क्रव्यादांशम्परित्यजेत् ॥१८॥
इत्थं प्रतिष्ठितं वह्निं पाणिभ्यामात्मसम्मुखम् ।
उद्धृत्य तासु रेखासु मायाद्यां व्याहृतिं स्मरन् ॥ १९ ॥
संस्थाप्य तृणदारुभ्यां प्रवलीकृत्य पावकम् ।
समिधे हे घृताक्ते च हुत्वा तस्मिन् हुताशने ।
स्वकर्मविहितं नाम कृत्वा ध्यायेद्धनञ्जयम् ॥ २० ॥
बालार्करोचिःसङ्काशं सप्तजिह्वं द्विमस्तकम् ।

तिस्र इत्यादि । तत्र मण्डले हस्तमात्रप्रमाणेन रचिते स्थण्डिले प्रागग्यास्तिस्रो रेखा विधातव्या तत कूर्चेन ह्रमिति मन्त्रेण ता रेखा अभ्युक्ष्य जलेनाभिषिच्य वह्निना रमिति मन्त्रेण वह्निमाहरेत् आनयेत् ॥ १६ ॥

आनीयेत्यादि । वह्निमानीय वाग्भवम् ऐमिति मन्त्रं स्मरन् सन् तत्पार्श्वे स्थण्डिलस्य पार्श्वे स्थापयेत् ॥ १७ ॥

तत इत्यादि । तत पर तस्माद्वह्नेरेक ज्वलद्दारु प्रज्वलत्काष्ठ दक्षपाणिना गृहीत्वा ह्रीं क्रव्यादेभ्यो नम स्वाहेति मन्त्रेण क्रव्यादांशं राक्षसभागं दक्षिणस्या दिशि परित्यजेत् ॥ १८ ॥

इत्थमित्यादि । इत्थमनेन प्रकारेण प्रतिष्ठित संस्कृत वह्निं पाणिभ्यामुद्धृत्योत्थाप्य मायाद्यां ह्रीं बीजाद्यां व्याहृतिं स्मरन् सन् आत्मन सम्मुख यथा स्यात्तथा तासु रेखासु संस्थाप्य तृणदारुभ्यां पावकमग्निं प्रवलीकृत्य च तस्मिन् हुताशनेऽग्नौ घृताक्ते घृतसयुक्ते हे समिधौ काष्ठे हुत्वा प्रक्षिप्य वह्ने स्वकर्मविहित नाम च कृत्वा धनञ्जयमग्निं ध्यायेत् ॥ १९ ॥ २० ॥

अजारूढं शक्तिधर जटामुकुटमण्डितम् ॥ २१ ॥
ध्यात्वैवं प्राञ्जलिर्भूत्वावाहयेद्धव्यवाहनम् ॥ २२ ॥
मायामेह्येहि पदतः सर्वामर वदेत् प्रिये ।।
हव्यवाहपदान्ते च मुनिभिः खगणैः सह ।
अध्वरं रक्ष रक्षेति नमः स्वाहा ततो वदेत् ॥ २३ ॥
इत्यावाह्य हव्यवाहमयं ते योनिरुच्चरन् ।
यथोपचारै सम्पूज्य सप्तजिह्वां प्रपूजयेत् ॥ २४ ॥

कालो करालो च मनोजवा च
सुलोहिता चैव सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरूपिणी च
लेलायमानेति च सप्तजिह्वाः ॥ २५ ॥

वह्नेर्ध्यानमेवाह बालार्करूपसङ्काशमित्यादि । बालो योऽर्क सूर्यस्तद्वद्रूपो लोहितवर्ण सङ्काशो दीप्तिर्यस्य तथाभूतम् ॥ २१ ॥

ध्यात्वेत्यादि । एव हव्यवाहनमग्नि ध्यात्वा ततः प्राञ्जलिर्भूत्वा वक्ष्यमाणमन्त्रेण हव्यवाहनमावाहयेत् ॥ २२ ॥

वह्नेरावाहनमन्त्रमेवाह मायामित्यादिना सार्द्धेन । हे प्रिये ! पूर्वे मायां ह्रीमिति बीजं वदेत् ततः परमेह्येहीत्युक्तात् पदतः पर सर्वामरेति पद वदेत् ततो हव्यवाहेति पदस्यान्ते मुनिभि खगपै सहाध्वरं रक्ष रक्षेति वदेत् ततो नम स्वाहेति वदेत् सकलपदयोजनया ह्रीमेह्येहि सर्वामरहव्यवाह मुनिभि. खगपै. सहाध्वर रक्ष रक्ष नम स्वाहेति मन्त्रो जात ॥ २३ ॥

इतीति । इत्यनेन मन्त्रेण हव्यवाहनमग्निमावाह्य वह्ने ! ते तवाय योनिरित्युच्चरन् सन् प्रणवादिनमोऽन्तेन नाममन्त्रेणोपचारै पाद्यादिभिर्वह्नेः यथावत् सम्पूज्य प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभिर्वह्नेः सप्तजिह्वाः प्रपूजयेत् ॥ २४ ॥

ततोऽग्नेः पूर्वमारभ्य सहृ कौलालपाणिना ।
उत्तरान्तं महेशानि ! त्रिधा प्रोक्षणमाचरेत् ॥ २६ ॥
तथैव याम्यमारभ्य कौवेरान्तं हुताशितुः ।
त्रिधा पर्य्युक्षणं कुर्य्यात्ततो यज्ञीयवस्तुनः ॥ २७ ॥
परिस्तरेत्ततो दर्भैः पूर्वस्मादुत्तरावधि ।
उदक्संस्थैरुत्तराग्रैः प्रागग्रैरन्यदिक्स्थितैः ॥ २८ ॥
अग्निं दक्षिणतः कृत्वा गत्वा ब्रह्मासनान्तिकम् ।
वामाङ्गुष्ठकनिष्ठाभ्यां ब्रह्मणः कल्पितासनात् ॥ २९ ॥
गृहीत्वा कुशपत्रैकं ह्रीं निरस्तः परावसुः ।
इत्युक्त्वाग्नेर्दक्षिणस्यां निक्षिपेदुत्करादिना ॥ ३० ॥

वङ्क्षे सप्तजिह्वा एवाह काल्यादिनैकेन । काल्याद्या विश्वनिरूपिण्यन्ता लेलायमाना अग्नेर्हविर्भक्षणार्था एताः सप्तजिह्वा ॥ २५ ॥

तत इति । हे महेशानि ! तत परं सहृकौलालपाणिना सजलेन हस्तेन पूर्वमारभ्योत्तरान्तमुत्तरपर्य्यन्तमग्नेस्त्रिधा त्रिवारं प्रोक्षणमाचरेत् ॥ २६ ॥

तथैवेत्यादि । ततस्तथैव सहृकौलालपाणिनैव याम्य दक्षिणमारभ्य कौवेरान्तमुत्तरपर्य्यन्त हुताशितुर्वङ्क्षेस्त्रिधा पर्य्युक्षणमभिषेचन कुर्य्यात् ततः परं यज्ञीयवस्तुनोऽपि त्रिधैव पर्य्युक्षणं कुर्य्यात् ॥ २७ ॥

परिस्तरेदिति । तत परं पूर्वस्मात् पूर्वमारभ्य उत्तरावधि उत्तरपर्य्यन्तमुदक्संस्थैरुत्तरादिक्स्थितैरुत्तराग्रैरन्यदिक्स्थितैः प्रागग्रैर्दर्भैः कुशैः स्यण्डिल परिस्तरेदाच्छादयेत् ॥ २८ ॥

अग्निमित्यादि । ततोऽग्नि दक्षिणत कृत्वा ब्रह्मासनान्तिक गत्वा वामाङ्गुष्ठकनिष्ठाभ्यामङ्गुलिभ्यां ब्रह्मण कल्पितादासनात् कुशपत्रैकमेक कुशपत्रं गृहीत्वा ह्रीं निरस्तः परावसुरिति-

सीद यज्ञपते । ब्रह्मन्निदन्ते कल्पितासनम् ।
सीदामीति वदन् ब्रह्मा विशेत्तत्रोत्तरामुखः ॥ २१ ॥
सम्भूज्य गन्धपुष्पाद्यैर्ब्रह्माणं प्रार्थयेदिदम् ॥ २२ ॥
गोपाय यज्ञं यज्ञेश । यज्ञं पाहि तवेप्सते ।
मां च यज्ञपते पाहि कर्मसाक्षिन्नमोऽस्तु ते ॥ २३ ॥
गोपयामि वदेत् ब्रह्मा ब्रह्माभावे स्वयं वदेत् ।
तत्र दर्भमयं विप्रं कल्पयेत् यज्ञसिद्धये ॥ २४ ॥
ततो ब्रह्मन्निहागच्छागच्छेत्यावाह्य साधकः ।
पाद्यादिभिश्च सम्भूज्य यावद् यज्ञसमापनम् ।
तावद्भवद्भिः स्थातव्यमिति प्रार्थ्य नमेत्तत ॥ २५ ॥

मन्त्रमुक्त्वा उत्करादिना सह तदेव कुशपत्रमग्नेर्ईक्षिणस्यां दिशि निक्षिपेत् ॥ २९ । ३० ॥

सीदेति । हे यज्ञपते ! ब्रह्मन् ! इदं ते तदर्थं कल्पितासनं वर्त्तते त्वं सीदात्रोपविशेति ब्रह्माणं यज्ञकर्त्ता ब्रूयात् ततोऽहं सीदामीति वदन् ब्रह्मोत्तरामुखो भूत्वा तत्रासने विशेत् ॥ ३१ ॥

सम्भूज्येत्यादि । ततो गन्धपुष्पादिभिर्ब्रह्माणं सम्भूज्य तमेवेदं प्रार्थयेत् ॥ ३२ ॥

इदं किं प्रार्थयेदित्यपेक्षायामाह गोपाय यज्ञमित्यादि । गोपाय रक्ष ॥ ३३ ॥

गोपयामीति । यज्ञकर्त्रैव प्रार्थितो ब्रह्मा गोपयामीति वदेत् ब्रह्माभावे तु गोपयामीति स्वयमेव वदेत् तत्र ब्रह्माभावे सति यज्ञसिद्धये दर्भमयं विप्रं कल्पयेत् ॥ ३४ ॥

तत इत्यादि । ततः परं साधको यज्ञकर्त्ता ब्रह्मन्निहागच्छागच्छेति मन्त्रेण ब्रह्माणमावाह्य पाद्यादिभिः सम्भूज्य च यावद्यज्ञसमापनं भवेत्तावद्भवद्भिरिह स्थातव्यमिति प्रार्थ्य च ततो ब्रह्माणं नमेत् ॥ ३५ ॥

सोदकेन करेणाग्नेरीशानाद् ब्रह्मणोऽन्तिकम् ।
त्रिधा पर्य्युक्ष्य वह्निञ्च त्रिः प्रोक्ष्य तदनन्तरम् ॥ ३६ ॥
आगत्य वर्त्मना तेन सूपविश्य निजासने ।
स्थण्डिलस्योत्तरे दर्भानुदगग्रान् परिस्तरेत् ॥ ३७ ॥
तेषु यज्ञीयवस्तूनि सर्वाण्यासादयेत् सुधीः ।
सोदकं प्रोक्षणीपात्रमाज्यस्थालीसमित्कुशान् ॥ ३८ ॥
आसाद्य स्रुक्स्रुवादीनि क्रां क्रीं क्रूमिति मन्त्रकैः ।
दिव्यदृष्ट्या प्रोक्षणेन संस्कृत्य तदनन्तरम् ॥ ३९ ॥
पृथिव्यां दक्षिणं जानु पातयित्वा स्रुवेण स्रुचा ।
घृतमादाय मतिमांश्चिन्तयन् हितमात्मनः ।
क्रीं विष्णवे हिठान्तेन प्रदद्यादाहुतित्रयम् ॥ ४० ॥

सोदकेनेति । ततः सोदकेन करेण सजलेन हस्तेनाग्नेरीशानादीशानकोणमारभ्य ब्रह्मणोऽन्तिकं ब्रह्मसमीपपर्य्यन्तं त्रिधा वारत्रयं पर्य्युक्ष्याभिषिच्य वह्निञ्च त्रिर्वारत्रयं प्रोक्ष्य तदनन्तरं येन वर्त्मना ब्रह्मासनान्तिकं गतवानासीत्तेनैव वर्त्मनागत्य निजासने सूपविश्य च यज्ञकर्त्ता स्थण्डिलस्योत्तरे देशे उदगग्रान् दर्भान् कुशान् परिस्तरेत् ॥ ३६ । ३७ ॥

तेष्विति । सुधीर्यज्ञसाधकस्तेषु दर्भेषु सर्वाणि यज्ञीयवस्तून्यासादयेत् स्थापयेत् दर्भेषु यानि यज्ञीयवस्तूनि स्थापयेत्तान्याह सोदकमित्यादिना ॥ ३८ ॥

आसाद्येति । दर्भेषु सोदकप्रोक्षणीपात्रादीनि वस्तूनि स्रुक्स्रुवादीनि यज्ञीयानि पात्राणि चासाद्य संस्थाप्य क्रां क्रीं क्रूमिति मन्त्रकैर्दिव्यदृष्ट्या प्रोक्षणेन च तानि संस्कृत्य तदनन्तरं पृथिव्यां दक्षिणं जानु पातयित्वा स्रुचा स्रुवेण यज्ञीये पात्रे घृतमादाय गृहीत्वा मतिमान् यज्ञसाधक आत्मनो हितं चिन्तयन् सन्

तथैव घृतमादाय ध्यायन् देवं प्रजापतिम् ।
वायव्यादग्निकोणान्तं जुहुयादाज्यधारया ॥ ४१ ॥
पुनराज्यं समादाय ध्यायन्देवं पुरन्दरम् ।
नैर्ऋतादीशकोणान्तं जुहुयादाज्यधारया ॥ ४२ ॥
ततोऽग्नेरुत्तरे याम्ये मध्ये च परमेश्वरि ! ।
अग्निं सोमं अग्नीसोमौ समुल्लिख्य यथाक्रमात् ॥४३॥
सचतुर्थीनमोऽन्तेन मायाद्येनाहुतित्रयम् ।
हुत्वा विधेयकर्मोक्तं होमं कुर्य्याद्विचक्षणः ॥ ४४ ॥
आहुतित्रयदानान्तं धाराहोमं प्रचक्षते ॥ ४५ ॥

द्विठान्तेन स्वाहान्तेन ह्रीं विष्णवे इति मन्त्रेण विष्णुमुद्दिश्याहुति त्रय प्रदद्यात् ॥ ३९ । ४० ॥

तथैवेत्यादि । तथैव स्रुचा स्रुवे एव घृतमादाय ह्रीं बीजाद्येन सचतुर्थीस्वाहान्तेन नाममन्त्रेण प्रजापतिं देवं ध्यायन् तमुद्दिश्य वायव्यात् वायव्य कोणमारभ्याग्निकोणान्तं घृतधारया जुहुयात् ॥४१॥

पुनरित्यादि । पुन स्रुचा स्रुवे आज्य घृत समादाय पुरन्दरं देव ध्यायन् तमुद्दिश्य ह्रीं बीजाद्येन सचतुर्थीस्वाहान्तेन नाममन्त्रेण नैर्ऋतान्नैर्ऋतं कोणमारभ्येशकोणान्तमीशानकोणपर्य्यन्तमाज्यधारया जुहुयात् ॥ ४२ ॥

तत इत्यादि । हे परमेश्वरि ! तत परमग्नेरुत्तरे भागे याम्ये दक्षिणे भागे मध्ये च यथाक्रमात् क्रमेणैवाग्निं सोममग्नीषोमौ च समुद्दिश्य मायाद्येन ह्रीं बीजाद्येन सचतुर्थीनमोऽन्तेन नाममन्त्रेणा-हुतित्रयं हुत्वा विचक्षणः सुधीर्यत्नसाधको विधेय कर्म्मोक्त विधेये कृतसंस्कारादौ कर्म्मण्युक्तं होमं कुर्य्यात् ॥ ४३ ॥ ४४ ॥

आहुतीत्यादि । विष्णूद्देश्यकाहुतित्रयदानमारभ्याग्न्याद्युद्देश्य-काहुतित्रयदानान्तं धाराहोमं प्रचक्षते प्रवदन्ति ॥ ४५ ॥

यदित्यादि । यद्यैवतमुद्दिश्याहुतिं दद्यात् तत्कृते तदर्थं देयोद्दे-

यदुद्दिश्याहुतिं दद्यात् देयोद्देशोऽपि तत्कृते ।
समाप्य प्रकृतं कर्म स्विष्टकृद्धोममाचरेत् ॥ ४६ ॥
प्रायश्चित्तात्मको होमः कलौ नास्ति वरानने ! ।
स्विष्टकृता व्याहृतिभिः प्रायश्चित्त विधीयते ॥ ४७ ॥
पूर्ववद्धविरादाय ब्रह्माणं मनसा स्मरन् ।
अस्मिन् कर्मणि देवेश । प्रमादाद्भ्रमतोऽपि वा ॥ ४८ ॥
न्यूनाधिकं कृत यच्च सर्वं स्विष्टकृतं कुरु ।
मायाद्येनानुना देवि । स्वाहान्तेनाहुतिं हुनेत् ॥४९॥
त्वमग्ने । सर्वलोकाना पावनः स्विष्टकृत् प्रभुः ।
यज्ञसाक्षी क्षेमकर्त्ता सर्वान् कामान् प्रपूरय ।

शोऽपि देयस्य वस्तुन उद्देश उल्लेखोऽपि कर्त्तव्य यथा ह्रीं विष्णव स्वाहा इदविरिद्द विष्णवे एवमेवेति विधेयकर्म्माङ्गभूत प्रकृतं कर्म्म होमकर्म्मैव समाप्य स्विष्टकृद्धोम शोभनार्भीष्टकारक हामसमाचरेत् ॥ ४६ ॥

प्रायश्चित्तेत्यादि । कलौ युगे प्रायश्चित्तात्मकहोमाभावात् स्विष्टकृता होमेन व्याहृतिभिर्होमेन च प्रायश्चित्त विधीयते ॥ ४७ ॥

अथ स्विष्टकृद्धोमाचरणविधिमाह पूर्ववदित्यादिभि । पूर्ववत् स्रुवेण स्रुचे हविर्हतनादाय ब्रह्माण प्रजापति मनसा स्मरन् स्वतदुद्दिश्य मायाद्येन ह्रीं बीजाद्येन स्वाहान्तेन—

अस्मिन् कर्म्मणि देवेश । प्रमादाद्भ्रमतोऽपि वा ।
न्यूनाधिकं कृत यच्च सर्व्वं स्विष्टकृत कुरु ॥

इत्यनुना मन्त्रेणाहुति हुनेत् दद्यात् ॥ ४८ । ४९ ॥

त्वमित्यादि । ततोऽग्निमुद्दिश्यादिभूतया मायया ह्रीं बीजेनान्तभूतया वह्निजायया स्वाहया च संयुक्तेन—

त्वमग्ने । सर्व्वलोकाना पावन स्विष्टकृत प्रभु ।
यज्ञसाक्षी क्षेमकर्त्ता सर्व्वान् कामान् प्रपूरय ॥

अनेन हवन कुर्य्यात् मायया वह्निजायया ॥ ५० ॥
इत्थं खिष्टकृत होमं समाप्य क्रतुसाधकः ।
कर्मणोऽस्य परब्रह्मन्नयुक्तं विहितञ्च यत् ॥ ५१ ॥
तच्छान्त्यै यज्ञसम्पत्यै व्याहृत्या हूयते विभो ! ।
मायादिवह्निजायान्तैर्भूर्भुवः स्वरिति त्रिभिः ॥ ५२ ॥
आहुतित्रितयं दद्यात् त्रितयेन तथैव च ।
हुत्वाग्नौ यजमानेन दद्यात् पूर्णाहुतिं बुधः ॥ ५३ ॥
स्वय चेत् कर्मकर्त्ता स्यात् स्वयमेवाहुति क्षिपेत् ।
अभिषेकविधानानामेवमेव विधिः स्मृतः ॥ ५४ ॥
आदौ मायां समुच्चार्य्य ततो यज्ञपते । वदेत् ।
पूर्णो भवतु यज्ञो मे हृष्यन्तु यज्ञदेवताः ।
कलानि सम्यक् यच्छन्तु वह्निकान्तावधिर्मनुः ॥ ५५ ॥

इत्यनेन मन्त्रेण हवन कुर्य्यात् ॥ ५० ॥

इत्यमित्यादि । इत्यमनेन प्रकारेण खिष्टकृतं होम समाप्य क्रतुसाधको यज्ञकर्त्ता कर्मणोऽस्य परब्रह्मन्नयुक्त विहितञ्च यत् तच्छान्त्यै यज्ञसम्पत्यै व्याहृत्या हूयते विभो इति परं ब्रह्म सम्बार्य्य परं ब्रह्मैवोद्दिश्य च मायादिवह्निजायान्तैर्ह्रीं बीजादिभिः स्वाहान्तैर्भूर्भुव स्वरिति त्रिभिर्मन्त्रैराहुतित्रितयं दद्यात् तथैव ह्रीं बीजादिना स्वाहान्तेन भूरादित्रितयेनैकमाहुति दद्यात् बुधो यज्ञसाधक एव हुत्वा यजमानेन सह विष्णुमुद्दिश्य वक्ष्यमाणमन्त्रेणाग्नौ पूर्णाहुतिं दद्यात् ॥ ५१—५३ ॥

स्वयञ्चेत्यादिश्लोकस्तु स्पष्टार्थ ॥ ५४ ॥

येन मन्त्रेण पूर्णाहुतिं दद्यात् तमेव मन्त्रमाह आदावित्यादिना सार्द्धेन । आदौ मायां ह्रीं बीज समुच्चार्य्य ततो यज्ञपते इति वदेत् तत पूर्णो भवतु यज्ञो मे हृष्यन्तु यज्ञदेवता

मन्त्रेणानेन मतिमानुत्थाय सुसमाहितः ।
फलताम्बूलसहिताहुतिं दद्याद्धुताशने ॥ ५६ ॥
दत्तपूर्णाहुतिर्विद्वान् शान्तिकर्म समाचरेत् ।
प्रोक्षणीपात्रतोयेन कुर्यै. सम्मार्जयेच्छिर. ॥ ५७ ॥
आप. सुमित्रिया: सन्तु भवन्त्वोषधयो मम ।
आपो रक्षन्तु मा नित्यमापो नारायण: स्वयम् ॥ ५८ ॥
आपो हिष्ठामयोभुवस्तान ऊर्जे दधातन: ।
इत्याभ्यां मार्जनं कृत्वा भूमौ विन्दून् विनिक्षिपेत् ॥५९॥
ये द्विषन्ति च मां नित्य यांश्च द्विषो नरान् वयम् ।
आपो दुर्मित्रियास्तेषा सन्तु भक्षन्तु तानपि ॥ ६० ॥
अनेनेशानदिग्भागे विन्दून् प्रक्षिप्य तान् कुशान् ।

कलानि सम्यगुपयच्छन्तु इति मनुर्जात अय मनुर्वक्ष्यिकान्तावधि खाङ्गान्त प्रोक्त ॥ ५५ ॥

मन्त्रेणेत्यादि । मतिमान् यज्ञसाधको यजमानेन सङ्गोत्थाय सुसमाहित अतिसावधान सन्नेन मन्त्रेण फलताम्बूलसहिताहुतिं हुताशनेऽग्नौ दद्यात् ॥ ५६ ॥

दत्तेत्यादि । एव दत्तपूर्णाहुति सन् विद्वान् यज्ञसाधक शान्तिकर्म समाचरेत् । शान्तिकर्माचरणस्यैव विधिमाह प्रोक्षणी-पात्रेत्यादिभि. ॥ ५७ ॥

शिर सम्मार्जनार्थमाप इत्यादिक मन्त्रद्वयमाह आप इति । हे आपो । भवत्यो मम सुमित्रिया सन्तु औषधयश्च भवन्तु इत्येवमन्वय. सुमित्रायण्येव सुमित्रिया स्वार्थे ष्णा तस्येयादेश ॥ ५८ ॥

आप इत्यादेर्थो वक्ष्यते । इत्याभ्यां मन्त्राभ्या शिरसो मार्जन कृत्वा भूमौ कुशैर्विन्दून् विनि क्षिपेत् ॥ ५९ ॥

भूमौ विन्दू ना निक्षेपणस्य मन्त्रमाह ये द्विषन्तीति ॥६०॥

हित्वा कृताञ्जलिर्भूत्वा प्रार्थयेद्धव्यवाहनम् ॥ ६१ ॥
बुद्धिं विद्यां बलं मेधां प्रज्ञां श्रद्धां यश श्रियम् ।
आरोग्यं तेज आयुष्यं देहि मे हव्यवाहन ! ॥ ६२ ॥
इति प्रार्थ्य वौतिहोत्रं विसृजेदमुना शिवे ! ॥ ६३ ॥
यज्ञ ! यज्ञपतिं गच्छ यज्ञं गच्छ हुताशन ! ।
स्वां योनिं गच्छ यज्ञेश ! पूरयास्मन्मनोरथम् ॥ ६४ ॥
अग्ने ! त्वमस्त्र स्वाहेति मन्त्रेणाग्ने रुदग्दिशि ।
दत्वा दध्नाहुतिं वह्निं दक्षिणस्यां विचालयेत् ॥ ६५ ॥
ब्रह्मणे दक्षिणां दत्वा भक्त्या नत्वा विसर्जयेत् ।
ततस्तु तिलकं कुर्य्यात् स्रुवसलग्नभस्मना ॥ ६६ ॥

अनेनेत्यादि । अनेन मन्त्रेणेशानदिग्भागे कुशैर्विन्दून् प्रक्षिप्य तान् कुशानपि तत्रैव हित्वा त्यक्त्वा कृताञ्जलिर्भूत्वा हव्यवाहनमग्निं प्रार्थयेत् ॥ ६१ ॥

अग्निं किं प्रार्थयेदित्यपेक्षायामाह बुद्धिमित्यादि । बुद्धिम् शास्त्रादितत्त्वज्ञानम् विद्याम् आत्मज्ञानम् मेधाम् धारणावतीं श्रियम् प्रज्ञाम् सारासारविवेकनैपुण्यम् ॥ ६२ ॥

इतीति । हे शिवे ! इति वौतिहोत्रमग्निं प्रार्थ्यासुना वक्ष्यमाणेन मन्त्रेण तमेव विसृजेत् ॥ ६३ ॥

अग्निविसर्जनस्यैव मन्त्रमाह यज्ञेति । हे यज्ञ ! त्वं यज्ञपतिं विष्णुं गच्छ प्राप्नुहि हे हुताशन ! त्वं यज्ञं गच्छ हे यज्ञेश ! यज्ञकर्त्रस्त्वं स्वां योनिमात्मीयस्थानं गच्छ हे यज्ञादिक ! त्वमस्मन्मनोरथमस्माकं कामं पूरय यज्ञयज्ञपतिमित्यादिनाऽग्नेः । त्वमस्त्र स्वाहेत्यनेनाग्ने मन्त्रेणाग्नेरुदग्दिशि दध्नाहुतिं दत्वा दक्षिणस्यां दिशि वह्निमनेनैव मन्त्रेण विचालयेत् ॥ ६४ ॥ ६५ ॥

ब्रह्मणे इत्यादिस्तु सुबोधः ॥ ६६ ॥

मायां कामं समुच्चार्य्य सर्वशान्तिकरो भवम् ।
ललाटे तिलकं कुर्य्यात् मन्त्रेणानेन याज्ञिकः ॥ ६७ ॥
शान्तिरस्तु शिवं चास्तु वामवाग्निप्रसादतः ।
मरुतां ब्रह्मणश्चैव वसुरुद्रप्रजापतेः ॥ ६८ ॥
अनेन मन्त्रनायुष्यं धारयन्मस्तकोपरि ।
स्वशक्त्या दक्षिणां दद्यात् होमप्रकृतकर्मणे ॥ ६९ ॥
इति ते कथिता देवि ! सर्वकर्मकुशण्डिका ।
प्रयोज्या शुभकर्मादौ यत्नतः कुलसाधकैः ॥ ७० ॥
प्रकृते कर्मणि शिवे ! चरुर्येषां कुलागमः ।
सिद्ध्यर्थं कर्मणान्तेषां चरुकर्म निगद्यते ॥ ७१ ॥
चरुस्थाली प्रकर्त्तव्या ताम्री वा मृत्तिकोऽथवा ॥ ७२ ॥
कुशण्डिकोक्तविधिना द्रव्यसंस्करणावधि ।
कृत्वा कर्म चरुस्थालीमानयेदात्मसम्मुखे ॥ ७३ ॥

नन्वनेन मन्त्रेण ललाटे तिलकं कर्त्तव्यं तत्राह मायामित्यादि । मायां ह्रीं बीजं कामं क्लीं बीजं समुच्चार्य्य सर्वशान्तिकरो भवेति वदेत् योजनया ह्रीं क्लीं सर्वशान्तिकरो भवेति मन्त्रो जातः याज्ञिको यज्ञकर्त्तानेन मन्त्रेण ललाटे तिलकं कुर्य्यात् ॥ ६७ ॥

शान्तिरित्यादि । शिवम् कल्याणम् मरुतामित्यादावपि प्रसादत इत्यस्य योजना कर्त्तव्या ॥ ६८ ॥

अनेनेति । अनेन शान्तिरस्त्वित्यादिना प्रजापतेरित्यन्तेन मन्त्रेण मस्तकोपरि पुष्पं धारयेत् ततो होमप्रकृतकर्मणो स्वशक्त्या दक्षिणां यज्ञसाधकाय ब्राह्मणाय दद्यात् ॥ ६९ ॥ ७० ॥

प्रकृत इत्यादि । प्रकृते कर्मणि कृतसंस्कारादौ चरुर्देवतार्थं यस्याश्च कुले आगमन यस्य चरोः स कुलागमः ॥ ७१ ॥

चरुकर्मैवाह चरुस्थालीत्यादिभिः ॥ ७२ ॥

अक्षतामव्रणां दृष्ट्वा प्रादेशपरिमाणकम् ।
पवित्रकुशमेकञ्च स्थालीमध्ये नियोजयेत् ॥ ७४ ॥
आनीय तण्डुलास्तत संस्थाप्य स्थण्डिलान्तिके ।
यस्मिन् कर्म्मणि ये देवाः पूजनीयाः सुरार्चिते ! ॥७५॥
तत्तन्नाम चतुर्थ्यन्तमुक्त्वा त्वाजुष्टमीरयन् ।
गृह्णामि निर्वपामीति प्रोक्षामीति क्रमाददन् । ७६ ॥
गृहीत्वा निर्वपेत् स्थाल्या प्रोक्षयेज्जलविन्दुना ।
प्रत्येकञ्चतुरो मुष्टीन् देवमुद्दिश्य तण्डुलान् ॥ ७७ ॥
ततो दुग्ध सिताञ्चैव दत्वा पाकविधानत ।
सुपचेत् सस्कृते वह्नौ सावधानेन सुव्रते ! ॥ ७८ ॥

कुशण्डिकेत्यादि । कुशण्डिकोक्तविधिना द्रव्यसस्कारणावधि द्रव्यसस्कारपर्य्यन्तं सर्व कर्म कृत्वा चरुस्थालीमात्मसम्मुखे देशे आनयेत् ॥७३॥

अक्षतामिति । ततोऽक्षतासभग्नामव्रणामच्छिद्रां चरुस्थाली दृष्ट्वा प्रादेशपरिमाणकमेक पवित्रकुश स्थालीमध्ये नियोजयेत् ॥ ७४ ॥

आनीयेत्यादि । ततस्तत्र चरुस्थाने तण्डुलानानीय स्थण्डिलान्तिके सस्थाप्य च यस्मिन् क्रतुसस्कारादौ कर्मणि ये देवा पूजनीयास्तत्तन्नाम चतुर्थ्यन्तमुक्त्वा तत परं त्वाजुष्टमिति वदन् तत परं क्रमादेव गृह्णामीति निर्वपामीति प्रोक्षामीति च वदन् सन् प्रत्येकं देवमुद्दिश्य चतुरो मुष्टीन् चतुर्दृष्टपरिमितास्तण्डुलान् गृहीत्वा स्थाल्या निर्वपेत् जलविन्दुना प्रोक्षयेच्च अमुकदेवाय त्वा जुष्टं गृह्णामीति मन्त्रेण तण्डुलानादायामुकदेवाय त्वाजुष्ट निर्वपामीति मन्त्रेण स्थाल्या निक्षिपेत् अमुकदेवाय त्वाजुष्टं प्रोक्षामीति मन्त्रेण जलविन्दुना तानभिषिञ्चेदित्यर्थः । त्वा आजुष्टमिति च्छेद आजुष्टम् प्रीतः आजुष्टमिति क्रियाविशेषणम् ॥ ७५—७७ ॥

अत ऊर्ति । हे सुव्रते ! तत. परं क्रमेण दुग्धं सिताञ्च

सुपक्वं कोमलं ज्ञात्वा दद्यात् तत्र घृतस्रुवम् ॥ ७९ ॥
अग्नेरुत्तरतः पात्रं विनिधाय कुशोपरि ।
पुनस्त्रिधा घृतं दत्वा स्थालीमाच्छादयेत् कुशैः ॥ ८० ॥
ततः स्रुवे चरुस्थाल्या घृताधारणपूर्वकम् ।
किञ्चिच्चरुं समादाय जानुहोम समाचरेत् ॥ ८१ ॥
धाराहोमं ततः कृत्वा प्रधानीभूतकर्म्मणि ।
यत्र ये विहिता देवास्तन्मन्त्रैराहुतिर्हुनेत् ॥ ८२ ॥
समाप्य प्रकृतं होमं स्विष्टकृद्धोमपूर्वकम् ।
प्रायश्चित्ताख्यकं हुत्वा कुर्य्यात् कर्म्मसमापनम् ॥ ८३ ॥
संस्कारेषु प्रतिष्ठासु विधिरेष. प्रकीर्त्तितः ।
विधेय. शुभकर्म्मादौ कर्म्मसंसिद्धिहेतवे ॥ ८४ ॥

स्थाल्या दत्वा सावधानेन मनसा स्मरते वह्नौ पावकविधानतश्चरुं सुपचेत् ॥ ७८ ॥

सुपक्वमिति । ततः सुपक्वं कोमलं चरुं ज्ञात्वा तत्र घृतस्रुवं घृतपूर्णस्रुवं दद्यात् ॥ ७९ ॥

अग्नेरिति । ततश्चरुपात्रमग्नेरुत्तार्य्याग्नेरुत्तरतो देशे कुशोपरि विनिधाय संस्थाप्य च पुनस्त्रिधा त्रिवार तत्र घृत दत्वा कुशैः स्थालीमाच्छादयेत् ॥ ८० ॥

तत इति । ततः परं घृताधारणपूर्वकं घृतसेचनपूर्वक चरुस्थाल्याः सकाशात् किञ्चिच्चरु स्रुवे समादाय गृहीत्वा जानुहोमं समाचरेत् कुर्य्यात् पृथिव्या दक्षिण जानु पातयित्वा यो होमो विधीयते स एव जानुहोमो ज्ञातव्य ॥ ८१ ॥

धारेत्यादि । ततो धाराहोम कृत्वा यत्र यस्मिन् प्रधानीभूतकर्मणि ये देवाः पूज्या विहितास्तन्मन्त्रैस्तेषां देवानां मन्त्रैराहुतीर्हुनेद्दद्यात् ॥ ८२ ॥

समाप्येति । एव प्रकृतं होम समाप्य स्विष्टकृद्धोमपूर्वकं प्राय-

अथोच्यते महामाये । गर्भाधानादिका: क्रिया: ।
तत्तादृतुसंस्कार: कथ्यते क्रमत: शृणु ॥ ८५ ॥
कृतनित्यक्रिय: शुद्ध पञ्चदेवान् समर्चयेत् ।
ब्रह्मा दुर्गा गणेशश्च ग्रहा दिक्पतयस्तथा ॥ ८६ ॥
स्थण्डिलस्येन्द्रदिग्भागे घटेष्वेतान् प्रपूजयेत् ।
ततस्तु मातृका: पूज्या गौर्य्याद्या: षोडश क्रमात् ॥८७॥
गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा शान्ति: पुष्टिर्धृति क्षमा ।
आत्मनो देवता चैव तथैव कुलदेवता ॥ ८८ ॥
आयान्तु मातर: सर्वाश्चिदग्यानन्दकारिका: ।
विवाहव्रतयज्ञानां सर्वाभीष्टं प्रकल्प्यताम् ॥ ८९ ॥
यानशक्तिसमारूढ़ा: सौम्यमूर्त्तिधरा: सदा ।
आयान्तु मातर: सर्वा यज्ञोत्सवसमृद्धये ॥ ९० ॥
इत्यावाह्य मातृगणान् स्वशक्त्या परिपूज्य च ।

चित्तात्मक हुत्वा होम कृत्वा कर्मसमापन होमकर्मण समाप्तिं कुर्य्यात् ॥ ८३–८५ ॥

कृतसंस्कारविधिमेवाह कृतनित्यक्रिय इत्यादिभि । ननु कान् पञ्चदेवान् समर्चयेदित्यपेक्षायामाह ब्रह्मेत्यादि ॥ ८६ ॥

स्थण्डिलस्येत्यादि । स्थण्डिलस्य चत्वरस्येन्द्रदिग्भागे पूर्वभागे संस्थापितेषु पञ्चसु घटेष्वेतान् ब्रह्मादीन् देवान् गन्धपुष्पादिभि पूजयेत् ॥ ८७ ॥

पूज्या गौर्य्याद्या षोडशमातृका एव दर्शयति गौरीत्यादिना सार्द्धेन ॥ ८८ ॥

अथ गौर्य्यादिषोडशमातृकावाहनार्थं मन्त्रद्वयमाह आयान्तु मातर: सर्वा इत्यादि ॥ ८९ ॥ ९० ॥

देहल्यां नाभिमात्रायां प्रादेशपरिमाणतः ।
सप्त वा पञ्च वा विन्दून् दद्यात् सिन्दूरचन्दनैः ॥९१॥
प्रत्येकविन्दु मतिमान् काम माया रमा स्मरन् ।
घृतधारामविच्छिन्नां दत्वा तत्र वसु यजेत् ॥ ९२ ॥
वसुधारा प्रकल्पैव मयोक्तेनैव वर्त्मना ।
विरच्य स्थण्डिल धीरो वह्निस्थापनपूर्वकम् ।
होमद्रव्याणि संस्कृत्य पचेच्चरुमनुत्तमम् ॥ ९३ ॥
प्राजापत्यश्चरुश्चात्र वायुनामा हुताशन. ।
समाप्य धाराहोमान्त कृत्यमार्त्तवमारभेत् ॥ ९४ ॥
क्रीं प्रजापतये स्वाहा चरुणैवाहुतित्रयम् ।

इतीत्यादि । इत्याभ्या मन्त्राभ्या मातृगणनावाह्य स्वशक्त्या गन्धपुष्पादिभि परिपूज्य च नाभिमात्रायां नाभिपरिमितायां देहल्या प्रादेशपरिमाणकपरिमिते देशे सप्त वा पञ्च वा विन्दून् सिन्दूरचन्दनैर्दद्यात् ॥ ९१ ॥

प्रत्येकेत्यादि । मतिमान् कर्मसाधक काम क्लीमिति माया ह्रीमिति रमा श्रीमिति च वीजं स्मरन् सन् प्रत्येकविन्दुमविच्छिन्ना घृतधारां दत्वा तत्रैव वसु देव गन्धपुष्पादिभिर्यजेत् ॥ ९२ ॥

वसुधारामित्यादि । मयोक्तेनैव वर्त्मनैवमनेन प्रकारेण वसुधारा प्रकल्प्य सम्पाद्य धीरो विचक्षण कर्मसाधक स्थण्डिल चत्वर विरच्य तत्र वह्निस्थापनपूर्वक होमद्रव्याणि सस्कृत्य चानुत्तम न विद्यते उत्तमो यस्मादेवं भूत चरु पचेत् ॥ ९३ ॥

प्राजापत्य इत्यादि । अत्र ऋतुसंस्कारकर्म्मणि यश्चरु· पच्यते स प्राजापत्य प्रजापतिदेवताको भवति हुताशनोऽग्निश्च वायुनामा भवति तत. पूर्वोक्तेन विधिना धाराहोमान्तं कर्म्म समाप्य कृत्य कर्त्तव्य आर्त्तवऋतुसंस्कारकर्म्मारभेत् ॥ ९४ ॥

प्रदायैकाहुतिं दद्यादिमं मन्त्रमुदीरयन् ॥ ९५ ॥
विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ ९६ ॥
आज्येन चरुणा वापि साज्येन चरुणापि वा ।
सूर्यं प्रजापतिं विष्णुं ध्यायेन्नाहुतिमुत्सृजेत् ॥ ९७ ॥
गर्भं धेहि श्रिनीवाली गर्भं धेहि सरस्वती ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ९८ ॥
ध्यात्वा देवीं श्रिनीवालीं सरस्वत्यश्विनौ तथा ।
स्वाहान्तमनुनानेन दद्यादाहुतिमुत्तमाम् ॥ ९९ ॥
ततः काम वधूं मायां रमां कूर्चं समुच्चरन् ।
अमुष्यै पुत्रकामायै गर्भमाधेहि सद्विठम् ।
उक्त्वा ध्यात्वा रविं विष्णुं जुहुयात् संस्कृतेऽनले ॥१००॥

ह्रौमित्यादि । ह्रीं प्रजापतये स्वाहेति मन्त्रेण प्रजापतिमुद्दिश्य चरुणैवाहुतित्रयं प्रदायेमं वक्ष्यमाण मन्त्रमुदीरयन् वदन् सन् एकाहुतिं दद्यात् ॥ ९५ ॥

एकाहुतिदानार्थं मन्त्रमेवाह विष्णुर्योनिमिति । पिंशतु टीपयतु ॥ ९६ ॥

आज्येनेत्यादि । विष्णुर्योनिमित्यादिना मन्त्रेणाज्येन घृतेन वा चरुणैव वा साज्येन सघृतेन चरुणा वा सूर्यं प्रजापतिं विष्णुञ्च ध्यायन् सन्तानेप्सोर्द्दिश्यैकामाहुतिमुत्सृजेद्दद्यात् ॥ ९७ । ९८ ॥

ध्यात्वेत्यादि । अनेन गर्भं धेहि श्रिनीवालीत्यादिना स्वाहान्तेन मनुना श्रिनीवालीं देवीं तथा सरस्वत्यश्विनौ सरस्वतीसहितावश्विनौ देवौ च ध्यात्वा उक्तसामाहुतिं दद्यात् ॥ ९९ ॥

ततः इत्यादि । ततः परं काम क्लौमिति वधूं स्त्रीमिति मायां ह्रीमिति रमां श्रीमिति कूर्चं हूमिति च बीजं समुच्चरन् सद्विठं स्वाहासहितमसुष्यै

यथेयं पृथिवी देवी ह्युत्तानां गर्भमादधे ।
तथा त्वं गर्भमाधेहि दशमे मासि सूतये ।
स्वाहान्तेनामुना विष्णुं ध्यायन्नाहुतिमाचरेत् ॥ १०१॥
पुनराज्यं समादाय ध्यात्वा विष्णुं परात्परम् ।
विष्णो ! ज्येष्ठेन रूपेण नार्य्यामस्यां वरीयसम् ।
सुतमाधेहि च इन्मुक्त्वा वह्नौ हविरथर्जेत् ॥ १०२ ॥
कामेन पुटितां मायां मायया पुटितां वधूम् ।
पुनः कामञ्च मायाञ्च पठित्वास्याः शिरः स्पृशेत्॥१०३॥
पतिपुत्रवतीभिश्च नारीभिः परिवेष्टितः ।
शिरश्चालभ्य हस्ताभ्यां वध्वाः क्रोड़ाञ्जले पतिः ॥१०४॥

पुत्रकामायै गर्भमाधेहीत्युक्त्वा क्लीं स्त्री ह्रीं श्रीं क्लमनुष्यै पुत्रकामायै गर्भमाधेहि स्वाहेति मन्त्रमुच्चार्य रविं विष्णुञ्च ध्यात्वा संस्कृतेऽनले जुहुयात् ॥ १०० ॥

यथेयमिति । सूतये प्रसवाय स्वाहान्तेनामुना यथेयं पृथिवीत्यादिना मन्त्रेण विष्णुं ध्यायंस्तमेवोद्दिश्याहुतिमाहरेद्वह्नौ दद्यात् ॥१०१॥

पुनरित्यादि । पुनराज्यं घृतं समादाय गृहीत्वा परादपि परं श्रेष्ठं विष्णुं ध्यात्वा तमेवोद्दिश्य विष्णो ! ज्येष्ठेन रूपेण नार्य्यामस्यां वरीयसं सुतमाधेहि स्वाहेति मन्त्रमुक्त्वा वह्नौ हविर्घृतं त्यजेदित्यन्वयः ज्येष्ठेन श्रेष्ठेन रूपेण विशिष्टम् वरीयसमतिवरमतिश्रेष्ठमित्यर्थः ठद्दय स्वाहा ॥ १०२ ॥

कामेनेति । ततः कामेन क्लीमिति बीजेन पुटितामादावन्ते च संयुक्तां मायां ह्रीं बीजं तथैव मायया ह्रीं बीजेन पुटितां वधू स्त्रीं बीजं पुनः कामं क्लीं बीजं च मायां ह्रीं बीजं च पठित्वा क्लीं ह्रीं क्लीं ह्रीं स्त्रीं ह्रीं क्लीं ह्रीमिति मन्त्रं पठित्वास्या भार्य्याया शिरः स्पृशेत् ॥१०३॥

पतीत्यादि । पतिपुत्रवतीभिर्नारीभिः परिवेष्टितः पतिर्हस्ताभ्यां वध्वाः शिरश्चालभ्य स्पृष्ट्वा तस्या एव क्रोड़ाञ्जले हस्ताभ्यां विष्णुं

विष्णुं दुर्गां विधिं सूर्य्यं ध्यात्वा दद्यात् फलत्रयम् ।
ततः स्विष्टकृतं हुत्वा प्रायश्चित्त्वा समापयेत् ॥ १०५ ॥
यद्वा प्रदोषसमये गौरीशङ्करपूजनात् ।
भास्करार्घ्यप्रदानाच्च दम्पत्योः शोधन भवेत् ॥ १०६ ॥
आर्त्तवं कथितं कर्म्म गर्भाधानमथ शृणु ॥ १०७ ॥
तद्रात्रावन्यरात्रौ वा युग्मायां निशि भार्य्यया ।
सदनाभ्यन्तरं गत्वा ध्यात्वा देव प्रजापतिम् ॥ १०८॥
स्मरन् पत्नीं पठेद्भर्त्ता मायाबीजपुरःसरम् ।
आवयोः सुप्रजायै त्वं शय्ये ! शुभकरी भव ॥ १०९॥
आरुह्य भार्य्यया शय्यां प्राङ्मुखो वाप्युदङ्मुखः ।
उपविश्य स्त्रियं पश्यन् हस्तमाधाय मस्तके ।
वामेन पाणिनालिङ्ग्य स्थाने स्थाने मनुं जपेत् ॥ ११०॥

दुर्गां विधिं प्रजापतिं सूर्य्यञ्च ध्यात्वा फलत्रयं दद्यात् समापयेत् आर्त्तवं कर्मेति शेषः ॥ १०४ । १०५ ॥

अथान्यदृतुसंस्कारस्य विधानमाह यद्वेत्याद्येकेन । प्रदोषसमये रात्यारम्भसमये ॥ १०६ । १०७ ॥

अथ गर्भाधानक्रियाविधिमेवाह तद्रात्रावित्यादिभि । तद्रात्रावृतुसंस्काररात्रावन्यरात्रौ वा युग्मायामेव निशि भार्य्यया सह सदनाभ्यन्तरं गत्वा प्रजापतिं देवं ध्यात्वा च पत्नीं स्मरन् भर्त्ता मायाबीजपुरःसरं मायाबीजं ह्रीमिति पुरःसरमग्रे सरं यत्तत्तथाभूतं आवयो सुप्रजायै त्वं शय्ये शुभकरी भवेति मन्त्रं पठेत् ॥ १०८ । १०९ ॥

आरुह्येति । ततो भार्य्यया सह शय्यामारुह्य प्राङ्मुखउदङ्मुखो वा भूत्वा तत्रोपविश्य च स्त्रियं पश्यन् भर्त्ता तस्या मस्तके दक्षिणं हस्तमाधाय वामेन पाणिना तामालिङ्ग्य च स्थाने स्थाने मनुं जपेत् ॥ ११० ॥

श्रीर्षे कामं शतं जप्त्वा चिबुके वाग्भवं शतम् ।
कण्ठे रमां विंशतिधा स्तनद्वन्द्वे शतं शतम् ॥ १११ ॥
हृदये दशधा मायां नाभौ तां पञ्चविंशतिम् ।
जप्त्वा योनौ करं दत्वा कामेन सह वाग्भवम् ॥ ११२॥
शतमष्टोत्तरं जप्त्वा लिङ्गेऽप्येवं समाचरन् ।
विकाश्य मायया योनिं स्त्रियं गच्छेत् सुताप्तये ॥११३॥
रेतःसम्पातसमये ध्यात्वा विश्वकृतं पतिः ।
नाभेरधस्तात् चित्कुण्डे रक्तिमायां प्रपातयेत् ॥११४॥
शुक्रसेकान्तरे विद्वानिमं मन्त्रमुदीरयेत् ॥ ११५ ॥
यथाग्निना सगर्भाभूद्यौर्यथा वज्रधारिणा ।
वायुना दिग्गर्भवती तथा गर्भवती भव ॥ ११६ ॥

ननु कस्मिन् कस्मिन् स्थाने कं कं मन्त्रं जपेदित्यपेक्षायामाह श्रीर्षे काममित्यादि । श्रीर्षे मस्तके कामं क्लीमिति मन्त्रं शतवारं जप्त्वा चिबुके ओष्ठाधराधोभागे च वाग्भवम् ऐमिति मन्त्रं शतवारं जप्त्वा कण्ठे च रमां श्रीमिति मन्त्रं विंशतिधा विंशतिवार जप्त्वा स्तनद्वन्द्वे च श्रीमिति मन्त्रं शतं जपेत् ॥ १११ ॥

हृदये इत्यादि । ततो भार्यायां हृदये मायां ह्रीमिति मन्त्रं दशधा जप्त्वा नाभौ च तां माया ह्रीमिति मन्त्रं पञ्चविंशतिवारं जप्त्वा योनौ च करं दत्वा कामेन क्लीमिति बीजेन सह वाग्भवं ऐमिति मन्त्रमष्टोत्तरं शतं जप्त्वा लिङ्गेऽप्येवं क्लीम् ऐमिति मन्त्रस्य जपं समाचरन् प्रतिमायां ह्रीमिति मन्त्रेण योनिं विकाश्य व्यादाय सुताप्तये पुत्रप्राप्तये स्त्रियं गच्छेत् ॥ ११२ ॥ ११३ ॥

रेत सम्पातेत्यादि । रेतःसम्पातसमये बीजसम्पातनकाले पतिर्विश्वकृतं प्रजापतिं ध्यात्वा नाभेरधस्ताच्चित्कुण्डे रक्तिकाया नाड्यां बीजं प्रपातयेत् ॥ ११४ । ११५ ॥

जाते गर्भे ऋतौ तस्मिन्नन्यस्मिन् वा महेश्वरि ! ।
तृतीये गर्भमासे तु चरेत् पुंसवनं गृही ॥ ११७ ॥
कृतनित्यक्रियो भर्त्ता पञ्चदेवान् समर्च्चयेत् ।
गौर्य्यादिमातृकाश्चैव वसोर्धारां प्रकल्पयेत् ॥ ११८ ॥
वृद्धिश्राद्धं ततः कृत्वा पूर्व्वोक्तविधिना सुधीः ।
धाराहोमान्तमापाद्य कुर्य्यात् पुंसवनक्रियां ॥ ११९ ॥
प्राजापत्यश्चरुस्तत्र चन्द्रनामा हुताशनः ॥ १२० ॥
गव्ये दधि यवञ्चैकं द्वौ माषावपि निक्षिपेत् ।
पतिः पृच्छेत् स्त्रियं भद्रे ! किं त्वं पिबसि त्रिः कृतम्॥१२१
ततः सीमन्तिनी ब्रूयात् मायापुंसवनं त्रिधा ।
प्रस्थतीन्स्त्रीन् पिबेन्नारी यवमाषयुतं दधि ॥ १२२ ॥
जीवत्सुताभिर्वनितां यागस्थानं समानयेत् ।
संस्थाप्य वामभागे तां चरुहोमं समाचरेत् ॥ १२३ ॥

बीजसेकान्तरे यं मन्त्रं भर्त्ता पठेत्तमेव मन्त्रमाह यथाग्निनेति । भूः पृथ्वी द्यौः स्वर्गः वज्रधारिणा इन्द्रेण ॥ ११६ । ११७ ॥

पुंसवनक्रियाविधिमेवाह कृतनित्यक्रिय इत्यादिभिः । कृतनित्यक्रियो भर्त्ता पूर्व्वोक्तान् ब्रह्मादीन् पञ्च देवान् समर्च्चयेत् ॥ ११८।११९ ॥

तत्र पुंसवनक्रियायाम् ॥ १२० ॥

गव्ये इत्यादि । गव्ये गोसम्बन्धिनि दधि एकं यव द्वौ माषावपि निःक्षिपेत् ततो हे भद्रे ! पत्नि ! त्वं किं पिबसीति पतिस्त्रिःकृतं त्रिवारं स्त्रियं पृच्छेत् ॥ १२१ ॥

ततइति । ततः परं मायापुंसवनं स्त्रीं पुंसवनमिति सीमन्तिनी स्त्री त्रिधा त्रिवारं ब्रूयात् ततो नारी यागस्थानादन्यत्र गत्वा तीन् प्रस्थतीन् यवमाषयुतं दधि पिबेत् ॥ १२२ ॥

जीवदित्यादि । ततो जीवन्तः सुताः पुत्रा यासान्ता जीवत्सुता-

पूर्ववच्चरुमादाय मायां कूर्चं समुच्चरन् ।
ये गर्भविघ्नकर्त्तारो ये च गर्भविनाशकाः ॥ १२४ ॥
भूताः प्रेताः पिशाचाश्च वेताला बालघातकाः ।
तान् सर्वान् नाशय द्वन्द्वं गर्भरक्षां कुरु द्विठः ॥ १२५॥
मन्त्रेणानेन रक्षोघ्नं चिन्तयित्वा हुताशनम् ।
रुद्रं प्रजापतिं ध्यायन् प्रदद्यात् द्वादशाहुतीः १२६॥
ततो मायाचन्द्रमसे स्वाहेत्याहुतिपञ्चकम् ।
दत्वा भार्यांहृदि स्मृष्ट्वा मायालक्ष्मीं शतं जपेत्॥१२७॥
ततः स्विष्टकृतं हुत्वा प्रायश्चित्या समापयेत् ।
ततस्तु पञ्चमे मासि दद्यात् पञ्चामृतं स्त्रियै ॥ १२८ ॥
शर्करा मधु दुग्धञ्च घृतं दधि समांशकम् ।
पञ्चामृतमिदं प्रोक्तं देहशुद्धौ विधीयते ॥ १२९ ॥

स्वामिन्स्त्रीभिः सह वनितां स्त्रियं यागस्थानं समानयेत् तां वनितां वामभागे संस्थाप्य चरुहोमं समाचरेत् ॥ १२३ ॥

पूर्ववदिति । पूर्ववत् स्रुवेण चरुमादाय स्रुहीत्वा मायां ह्रीमिति कूर्चं हूमिति च बीजं समुच्चरन् ये गर्भेत्यादि तान् सर्वानित्यन्तं वाक्यमुच्चरेत् ततो नाशय द्वन्द्वमुच्चरेत् ततो गर्भरक्षा कुर्विति वदेत् ततो द्विठ· स्वाहेति वदेत् सकलपदयोजनया ह्रीं हूं ये गर्भविघ्नकर्त्तारो ये च गर्भविनाशका भूता प्रेता· पिशाचाश्च वेताला बालघातकास्तान् सर्वांश्चाशय नाशय गर्भरक्षा कुरु स्वाहेति मन्त्रो ज्ञात. अनेन मन्त्रेण रक्षोघ्न रक्षोघ्ननामान हुताशनसंज्ञं चिन्तयित्वा रुद्र प्रजापतिञ्च ध्यायन् द्वादशाहुती· दद्यात् ॥ १२४—१२६ ॥

ततइत्यादि । तत परं ह्रीं चन्द्रमसे स्वाहेति मन्त्रेणाहुतिपञ्चकं दत्वा भार्यांहृदि स्मृष्ट्वा मायां लक्ष्मीं ह्रीं श्रीमिति मन्त्रं शतवारं जपेत् ॥ १२७ ॥

समापयेत् पुंसवनं कर्म्मेति शेष. ॥ १२८ ॥

वाग्भवं मदन लक्ष्मीं मायां कूर्चं पुरन्दरम् ।
पञ्चद्रव्योपरि शिवे ! प्रजप्य पञ्चपञ्चधा ।
एकीकृत्यामृतान्यत्र प्राशयेदपि तां पतिः ॥ १३० ॥
सीमन्तोन्नयन कुर्य्यान्मासि षष्ठेऽष्टमेऽपि वा ।
यावन्न जायतेऽपत्यं तावत् सीमन्तनक्रिया ॥ १३१ ॥
पूर्वोक्तधाराहोमान्तं कर्म्म कृत्वा स्त्रिया सह ।
उपविश्यासने प्राज्ञः प्रदद्यादाहुतित्रयम् ।
विष्णवे भास्वते धात्रे वह्निजायां समुच्चरन् ॥ १३२ ॥
ततश्चन्द्रमसं ध्यात्वा शिवनाम्नि हुताशने ।
सप्तधा हवनं कुर्य्यात् सोममुद्दिश्य मानवः ॥ १३३ ॥
अश्विनौ वासवं विष्णुं शिवं दुर्गां प्रजापतिम् ।
ध्यात्वा प्रत्येकतो दद्यादाहुतौ पञ्चधा शिवे ! ॥ १३४ ॥

ननु किंनाम पञ्चामृतमत आह शर्करेत्यादि । सप्ताग्यकम् तुल्यभागम् ॥ १२९ ॥

वाग्भवमित्यादि । वाग्भवं ऐमिति मदन क्लीमिति लक्ष्मी श्रीमिति माया ह्रीमिति कूर्चं हूमिति पुरन्दर लमिति च बीज शर्करादिपञ्चद्रव्योपरि पञ्च पञ्चधा पञ्च पञ्चवारान् प्रजप्य शर्करादीन्यस्तान्येकीकृत्य पतिर्हविता भार्य्यामत्र पञ्चमे मासि प्राशयेत् ॥ १३० । १३१ ॥

सीमन्तोन्नयनक्रियाविधिमेवाह पूर्व्वोक्तेत्यादिभि । प्राज्ञो विद्वान् पुरुषः स्त्रिया सहासने उपविश्य पूर्व्वोक्तधाराहोमान्तं कर्म्म कृत्वा पूर्व्वं विष्णवे इति भास्वते इति धात्रे इति समुच्चरन् ततो वह्निजायां स्वाहां समुच्चरन् विष्णवे स्वाहा सूर्य्याय स्वाहा प्रजापतये स्वाहेति च मन्त्रं प्रकीर्त्तयन् सन् विष्णु, सूर्य्य प्रजापति चोद्दिश्याहुतित्रयं प्रदद्यात् ॥ १३२ । १३३ । १३४ ॥

स्वर्णकङ्कतिकां भर्त्ता गृहीत्वा दक्षिणे करे ।
सीमन्तादूर्द्धकेशान्तः केशपाशे निवेशयेत् ॥ १३५ ॥
शिवं विष्णुं विधिं ध्यायन् मायाबीजं समुच्चरन् ॥१३६॥
भार्य्ये ! कल्याणि ! सुभगे ! दशमे मासि सुव्रते ! ।
सुप्रसूता भव प्रीता प्रसादाद्विश्वकर्म्मणः ॥ १३७ ॥
आयुष्मती कङ्कतिका वर्च्चस्वी ते शुभं कुरु ।
ततः समापयेत् कर्म्म स्विष्टकृद्धवनादिभिः ॥ १३८ ॥
जातमात्रं सुतं दृष्ट्वा दत्वा स्वर्णं गृहान्तरे ।
पूर्वोक्तविधिना धीरो धाराहोमं समापयेत् ॥ १३९ ॥
तत पश्चाहुतिर्दद्यात् अग्निमिन्द्रं प्रजापतिम् ।
विश्वान् देवांश्च ब्रह्माणमुद्दिश्य तदनन्तरम् ॥ १४० ॥
मधुसर्पिः कांस्यपात्रे समं नीत्वा समांशकम् ।
वाग्भवं श्रुतधा जप्त्वा प्राशयेत्तनयं पिता ॥ १४१ ॥

स्वर्णेत्यादि । ततो भर्त्ता दक्षिणे करे स्वर्णकङ्कतिकां सुवर्णमयीं प्रसाधनीं गृहीत्वा पूर्व्वं मायाबीजं ह्रीमिति बीजं समुच्चरन् ततो भार्य्ये ! कल्याणि ! सुभगे ! दशमे मासि सुव्रते ! सुप्रसूता भव प्रीता प्रसादाद्विश्वकर्म्मणः आयुष्मती कङ्कतिका वर्च्चस्वी ते शुभं कुर्य्यादिति मन्त्रं समुच्चरन् शिवं विष्णुं विधिं प्रजापतिञ्च ध्यायन् सन् सीमन्तात् सकाशात् ऊर्द्धकेशान्तं केशपाशे ऊर्द्धकेशाभ्यन्तरकेशसमूहे निवेशयेत् आयुष्मतीत्यस्य भवेत्यनेनान्वयो विधेयः ते इत्यस्य कङ्कतिकेत्यनेनान्वयः ॥१३५—१३८ ॥

अथ जातकर्म्मविधिमाह जातमात्रमित्यादि । दत्वा सुतादिति शेषः गृहान्तरे सूतिकागृहादन्यस्मिन् गृहे ॥ १३९ ॥

तत इत्यादिस्तु स्पष्टार्थः ॥ १४० ॥

मध्यमिति तदनन्तरं पश्चाहुतिर्दद्यादित्यन्वयः कांस्यपात्रे समांशकं

दक्षहस्तानामिकया मन्त्रमेनं समुच्चरन् ।
आयुर्वर्च्चो बलं मेधा वर्द्धतां तु सदा शिशोः ॥ १४२ ॥
इत्यायुर्जनन कृत्वा गुप्तं नाम प्रकल्पयेत् ।
कृतोपनयने पुत्रे तेन नाम्ना समाह्वयेत् ॥ १४३ ॥
प्रायश्चित्तादिकं कृत्वा जातकर्म्म समापयेत् ।
नालच्छेद ततो धात्री कुर्य्यादुत्साहपूर्वकम् ॥ १४४ ॥
यावन्न छिद्यते नालं तावच्छौचं न बाधते ।
प्रागेव नाड़िकाच्छेदाद्दैवीं पैत्रीं क्रियाचरेत् ॥ १४५॥
कुमार्य्याश्चापि कर्त्तव्यमेवमेवममन्त्रकम् ।
षष्ठे वा चाष्टमे मासि नाम कुर्य्यात् प्रकाशतः ॥ १४६॥
स्नापयित्वा शिशुं माता परिधाप्याम्बरे शुभे ।
भर्त्तुः पार्श्वं समागत्य प्राङ्मुखं स्थापयेत् सुतम्॥१४७॥
अभिषिञ्चेत् शिशोर्म्मूर्द्धिं सहिरण्यकुशोदकैः ।
जाह्नवी यमुना रेवा सुपवित्रा सरस्वती ॥ १४८ ॥
नर्म्मदा वरदा कुन्ती सागराश्च सरांसि च ।
एते त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये ॥ १४९ ॥

मधुसर्पिश्च समानीय तदुपरि वाग्भवम् ऐमिति मन्त्रं सप्तधा जप्त्वा आयुर्वर्च्चो बलं मेधा वर्द्धता ते सदा शिशो· इत्येन मन्त्रं समुच्चरन् पिता दक्षहस्तानामिकयाङ्गुल्या मधुसर्पिस्तनय प्राशयेत् ॥ १४१ । १४२॥

इत्यायुर्ज्जननमित्यादिवस्तु स्पष्टार्थं ॥ १४३—१४५ ॥

कुमार्य्या इत्यादि । कुमार्य्याश्चाप्यमन्त्रकं मन्त्रहीनमेव जातकर्म्मैवमेव कर्त्तव्यम् ॥ १४६ ॥

अथ नामकरणस्यैव विधिमाह स्नापयित्वेत्यादिभि. । माता शिशुं स्नापयित्वा शुभे अम्बरे वस्त्रे परिधाप्य भर्तुः पार्श्वं समागत्य सुतं प्राङ्मुखं स्थापयेत् ॥ १४७ ॥

ओं आपोहिष्ठा मयोभुवस्ता न ऊर्जे ।
दधातन महेरणाय चक्षुषे ॥ १५० ॥
ओं यो वः शिवतमो रसस्तस्य भाजयतेहन-
ऽषतीरिव मातरः । ओं तस्मा अरङ्गमामवो-
यस्य क्षयाय जिन्वथ आपो जनयथाचन ॥ १५१ ॥

अभिषिञ्चेदित्यादि । ततः पिता जाङ्घवीत्यादिभिर्मन्त्रैः सहिरण्यकुशोदकैः शिशोः मूर्ध्नभिषिञ्चेत् ॥ १४८ । १४९ ॥

आपइत्यादि । हे आपो ! हि यस्मात् यूयं मयोभुवः स्था मयः सुखं तस्य भावयित्र्यः प्रापयित्र्यो भवत ता तस्मात् नोऽस्मान् ऊर्जेऽन्नाय दधातन स्थापयत किञ्च महे महते रणाय रमणीयाय चक्षुषे दर्शनीयाय दधातन, अयमर्थः हे आपो ! यस्मादूयूयं सुखं प्रापयथ तस्मादस्माकैहिकेनाद्यादिनामुष्मिकेन च महारमणीयदर्शनीयेन ब्रह्मणा संयोजयतेति, हि शा इति श्नसोर्लोट् मध्यमपुरुषबहुवचनं दधातनेत्यपि दधातेर्लोट् मध्यमपुरुषबहुवचन छन्दसि बहुलमित्यनेन सिद्धं महे इति महते इति पदस्य छान्दसत्वादकारतकारयोर्लोपे सति महे इति भवति रणायेति रमणीयशब्दस्य छन्दसि रणादेशः चक्षुषे इति उस् प्रत्ययान्नाङ्चतुर्थी ॥ १५० ॥

यो व इत्यादि । हे आपो ! वो युष्माकं शिवतमोऽत्यन्तकल्याणरूपो यो रसो निर्यासो मधुरस्तस्य रसस्येह नोऽस्मान् भाजयत भागिनः कुरुत तेन रसेन सम्बद्धानस्मान् कुरुतेत्यर्थः किम्भूता यूयम् ऋषतीरिच्छावत्यः स्नेहेन मातर इव, अयमर्थः यथा स्नेहेन मातरः पुत्रान् तुल्यरसभागिनः कुर्वन्ति तथा यूयमप्यस्मान् कल्याणकारिरससम्बन्धान् कुरुतेति, ऋषतीरिति वश कान्तौ शतृप्रत्ययः तदन्ताद्दीप्प्रत्ययः ततो जसि ऋते निपातनात् पूर्वसवर्णदीर्घः । हे आपो ! वो युष्माकं तस्मै तस्मिन् रसेऽरमन्तं पर्याप्तं गमाम गच्छामेत्यर्थः किञ्च यस्तव रसे नोऽस्माकं भोग यूय जनयथ यस्य रसस्य क्षयाय क्षये स्थाने जिन्वथ प्रीणयथ आब्रह्मस्तम्बपर्यन्तं जगदिति शेषः, अयमर्थः । हे

अभिषिच्य त्रिभिर्मन्त्रैः पूर्ववद्वह्निसंस्क्रियाम् ।
कृत्वा सम्पाद्य धारान्तं दद्यात् पञ्चाहुतीः सुधीः ॥१५२॥
अग्नये प्रथमां दत्वा वासवाय ततः परम् ।
ततः प्रजानाम्पतये विश्वदेवेभ्य एव च ।
ब्रह्मणे चाहुतिं दद्याद्भौ पार्थिवसंज्ञके ॥ १५३ ॥
ततोऽङ्के पुत्रमादाय श्रावयेत् दक्षिणश्रुतौ ।
खल्वाटरं सुखोच्चार्यं शुभं नाम विचक्षणः ॥ १५४॥
श्रावयित्वा त्रिधा नाम ब्राह्मणेभ्यो निवेद्य च ।
ततः समापयेत् कर्म्म कृत्वा खिष्टकृदादिकम् ॥१५५ ॥
कन्याया निष्क मो नास्ति वृद्धिश्राद्धं न विद्यते ।
नामान्नप्राशनं चूड़ां कुर्य्याद्दीमानमन्त्रकम् ॥ १५६ ॥
चतुर्थे मासि षष्ठे वा कुर्य्यान्निष्क मणं शिशोः ॥ १५७॥
कृतनित्यक्रियः स्नात· सम्पूज्य गणनायकम् ।

आपो । युष्माक यस्य रसस्य स्थाने जगदूयूयं प्रीणयथ तस्य विषये वयं तृप्ति गच्छाम यथञ्च नस्तत्र सम्भोगं जनयथेति तस्मै क्षयायेत्युभयत्रापि सप्तम्यर्थे चतुर्थी गमाम इति लोटुत्तमपुरुषबहुवचन गच्छादेशाभावश्छान्दस जनयथा इति छन्दसि दीर्घ जिन्वथ इति छन्दसि सिद्धम् ॥ १५१ ॥

अभिषिच्येत्यादि । एतैस्त्रिभिर्मन्त्रैः शिशोर्मूर्ध्नभिषिच्य पूर्ववत् वह्निसंस्क्रिया कृत्वा धारान्तं धाराहोमान्त कर्म च सम्पाद्य सुधी· पिता पञ्चाहुतीर्दद्यात् ॥ १५२ ॥

ननु कान्देवानुद्दिश्य पञ्चाहुतीर्दद्यादित्यपेक्षायामाह अग्नये इत्यादि ॥ १५३ ॥

तत इत्यादि । ततोऽङ्के क्रोडे पुत्रमादाय गृहीत्वा विचक्षण· पिता पुत्रस्य दक्षिणश्रुतौ दक्षिणे कर्णे खल्वाटर सुखोच्चार्यं शुभं मङ्गलवाचकं नाम श्रावयेत् ॥ १५४—१५७ ॥

स्नापयित्वा तु तनयं वस्त्रालङ्कारभूषितम् ।
सस्थाप्य पुरतो विद्वानिमं मन्त्रमुदीरयेत् ॥ १५८ ॥
ब्रह्मा विष्णु शिवो दुर्गा गणेशो भास्करस्तथा ।
इन्द्रो वायु: कुबेरश्च वरुणोऽग्निर्बृहस्पतिः ।
शिशोः शुभं प्रकुर्वन्तु रक्षन्तु पथि सर्वदा ॥ १५९ ॥
इत्युक्त्वाङ्के समादाय गीतवाद्यपुरःसरम् ।
बहिर्निष्क्रामयेद्बालं सानन्दैः स्वजनैः सह ॥ १६० ॥
गत्वाध्वनि कियद्दूरं शिशुं सूर्यं निरीक्षयेत् ॥ १६१ ॥
ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरेत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ॥ १६२ ॥
इत्यादित्यं दर्शयित्वा समागत्य निजालयम् ।
अर्घ्यं दत्वा दिनेशाय स्वजनान् भोजयेत् पिता॥ १६३
षष्ठे मासि कुमारस्य मासि वाप्यष्टमे शिवे ।।
पितृभ्राता पिता वापि कुर्यादन्नाशनक्रियाम् ॥ १६४॥

अथ शिशुनिष्क्रमणक्रियाविधिमाह कृतनित्यक्रिय इत्यादिभिः ॥ १५८ ॥

य मन्त्रमुदीरयेत्तमेव मन्त्रमाह ब्रह्मा विष्णुरिति ॥ १५९ ॥

इतीत्यादि । इतीम मन्त्रमुक्त्वाङ्के क्रोडे बालं समादाय गृहीत्वा सानन्दैः स्वजनैः सह गीतवाद्यपुरःसरं बालं बहिर्निष्क्रामयेत् ॥१६०॥

गत्वेत्यादि । अध्वनि मार्गे कियद्दूरं गत्वा पिता शिशुं बालं सूर्यं निरीक्षयेद्दर्शयेत् ॥ १६१ ॥

येन मन्त्रेण शिशुं सूर्यं दर्शयेत्त मन्त्रमाह ॐ तच्चक्षुरिति । पुरस्तादग्रतः शुक्रमुच्चरेत् शुक्रमुक्त्वाग्रं गच्छेत् तत्सूर्यरूपं देवहितं चक्षुर्वर्त्तते यद्वयं शतं शरदो वर्षाणि पश्येम यच्च पश्यन्तो वयं शतं शरदो जीवेम ॥ १६२—१६३ ॥

पूर्ववद्देवपूजादि वह्निसंस्करणं तथा ।
एवं धारान्तकर्माणि समाप्य विधिवत् पिता ॥१६५॥
दद्यात् पञ्चाहुतिस्तत्र शुचिनाज्ञि हुताशने ।
अग्निमुद्दिश्य प्रथमां द्वितीयां वासवं स्मरन् ॥ १६६ ॥
ततः प्रजापतिं देवं विश्वान् देवान् ततः परम् ।
ब्रह्माणञ्च समुद्दिश्य पञ्चमीमाहुतीं त्यजेत् ॥ १६७ ॥
ततोऽग्नावन्नदां ध्यात्वा दत्तपञ्चाहुतिः पिता ।
तत्राथवा गृहेऽन्यस्मिन् वस्त्रालङ्कारशोभितम् ।
क्रोडे निधाय तनयं प्राशयेत् पायसान्वितम् ॥१६८॥
पञ्चप्राणाहुतैर्मन्त्रैर्भोजयित्वा तु पञ्चधा ।
ततोऽन्नव्यञ्जनादीनां दत्वा किञ्चित् शिशोर्मुखे ॥१६९॥
शङ्खतूर्य्यादिघोषेण प्रायश्चित्त्या समापयेत् ।
इत्यन्नप्राशनं प्रोक्तं चूड़ाविधिमतः शृणु ॥ १७० ॥
तृतीये पञ्चमे वर्षे कुलाचारानुसारतः ।
चूडाकर्म शिशोः कुर्य्याद्वालसंस्कारसिद्धये ॥ १७१ ॥

अन्नप्राशनक्रियाविधिमाह पूर्ववदित्यादिभि ॥ १६५ ॥

तत्र अन्नप्राशनक्रियायाम् । ननु कान्देवानुद्दिश्य पञ्चाहुतीर्देद्या-दित्यपेक्षायामाह अग्निमित्यादि ॥ १६६ ॥ १६७ ॥

तत इत्यादि । तत परमन्नदां देवीं ध्यात्वा तानुद्दिश्याग्नौ दत्ता पञ्चाहुतिर्येन स दत्तपञ्चाहुतिः पिता तत्राथवान्यस्मिन् गृहे वस्त्रालङ्कारशोभित तनयं क्रोड़े निधाय संस्थाप्य पायसान्वितं परमान्न-रूपमन्नत प्राशयेत् भोजयेत् ॥ १६८ ॥

पञ्चेत्यादि । प्राणाय स्वाहा अपानाय स्वाहा समानाय स्वाहा उदानाय स्वाहा व्यानाय स्वाहेत्यात्मकैः पञ्चप्राणाहुतैर्मन्त्रैः. पुत्रं पायसं पञ्चधा भोजयित्वा ततोऽन्नव्यञ्जनादीनां किञ्चित् शिशोर्मुखे

देवपूजादिधारान्तं कर्म निष्पाद्य साधकः।
सत्याग्नेरुत्तरे देशे हस्तगोमयपूरितम् ॥ १७२ ॥
तिलगोधूमसंयुक्तं शरावं स्थापयेद् बुधः।
कवोष्णं सलिलञ्चापि क्षुरमेकं सुशाणितम् ॥ १७३ ॥
आसाद्य तनयं तत्र जनकः स्वीयवामतः।
संस्थाप्य जननीक्रोड़े कवोष्णसलिलैश्च तैः ॥ १७४ ॥
वारुणं दग्धधा जप्त्वा सम्मार्ज्य शिशुमूर्द्धजान्।
मायया कुशपत्राभ्यां जुष्टिमेकां प्रकल्पयेत् ॥ १७५ ॥
मायां लक्ष्मीं त्रिधा जप्त्वा गृहीत्वा लौहजं क्षुरम्।
क्षित्वा तु जुष्टिकामूलं माढ्यहस्ते निवेशयेत् ॥ १७६ ॥

दत्वा शङ्खतूर्य्यादिघोषेण प्रायश्चित्त्वा चान्नप्राशनक्रियां समापयेत् ॥ १६९—१७१ ॥

अथ वृद्धाकर्मविधिमाह देवपूजादीत्यादिभि। बुधो विचक्षणः साधकः कर्मनिष्पादकः पिता पूर्ववद्देवपूजादिधारान्तं कर्म निष्पाद्य सत्याग्नेः सत्यनाम्नो वह्नेरुत्तरे देशे हस्तगोमयपूरितं तिलगोधूमसंयुक्तं शरावं कवोष्णमीषदुष्णं सलिलं जलं सुशाणितमेकं क्षुरञ्चापि स्थापयेत् ॥ १७२ ॥ १७३ ॥

आसाद्येत्यादि। ततो जनकः पिता तनयं पुत्रं सत्यनाम्नो वह्नेः समीपे आसाद्यानाय स्वीयवामतः आत्मनो वामे देशे जननीक्रोडे संस्थाप्य तैर्वह्नेरुत्तरे देशे स्थापितैः कवोष्णसलिलैर्वारुणं वरुणसम्बन्धि वर्मेति बीजं दग्धधा जप्त्वा शिशुमूर्द्धजान् बालयकेशान् सम्मार्ज्य मायया ह्रीं बीजेन कुशपत्राभ्यामेकां जुष्टिं प्रकल्पयेत् ॥ ॥ १७४ ॥ १७५ ॥

मायामित्यादि। ततो मायां ह्रीं बीजं लक्ष्मीं श्रीं बीजञ्च त्रिधा जप्त्वा लौहजं क्षुरं गृहीत्वा जुष्टिकामूलं क्षित्वा माढ्यहस्ते जुष्टिकां निवेशयेत् स्थापयेत् ॥ १७६ ॥

कुमारमाता हस्ताभ्यामादाय गोमयान्विते ।
शरावे स्थापयेत् जुष्टिं नापिताय पिता वदेत् ॥१७७॥
क्षुरमुण्डिन् । शिशोः क्षौरं सुखं साधय ठद्वयम् ।
पठित्वा नापित पश्यन् सत्यनामनि पावके ।
प्रजापतिं समुद्दिश्य प्रदद्यादाहुतित्रयम् ॥ १७८ ॥
नापितेन कृतक्षौरं स्नापयित्वा शिशुं ततः ।
वस्त्रालङ्कारमाल्येन भूषयित्वाग्निसन्निधौ ॥ १७९ ॥
स्ववामभागे संस्थाप्य स्विष्टकृद्धोममाचरेत् ।
प्रायश्चित्तं ततः कृत्वा दद्यात् पूर्णाहुतिं पिता ॥१८०॥
माया शिशो । ते क्षुरकं कुरुतां विश्वकृद्विभुः ।
पठित्वैनं शिशोः कर्णे स्वर्णमय्या शलाकया ।
राजत्या लौहजन्या वा कर्णवेधं प्रकल्पयेत् ॥ १८१ ॥
आपोहिष्ठेति मन्त्रेण अभिषिच्य सुतं ततः ।
शान्त्यादिदक्षिणां कृत्वा चूडाकर्म समापयेत् ॥१८२॥

कुमारेत्यादि । कुमारमाता हस्ताभ्यां जुष्टिकामादाय गृहीत्वा गोमयान्विते शरावे स्थापयेत् ततो नापिताय पिता शिशुजनको वदेत् ॥ १७७ ॥

शिशो पिता नापिताय किं वदेदित्यपेक्षायामाह क्षुरमुण्डिन्नित्यादि । हे क्षुरमुण्डिन्नापित ! शिशो क्षौरं सुखं यथा स्यात्तथा त्वं साधय ठद्वय स्वाहा क्षुरमुण्डिन्नित्याद्य साधय स्वाहेत्यन्तं मन्त्रं पठित्वा नापित पश्यन् शिशुजनक प्रजापतिं समुद्दिश्य सत्यनामनि पावकेऽग्नावाहुतित्रय प्रदद्यात् ॥ १७८ ॥

नापितेनेति । ततो नापितेन कृतं क्षौरं यस्य तथाभूतं शिशुं स्नापयित्वा ततो वस्त्रालङ्कारमाल्येन भूषयित्वाग्निसन्निधौ स्ववामभागे संस्थाप्य च स्विष्टकृतं होममाचरेत् कुर्यात् ॥ १७९ ॥ १८० ॥

गर्भाधानादिचूड़ान्तं समानं सर्व्वजातिषु।
शूद्रसामान्यजातीनां सर्व्वमेतदमन्त्रकम् ॥ १८३ ॥
जातकर्म्मादिचूडान्तं कुमार्य्याश्चाप्यमन्त्रकम्।
कर्त्तव्यं पञ्चभिर्व्वर्णैरेकं निष्क्रमणं विना ॥ १८४ ॥
अथोच्यते द्विजातीनामुपवीतक्रियाविधिः।
यस्मिन् कृते द्विजन्मानो दैवपैत्राधिकारिणः ॥ १८५ ॥
गर्भाष्टमेऽष्टमे वाब्दे कुर्य्यादुपनयं शिशोः।
षोड़शाब्दाधिको नोपनेतव्यो निष्क्रियोऽपि सः ॥ १८६ ॥
कृतनित्यक्रियो विद्वान् पञ्चदेवान् समर्च्चयेत्।
गौर्य्यादिमातृकायैव वसुधारां प्रकल्पयेत् ॥ १८७ ॥
तद्विश्राद्धं ततः कुर्य्यात् देवतापितृतुष्टये।
कुशण्डिकोक्तविधिना धान्यहोमान्तमाचरेत् ॥ १८८ ॥
प्रातः कृताग्नन बालं सस्नातं समलङ्कृतम्।
शिखां विना कृतक्षौरं चौमाम्बरविभूषितम् ॥ १८९ ॥

मायेत्यादि। मायां ह्रीं बीजम् एन ह्रीं शिशो इत्याद्यं विश्वलक्ष्मिरित्यन्तं मन्त्रं शिशो कर्णे पठित्वा स्वर्णमय्या सुवर्णविकारभूतया राजत्या रजतोद्भूतया लौहमय्या वा शलाकया शिशोः कर्णवेधं प्रकल्पयेत् कुर्य्यात् ॥ १८१—१८४ ॥

अथेत्यादि। द्विजातीनाम् ब्राह्मणक्षत्रियवैश्यानाम् ॥ १८५ ॥

गर्भेत्यादि। गर्भाष्टमे जननाद्वाष्टमेऽब्दे वर्षे शिशोर्बालस्योपनयमुपनयनं कुर्य्यात् षोडशाब्दाधिको लङ्घितषोड़शवर्षो बालो नोपनेतव्यः स बालो निष्क्रियोऽपि दैवपित्र्यक्रियाविहीनोऽपि भवति ॥ १८६ ॥

अथोपवीतक्रियाविधिमेवाह कृतनित्यक्रिय इत्यादिभिः। पञ्चदेवान् ब्रह्मादीन् ॥ १८७ ॥ १८८ ॥

क्षायामखण्डमानीय समुद्भवहुताग्नितः ।
समीपे चात्मनो वामे संस्थाप्य विमलासने ॥ १८० ॥
शिष्यं वदेद्ब्रह्मचर्य्यं कुरु वत्स ! ततः शिशुः ।
ब्रह्मचर्य्यं करोमीति गुरवे विनिवेदयेत् ॥ १८१ ॥
ततो गुरुः प्रसन्नात्मा शिष्यवे शान्तचेतसे ।
काषायवाससी दद्यात् दीर्घायुष्टाय वर्च्चसे ॥ १८२ ॥
मौञ्जीं कुशमयीं वापि ग्रन्थितां ग्रन्थिसंयुताम् ।
तूष्णीं च मेखलां दद्यात् काषायाम्बरधारिणे ॥ १८३॥
मायासुचार्य्य सुभगा मेखला स्यात् शुभप्रदा ।
इत्युक्त्वा मेखलां बद्ध्वा मौनी तिष्ठेत् गुरोः पुरः ॥१८४॥

यज्ञोपवीतं परमं पवित्रं
प्रहस्पतिर्यत् सहज पुरस्तात् ।

प्रातरित्यादि । ततः प्रातः कृताह्निकं कृतभोजनं येन तथाभूतं शिष्यं विना, कृतं क्षौरं यस्य तथाभूतं सुस्नात सुष्ठु कृतस्नान भूषणादिभि सम्यगलङ्कृतं क्षौमाम्बरविभूषित दुकूलवस्त्राभ्यामलङ्कृतं बालं काषायखण्डमानीय समुद्भवहुताग्नितः समुद्भवनाम्नो वह्नेः समीपे चात्मनो वामे देशे विमलासने संस्थाप्य च ब्रह्मचर्य्यं कुरु वत्सेति गुरुः शिष्यं वदेत् तत परं शिशु ब्रह्मचर्य्यं करोमीति गुरवे विनिवेदयेत् ॥ १८९—१८१ ॥

ततः परं प्रसन्नात्मा प्रसन्नमना गुरु शान्तचेतसे शिष्यवे दीर्घायुष्टाय दीर्घमायुर्यस्य स दीर्घायुस्तस्य भावो दीर्घायुष्टं तस्मै वर्च्चसे तेजसे च काषायवाससी कषायेण रक्ते वस्त्रे दद्यात् ॥ १८२ ॥

मौञ्जीमिति । मौञ्जीं मुञ्जमयीं कुशमयी वा ग्रन्थितां ग्रन्थिसंयुतां मेखलामपि काषायाम्बरधारिणे शिष्यवे तूष्णीमेव दद्यात् ॥ १८३ ॥

मायामिति । पूर्वं मायां ह्रीमिति बीजमुच्चार्य्य ततः सुभगा

आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः ॥ १९५ ॥
मन्त्रेणानेन शिष्यवे दद्यात् कृष्णाजिनान्वितम् ।
यज्ञोपवीतं दण्डञ्च वैणवं खादिरञ्च वा ।
पालाशमथवा दद्यात् चौरवृक्षसमुद्भवम् ॥ १९६ ॥
आपोहिष्ठेति मन्त्रेण मायया पुटितेन च ।
त्रिरावृत्त्या कुशाम्भोभिर्धृतदण्डोपवीतिनम् ।
अभिषिच्य ततस्तोयैः पूरयेदालकाञ्जलिम् ॥ १९७ ॥
तदञ्जलिं दिनेशाय दातारं ब्रह्मचारिणम् ।
तच्चक्षुरिति मन्त्रेण दर्शयेद्भास्करं गुरुः ॥ १९८ ॥
दृष्टभास्करमाचार्यो वदेन्माणवकं ततः ।

मेखलां खाच्छुभप्रदेति मन्त्रमुक्त्वा कट्यां मेखलां बद्ध्वा मौनी सन् गुरोः पुरस्तिष्ठेत् ॥ १९४ ॥ १९५ ॥

मन्त्रेणेत्यादि । अनेन यज्ञोपवीतमित्यादिना बलमस्तु तेज इत्यन्तेन मन्त्रेण कृष्णाजिनान्वितं कृष्णवर्णमृगचर्मसंयुक्तं यज्ञोपवीतं शिष्यवे दद्यात् वैणवं वेणुसमुद्भवं खादिरं खदिरसमुद्भवं पालाशं पलाशसमुद्भवं चौरवृक्षसमुद्भवं वा दण्डमपि शिष्यवे दद्यात् ॥ १९६ ॥

आपोहिष्ठेत्यादि । ततो मायया ह्रीं बीजेनादावन्ते च पुटितेन संपुटितेनापो हिष्ठेति मन्त्रेण कुशाम्भोभिर्धृतदण्डोपवीतिनं धृतदण्डोपवीतवन्तं शिष्यं त्रिरावृत्त्याभिषिच्य ततः परं तोयैर्जलैरालकाञ्जलिं पूरयेत् ॥ १९७ ॥

तदञ्जलिमित्यादि । दिनेशाय सूर्याय तदञ्जलिं दातारं ब्रह्मचारिणं बालकं तच्चक्षुरिति मन्त्रेण भास्करं गुरुर्दर्शयेत् । दातारमित्यत्र शीले तृन्प्रत्ययः अतएव तदञ्जलिमित्यत्र कर्तृकर्मणोः कृतीत्यनेन कर्मणि प्राप्तायाः षष्ठ्या न लोकान्वयनिष्ठा खलर्थतृनित्यनेन प्रतिषेधो जातः ॥ १९८ ॥

मम व्रते मनो धेहि मम चित्तं ददामि ते ।
जुषस्वैकमना वत्स ! मम वाचोऽस्तु ते शिवम् ॥१९९॥
हृदि स्पृष्ट्वा पठित्वैनं किन्नामासीति तं वदेत् ।
शिष्यस्त्वमुकशर्माहं भवन्तमभिवादये ॥ २०० ॥
कस्य त्वं ब्रह्मचारीति गुरौ पृच्छति पार्वति ! ।
शिष्य सावहितो ब्रूयाद्भवतो ब्रह्मचार्यहम् ॥२०१॥
इन्द्रस्य ब्रह्मचारी त्वमाचार्यस्ते हुताशनः ।
इत्युक्त्वा सद्गुरुः पश्चाद्देवेभ्यस्तं समर्पयेत् ॥ २०२ ॥
त्वां प्रजापतये वत्स ! सवित्रे वरुणाय च ।
पृथिव्यै विश्वदेवेभ्यः सर्व्वदेवेभ्य एव च ।
समर्पयामि ते सर्व्वं रक्षन्तु त्वां निरन्तरम् ॥ २०३ ॥

दृष्टभास्करमित्यादि । ततः परमाचार्यो गुरुं दृष्टभास्करं दृष्टो भास्करो येन तथाभूत सावधानं शिष्यं वदेत् । आचार्यो बालक किं वदेदित्यपेक्षायामाह मम व्रते इत्यादि । जुषस्व मम व्रतं सेवस्व शिवं कल्याणकरं ॥ १९९ ॥

हृदीति । गुरुरेनं मन्त्रमित्यादिकं शिवनिर्दिष्टं मन्त्रं पठित्वा शिष्यस्य हृदि स्पृष्ट्वा वत्स ! त्वं किं नामासीति तं शिष्यं वदेत् गुरुरेव कथयेत् शिष्यः अमुकशर्माहं भवन्तमभिवादये इति ब्रूयात् ॥ २०० ॥

कस्येत्यादि । हे वत्स ! त्वं कस्य ब्रह्मचार्यसीति गुरौ पृच्छति सति शिष्य सावहित सावधान सन् भवतो ब्रह्मचार्यहमिति ब्रूयात् ॥ २०१ ॥

इन्द्रस्येत्यादि । वत्स ! त्वमिन्द्रस्य ब्रह्मचार्यसि ते तव हुताशनोऽग्निराचार्यो गुरुर्भवति इति शिष्यसङ्घात्स गुरु पश्चात्तं शिष्यं देवेभ्यः समर्पयेत् ॥ २०२ ॥

ननु केभ्यो देवेभ्यो गुरु शिष्यं समर्पयेदित्याकाङ्क्षायामाह त्वां प्रजापतये वत्सेत्यादि ॥ २०३ ॥

ततो माणवको वह्निं दक्षिणावर्त्तयोगतः ।
गुरुं प्रदक्षिणीकृत्य स्वासने तत्र विशेत् ॥ २०४ ॥
गुरुः शिष्येण संस्पृष्टः सन्नह्यन्नुत्तराशने ।
पञ्चदेवान् समुद्दिश्य हुत्वा पश्चाहुतीः प्रिये ! ॥ २०५ ॥
प्रजापतिस्तथा शक्रो विष्णुर्ब्रह्मा शिवस्तथा ॥ २०६ ॥
मायादिवह्निजायान्तैर्जुहुयात् स्वस्वनामभिः ।
अरुन्धत्यन्ते सव्यतर्पणविधिना तर्पयेत्ततः ॥ २०७ ॥
ततो दुर्गां महालक्ष्मीः [illegible]
इन्द्राद्यान्दिक्पालान् भास्करं दिक्स्वधाः ॥ २०८ ॥
प्रत्येकनाम्ना हुत्वैतान् वाससाच्छाद्य वाचकम् ।
एकैकाञ्जलिकं प्राणं [illegible]
को वाऽस्मन्ते तनय ! ब्रूहि किन्ते मनोगतम् ॥ २०९ ॥

तत इत्यादि । तत परं माणवको बालको दक्षिणावर्त्तयोगतो वह्निं गुरुञ्च प्रदक्षिणीकृत्य पुनः स्वासने आविशेत् ॥ २०४ ॥

गुरुरिति । गुरुः शिष्येण सस्पृष्टः सन् सन्नह्यन्नुत्तराशने सन्नद्धवस्त्रे सन्नद्धे अग्नौ पञ्चदेवान् समुद्दिश्य पञ्चाहुतीर्हुयात् ॥ २०५ ॥

नन्वत्र पञ्चदेवान् समुद्दिश्य पञ्चाहुतीर्हुयादित्यपेक्षायां तान् पञ्च देवान् दर्शयति प्रजापतिरित्यर्द्धेन ॥ २०६ ॥

नन्वत्र कैर्मन्त्रैः पञ्चदेवानुद्दिश्याहुतीर्हुयात्तत्राह मायादीत्यादि । मायादिवह्निजायान्तैः ह्रींबीजादिभिः स्वाहान्तैः स्वस्वनामभिः प्रजापत्यादीन् पञ्चदेवानुद्दिश्य जुहुयात् । ननु प्रजापत्यादिपञ्चदेवो द्वेधाऽत्र होमो मायादिवह्निजायान्तैः स्वस्वनामभिर्विधातव्यस्तदन्यदेवो [illegible] तत्राह अरुन्धत्यन्ते इत्यादि । ततो ह्रीं बीजादीन [illegible] प्रत्येकनाम्ना एतान् दुर्गालक्ष्म्यादीनुद्दिश्य हुत्वा वाससा तन्तु [illegible] हे तनय ! ते तवाश्रमं कृते मनोगतं

ततः शिष्य. सावहितो भूत्वा गुरुपदद्वयम् ।
करोतु मामात्मसिण ब्रह्मविद्योपदेशतः ॥ २१० ॥
एव प्रार्थ्यमानस्य दक्षकर्णे शिवोस्तदा ।
आवयित्वा त्रिधा तारं सर्व्वमन्त्रमयं शिवे ।।
व्याहृतित्रयमुच्चार्य्य सावित्रीं आवयेद्गुरु ॥ २११ ॥
ऋषि सदाशिव. प्रोक्तः छन्दस्त्रिष्टुबुदाहृतम् ।
अधिष्ठात्री तु सावित्री मोक्षार्थे विनियोगिता ॥२१२॥
आदौ तत्सवितु. पश्चाद्वरेण्यं पदमुच्चरेत् ।
भर्ग पदान्ते देवस्य धीमहीति पदं वदेत् ॥ २१३ ॥
ततस्तु परमेशानि ! धियो यो न प्रचोदयात् ।
पुन प्रणवमुच्चार्य्य सावित्र्यार्थं गुरुर्व्वदेत् ॥ २१४ ॥

वा किं वर्त्तते त्व ब्रूहि इति प्राज्ञो धीमान् गुरुर्ब्रह्मवार्थ्यभिमानिन साधवक बालक पृच्छेत् ॥ २०७ ॥ २०८ ॥ २०९ ॥

तत इत्यादि । तत पर शिष्य सावहित सावधान सन् गुरुपद द्वय भूत्वा हे गुरो । ब्रह्मविद्योपदेशत सावित्रया उपदेशेन मामात्मसिण भवान् करोत्विति प्रार्थयेत् ॥ २१० ॥

एवमित्यादि । तदा तस्मिन् काले एव प्रार्थ्यमानस्य शिवोर्दक्षकर्णे सर्वमन्त्रमयं सकलमन्त्रस्वरूपं सकलमन्त्रप्रधान वा तार प्रणवं त्रिधा त्रिवार आवयित्वा ततो भूरादिव्याहृतित्रयमुच्चार्य्य गुरु सावित्री गायत्री आवयेत् ॥ २११ ॥

अथ गायत्र्या ऋष्यादिकमाह ऋषिरित्यादिना । अस्या गायत्र्या. सदाशिव ऋषिस्त्रिष्टुप्छन्द सावित्र्यधिष्ठात्री देवता मोक्षार्थे विनियोग शिरसि सदाशिवाय ऋषये नम मुखे त्रिष्टुप्छन्दसे नम हृत्ये सावित्र्यै अधिष्ठात्र्यै देवतायै नम इत्यृष्यादिन्यास विधाय सावित्र्या जपो विधेय ॥ २१२ ॥

सावित्रीमेवाह आदावित्यादिना सार्द्धेन । आदौ तत्सवितुः

त्रयक्षराख्यकतारेण परेशः प्रतिपाद्यते ।
पाता हर्त्ता च संस्रष्टा यो देवः प्रकृतेः परः ॥ २१५ ॥
असौ देवस्त्रिलोकात्मा त्रिगुण व्याप्य तिष्ठति ।
अतो विश्वमय ब्रह्म वाच्य व्याहृतिभिस्त्रिभिः ॥ २१६ ॥
तारव्याहृतिवाच्यो यः सावित्र्या ज्ञेय एव सः ।
जगद्रूपस्य सवितुः संस्रष्टुर्दीप्यतो विभो. ॥ २१७ ॥
अन्तर्गतं महद्वर्णो वरणीयं यतात्मभिः ।
ध्यायेम दृत् पर सत्यं सर्व्वव्यापि सनातनम् ॥ २१८ ॥

पश्चात् वरेण्य पदमुच्चरेत् ततो भर्ग इति पदं वदेत् तत् पदान्ते देवस्येति पद वदेत् तदन्ते धीमहीति पद वदेत् ततस्तु धियो यो न प्रचोदयादिति वदेत् सकलपदयोजनया तत्सवितुर्व्वरेण्य भर्गो देवस्य धीमहि धियो यो न. प्रचोदयात् इत्याकारिका सावित्री जाता सावित्र्यन्ते पुन प्रणवमोङ्कारमुच्चार्य्य गुरु सावित्र्यर्थं वदेत् सावित्र्यर्थमिति प्रणवार्थस्य व्याहृत्यर्थस्य चाप्युपलक्षणम् ॥ २१३ । २१४ ॥

प्रथमत· प्रणवार्थं व्याहृत्यर्थं चाभिदधाति द्वाभ्यां त्रयक्षराख्येत्यादि । पाता जगत· पालको हर्त्ता तस्य सहारक· संस्रष्टा तस्यैवोत्पादकस्य प्रकृते परो दूर उत्तमो वा य· परेश परमात्मा देवो दीप्यादिक्रियाश्रयोऽस्ति असौ परेशो देव त्रयक्षराख्यकतारेणाकारादित्रिवर्णात्मकेन प्रणवेन प्रतिपाद्यते बोध्यते । प्रणवप्रतिपाद्यो यो देवोऽसौ देवो यतस्त्रिलोकात्मा त्रिलोकस्वरूपो भवति त्रिगुण सत्त्वादिकं व्याप्य तिष्ठति च अतो हेतोर्व्विश्वमय विश्वस्वरूप ब्रह्मलोकमयाभिधायिभिर्भूरादिभिस्त्रिभिर्व्याहृतिभिर्व्वाच्यं भवति ॥ २१५ । २१६ ॥

एव प्रणवार्थं व्याहृत्यर्थं च द्वाभ्यामभिधायेदानीं तार इत्यादिभिस्त्रिभि· सावित्र्यर्थमभिधत्ते तारेत्यादि । तारव्याहृतिवाच्यो य परमात्मा स एव सावित्र्या अपि वाच्यो ज्ञेयः परमात्मन एव यथा सावित्रीवाच्यत्व भवेत्तथैव व्याख्याति· जगद्रूपस्येत्यादि । सवितुरित्यस्य

यो भर्गः सर्वसाक्षीशो मनोबुद्धीन्द्रियाणि नः ।
धर्मार्थकाममोक्षेषु प्रेरयेद्विनियोजयेत् ॥ २१९ ॥
इत्यमर्थयुतां ब्रह्मविद्यामादिश्य सद्गुरुः ।
शिष्यं नियोजयेद्देवि ! गृहस्थाश्रमकर्मसु ॥ २२० ॥
ब्रह्मचर्य्योचितं वेशं वत्सेदानीं परित्यज ।
शास्त्रबोदितमार्गेण देवान् पितॄन् समर्चय ॥ २२१ ॥

विवरण जगद्रूपस्य सवितुर्देवस्य सृष्टिकर्तुरिति । देवस्येत्यस्य विवरण दीव्यतो विभोरिति भर्गपदार्थमाह अन्तर्गत महद्ब्रह्म इति वरेण्यमित्यस्यार्थमाह यतात्मभिर्ब्रह्मरणीयमिति धीमहीत्यस्य विवरण ध्यायेमेति तत्पदार्थमाह परं सत्य सर्व्वव्यापि सनातनमिति य इत्यस्य विवरणं सर्व्वसाक्षीश इति धियइत्यस्य विवरण मनोबुद्धीन्द्रियाणीति प्रचोदयादित्यस्य विवरण धर्मार्थकाममोक्षेषु प्रेरयेदिति प्रेरयेदित्यय च विवरण विनियोजयेदिति तदेव वाक्यार्थं सवितुर्जगद्रूपस्य वस्तुन सृष्टिकर्तुर्देवस्य दीव्यतो विभोर्ब्रह्मरेण्यं यतात्मभि. सयतात्मकरणैर्ब्रह्मरणीयमुपासनीय तत् परमुत्तम सत्यं यथार्थभूतं सर्व्वव्यापि सकलपदार्थव्यापनशील सनातनमाद्यन्तशून्यमन्तर्गत महद्ब्रह्मतेजो वय धीमहि ध्यायेम य सर्व्वसाक्षीश सर्व्वेषां शुभाशुभकर्म्मणां द्रष्टा नियन्ता च भर्गो नोऽस्माक धियो मनोबुद्धीन्द्रियाणि प्रचोदयात् धर्म्मार्थकाममोक्षेषु प्रेरयेत् विनियोजयेदिति अत्र यद्यपि सवितृभर्ग इति सवितृभर्गयोर्भेदः प्रतीयते तथापि परमार्थचिन्तायामभेद एवेति बोद्धव्यम ॥ २१७—२१९ ॥

इत्यमित्यादि । हे देवि ! इत्यनेन प्रकारेणार्थयुता ब्रह्मविद्यां गायत्रीमादिश्याभिधार्थमितस्ततो गमयित्वा सद्गुरु शिष्य गृहस्थाश्रमकर्म्मसु नियोजयेत् प्रवर्त्तयेत् ॥ २२० ॥

गृहस्थाश्रमकर्म्मसु शिष्यस्य प्रवर्त्तनमेवाह ब्रह्मचर्य्येत्यादिभिः । हे वत्स ! त्वमिदानी ब्रह्मचर्य्योचितं वेशं परित्यज शास्त्रबोदितमार्गेण शम्भुप्रोक्तेन वर्त्मना देवान् पितॄंश्च समर्चय सम्यक् पूजय ॥ २२१ ॥

ब्रह्मविद्योपदेशेन पवित्रं ते कलेवरम् ।
प्राप्य गृहस्थाश्रमिता तदुक्तं कर्म कल्पय ॥ २२२ ॥
उपवीतद्वय दिव्यवस्त्रालङ्करणानि च ।
गृहाण पादुकाछत्र गन्धमाल्यानुलेपनम् ॥ २२३ ॥
तत काषायवसन कृष्णाजिनसमन्वितम् ।
यज्ञसूत्र मेखलाञ्च दण्ड भिक्षाकरण्डकम् ॥ २२४ ॥
आचारादर्जितां भिक्षां समर्प्य गुरवे शिवे ! ।
शुद्धोपवीतयुगल परिधायाम्बरे शुभे ॥ २२५ ॥
गन्धमाल्यधरस्तूष्णीं तिष्ठेदाचार्यसन्निधौ ।
ततो गृहस्थाश्रमिण शिष्यमेतदुदेद्गुरुः ॥ २२६ ॥
जितेन्द्रियः सत्यवादी ब्रह्मज्ञानपरो भव ।
स्वाध्यायाश्रमकर्माणि यथाधर्मेण साधय ॥ २२७ ॥

ब्रह्मेत्यादि । हे वत्स ! ब्रह्मविद्योपदेशेन ते तव कलेवर शरीर पवित्रमासीत् इदानीं प्राप्य या गृहस्थाश्रमिता तदुक्त कर्म कल्पय कुरु ॥ २२२ ॥

उपवीतेत्यादि । हे वत्स ! त्वमिदानीमुपवीतद्वय द्वे उपवीते दिव्यानि वस्त्रालङ्करणानि च पादुकाछत्रमुपानहं छत्र च गन्धमाल्यानुलेपनमपि गृहाण ॥ २२३ ॥

तत इत्यादि । गुरुणैवमाज्ञापित शिष्य ततः परं काषायवसन कषायेण रक्तं वस्त्र कृष्णाजिनसमन्वितं यज्ञसूत्र मेखलां दण्ड भिक्षा करण्डकं भिक्षापात्रमाचारादर्जिता भिक्षाञ्च गुरवे समर्प्य दत्वा शुद्धोपवीतयुगल शुभे अम्बरे वस्त्रे च परिधाय गन्धमाल्यधर सन् तूष्णी माचार्यसन्निधौ गुरुसमीपे तिष्ठेत् ततो गृहस्थाश्रमिण शिष्य गुरुरेतदुदेत् ॥ २२४—२२६ ॥

इत्यादिश्य द्विजं पश्चात् समुद्भवहुताशने ।
मायादिप्रणवान्तेन भूर्भुवःस्वस्त्रयेण च ॥ २२८ ॥
हावयित्वा त्रिधाचार्य्यः स्विष्टकृद्धोममाचरेत् ।
दत्वा पूर्णाहुतिं भद्रे ! व्रतकर्म्म समापयेत् ॥ २२९ ॥
जीवसेकादिसंस्कारा व्रतान्तः पिहितो नव ।
उद्वाह पिहितो वापि स्वतोऽपि सिध्यति प्रिये ! ॥२३०॥
विवाहाङ्गि कृतस्नानः कृतनित्यक्रियः कृती ।
पञ्चदेवान् समभ्यर्च्च गौर्य्यादिमातृकास्तथा ।
वसोर्धारां कल्पयित्वा वृद्धिश्राद्धं समाचरेत् ॥ २३१ ॥
रात्रौ प्रतिश्रुतं पात्रं गीतवाद्यपुरःसरम् ।
कायामण्डपमानीय उपवेश्य वरासने ॥ २३२ ॥
वासवाभिमुखं दाता पश्चिमाभिमुखो विशेत् ।
आचम्य स्वस्तिमृद्धिञ्च कथयेद्ब्राह्मणैः सह ॥ २३३ ॥

ननु गृहस्थाश्रमिणं शिष्यं गुरुः किं वदेदित्यपेक्षायामाह जितेन्द्रिय इत्यादि ॥ २२७ ॥

इतीत्यादि । द्विज द्विजत्वशालिन शिष्यमित्यादिश्लोकाभ्यां पश्चात् समुद्भवहुताशने समुद्भवाख्ये वह्नौ मायादिप्रणवान्तेन ह्रीं बीजादिना ओंकारान्तेन भूर्भुवः स्वस्त्रयेण मन्त्रेण त्रिधा त्रिवार शिष्येण हावयित्वा च स्विष्टकृतं होममाचरेदाचार्य्यः पूर्णाहुतिं दत्वा व्रतकर्म्म यज्ञोपवीतक्रियां समापयेत् ॥ २२८—२३० ॥

अथोद्वाहक्रियाविधिमाह विवाहाङ्गीत्यादिभिः ॥ २३१ ॥

रात्रावित्यादि । ततः प्रतिश्रुतमङ्गीकृतं पात्रं वरं गीतवाद्यपुरःसरं यथा स्यात्तथा रात्रौ कायामण्डपमानीय वरासने श्रेष्ठे पीठे वासवाभिमुखं पूर्व्वाभिमुखमुपवेश्य च कन्याया दाता पश्चिमाभिमुखो भूत्वा विशेत् पश्चिमाभिमुख उपविष्टो दाता आचम्याचमनं कृत्वा

साधुप्रश्नं वरं पृच्छेदर्चना प्रश्नमेव च ।
वरात् प्रश्नोत्तरं नीत्वा पाद्याद्यैर्वरमर्चयेत् ॥२३४॥
समर्पयामि वाक्येन देयद्रव्यं समर्पयेत् ।
पादयोरर्पयेत् पाद्यं शिरस्यर्घ्यं निवेदयेत् ॥ २३५ ॥
आचम्यं वदने दद्यात् गन्धं माल्यं सुवाससी ।
दिव्याभरणरत्नानि यज्ञसूत्रं समर्पयेत् ॥ २३६ ॥
ततस्तु भाजने कांस्ये कृत्वा दधि घृतं मधु ।
समर्पयामि वाक्येन मधुपर्कं करेऽर्पयेत ॥ २३७ ॥
वरोऽपि पात्रमादाय वामे पाणौ निधाय च ।
दत्ताङ्गुष्ठानामिकाभ्यां प्राणाहुत्युक्तमन्त्रकैः ॥ २३८ ॥
पञ्चधाप्राय तत्पात्रमुदीच्यां दिशि धारयेत् ।

कर्त्तव्येऽस्मिन् शुभविवाहकर्म्मणि स्वस्ति भवन्तो ब्रुवन्त्वित्युक्त्वा ब्राह्मणैः सह स्वस्तिन इन्द्रो इत्यृचा इत्यादि स्वस्तिं कथयेत् ततः कर्त्तव्येऽस्मिन् शुभविवाहकर्म्मणि ऋद्धिं भवन्तोऽभिब्रुवन्त्वित्युक्त्वा तैरेव सह ऋध्यता३ इत्यृद्धिञ्च कथयेत् ॥ २३२ । २३३ ॥

साध्वित्यादि । ततो दाता साधु भवानास्तामिति साधुप्रश्नं भवन्तमर्चयिष्याम इत्यर्चनाप्रश्नञ्च वरं पृच्छेत् ततो वरात् साध्वहमासे इति ओमर्चयेति च प्रश्नोत्तरं नीत्वा समादाय पाद्याद्यैर्वरमर्चयेत् पूजयेत् पाद्यादीनि वराय समर्पयेदित्यर्थः ॥ २३४ ॥

ननु केन वाक्येन कुत्र कुत्र वा अङ्गे पाद्यादिकं समर्पयेदित्याकाङ्क्षायामाह समर्पयामीत्यादि । तुभ्यमिदं समर्पयामीति वाक्येन पाद्यादिदेयद्रव्यं वराय समर्पयेत् ॥ २३५ । २३६ ॥

ततस्त्वित्यादि । ततस्तु काम्ये भाजने दधि घृतं मधु च कृत्वा तुभ्यं समर्पयामीति वाक्येन मधुपर्कं वरस्य करे दक्षिणे हस्ते समर्पयेत् ॥ २३७ ॥

मधुपर्कं समर्प्यैव पुनराचामयेद्वरम् ॥ २३९ ॥
दूर्वाक्षताभ्यां जामातुर्विधृत्य जानु दक्षिणम् ।
स्मृत्वा विष्णुं तत्सदिति मासप्रभृतिथीस्ततः ॥ २४० ॥
समुल्लिख्य निमित्तानि ब्रूयाद्वरमुत्तमम् ।
गोत्रप्रवरनामानि प्रत्येकं प्रपितामहात् ॥ २४१ ॥
षष्ठ्यन्तानि समुच्चार्य्य वरस्य जनकावधि ।
द्वितीयान्तं वरं ब्रूयात् गोत्रप्रवरनामभिः ॥ २४२ ॥
तथैव कन्यामुल्लिख्य ब्राह्मोद्वाहेन पण्डितः ।
दातुं भवन्तमित्युक्त्वा ब्रूयेऽहमिति कीर्त्तयेत् ॥ २४३ ॥

वरोऽपीत्यादि । वरोऽपि मधुपर्कपात्रमादाय गृहीत्वा वामे पाणौ निधाय संस्थाप्य च दक्षाङ्गुष्ठानामिकाभ्यामङ्गुलिभ्यां प्राणाय स्वाहेत्यादिकैः प्राणाद्युक्तमन्त्रकैः पञ्चधा पञ्चवारं मधुपर्कमाघ्राय तत्पात्रं मधुपर्कपात्रमुदीच्यामुत्तरस्यां दिशि धारयेत् एवं वराय मधुपर्कं समर्प्य पुनर्वरमाचामयेत् ॥ २३८ । २३९ ॥

दूर्वेत्यादि । ततो जामातुर्वरस्य दक्षिणं जानु विधृत्य प्रथमतो विष्णुं स्मृत्वा ततस्तत्सदिति समुल्लिख्योच्चार्य्य ततो मासप्रभृतीनि निमित्तानि समुल्लिख्य ततो वरस्य प्रपितामहात् प्रपितामहमारभ्य जनकावधेर्जनकपर्य्यन्तस्य त्रिपुरुषस्य प्रत्येकं षष्ठ्यन्तानि गोत्रप्रवरनामानि समुच्चार्य्य ततो गोत्रप्रवरनामभिर्विशिष्टं द्वितीयान्तं वरं ब्रूयात् ततस्तथैव कन्यायाः प्रपितामहाद्देर्जनकपर्य्यन्तस्य त्रिपुरुषस्य षष्ठ्यन्तानि गोत्रप्रवरनामान्युल्लिख्य ततो गोत्रप्रवरनामभिर्विशिष्टां द्वितीयान्तां कन्यामुल्लिख्य ततो ब्राह्मोद्वाहेन दातुं भवन्तमित्युक्त्वा पण्डितः समुदाता दृष्टेऽहमिति कीर्त्तयेत् योजनया विष्णुरों तत्सदद्य ओ अद्यामुकमासामुकपक्षेऽमुकतिथावमुकराशिस्थिते भास्करेऽमुकगोत्रः श्रीमदमुक देवशर्म्माऽमुकगोत्रस्यामुकप्रवरस्य श्रीमतो अमुकदेवशर्मणः प्रपौत्रममुकगोत्रस्यामुकप्रवरस्य श्रीमदमुकदेवशर्मणः पौत्रममु-

वृतोऽस्मीति वरो ब्रूयात् ततो दाता वदेद्वरम्।
यथाविहितमित्युक्ता विवाहकर्म्म कुर्व्विति।
वरो ब्रूयात् यथाज्ञानं करवाणि तदुत्तरम् ॥ २४४ ॥
ततः कन्यां समानीय वस्त्रालङ्कारभूषिताम्।
वस्त्रान्तरेण संच्छाद्य स्थापयेद्वरसम्मुखम् ॥ २४५ ॥
पुनर्व्वरं समभ्यर्च्च्य वासोऽलङ्करणादिभिः।
वरस्य दक्षिणे पाणौ कन्यापाणिं नियोजयेत् ॥२४६॥
तन्मध्ये पञ्चरत्नानि फलताम्बूलमेव वा।
दत्वार्च्चयित्वा तनयां वराय विदुषेऽर्पयेत् ॥ २४७ ॥

अगोत्रस्यासुकप्रवरस्य श्रीमदसुकदेवशर्म्मणः पुत्रमसुकगोत्रमसुकप्रवरं श्रीमन्नामसुकदेवशर्म्माणं वरमसुकगोत्रस्यासुकप्रवरस्य श्रीमदसुकदेवशर्म्मणः प्रपौत्रीमसुकगोत्रस्यासुकप्रवरस्य श्रीमदसुकदेवशर्म्मणः पौत्रीमसुकगोत्रस्यासुकप्रवरस्य श्रीमदसुकदेवशर्म्मणः पुत्रीमसुकगोत्रामसुकप्रवरामसुकीं देवीं कन्यां ब्राह्मोद्वाहेन दातुं भवन्तमहं वृणे इति वाक्यं जातं अनेन वाक्येन दूर्व्वाक्षताभ्यामुत्तमं वरं वृणुयात् ॥ २४०—२४३ ॥

वृत इत्यादि। ततो वृतोऽस्मीति वरो ब्रूयात् ततो दाता यथाविहितमित्युक्ता विवाहकर्म्म कुरु इति वरं वदेत् यथाविहितं विवाहकर्म्म कर्व्विति जामातरं ब्रूयादित्यर्थः ततो यथाज्ञानं विवाहकर्म्म करवाणीति तदुत्तरं वरो ब्रूयात् ॥ २४४ ॥

तत इत्यादि। ततः परं वस्त्रालङ्कारभूषितां कन्यां वस्त्रान्तरेण संच्छाद्य गृहात् समानीय वरसम्मुखं स्थापयेत् ॥ २४५ ॥

पुनरित्यादि। ततो दाता वासोऽलङ्करणादिभिर्व्वरं पुनः समभ्यर्च्च्य वरस्य दक्षिणे पाणौ कन्यापाणिं कन्याया दक्षिणं हस्तं नियोजयेत् स्थापयेत् ॥ २४६ ॥

तन्मध्ये इत्यादि। ततस्तन्मध्ये पाणिमध्ये पञ्चरत्नानि फल-

प्राग्वत्त्रिपुरुषाख्यानं निमित्ताख्यानमेव च ।
आत्मनः काममुद्दिश्य चतुर्थ्यन्तं वरं वदेत् ॥ २४८ ॥
कन्याभिधां द्वितीयान्तामर्च्चितां समलङ्कृताम् ।
साच्छादनां प्रजापतिदेवताकामुदीरयन् ॥ २४९ ॥
तुभ्यमहमिति प्रोच्य दद्यात् सम्प्रदद्दे वदन् ।
वरः स्वस्तीति स्वीकुर्य्यात् सम्प्रदाता वरं वदेत् ॥२५०॥
धर्म्मे चार्थे च कामे च भवता भार्य्यया सह ।
वर्त्तितव्यं वरो वाढमुक्त्वा कामसुतिं पठेत् ॥ २५१ ॥

ताम्बूलमेव वा दत्वा तनयां पुत्रीमर्च्चयित्वा विदुषे धीमते वरायार्पयेत् दद्यात् ॥ २४७ ॥

ननु केन वाक्येन वराय कन्या समर्पयितव्येत्याकाङ्क्षायामाह प्राग्वदित्यादि । प्राग्वत् पूर्ववत् त्रिपुरुषाख्यानं निमित्ताख्यानञ्च कृत्वात्मनः काममभ्युद्दिश्य ततश्चतुर्थ्यन्तं वरं वदेत् ततो द्वितीयान्तामर्च्चितां समलङ्कृतां साच्छादनां प्रजापतिदेवताकां कन्याभिधामुदीरयंस्तुभ्यमहमिति प्रोच्य ततः सम्प्रदद्दे इति वदन्नेनया दद्यात् योजनया विष्णुरों तत्सत् ओं अद्यामुकमासामुकपक्षेऽमुकतिथावमुकराशिस्थिते भास्करेऽमुकाभीष्टार्थसिद्धिकामोऽमुकगोत्रः श्रीमदमुकशर्म्माऽमुकगोत्रस्यामुकप्रवरस्य श्रीमदमुकदेवशर्म्मणः प्रपौत्राय अमुकगोत्रस्यामुकप्रवरस्य श्रीमदमुकदेवशर्म्मणः पौत्रायामुकगोत्रायामुकप्रवराय श्रीमतेऽमुकदेवशर्म्मणे वरायामुकगोत्रस्यामुकप्रवरस्य श्रीमदमुकदेवशर्म्मणः प्रपौत्रीममुकगोत्रस्यामुकप्रवरस्य श्रीमदमुकदेवशर्म्मणः पौत्रीममुकगोत्रस्यामुकप्रवरस्य श्रीमदमुकदेवशर्म्मणः पुत्रीममुकगोत्रामसुकप्रवरामर्च्चितां समलङ्कृतां साच्छादनां प्रजापतिदेवताकामसुकीं देवीमेनां कन्यां तुभ्यमहं सम्प्रदद्दे इति वाक्येन विदुषे वराय तनया समर्पयेदित्यर्थः वरः स्वस्तीत्युक्त्वा भार्य्यां स्वीकुर्य्यात् ततः सम्प्रदाता वरं वदेत् ॥ २४८–२५० ॥

सम्प्रदाता वरं प्रति किं वदेदित्यपेक्षायामाह धर्म्मे चेत्यादि । हे

दाता कामो ग्रहीतापि कामायादाच्च कामिनीम् ।
कामेन त्वां प्रगृह्णामि कामः पूर्णोऽस्तु चावयोः ॥२५२॥
ततो वदेत् सम्प्रदाता कन्या जामातर प्रति ।
प्रजापतिप्रसादेन युवयोरभिवाञ्छितम् ।
पूर्णमस्तु शिवञ्चास्तु धर्म्मं पालयतं युवाम् ॥ २५३ ॥
तत आच्छाद्य वस्त्रेण सम्प्रदाता सुमङ्गलैः ।
परस्परशुभालोकं कारयेद्वरकन्ययो. ॥ २५४ ॥
ततो हिरण्यरत्नानि यथाशक्त्यनुसारतः ।
जामात्रे दक्षिणां दद्यादच्छिद्रमवधारयेत् ॥ २५५ ॥

जामातर्धर्मे चार्थे च कामे च भार्य्यया सह भवता वर्त्तितव्यं ततो वरो वाङ्मुखत्वा कामस्तुति पठेत् पादमङ्गीकरण इदमप्रतिग्रयोर्वाङ्मित्यमर· । ॥ २५२ ॥

कामस्तुतिमेवाह दाता काम इति । कामो दाता भवति काम एव गृहीता भवति काम· कामाय कामिनीमदात् हे भार्य्ये । कामेन त्वामह प्रतिगृह्णामि आवयो· काम· पूर्णोऽस्तु ॥ २५२ ॥

तत इत्यादि । तत. कामस्तुतिपाठादनन्तर सम्प्रदाता कन्यां जामातर वरञ्च प्रति वदेत् किं वदेदित्यपेक्षायामाह प्रजापतिप्रसादेनेत्यादि ॥ २५३ ॥

तत इत्यादि । तत सम्प्रदाता वस्त्रेण वरकन्ये आच्छाद्य सुमङ्गलैर्गीतवाद्यादिभिर्वरकन्ययो; परस्परशुभालोक कारयेत् ॥ २५४ ॥

तत इत्यादि । ओं अद्येत्यादि कृतस्यास्य शुभविवाहकर्म्मणः साङ्गतार्थं हिरण्यादिदक्षिणामसुकगोत्रायासुकदेवशर्म्मणे वराय तुभ्यमहं सम्प्रददे इति वाक्येन सम्प्रदाता जामात्रे यथाशक्त्यनुसारतो हिरण्यरत्नानि दक्षिणा दद्यात् तत कृतमिद शुभविवाहकर्म्माच्छिद्रमस्त्वित्यवधारयेत् ॥ २५५ ॥

वरस्तु भार्य्यया सार्द्धं तदात्वे दिवसेऽपि वा ।
कृशण्डिकोक्तविधिना वह्निस्थापनमाचरेत् ॥ २५६ ॥
योजकाख्यः पावकोऽत्र प्राजापत्यश्चरुः स्मृतः ।
आरान्तं कर्म्म सम्पाद्य दद्यात् पञ्चाहुतीर्व्वरः ॥२५७॥
शिवं दुर्गां तथा विष्णुं ब्रह्माणं वज्रधारिणम् ।
ध्यात्वैकैकं समुद्दिश्य जुहुयात् सस्रुतेऽनले ॥ २५८ ॥
भार्य्यायाः पाणियुगलं गृह्णीयादित्युदीरयन् ।
पाणिं गृह्णामि सुभगे ! गुरुदेवरता भव ।
गार्हस्थ्यं कर्म्म धर्म्मेण यथावदनुशीलय ॥ २५९ ॥
हुतेन स्वामिदत्तेन लाजैर्भ्रात्राहृतैः शिवे ! ।
प्रजापतिं समुद्दिश्य दद्यात् वेदाहुतीर्व्वधूः ॥ २६० ॥
प्रदक्षिणीकृत्य वह्निमुत्थाय भार्य्यया सह ।
दुर्गां शिवं रमां विष्णुं ब्राह्मीं ब्रह्माणमेव च ।
युग्मं युग्मं समुद्दिश्य त्रिस्त्रिधा हवनं चरेत् ॥२६१॥

वरस्त्वित्यादि । तदनन्तरमिति शेषः दिवसेऽपि वा तस्या एव रात्रेः परस्मिन् दिने वा ॥ २५६ ॥

अत्र विवाहकर्मणि ॥ २५७ ॥

नन्वत्रैवानुद्दिश्य स्वभार्य्यां वरः पञ्चाहुतीर्दद्यादित्यपेक्षायात्र शिवमित्यादि ॥ २५८ ॥

भार्य्याया इति । ततो वर इति वक्ष्यमाणं मन्त्रमुदीरयन् कीर्त्तयन् भार्य्यायाः पाणियुगलं गृह्णीयात् तत्रैव मन्त्रतात्र पाणिं गृह्णामि सुभगे इति ॥ २५९ ॥

हुतेनेत्यादि । हे शिवे ! ततो वधूर्भ्रात्रास्वामिदत्तेन हुतेन भ्रात्रा-दत्तैर्लाजैश्च प्रजापतिं समुद्दिश्य वेदाहुतीश्चतस्र आहुतीर्दद्यात् ॥

अश्मारोहणिकाउत्तारोहौ कुर्यादमन्त्रकम् ।
निशायां चेत् तदा स्त्रीभि: पश्येद्ध्रुवमरुन्धतीम् ॥२६२
प्रत्याहुत्यासने सम्यगुपविश्य वरस्तदा ।
स्विष्टकृद्धोमत: पूर्णाहुत्यन्तेन समापयेत् ॥ २६३ ॥
ब्राह्मो विवाहो विहितो दोषहीन: सवर्णया ।
कुलधर्मानुसारेण गोत्रभिन्नासपिण्डया ॥ २६४ ॥
ब्रह्मोद्वाहेन या ग्राह्या सैव पत्नी गृहेश्वरी ।
तदनुज्ञां विना ब्राह्मविवाहं नाचरेत् पुन: ॥ २६५ ॥
तस्या अपत्ये तद्वंशे विद्यमाने कुलेश्वरि ! ।
शैवोद्वान्यपत्यानि दायार्हाणि भवन्ति न ॥ २६६ ॥
शैवा तदन्वयाश्चैव लभेरन् धनभाजिन: ।
यथाविभवमाच्छाद्य ग्रासञ्च परमेश्वरि ! ॥ ३६७ ॥
शैवो विवाहो द्विविध कुलचक्रे विधीयते ।
चक्रस्य नियमेनैको द्वितीयो जीवनावधि ॥ २६८ ॥

प्रदक्षिणीकृत्येत्यादि । ततो वरो भार्यया सङ्गोत्थाय वह्निं प्रदक्षिणीकृत्य दुर्गां शिवञ्च रमां विष्णुञ्च ब्राह्मीं ब्रह्माणमेव च युग्मं युग्मं समुद्दिश्य त्रिस्त्रिधा त्रिवारं त्रिवारं हवनं चरेत् कुर्यात् ॥२६१॥

अश्मारोहणिकेत्यादि । तत: समार्यो वरोऽमन्त्रकं सप्तपदार्जितमेवाश्मारोहणिकासम्भारोहौ पाषाणारोहणं सप्तमखण्डिकारोहणञ्च कुर्यात् चेत् यदि निशाया तदारोहौ कुर्यात्तदा स्त्रीभि: परिवृत: समार्यो वरो ध्रुवमरुन्धतीञ्च पश्येत् ॥ २६२ ॥

समापयेत् विवाहकर्मेति शेष: ॥ २६३—२६५ ॥

तस्या इत्यादि । तस्या ब्राह्मोद्वाहेन गृहीताया: पत्न्या: अपत्ये आत्मजे आत्मजाया वा ॥ २६६ ॥

धनभाजिनो जना: ॥ २६७ ॥ २६८ ॥

चक्रानुष्ठानसमये स्वगणै: शक्तिसाधकै ।
परस्परेच्छयोद्वाहं कुर्य्याद्वीर: समाहित: ॥ २६९ ॥
भैरवीवीरवृन्देषु स्वाभिप्रायं निवेदयेत् ।
आवयो: शाम्भवोद्वाहे भवद्भिरनुमन्यताम् ॥ २७० ॥
तेषामनुज्ञामादाय जप्त्वा सप्ताक्षरं मनुम् ।
अष्टोत्तरशताद्वृत्या प्रणमेत् कालिकां पराम् ॥ २७१ ॥
ततो वदेत् तां रमणीं कौलानां सन्निधौ शिवे ! ।
अकैतवेन चित्तेन पतिभावेन मां वृणु ॥ २७२ ॥
गन्धपुष्पाक्षतैर्वृत्वा सा कौलादपि तं तत: ।
सुश्रद्दधाना देवेशि ! करौ दद्यात् करोपरि ॥ २७३ ॥
ततोऽभिषिञ्चेत् चक्रेशो मन्त्रेणानेन दम्पती ।
तदा चक्रस्थिता: कौला ब्रूयु: स्वस्तीति सादरम् ॥२७४

अथ शाम्भवोद्वाहविधिमाह चक्रानुष्ठानेत्यादिभि: । स्वगणै शक्तिसाधकै सह चक्रानुष्ठानसमये परस्परेच्छया परस्परस्य भैरव्या वीरस्य चाकाङ्क्षया समाहित सावधान सन् वीर उद्वाहं कुर्य्यात् ॥ २६९ ॥ २७० ॥

तेषामित्यादि । तेषां भैरवीवीरवृन्दानामनुज्ञामनुमतिमादाय गृहीत्वा सप्ताक्षर परमेश्वरि स्वाहेति मनुमष्टोत्तरशताद्वृत्या जप्त्वा वीर: परमासुत्तमां कालिकां प्रणमेत् ॥ २७१ ॥

तत इत्यादि । हे शिवे ! पार्व्वति ! ततो वीर: कौलाना सन्निधौ समीपे हे रमणि ! त्वमकैतवेन व्याजशून्येन चित्तेन पतिभावेन मां वृणुहीति तां रमणीं वदेत् ॥ २७२ ॥

गन्धेत्यादि । हे देवेशि ! तत सा कौला सुश्रद्दधाना सती गन्धपुष्पाक्षतैर्वृणुहीति प्रिय वृत्वा तस्य करोपरि स्वकीयौ करौ दद्यात् ॥२७३॥

तत इत्यादि । तत:परं चक्रेशोऽनेन वक्ष्यमाणेन मन्त्रेण तौ

राजराजेश्वरी काली तारिणी भुवनेश्वरी ।
वगला कमला नित्या युवां रक्षन्तु भैरवी ॥ २७५ ॥
अभिषिञ्चेत् द्वादशधा मधुना वार्य्ययाथ सा ।
ततस्तौ प्रणतौ विद्वान् श्रावयेद्वाग्भव रमाम् ॥२७६ ॥
यद्यद्गृहीतं तत्र ताभ्यां पाल्यं प्रयत्नतः ।
शाम्भवोक्तविधानेन कुलीनाभ्यां कुलेश्वरि ! ॥२७७॥
वयोवर्णविचारोऽत्र शैवोद्वाहे न विद्यते ।
असपिण्डां भर्तृहीनामुद्वहेच्छम्भु शासनात् ॥ २७८ ॥
परिणीता शैवधर्मे चक्रनिर्धारणेन या ।
अपत्यार्थी ऋतुं दृष्ट्वा चक्रातीते तु तां त्यजेत् ॥२७९॥
शैवभार्य्योद्वहापत्यमनुलोमेन मातृवत् ।
सजाचरैर्विलोमेन तत्तु मातृन्यजातिवत् ॥ २८० ॥
एषां राङ्करजातीनां सर्वत्र पितृकर्मसु ।

दम्पती जायापती अभिषिञ्चेत् तदा अस्मिन् काले चक्रस्थिता· कौला· साधक यथा स्वात्तथा स्वस्तीति ब्रूयुर्वदेयु ॥ २७४ ॥

ननु केन मन्त्रेण चक्रेशो दम्पती अभिषिञ्चेदित्यपेक्षायामाह राजराजेश्वरीत्यादि ॥ २७५ ॥

अभिषिञ्चेदित्यादि । चक्रेशोऽनेनैव मन्त्रेण मधुना मद्येन वार्य्ययाथवार्घ्यजलेन वा द्वादशधा द्वादशवारं दम्पती अभिषिञ्चेत् ततः प्रणतौ दम्पती प्रति विद्वांश्चक्रेशो वाग्भव ऐमिति रमां श्रीमिति च बीजं श्रावयेत् ॥ २७६ ॥

तत्र शाम्भवोद्वाहकर्म्मणि ताभ्यां जायापतिभ्यां ॥ २७७।२७८ ॥

परिणीतेत्यादि । चक्रनिर्द्धारणेन चक्रनियमेन शैवधर्म्मे वा स्त्री परिणीता जाता आसीत्तां स्त्रियं चक्रातीते सत्यपत्यार्थी वीरः स्त्रियमृतं दृष्ट्वा त्यजेत् ॥ २७९ ॥

भोज्यप्रदान कौलानां भोजनं विहितं भवेत् ॥ २८१ ॥
नृणां स्वभावजं देवि । प्रिय भोजनमैथुनम् ।
सङ्क्षेपाय हिताथाय शैवधर्मे निरूपितम् ॥ २८२ ॥
अतएव महेशानि । शैवधर्म्मनिषेवणात् ।
धर्म्मार्थकाममोक्षाणां प्रभुर्भवति नान्यथा ॥ २८७ ॥

इति श्रीमहानिर्व्वाणतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे सर्व्व धर्म्म-
निर्णयसारे श्रीमदाद्यासदाशिवसंवादे
कुशण्डिकादशविधसंस्कारविधि
र्नाम नवमोल्लास ।

शैवभार्य्येत्यादि । अनुलोमेन वर्णेन शैवभार्य्योद्वाहपत्यं मातृवत् कर्म्म समाचरेत् कुर्य्यात् यथा ब्राह्मणात् क्षत्रियाया शैव्याभार्य्यायां जातमपत्यं क्षत्रियावत् कर्म्म समाचरेदित्येव विलोमेन वर्णेन यत् शैवभार्य्योद्वाहपत्य तत्तु सामान्यजातिवत् प्रभुवर्णवत् कर्म्म समाचरेत् ॥ २८०—२८२ ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां नवमोल्लासः ।

दशमोल्लासः ।

श्रीदेव्युवाच ।

कुशण्डिकाविधिर्नाथ । संस्काराश्च दश श्रुता ।
द्वैद्विजाद्यविधिं देव । कृपया मे प्रकाशय ॥ १ ॥

कुशण्डिकाया जीवसेकादिवियाहान्तानां दशविधसंस्काराणाञ्च विधि श्रुत्वेदानीं द्वैद्विजाद्यविधिं कुशण्डिकाया द्वैद्विजाद्यस्य च

कस्मिन् कस्मिंश्च संस्कारे प्रतिष्ठासु च कास्वपि ।
कुमारिकाविधानञ्च हविष्यान्नञ्च शङ्कर ! ॥ २ ॥
कर्त्तव्यं वा न कर्त्तव्यं तन्मे ब्रूहि यतः परम् ।
मत्प्रीतये महेशान ! जीवानां मङ्गलाय च ॥ ३ ॥

श्रीसदाशिव उवाच ।

जीवसेकादिवाहान्तदशसंस्कारकर्म्मसु ।
यत्र यद्धितं भद्रे ! सविशेषं प्रकीर्त्तितम् ॥ ४ ॥
तदेव कार्य्यं मनुजैस्तत्त्वज्ञैर्हितमिच्छुभिः ।
अन्यत्र यद्विधातव्यं तत् शृणुष्व वरानने ! ॥ ५ ॥
वापीकूपतडागानां देवप्रतिकृतेस्तथा ।
गृहारामव्रतादीनां प्रतिष्ठाकर्म्मसु प्रिये ! ॥ ६ ॥
सर्वत्र पञ्चदेवानां मातॄणामपि पूजनम् ।
वसोर्धारा च कर्त्तव्या हविष्यान्नकुमारिके ॥ ७ ॥
स्त्रीणां विधेयकृत्येषु हविष्यान्नं न विद्यते ।
देवतापितृतृप्त्यर्थं भोज्यमेकं समुत्सृजेत् ॥ ८ ॥

कस्मिन् कस्मिन् कर्म्मणि कार्य्यत्वमकार्य्यत्वं वा वर्त्तते तदपि श्रोतुमिच्छन्ती श्रीदेव्युवाच कुमारिकाविधिरित्यादि ॥ १ । २ ॥

आचक्ष्व ब्रूहि ॥ ३ ॥

श्रीदेव्यैवं प्रार्थितः सन् श्रीसदाशिव उवाच जीवसेकादित्यादि । जीवसेकाज्जीवसेकमारभ्य ॥ ४ । ५ ॥

वापीत्यादि । देवप्रतिकृतेः देवताप्रतिमायाः ॥ ६ ॥

पञ्चदेवानां ब्रह्मादीनां मातॄणां गौर्य्यादीनाम् ॥ ७ ॥

स्त्रीणामित्यादि । स्त्रीणामिति कृत्यानां कर्त्तरि षष्ठी समुत्सृजेत् स्त्रीति शेषः ॥ ८ ॥

देवमात्रार्चनं तत्र वसुधारा कुशखिडका ।
भक्त्या स्त्रिया विधातव्या ऋत्विजा कमलानने ! ॥ ९ ॥
पुत्रश्च पौत्रो दौहित्रो ज्ञातयो भगिनीसुतः ।
जामातर्त्विग्दैवपित्रे श्रस्ताः प्रतिनिधौ शिवे ! ॥ १० ॥
वृद्धिश्राद्धं प्रवक्ष्यामि तत्त्वतः शृणु कालिके ! ॥ ११ ॥
कृत्वा नित्योदितं कर्म्म मानवः सुसमाहितः ।
गङ्गां यज्ञेश्वरं विष्णुं वास्त्वीशं भूपतिं यजेत् ॥ १२ ॥
ततो दर्भमयान् विप्रान् कल्पयेत् प्रणवं स्मरन् ।
पञ्चभिर्नवभिर्वापि सप्तभिस्त्रिभिरेव वा ॥ १३ ॥
निर्गर्भैश्च कुशैः साग्रैर्दक्षिणावर्त्तयोगतः ।
सार्द्धद्वयावर्त्तनेन ऊर्द्ध्वाग्रैरचयेद्द्विजान् ॥ १४ ॥
वृद्धिश्राद्धे पार्वणादौ षड्विप्राः परिकीर्त्तिताः ।

तत्र स्त्रीभिर्विधेयेषु कर्मसु ऋत्विजा आत्मप्रतिनिधिना पुरोहितेन ॥ ९ ॥

ननु पुरोहित एव प्रतिनिधिः प्रशस्तो भवति तदन्योऽपि वा कश्चित् तत्राह पुत्र इत्यादि ॥ १० । ११ ॥

अथ वृद्धिश्राद्धविधिमाह कृत्वेत्यादिभिः । नित्योदितं कर्म कृत्वा पूर्वाभिमुखो मानवः सुसमाहितोऽतिसावधानः सन् प्रणवादिनमोऽन्तेन नामसन्त्रेण गन्धपुष्पादिभिर्गङ्गा यज्ञेश्वरं विष्णुं वास्त्वीशं भूपतिं भूमिस्वामिनं पुरुषञ्च क्रमतो यजेत् पूजयेत् ॥ १२ ॥

तत इत्यादि । तत परं प्रणवमोङ्कारं स्मरन् सन् मानवो दर्भमयान् विप्रान् कल्पयेत् रचयेत् । दर्भमयब्राह्मणनिर्वाहमाह पञ्चभिरित्यादिना सार्द्धेन । निर्गर्भैर्गर्भशून्यैः साग्रैरग्रभागसहितैरूर्द्ध्वाग्रैर्नवभिः सप्तभिः पञ्चभिस्त्रिभिरेव वा कुशैर्दक्षिणावर्त्तयोगतः सार्द्धद्वयावर्त्तनेन द्विजान् विप्रान् रचयेत् ॥ १३ । १४ ॥

एकोद्दिष्टे तु कथित एक एव द्विजः शिवे ! ॥ १५ ॥
ततो विप्रान् कुशमयानेकस्मिन्नेव भाजने ।
कौवेराभिमुखान् कृत्वा स्थापयेदमुना सुधीः ॥ १६ ॥
ॐ यन्नो देवीरभीष्टये यन्नो भवन्तु ।
पीतये शयो रभिस्रवन्तु नः ॥ १७ ॥
ततस्तु गन्धपुष्पाभ्यां पूजयेत् कुशभूसुरान् ॥ १८ ॥
पश्चिमे दक्षिणे चैव युग्मयुग्मक्रमात् सुधीः ।
षट्पात्राणि सदर्भाणि स्थापयेत्तुलसीतिलैः ॥ १९ ॥
पात्रद्वये पश्चिमायां याम्ये पात्रचतुष्टयम् ।
पूर्वास्यावुत्तरमुखान् षड् विप्रानुपवेशयेत् ॥ २० ॥
दैवपक्षं पश्चिमायां दक्षिणे वामयाम्ययोः ।

ननु कति दर्भमया ब्राह्मणा कल्पयितव्या इत्याकाङ्क्षायामाह द्विजिश्राद्धे इत्यादि ॥ १५ ॥

तत इत्यादि । ततः परं सुधीर्द्विजिश्राद्धकर्त्ता एकस्मिन्नेव भाजने कुशमयान् विप्रान् कौवेरमुखानुत्तरमुखान् कृत्वामुना वक्ष्यमाणेन मन्त्रेण स्थापयेत् ॥ १६ ॥

कुशमयब्राह्मणस्थापनार्थं मन्त्रमेवाह । ॐयन्न इत्यादयम् ॥१७॥

ततस्त्वित्यादि । ततस्तु प्रणवादिनमोऽन्तेन नाममन्त्रेण गन्धपुष्पाभ्यां कुशभूसुरान् कुशमयब्राह्मणान् पूजयेत् ॥ १८ ॥

पश्चिमे इत्यादि । ततः सुधीः कर्म्मसाधकः पश्चिमे दक्षिणे चैव युग्म युग्म क्रमात् सदर्भाणि कुशसहितानि तुलसीतिलैश्च युक्तानि षट्पात्राणि स्थापयेत् ॥ १९ ॥

पात्रद्वये इत्यादि । ततः पश्चिमाया दिशि स्थापिते पात्रद्वये याम्ये दक्षिणे स्थापिते पात्रचतुष्टये च क्रमतः पूर्व्वास्यौ पूर्व्वमुखौ उत्तरास्यौश्च कुशमयान् षड् विप्रानुपवेशयेत् ॥ २० ॥

पितुर्मातामहस्यापि पञ्चौ द्वौ विद्धि पार्वति । ॥ २१ ॥
नान्दीमुखाश्च पितरो नान्दीमुख्याश्च मातरः ।
मातामहादयोऽप्येवं मातामह्यादयोऽपि च ।
आद्ये नान्द्याभ्युदयिके समुल्लेख्या वरानने । ॥ २२ ॥
दक्षावर्त्तेनोत्तरास्यो दैवं कर्म्म समाचरेत् ।
वामावर्त्तेन दक्षास्यः पित्र्यकर्माणि साधयेत् ॥ २३ ॥
सर्व्वकर्म्म प्रकुर्वीत दैवादिक्रमतः शिवे ।।
लङ्घनान्मातृमातृणां श्राद्ध तद्विफलं भवेत् ॥ २४ ॥
कौवेराभिमुखोऽनुज्ञावाक्यं दैवे प्रकल्पयेत् ।
याम्यास्यः कल्पयेद्वाक्यं पित्रे मातामहेऽपि च ।

दैवपञ्चमित्यादि । हे पार्व्वति ! पश्चिमायां दिशि दैवं पञ्च त्वं विद्धि जानीहि । दक्षिणे तु वामयाम्ययोर्वामभागे दक्षिणभागे च क्रमत पितुर्मातामहस्यापि द्वौ पञ्चौ विद्धि ॥ २१ ॥

नान्दीमुखाश्चेत्यादि । हे वरानने ! देवि ! आभ्युदयिके नान्दीश्राद्धे पितर पित्रादयो नान्दीमुखा मातरो मात्रादयश्च नान्दीमुख्यसमुल्लेख्या. समुल्लेख्याः एव मातामहादयोऽपि नान्दीमुखा मातामह्यादयोऽपि नान्दीमुख्यः समुल्लेख्याः ॥ २२ ॥

दक्षावर्त्तेनेत्यादि । दक्षिणावर्त्तेनोत्तरास्य उत्तरमुख सन् दैवं कर्म्म समाचरेत् कुर्य्यात् । वामावर्त्तेन दक्षास्यो दक्षिणमुखः सन् पित्र्यकर्म्माणि साधयेत् ॥ २३ ॥

सर्व्वमित्यादि । हे शिवे ! दैवादिक्रमत एव सर्व्वं कर्म्म प्रकुर्व्वीत । ननु पित्र्यकर्मसाधनाय दक्षिणावर्त्तेनैव दक्षिणामुखभवने को दोषस्तत्राह लङ्घनादित्यादि । मातृमातृणां मातृभ्रात्रादीना लङ्घनात्तच्छ्राद्धं विफलं भवेत् । मातृमातृणामिति मातुः पित्रादीनामप्युपलक्षणम् ॥ २४ ॥

तत्रादौ दैवपक्षे तु वाक्यं शृणु शुचिस्मिते ! ॥ २५ ॥
कालादीनि निमित्तानि समुल्लिख्य ततः परम् ।
तत्तत् कर्म्माभ्युदयार्थमुक्त्वा साधकसत्तमः ॥ २६ ॥
पित्रादीनां त्रयाणां तु मात्रादीनां तथैव च ।
मातामहानां च मातामह्यादीनामपि प्रिये ! ॥ २७ ॥
षष्ठ्यन्तं कीर्त्तयेन्नाम गोत्रोच्चारणपूर्वकम् ।
विश्वेषाञ्चैव देवानां श्राद्ध पदमुदीरयेत् ॥ २८ ॥
कृशनिर्म्मितयोः पश्चात् विप्रयोरहमित्यपि ।
करिष्ये परमेशानोत्यनुज्ञावाक्यमीरितम् ॥ २९ ॥

कौवेरेत्यादि । कौवेराभिमुखो उत्तराभिमुखो भूत्वा दैवे पक्षे-नुज्ञावाक्यं कल्पयेत् ॥ २५ ॥

दैवपक्षे प्रकल्पनीयं यदनुज्ञावाक्य तदेवाह कालादीनीत्यादिभिः । प्रथमत कालादीनि निमित्तानि समुल्लिख्य ततः परं तत्तत्कर्म्माभ्युदयार्थमुक्त्वा साधकसत्तमो गोत्रोच्चारणपूर्व्वक पित्रादीनां त्रयाणां मात्रादीनामपि तिसृणा तथैव मातामहादीना त्रयाणां मातामह्यादीनामपि तिसृणा षष्ठ्यन्तं नाम कीर्त्तयेत् । ततो विश्वेषा देवाना चेति पदमुदीरयेदुच्चारयेत् । तत श्राद्धपदमुदीरयेत् । पश्चात् कृशनिर्म्मितयोर्व्विप्रयोरहमित्यप्युदीरयेत् । तत करिष्ये इत्युदीरयेत् । सकलपदयोजनया विष्णुरोमत्सत् अद्यामुकमास्यमुकपक्षेऽमुकतिथावमुककर्म्माभ्युदयार्थममुकगोत्राणा नान्दीमुखाना पित्रपितामहप्रपितामहानामसुकामुकामुकदेवशर्म्मणामसुकगोत्राणा नान्दीमुखीनां मात्रपितामहीप्रपितामहीनाममुक्यमुक्यमुकीनां देवीना चासुकगोत्राणा नान्दीमुखाना मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकदेवशर्म्मणा चामुकगोत्राणां नान्दीमुखीनां मातामहीप्रमातामहीवृद्धप्रमातामहीनामसुक्यमुक्यमुकीनां देवीनां च विश्वेषां देवानामाभ्युदयिक श्राद्ध कृशनिर्म्मितयो-

विश्वान् देवान् परित्यज्य पित्रपक्षे तु पार्वति ! ।
तथा मातामहस्यापि पक्षेऽनुज्ञा प्रकीर्त्तिता ॥ ३० ॥
ततो जपेद्ब्रह्मविद्यां गायत्रीं दशधा शिवे ! ॥ ३१ ॥
देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमोऽस्तु पुष्ट्यै स्वाहायै नित्यमेव भवन्त्विति ॥ ३२ ॥
पठित्वैनं त्रिधा हस्ते जलमादाय सत्तमः ।
वं ह्रूम्फड्रिति मन्त्रेण श्राद्धद्रव्याणि शोधयेत् ॥३३ ॥
आग्नेय्यां पात्रमेकन्तु संस्थाप्य कुलनायिके ! ।
रक्षोघ्नमसृतं प्रोच्य यन्नरक्षां कुरुष्व मे
इत्युक्त्वा भाजने तस्मिंस्तुलसीदलसंयुतम् ॥ ३४ ॥

र्विप्रयोरहं करिष्ये इति वाक्यं जातम् । हे परमेशानि ! दैवपक्षे इत्येतदेवानुज्ञावाक्यमीरितं कथितम् ॥ २६—२९ ॥

पित्रपक्षे मातामहपक्षे च यदनुज्ञावाक्यं प्रकल्पनीयं तदाह विश्वानित्यादिना । हे पार्वति ! पित्रपक्षे तथा मातामहस्यापि पक्षे विश्वान् देवान् परित्यज्यानुज्ञा प्रकीर्त्तिताऽनुज्ञावाक्यं कथितम् । पित्रपक्षेऽनुज्ञावाक्यं यथा ओम् अद्यामुकमास्यमुकपक्षेऽमुकतिथावमुकतिथावमुककर्म्माभ्युदयार्थममुकगोत्राणां नान्दीमुखानां पितृपितामहप्रपितामहानामममुकाममुकदेवशर्म्मणां अमुकगोत्राणां नान्दीमुखीनां मातृपितामहीप्रपितामहीनामममुक्यमुक्यमुकीनां देवीनां चायाभ्युदयिकं श्राद्धं कुशनिर्मितयोर्विप्रयोरहं करिष्ये इति । मातामहपक्षेऽप्येवमेवानुज्ञावाक्यं प्रकल्पनीयम् ॥ ३० ॥

ततः अनुज्ञावाक्यकल्पनादनन्तरम् ॥ ३१ ॥ ३२ ॥

पठित्वैनमित्यादि । एनं देवताभ्य इत्याद्यं भवन्त्वितीत्यन्तं मन्त्रं त्रिधा त्रिवारं पठित्वा ततः सत्तम श्राद्धकर्त्ता हस्ते जलमादाय वं-ह्रूम्फडिति मन्त्रेण श्राद्धद्रव्याणि शोधयेत् ॥ ३३ ॥

आग्नेय्यामित्यादि । तत आग्नेय्यां दिश्येकं पात्रं संस्थाप्य प्रथ-

निधाय सलिलं देवि ! देवादिक्रमतः सुधीः
विप्रेभ्यो जलगण्डूषं दत्वा दद्यात् कुशासनम् ॥ ३५ ॥
तत आवाहयेद्विद्वान् विश्वान् देवान् पितॄंस्तथा ।
मातृर्मातामहांश्चापि तथा मातामहीं शिवे ! ॥३६॥

ततो रक्षोघ्नमन्त्रं प्रोच्य ततो मे यज्ञरक्षां कुरुष्वेति वदेत् योजनया रक्षोघ्नमन्त्रमसि मम यज्ञरक्षां कुरुष्वेति मन्त्रो जातः इतीमं मन्त्रमुक्त्वा तच्चिह्नाग्नेय्या दिशि संस्थापिते भाजने तुलसीयवसंयुतं सलिलं जल निधाय संस्थाप्य तत सुधी श्राद्धकर्त्ता देवादिक्रमतः क्रमवेद्यो विप्रेभ्यो जलगण्डूषं दत्वा विश्वे देवा । इदमासनं वो नम इति वाक्येन विश्वेभ्यो देवेभ्योऽमुकगोत्र नान्दीमुख पितरमुकदेवशर्मन् अमुकगोत्र नान्दीमुख पितामहामुकदेवशर्मञ्चमुकगोत्र नान्दीमुख प्रपितामहामुकदेवशर्मंश्चिदमासन्न वः स्वधेति वाक्येन पित्रादिभ्योऽमुकगोत्रे नान्दीमुखि मातरमुकि देवि । अमुकगोत्रे नान्दीमुखि पितामहि अमुकि देवि । अमुकगोत्रे नान्दीमुखि प्रपितामहि अमुकि देवि ! इदमासनं वः स्वधेति वाक्येन मात्रादिभ्योऽमुकगोत्र नान्दीमुख मातामहामुकदेवशर्मञ्चमुकगोत्र नान्दीमुख प्रमातामहामुकदेवशर्मंश्चमुकगोत्र नान्दीमुख वृद्धप्रमातामहामुकदेवशर्मंश्चिदमासन वः स्वधेति वाक्येन मातामहादिभ्योऽमुकगोत्रे नान्दीमुखि मातामह्यमुकि देवि । अमुकगोत्रे नान्दीमुखि प्रमातामह्यमुकि देवि ! अमुकगोत्रे नान्दीमुखि वृद्धप्रमातामह्यमुकि देवि इदमासन वः स्वधेति वाक्येन मातामह्यादिभ्योऽपि कुशासनं दद्यात् ॥ ३४ । ३५ ॥

तत इत्यादि । ततो विद्वान् श्राद्धकर्त्ता विश्वे देवा इहागच्छतेह तिष्ठतेह सन्निधत्त मम पूजां गृह्णीतेति वाक्येन विश्वान् देवान् अमुकगोत्रा नान्दीमुखाः पितृपितामहप्रपितामहा अमुकामुकामुकदेवशर्माणः इहागच्छतेह तिष्ठतेह सन्निधत्त मम पूजां गृह्णीते ते वाक्येन पितॄन् पित्रादीन् तथा अमुकगोत्रा नान्दीमुख्यो मातृपितामहीप्रपि-

आवाह्य पूजयेदादौ विश्वान् देवांस्ततो यजेत् ।
पितृत्रयं तथा मातृत्रयं मातामहत्रयम् ॥३७॥
मातामहीत्रयं चापि पाद्यार्घ्याचमनादिभिः ।
धूपैर्दीपैश्च वासोभिः पूजयित्वा वरानने ! ।
पात्राणां पातनप्रश्नं कुर्य्याद्दैवक्रमात् शिवे ! ॥३८॥
मण्डलं रचयेदेकं मायया चतुरस्रकम् ।
द्वे द्वे च मण्डले कुर्य्यात् तदूर्द्ध्वपक्षद्वयोरपि ॥ ३९ ॥

ामह्योऽमुक्यमुक्यमुक्यो देव्य इहागच्छतेह तिष्ठतेह सन्निधत्त मम पूजां गृह्णीतेति वाक्येन मातृर्मातृादीरपि अमुकगोत्रा नान्दीमुखा मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकदेवशर्म्माण इहागच्छतेह तिष्ठतेह सन्निधत्त मम पूजां गृह्णीतेति वाक्येन मातामहान् मातामहादीनपि अमुकगोत्रा नान्दीमुखो मातामहीप्रमातामहीवृद्धप्रमातामह्योऽमुक्यमुक्यमुक्यो देव्य इहागच्छतेह तिष्ठतेह सन्निधत्त मम पूजां गृह्णीतेति वाक्येन मातामहीर्मातामह्यादीरपि कुशासने आवाहयेत् ॥ ३६ ॥

आवाहेत्यादि । एवं विश्वदेवादीनावाह्य विश्वेदेवा एतानि पाद्यार्घ्याचमनादीनि वो नम इति वाक्येन पाद्यार्घ्याचमनादिभिर्धूपैर्दीपैर्वस्त्रैर्वासोभिश्चाद्यादौ विश्वान् देवान् पूजयेत् । तत ओं अद्यामुकगोत्रा नान्दीमुखाः पितृपितामहप्रपितामहा अमुकामुकामुकदेवशर्म्माण एतानि गन्धपुष्पधूपदीपादीनि वः स्वधेति वाक्येन पितृत्रयं तथैवामुकगोत्रा नान्दीमुख्यो मातृपितामहीप्रपितामह्योऽमुक्यमुक्यमुक्यो देव्य एतानि पाद्यादीनि व स्वधेति वाक्येन मातृत्रयं तथैव प्रकल्पितेन वाक्येन मातामहत्रयं तथैव कल्पितवाक्येन मातामहीत्रयं चापि क्रमतः पाद्यादिभिर्यजेत् पूजयेत् । हे वरानने ! शिवे ! एवं विश्वदेवादीन् पूजयित्वा ततो दैवक्रमात् देवपक्षादिक्रमतः पात्राणि पातयिष्ये इति पात्राणां पातनप्रश्नं ब्राह्मणं प्रति कुर्य्यात् ॥ ३७ । ३८ ॥

वारुणप्रोक्षितेष्वेषु पात्राण्यासाद्य साधकः ।
तेन चालितपात्रेषु सर्वोपकरणैः सह ।
पानार्थपायसान्नानि क्रमेण परिवेशयेत् ॥ ४० ॥
ततो मधुयवान् दत्वा क्रां क्रूं फडिति मन्त्रकैः ।
सप्रोक्ष्यान्नानि सर्वाणि विश्वान् देवांस्तथा पितॄन् ॥४१॥
मातॄर्मातामहान् मातामहीरुल्लिख्य तत्त्ववित् ।
निवेद्य देवीं गायत्रीं देवताभ्यस्विधा पठेत् ॥ ४२ ॥

मण्डलमित्यादि । तत ओं पातयेति ब्राह्मणान्तदुत्तर प्राच्यं दैवपक्षे मायया ह्रींबीजेन चतुरस्रकं चतुष्कोणमेकं मण्डलं रचयेत् । पञ्चहयोरपि तद्वत् ह्रींबीजेन चतुष्कोणे द्वे द्वे मण्डले कुर्यात् ॥३९॥

वारुणेत्यादि । तत साधको जनो वारुणप्रोक्षितेषु वमिति बीजेनाभिषिक्तेषु मण्डलेषु क्रमत पात्राण्यासाद्य संस्थाप्य तेन वमिति बीजेन क्षालितेषु पात्रेषु सर्व्वैरुपकरणैः पानार्थपायसा पानार्थेन जलेन च सहान्नानि क्रमेण दैवादिक्रमत परिवेशयेत् ॥४०॥

तत इत्यादि । तत परमन्त्रेषु मधुयवान् दत्वा क्रां क्रूं फडिति मन्त्रकै सर्व्वाण्यन्नानि सप्रोक्ष्याभिषिच्य तत्त्ववित् जनो विश्वान् देवान् तथा पितॄन् पित्रादीन् तथा मातॄर्मात्रादींस्तथा मातामहान्मातामहादीन् तथा मातामहीर्मातामह्यादीरप्युल्लिख्योद्धार्य्य विश्वदेवादिभ्य सर्व्वाण्यन्नानि निवेद्य विश्वेदेवा पानार्थौदकमधुयवसर्व्वोपकरणसहितमेतदन्नं वो नम इति वाक्येन विश्वेभ्यो देवेभ्योऽक्षुक्षगोत्रा नान्दीमुखा पितृपितामहप्रपितामहा अमुकाऽमुकाऽमुकदेवशर्माण. पानार्थौदकमधुयवसर्व्वोपकरणान्वितमेतदन्नं व स्वधेति वाक्येन पित्रादिभ्योऽमुकगोत्रा नान्दीमुखेभ्यो । मातृपितामहीप्रपितामह्योऽमुक्यऽमुक्यऽमुक्यो देव्य पानार्थौदकमधुयवसर्व्वोपकरणान्वितमेतदन्नं व स्वधेति वाक्येन मात्रादिभ्योऽमुकगोत्रा नान्दीमुखा मातामहप्रमातामहवृद्धप्रमातामहा अमुकाऽमुकाऽमुकदेवशर्माण एतत् पानार्थौदकमधुयवसर्व्वोपकरणान्वित-

शेषान्नपिण्डयोः प्रश्नौ कुर्य्यादाद्ये ततः परम् ॥ ४३ ॥
दत्तशेषैरक्षताद्यैर्मालूरफलसन्निभान् ।
द्विजात् प्राप्तोत्तरः पिण्डान् रचयेद्द्वादश प्रिये । ॥४४॥
अन्यं तु कल्पयेदेकं पिण्ड तत्सममम्बिके ! ।
आस्तरेन्नैर्ऋते दर्भान् मण्डले यवसंयुतान् ॥ ४५ ॥
ये मे कुले लुप्तपिण्डाः पुरदारविवर्जिताः ।
अग्निदग्धाश्च ये केऽपि व्यालव्याघ्रहताश्च ये ॥ ४६ ॥
ये बान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ।
मदत्तपिण्डतोयाभ्यां ते यान्तु तृप्तिमक्षयाम् ॥ ४७ ॥
दत्वा पिण्डमपिण्डेभ्यो मन्त्राभ्यां सुरवन्दिते ! ।
प्रक्षाल्य हस्तावाचान्तः सावित्रीं प्रजपंस्ततः ।
देवताभ्यस्त्रिधा जप्त्वा मण्डलानि प्रकल्पयेत् ॥ ४८ ॥

अत्र वः स्वधेति वाक्येन मात्रादिभ्योऽक्षयोक्त्वा नान्दीमुखेभ्यो मातामह्यादिप्रमातामह्यादिवृद्धप्रमातामह्योऽक्षय्यसुक्षय्यसुक्ष्यो देव्यः. पानार्घोदकमधुयवसर्व्वोपकरणान्वितमेतदन्न व स्वधेति वाक्येन मातामह्यादिभ्योऽपि सोपकरणान्यन्नानि क्रमेण दत्वा गायत्री देवीं दशधा पठेत् ततो देवताभ्य इत्याद्यं भवन्तीत्यन्त मन्त्रं त्रिधा पठेत् हे आद्ये ! ततः परं शेषान्नमस्ति का देयमिति पिण्डदानं करिष्ये इति च शेषान्नपिण्डयोः प्रश्नौ विप्र प्रति कुर्य्यात् ॥ ४१—४३ ॥

दत्तशेषैरित्यादि । ततः परं द्विजान् दृष्टेभ्यो दीयतामिति ओं कुरुष्वेति प्राप्तोत्तरः सन् दत्तशेषैर्दृष्टेभ्योऽवशिष्टैरक्षताद्यैर्मालूरफलसन्निभान् बिल्वफलतुल्यान् द्वादश पिण्डान् रचयेत् ॥ ४४ ॥

अन्यन्त्वित्यादि । ततस्तेभ्योऽन्यमपि तत्समं बिल्वफलतुल्यमेकं पिण्डं कल्पयेत् । ततो नैर्ऋते कोणे कल्पिते चतुष्कोणमण्डले यवसंयुतान् दर्भान् कुशानास्तरेदाच्छादयेत् ॥ ४५—४७ ॥

उच्छिष्टपात्रपुरतः पूर्वोक्तविधिना बुधः।
द्वे द्वे च मण्डले देवि! रचयेत् पितृतः क्रमात् ॥ ४९ ॥
पूर्वमन्त्रेण संप्रोक्ष्य कुशांस्तेष्वास्तरेत् कृती।
अभ्युक्ष्य वायुना दर्भान् पित्रादिभ्यः क्रमात् शिवे!।
ऊर्द्धं मूले च मध्ये च त्रींस्त्रीन् पिण्डान्निवेदयेत् ॥५०॥
आमन्त्रणेन प्रत्येकं नामोच्चार्य्य महेश्वरि!।
स्वधया वितरेत् पिण्डं यवमाध्योकसयुतम् ॥ ५१ ॥

दत्तेत्यादि। हे सुरवन्दिते! ये मे कुले इत्यादिभ्यां ते यान्तु तस्मिन्मत्रयाभित्यन्ताभ्यां द्वाभ्यां मन्त्राभ्यामपिण्डेभ्यः पिण्डविहीनेभ्यो नैर्ऋतकोणे कल्पिते चतुष्कोणे मण्डले आच्छादितेषु दर्भेषु पूर्वं रचित-द्वादशपिण्डातिरिक्तं पश्चाद्रचितं त्रयोदशं पिण्डं दत्त्वा हस्तौ प्रक्षाल्य ततः आचान्तः कृताचमनः सन् सावित्रीं गायत्रीं दशधा प्रजपन् देवताभ्य इति मन्त्रं त्रिधा जप्त्वा मण्डलानि प्रकल्पयेत् ॥ ४८ ॥

ननु केन विधिना कुत्र स्थाने कियन्ति वा मण्डलानि प्रकल्पयितव्यानीत्याकाङ्क्षायामाह उच्छिष्टेत्यादि। हे देवि! बुधः प्राज्ञः श्राद्धकर्त्ता पूर्वोक्तेन विधिना पितृतः क्रमादुच्छिष्टपात्राणां पुरतो द्वे द्वे चतुष्कोणे मण्डले रचयेत् ॥ ४९ ॥

पूर्वमन्त्रेणेत्यादि। हे शिवे! ततो वमिति बीजरूपेण पूर्वमन्त्रेण च मण्डलानि सम्प्रोक्ष्याभिषिच्य कृती विचक्षणः श्राद्धकर्त्ता तेषु मण्डलेषु कुशानास्तरेत्। ततो वायुना यमिति बीजेन दर्भानभ्युक्ष्याभिषिच्य पित्रादिभ्यः क्रमात् दर्भाणां मूले मध्ये चोर्द्धे च पित्रादिभ्यो मातादिभ्यो मातामहादिभ्यो मातामह्यादिभ्यश्च क्रमेणैव त्रींस्त्रीन् पिण्डान्निवेदयेत् दद्यात् ॥ ५० ॥

ननु केन केन वाक्येन पित्रादिभ्यः पिण्डा निवेदयितव्या इत्यपेक्षायामाह आमन्त्रणेनेत्यादि। हे महेश्वरि! आमन्त्रणेन सम्बोधनविभक्त्या विशिष्टं पित्रादीनां प्रत्येकं नामोच्चार्य्य स्वधया यव-

पिण्डान्ते पिण्डशेषञ्च विकीर्य्य लेपभाजिनः ।
प्रीणयेत् करलेपेण नैकोद्दिष्टेष्वयं विधि ॥ ५२ ॥

माध्वीकसयुतं मधुयवाभ्यां संयुक्तं पिण्डं वितरेत् । अमुकगोत्र नान्दीमुख पितरमुकदेवशर्मन्नेष मधुयवयुतः पिण्डस्ते स्वधेति वाक्येन दर्भमूले पित्रेऽमुकगोत्र नान्दीमुख पितामहामुकदेवशर्मन्नेष मधुयवयुतः पिण्डस्ते स्वधेति वाक्येन दर्भमध्ये पितामहायामुकगोत्र नान्दीमुख प्रपितामहामुकदेवशर्मन्नेष मधुयवयुतः पिण्डस्ते स्वधेति वाक्येन दर्भाग्रे प्रपितामहायाऽमुकगोत्रे नान्दीमुखि मातरमुकि देवि मधुयवयुत एष पिण्डस्ते स्वधेति दर्भमूले मात्रे अमुकगोत्रे नान्दीमुखि पितामह्यमुकि देवि मधुयवयुत एष पिण्डस्ते स्वधेति दर्भमध्ये पितामह्यै अमुकगोत्रे नान्दीमुखि प्रपितामह्यमुकि देवि मधुयवयुत एष पिण्डस्ते स्वधेत्यनेन दर्भाग्ये प्रपितामह्यै अमुकगोत्र नान्दीमुख मातामहामुकदेवशर्मन्नेष मधुयवयुत पिण्डस्ते स्वधेत्यनेन दर्भमूले मातामहायामुकगोत्र नान्दीमुख प्रमातामहामुकदेवशर्मन्नेष मधुयवयुत पिण्डस्ते स्वधेत्यनेन दर्भमध्ये प्रमातामहायामुकगोत्र नान्दीमुख वृद्धप्रमातामहामुकदेवशर्मन्नेष मधुयवयुत पिण्डस्ते स्वधेत्यनेन दर्भाग्ये वृद्धप्रमातामहायामुकगोत्रे नान्दीमुखि मातामह्यमुकि देवि मधुयवयुत एष पिण्डस्ते स्वधेत्यनेन दर्भमूले मातामह्यै अमुकगोत्रे नान्दीमुखि प्रमातामह्यमुकि देवि मधुयवयुत एष पिण्डस्ते स्वधेत्यनेन दर्भमध्ये प्रमातामह्यै अमुकगोत्रे नान्दीमुखि वृद्धप्रमातामह्यमुकि देवि मधुयवयुत एष पिण्डस्ते स्वधेति वाक्येन दर्भाग्ये वृद्धप्रमातामह्यै च पिण्डं दद्यादित्यर्थः ॥ ५१ ॥

पिण्डान्ते इत्यादि । पिण्डान्ते पिण्डप्रदानान्ते पिण्डानभित पिण्डशेषं विकीर्य्य ओ लेपभुज पितर प्रीयन्तामिति वाक्येन करलेपेन हस्तलग्नेनान्नेन लेपभाजिनश्चतुर्थाद्यान् पितॄन् प्रीणयेत् । एकोद्दिष्टेष्वयं विधिर्लेपभाजिपितृप्रीणनविधिर्नास्ति ॥ ५२ ॥

देवतापितृतृप्त्यर्थं सावित्रीं दशधा जपेत् ।
देवताभ्यस्त्रिधा जप्त्वा पिण्डान् सम्यूजयेत्ततः ॥ ५३ ॥
प्रज्वाल्य धूपं दीपं च निमील्य नयनद्वयम् ।
दिव्यदेहधरान् पितॄनभ्रतः कव्यमध्वरे ।
विभाव्य प्रणमेद्धीमानिमं मन्त्रमुदीरयेत् ॥ ५४ ॥
पिता मे परमो धर्मः पिता मे परमं तपः ।
स्वर्गः पिता मे तत्तृप्तौ तृप्तमस्त्यखिलं जगत् ॥ ५५ ॥
ततो निर्माल्यमादाय प्रार्थयेदाशिषः पितॄन् ॥ ५६ ॥
आशिषो मे प्रदीयन्तां पितरः करुणामयाः ।
वेदाः सन्ततयो नित्यं वर्धन्तां बान्धवा मम ॥ ५७ ॥
यातारो मे विवर्धन्तां बहून्यन्नानि सन्तु मे ।
याचितारः सदा सन्तु मा च याचामि कञ्चन ॥ ५८ ॥
दैवादितो द्विजान् पिण्डान् विसृजेत्तदनन्तरम् ।

देवतेत्यादि । ततो देवतापितृतृप्त्यर्थं सावित्रीं सावित्रीं दशधा जपेत् ततो देवताभ्य इति मन्त्रं त्रिधा जप्त्वा ततो गन्धपुष्पाभ्यां पिण्डान् सम्यूजयेत् ॥ ५३ ॥

प्रज्वाल्येत्यादि । ततो धूपं दीपं च प्रज्वाल्य नयनद्वयं निमील्य दिव्यदेहधरानध्वरे यज्ञे कव्यं पित्र्यमन्नं अश्नतः खादतः पितॄन् विभाव्य विचिन्त्येमं वक्ष्यमाणं मन्त्रमुदीरयन् कीर्त्तयन् धीमान् जनस्तान् प्रणमेत् ॥ ५४ ॥

तमेव मन्त्रमाह पिता मे इत्याद्यम् ॥ ५५ ॥

तत इत्यादि । ततः परं निर्माल्यं पुष्पाद्यादाय गृहीत्वा आशिषो मे प्रदीयन्तामित्याद्यं मा च याचामि कञ्चनेत्यन्तं मन्त्रद्वयमुदीरयन् कर्मसाधकः पितनाशिषः कामान् प्रार्थयेत् याचेत् ॥ ५६–५८ ॥

तथैव दक्षिणां कुर्य्यात् पक्षेषु त्रिषु तत्त्ववित् ॥ ५९ ॥
गायत्रीं दशधा जप्त्वा देवताभ्योऽपि पञ्चधा ।
दृष्ट्वा वह्निं रविं विप्रमिदं पृच्छेत् कृताञ्जलिः ॥ ६० ॥
इदं श्राद्धं समुच्चार्य्य साङ्गं जातमुदीरयेत् ।
द्विजो वदेत् सम्यगेव साङ्गं जातं विधानतः ॥ ६१ ॥
अङ्गवैगुण्यशान्त्यर्थं प्रणवं दशधा जपन् ।
अच्छिद्राभिविधानेन कुर्य्यात् सर्व्वं समापनम् ।
पात्रीयान्नानि पिण्डांश्च ब्राह्मणाय निवेदयेत् ॥ ६२ ॥
विप्राभावे गवाजेभ्यः सलिले वा विनिःक्षिपेत् ।
इष्टिश्राद्धमिदं प्रोक्तं नित्यसंस्कारकर्म्मणि ॥ ६३ ॥

दैवादित इत्यादि । तदनन्तरं दैवादितो देवपक्षादिक्रमतो ब्रह्मन् त्वमस्मेति पिण्डं गयां गच्छेति च वाक्यमुच्चरन् तत्त्ववित् साधको दर्भमयान् द्विजान् पिण्डांश्च विसृजेत् तथैव दैवादिक्रमेणैव त्रिष्वपि पक्षेषु ओं तत्सत् अद्येत्यादि कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थं हिरण्यादिकममुकगोत्रायामुकदेवशर्म्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति वाक्येन यथाशक्ति हिरण्यादिकं दक्षिणां कुर्य्यात् ॥ ५९ ॥

गायत्रीमित्यादि । ततो गायत्रीं दशधा जप्त्वा देवताभ्य इति मन्त्रमपि पञ्चधा जप्त्वा वह्निं रविं च दृष्ट्वा कृताञ्जलिः सन् विप्रमिदं पृच्छेत् ॥ ६० ॥

विप्रं प्रति किं पृच्छेदित्यपेक्षायामाह इदमित्यादि । इदं श्राद्धं समुच्चार्य्य साङ्गं जातमित्युदीरयेत् । योजनया इदं श्राद्धं साङ्गं जातमित्येव विप्रं पृच्छेत् । ततो विधानतः सम्यगेव साङ्गं जातमिति द्विजो वदेत् ॥ ६१ ॥

अच्छिद्राभिविधानेन कृतमेतच्छ्राद्धकर्माच्छिद्रमस्त्विति कथनेन ॥६२।६३॥

श्राद्धे पर्व्वणि कर्त्तव्ये पार्व्वणत्वेन कीर्त्तयेत् ॥६४॥
देवतादिप्रतिष्ठासु तीर्थयात्राप्रवेशयोः ।
पार्व्वणेन विधानेन श्राद्धमेतदुदीरयेत् ॥ ६५ ॥
नैतेषु श्राद्धकृत्येषु पितृन्नान्दीमुखान् वदेत् ।
नमोऽन्तपुष्पायित्वत्र स्वधायै पदमुच्चरेत् ॥ ६६ ॥
पित्रादित्रयमध्ये तु यो जीवति वरानने ! ।
तस्योर्द्धतनमुल्लिख्य श्राद्धं कुर्य्यादिवच्चणः ॥ ६७ ॥
जनकादिषु जीवत्सु त्रिषु श्राद्धं विवर्ज्जयेत् ।
तेषु प्रीतेषु देवेशि ! श्राद्धयज्ञफलं लभेत् ॥ ६८ ॥
जीवत्पितरि कल्याणि ! नान्यश्राद्धाधिकारिता ।
मातुः श्राद्धं विना पत्न्यास्तथा नान्दीमुखं विना ॥६९॥

एवमाभ्युदयिकश्राद्धविधिमुक्त्वेदानीं सविशेषेण तेनैव विधिना पार्व्वणादिकमपि श्राद्धं विधातव्यमित्याह श्राद्धे इत्यादिभिः । पर्व्वसमावास्यादौ कर्त्तव्ये श्राद्धे कल्पनीयेष्वनुज्ञावाक्येषु पार्व्वणत्वेन श्राद्धं कीर्त्तयेदुच्चारयेत् ॥ ६४ ॥

देवतादीत्यादि । देवतादिप्रतिष्ठासु तीर्थयात्राप्रवेशयोश्च कर्त्तव्ये श्राद्धे कल्पनीयेष्वनुज्ञावाक्येषु पार्व्वणेन विधानेनैतच्छ्राद्धमित्युदीरयेत् ॥ ६५ ॥

नैतेष्वित्यादि । एतेषु श्राद्धकृत्येषु पितृन्नान्दीमुखान्न वदेत् किन्तु देवताभ्यः पितृभ्यश्चेति मन्त्रेण नमोऽन्ते पुष्पं दत्त्वात्र स्वधायै इति पदमुच्चरेत् । अन्यत् सर्व्वं पूर्व्ववदेव विधेयम् ॥ ६६ ॥

ऊर्द्धतनम् ऊर्द्धभवम् ॥ ६७ । ६८ ॥

जीवदित्यादि । हे कल्याणि ! पितरि जीवति सति पुत्रस्य मातुः पत्न्याश्च श्राद्धं विना तथा नान्दीमुखमाभ्युदयिकमपि श्राद्धं विना अन्यश्राद्धाधिकारिता नास्तीत्यन्वयः ॥ ६९ ॥

एकोद्दिष्टं तु कौलेशि ! विश्वदेवान्न पूजयेत् ।
एकमेव समुद्दिश्यानुज्ञावाक्यं प्रकल्पयेत् ॥ ७० ॥
दक्षिणाभिमुखो दद्यादन्नं पिण्डं च मानवः ।
यवस्थाने तिला देयाः सर्व्वमन्यच्च पूर्व्ववत् ॥ ७१ ॥
प्रेतश्राद्धे विशेषोऽय गङ्गाद्यर्च्चां विवर्ज्जयेत् ।
मृत संमुखिखेत् प्रेत वाक्ये दानेऽन्नपिण्डयोः ॥ ७२ ॥
एकमुद्दिश्य यत् श्राद्धमेकोद्दिष्टं तदुच्यते ।
प्रेतस्यान्ने च पिण्डे च मत्स्यं मांसं नियोजयेत् ॥७३॥
अशौचान्तात् हितोयेऽह्नि श्राद्धं यत् कुरुते नरः ।
प्रेतश्राद्धं विजानीहि तदेव कुलनायिके ! ॥ ७४ ॥
गर्भस्रावाज्जातमृतादन्यत्र मृतजातयोः ।
कुलाचारानुसारेण मानवोऽशौचमाचरेत् ॥ ७५ ॥
द्विजातीनां दशाहेन द्वादशाहेन पक्षतः ।

एकोद्दिष्टं श्राद्धं ॥ ७० । ७१ ॥

प्रेतश्राद्धे इत्यादि । प्रेतश्राद्धे गङ्गाद्यर्च्चां विवर्ज्जयेत् न कुर्य्यात् । अनुज्ञावाक्येऽन्नपिण्डयोर्द्दाने च मृतं जनं प्रेतं संसङ्किखेदुच्चारयेत् । प्रेतश्राद्धे विशेषोऽयं ज्ञेयः ॥ ७२ ॥
ननु किन्नाम एकोद्दिष्टं श्राद्धं तत्राह एकमुद्दिश्येत्यादि । नियोजयेत् समर्पयेत् ॥ ७३ ॥

ननु प्रेतश्राद्धं किन्नाम तत्राह अशौचान्तादित्यादि । अशौचान्तात् अशौचस्यान्तो यत्रास्ति तदशौचान्तं तस्मात् ॥ ७४ ॥
अथ प्रसङ्गादशौचादिव्यवस्थामाह गर्भस्रावादित्यादिभिः । गर्भस्रावाद्गर्भपातात् जातमृतात् जातः सन्नेव मृतो जातमृतस्तस्माज्जातमृतयोरन्यत्र मृतजातयोः सतोर्म्मानवः स्वस्वकुलाचारानुसारेणाशौचमशुचित्वक्रियामाचरेत् कुर्य्यात् ॥ ७५ ॥

शूद्रसामान्ययोर्देवि ! मासेनाशौचकल्पना ॥ ७६ ॥
असपिण्डमृतज्ञाती त्रिरात्राशौचमिष्यते ।
मृखतोऽपि गताशौचे सपिण्डस्य मृतिं शिवे ! ॥७७॥
अशुचिर्नाधिकारी स्याद्दैवे पित्र्ये च कर्मणि ।
ऋते कुलार्चनादाद्ये ! तथा प्रारब्धकर्मणः ॥ ७८ ॥
पञ्चवर्षाधिकान् मर्त्यान् दाहयेत् पितृकानने ।
भर्त्रा सह कुलेशानि ! न दहेत् कुलकामिनीम् ॥७९॥
तव स्वरूपा रमणी जगत्याच्छन्नविग्रहा ।
मोहाद्वर्त्तुश्चितारोहात् भवेन्नरकगामिनी ॥ ८० ॥
ब्रह्ममन्त्रोपासकांस्तु तेषामाज्ञानुसारतः ।
प्रवाहयेद्वा निखनेद्दाहयेद्वापि कालिके ! ॥ ८१ ॥
पुण्यक्षेत्रे च तीर्थे वा देव्याः पार्श्वे विशेषतः ।
कुलीनानां समीपे वा मरणं शस्तमम्बिके ! ॥ ८२ ॥
विभावयन् सत्यमेकं विस्मरन् जगतां त्रयम् ।

द्विजातीनामित्यादि । उपनीतसपिण्डमरणे गुरुजनने च द्विजातीनां ब्राह्मणक्षत्रियवैश्यानां क्रमतो दशाहेन द्वादशाहेन पञ्चत-पक्षेणाशौचकल्पना वित्तेया शूद्रसामान्ययोस्तु मासेनाशौचकल्पना ज्ञेया शूद्रसामान्यवर्णयोरुपनयनस्थाने विवाहो ज्ञेयः ॥ ७६ ॥

असपिण्डेत्यादि । असपिण्डमृतज्ञातौ सपिण्डभिन्ने गोत्रजे मृते सति त्रिरात्रमशौचमिष्यते । गते शौचेऽशौचे गते सपिण्डस्य मृतिं मरणं श्रुखतोऽपि जनस्य त्रिरात्राशौचमिष्यते ॥ ७७ ॥

अशुचिरित्यादि । हे आद्ये ! कुलार्चनात्तथा प्रारब्धकर्मणश्च ऋते कुलार्चन प्रारब्धकर्मभ्यामन्यस्मिन् दैवे पित्र्ये च कर्मण्यशुचि-र्जनोऽधिकारी न स्यात् ॥ ७८ ॥

पितृकानने श्मशाने ॥ ७९—८० ॥

परित्यजति यः प्राणान् स स्वरूपे प्रतिष्ठति ॥ ८३ ॥
प्रेतभूमौ शवं नीत्वा स्नापयित्वा घृतोचितम् ।
उत्तराभिमुखं कृत्वा शाययेत्तं चितोपरि ॥ ८४ ॥
सम्बोधनान्तं तद्गोत्रं प्रेताख्यानं समुच्चरन् ।
दत्वा पिण्डं प्रेतमुखे दहेद्दक्षिमनुं स्मरन् ॥ ८५ ॥
पिण्डन्तु रचयेत्तत्र सिद्धान्नैस्तण्डुलैश्च वा ।
यवगोधूमचूर्णैर्व्वा धात्रीफलसमं प्रिये ! ॥ ८६ ॥
स्थितेषु प्रेतपुत्रेषु ज्येष्ठे श्राद्धाधिकारिता ।
तदभावेऽन्यपुत्रादौ ज्येष्ठानुक्रमतो भवेत् ॥ ८७ ॥
अशौचान्तान्तदिवसे कृतस्नानो नरः शुचिः ।
मृतप्रेतत्वमुक्त्यर्थमुत्सृजेत्तिलकाञ्चनम् ॥ ८८ ॥
गां भूमिं वसनं यानं पात्रं धातुविनिर्म्मितम् ।

विभावयन् विचिन्तयन् स्वरूपे परमात्मनि ॥ ८३ ॥

प्रेतभूमावित्यादि । प्रेतभूमौ शवं नीत्वा घृतोचितं घृताभ्यक्तं तं स्नापयित्वोत्तराभिमुखं कृत्वा चितोपरि तं शाययेत् ॥ ८४ ॥

सम्बोधनान्तमित्यादि । सम्बोधनान्तं सम्बोधनविभक्त्यन्तं प्रेताख्यानं प्रेतनाम तद्गोत्रञ्च समुच्चरन् ओं अद्यामुकगोत्र प्रेत पितरमुकदेवशर्म्मन्नेष पिण्डस्ते स्वधेति वाक्यमुच्चारयन् प्रेतमुखे पिण्डं दत्वा दक्षिमनुं स्मरिति मन्त्रं स्मरन् सन् शवं दहेत् ॥ ८५—८६ ॥

ज्येष्ठे सुते ॥ ८७ ॥

अशौचान्तेत्यादि । अशौचान्तान्नाहात्परस्मिन् वासरे कृतस्नानः शुचिश्च सन्नरः ओं अद्येत्यादि अमुकगोत्रस्य प्रेतस्य पितरमुकदेवशर्म्मणः प्रेतत्वविमुक्त्यर्थममुकगोत्रायामुकदेवशर्म्मणे ब्राह्मणाय दातुं काञ्चनसहितांस्तिलानहमुत्सृजे इति वाक्येन मृतप्रेतत्वमुक्त्यर्थं तिलकाञ्चनमुत्सृजेत् ॥ ८८ ॥

भोज्यं बहुविधं दद्यात् प्रेतस्वर्गाय सत्सुतः ॥ ८९ ॥
गन्धं माल्य फल तोय शय्यां प्रियकरीं तथा ।
यद् यत् प्रेतप्रियं द्रव्यं तत् स्वर्गाय समुत्सृजेत् ॥९०॥
ततस्तु वृषभञ्चैक त्रिशूलाङ्केन लाञ्छितम् ।
स्वर्णेनालङ्कृत कृत्वा त्यजेत् तत्स्वरवाप्तये ॥ ९१ ॥
प्रेतश्राद्धोक्तविधिना श्राद्धं कृत्वातिभक्तितः ।
ब्रह्मज्ञान् ब्राह्मणान् कौलान् क्षुधितानपि भोजयेत्॥९२॥
दानेष्वशक्तो मनुजः कुर्वन् श्राद्धं स्वशक्तितः ।
बुभुक्षितान् भोजयित्वा प्रेतत्वं मोचयेत् पितुः ॥९३॥
आद्यैकोद्दिष्टमेतत्तु प्रेतत्वान्मुक्तिकारणम ।
वर्षे वर्षे मृततिथौ दद्यादन्न गतामवे ॥ ९४ ॥
बहुभिर्विधिभिः किं वा कर्मभिर्बहुभिश्च किम् ।
सर्वसिद्धिमवाप्नोति मानव कौलिकार्च्चनात् ॥ ९५ ॥
विना होमाज्जपात् श्राद्धात् संस्कारेषु च कर्मसु ।
सम्पूर्णकार्य्यसिद्धिः स्यादेकया कौलिकार्च्चया ॥ ९६ ॥

गामित्यादि । ओं अद्यामुकगोत्रस्य प्रेतस्य पितुरमुकदेवशर्मणः स्वर्गार्थममुकगोत्रायामुकदेवशर्म्मणे ब्राह्मणाय गामिमामहं सम्प्रददे इति वाक्येन सत्सुत प्रेतस्वर्गाय गां दद्यात् । इत्यमेव कल्पितेन तत्तद्वाक्येन भूम्यादिकमपि प्रेतस्वर्गाय दद्यात् ॥ ८९ । ९० ॥

तत्स्वरवाप्तये प्रेतस्वर्गावाप्तये ॥ ९१ ॥ ९२ ॥

बुभुक्षितान् क्षुधितान् ॥ ९३ ॥

आद्येत्यादि । एतदाद्यमेकोद्दिष्टं तु मृतस्य प्रेतत्वान्मुक्तेः कारणं भवति । अतःपरं वर्षे वर्षे मृततिथौ कृतमेकोद्दिष्टश्राद्धं

शुक्लां चतुर्थीमारभ्य शुभकर्म्माणि कारयेत् ।
असितां पञ्चमीं यावत् विधिरेषः शिवोदितः ॥ ९७ ॥
अन्यत्रापि विरुद्धेऽङ्गे गुर्व्वर्त्विक्कौलिकाज्ञया ।
कर्म्माण्यपरिहार्य्याणि कर्म्मार्हो कर्त्तुमर्हति ॥ ९८ ॥
गृहारम्भः प्रवेशश्च यात्रारत्नादिधारणम् ।
सम्भूज्याद्यां पञ्चतत्त्वैः कुर्य्यादेतानि कौलिकः ॥९९ ॥
संक्षेपयात्रामथवा कुर्य्यात् साधकसत्तमः ।
ध्यायन् देवीं जपन्मन्त्रं नत्वा गच्छेद् यथामति ॥१०० ॥
सर्व्वासु देवताचर्चासु शारदीयोत्सवादिषु ।
तत्तत्कल्पोक्तविधिना ध्यानपूजां समाचरेत् ॥ १०१ ॥
आद्यापूजोक्तविधिना बलिहोमं प्रयोजयेत् ।
कौलार्चनं दक्षिणाञ्च कृत्वा कर्म्म समाप्नुयेत् ॥ १०२ ॥
गङ्गां विष्णुं शिवं सूर्य्यं ब्रह्माणं परिपूज्य च ।
उद्देश्यमर्चयेद्देवं सामान्यो विधिरीरितः ॥ १०३ ॥
कौलिकः परमो धर्म्मः कौलिकः परदेवता ।
कौलिकः परमं तीर्थं तस्मात् कौलं सदार्चयेत् ॥१०४॥
सार्द्धत्रिकोटितीर्थानि ब्रह्माद्याः सर्व्वदेवताः ।
वसन्ति कौलिके देहे किन्न स्यात् कौलिकार्चनात्॥१०५
पूर्णाभिषिक्तः सत्कौलो यस्मिन् देशे विराजते ।
धन्यो मान्यः पुण्यतमः सदेशः प्रार्थ्यते सुरैः ॥ १०६ ॥
कृतपूर्णाभिषेकस्य साधकस्य शिवात्मनः ।

एकोद्दिष्टश्राद्धे मृतं प्रेतं नोच्चारयेदित्यवगन्तव्यम् गतासवे विगतप्राणाय ॥ ९४—९६ ॥

पुण्यपापविहीनस्य प्रभावं वेत्ति को भुवि ॥ १०७ ॥
केवलं नररूपेण तारयन्निखिलं जगत्।
शिक्षयन् लोकयात्राञ्च कौली विहरति क्षितौ ॥ १०८ ॥

श्रीदेव्युवाच।

पूर्णाभिषिक्तकौलस्य माहात्म्यं कथितं प्रभोः।
विधानमभिषेकस्य कृपया श्रावयस्व माम् ॥ १०९ ॥

श्रीसदाशिव उवाच।

विधानमेतत् परमं गुप्तमासीद् युगत्रये।
गुप्तभावेन कुर्व्वन्तो नरा मोक्षं ययुः पुरा ॥ ११० ॥
प्रवले कलिकाले तु प्रकाशे कुलवर्त्तिनः।
नक्तं वा दिवसे कुर्य्यात् सप्रकाशाभिषेचनम् ॥ १११ ॥
नाभिषेकं विना कौलः केवलं मद्यसेवनात्।
पूर्णाभिषेकात् कौलः स्यात् चक्राधीशः कुलार्च्चकः॥ ११२॥
तत्राभिषेकपूर्व्वेऽह्नि सर्व्वविघ्नोपशान्तये।
यथागक्रमोपचारेण विघ्नेशं पूजयेद्गुरुः ॥ ११३ ॥
गुरुरेवाधिकारी स्यात् शुभपूर्णाभिषेचने।
तदाभिषिक्तकौलेन सत्कारं साधयेत् प्रिये! ॥ ११४ ॥

शुक्लाभित्यादि। असिताम् इष्णाम् यावदित्यवधौ ॥ ९७—१०८ ॥

पूर्णाभिषेकविधिं श्रोतुमिच्छन्ती श्रीदेव्युवाच। पूर्णाभिषिक्त-कौलस्येत्यादि ॥ १०९ ॥

एवं प्रार्थितः सन् श्रीसदाशिव उवाच। विधानमित्यादि ॥ ११० ॥

नक्तं रात्रौ ॥ १११ ॥ ११२ ॥

अथ पूर्णाभिषेकस्य विधानमाह तत्रेत्यादिभिः। विघ्नेशम् गण-पतिम् ॥ ११३ ॥

खान्तार्णं विन्दुसंयुक्तं वीजमस्य प्रकीर्त्तितम् ॥ ११५ ॥
गणकोऽस्य ऋषिश्छन्दो नीवृत् विघ्नस्तु देवता ।
कर्त्तव्यकर्म्मणो विघ्नशान्त्यर्थे विनियोगिता ॥ ११६ ॥
षड्दीर्घयुक्तमूलेन षड़ङ्गानि समाचरेत् ।
प्राणायामं ततः कृत्वा ध्यायेद् गणपतिं शिवे ! ॥११७॥
सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानम्
शृङ्गं पाशाङ्कुशेष्टान्युरुकरविलसद्दारुणीपूर्णकुम्भम् ।

गुरुरित्यादि । चेत् यद्यनभिषिक्तत्वात् शुभपूर्णाभिषेचने गुरुरधिकारी न स्यात्तदाभिषिक्तकौलेन पूर्णाभिषेचन सस्कार नर साधयेत् ॥११४॥

अथ गणपतिपूजाया विधानमेवाह खान्तार्णमित्यादिभि । विन्दु-संयुक्तमनुस्वारसहितं खान्तार्ण खस्यान्तिमवर्णकारस्य रूपमक्षरमस्य विघ्नेशस्य वीज प्रकीर्त्तितम् ॥ ११५ ॥

अथ ऋष्यन्यास विधातु गणपतिवीजमन्त्रस्य ऋष्यादिकमाह गणक इत्यादिना । अस्य गणपतिवीजमन्त्रस्य गणकऋषिर्नीवृच्छन्दो विघ्नेशो देवता कर्त्तव्यस्य शुभपूर्णाभिषेककर्मणो विघ्नशान्त्यर्थे विनियोग शिरसि गणकाय ऋषये नम मुखे नीवृच्छन्दसे नम हृदये विघ्नाय देवतायै नम इत्यृष्यन्यास विदध्यात् ॥ ११६ ॥

षड़ित्यादि । तत षड्दीर्घयुक्तेन मूलेन गणपतिवीजेनाङ्गुष्ठादीनि हृदयादीनि च षडङ्गानि प्रतिन्यास समाचरेत् गास्त्रङ्गुष्ठाभ्यां नम गी तर्ज्जनीभ्या स्वाहा गूं मध्यमाभ्यां वषट् गैमनामिकाभ्यां हुम् गौं कनिष्ठाभ्या वौषट् ग करतलकरपृष्ठाभ्या फट् इत्यङ्गुष्ठादि-षड़ङ्गन्यासम् गा हृदयाय नम गीं शिरसे स्वाहा गू शिखायै वषट् गै कवचाय हुम् गौं नेत्रत्रयाय वौषट् गं अस्त्राय फट् इति हृदयादिषड़ङ्गन्यासं च विधायादित्यर्थ ततो गमिति मन्त्रेण प्राणायाम कृत्वा गणपतिं ध्यायेत् ॥ ११७ ॥

गणपतिध्यानमेवाहैकेन सिन्दूराभमित्यादि । हे भक्ता ! गणपति

बालेन्दूद्दीप्तमौलिं करिपतिवदनं बीजपूरार्द्रगण्डम् ।
भोगीन्द्रावद्धभूषं भजत गणपतिं रक्तवस्त्राङ्गरागम् ॥११८
ध्यात्वैवं मानसैरिष्ट्वा पीठशक्तीः प्रपूजयेत् ।
तीव्रा च ज्वालिनी नन्दा भोगदा कामरूपिणी ॥११९॥
उग्रा तेजस्वती सत्या मध्ये विघ्नविनाशिनी ।
पूर्वादितोऽर्चयित्वैताः पूजयेत् कमलासनम् ॥ १२० ॥
पुनर्ध्यात्वा गणेशानं पञ्चतत्त्वोपचारकैः ।

गणेशानं यूय भजतेत्यन्वय कथम्भूत गणपतिम् सिन्दूराभम् सिन्दूरेणाभा दीप्तिर्यस्य यस्मिन् वा तथाभूतम् । पुनः कीदृशम् त्रिनेत्रम् त्रिलोचनम् पुनः कीदृशम् पृथुतरजठरम् अतिविशालकुक्षिम् । पुनः कीदृशम् हस्तपद्मै पाणिकमलै शङ्ख पाशाङ्कुशेष्टानि पाशमङ्कुश वरं च दधान दधतम्॰ पुनः कीदृशम् उरुकरविलसद्वारुणीपूर्णकुम्भम् उरौ विशाले करे शुण्डाया विलसन् भासमानो वारुण्या मदिरया पूर्ण कुम्भो यस्य तथाभूतम् । पुनः कीदृशम् बालेन्दूद्दीप्तमौलिम् बालेन्दुनोद्दीप्तो मौलिः किरीटं यस्य तथाभूतम् । पुनः कीदृशम् करिपतिवदनम् करिपतेर्गजराजस्येव वदनं मुखं यस्य तथाभूतम् । पुनः कीदृशम् बीजपूरार्द्रगण्डम् बीजपूरेण मद्यप्रवाहेणार्द्रौ गण्डौ कपोलौ यस्य तथाभूतम् । पुनः कीदृशम् भोगीन्द्रावद्धभूषम् भोगीन्द्रेण सर्पराजेन बद्धा भूषा यस्य येन वा तथाभूतम् । पुनः कीदृशम् रक्तवस्त्राङ्गरागम् रक्तवस्त्रेणाङ्गे रागो रक्तत्व यस्य तथाभूतम् ॥ ११८ ॥

ध्यात्वैवमित्यादि । एवं गणपतिं ध्यात्वा मानसैरुपचारैरिष्ट्वा पूजयित्वा च प्रणवादिनमोऽन्तेन नाममन्त्रेण गन्धपुष्पादिभि पीठशक्तीः प्रपूजयेत् । या पीठशक्तीः प्रपूजयेत्ता आह तीव्रा वेत्यादिनैकेन । पूर्वादित क्रमेणैतास्तीव्राद्या अर्चयित्वा प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभि कमलासन पूजयेत् ॥ ११९ । १२० ॥

अभ्यर्च्य तच्चतुर्दिक्षु गणेश गणनायकम् ॥ १२१ ॥
गणनाथं गणक्रीड़ यजेत् कौलिकसत्तमः ।
एकदन्तं रक्तशुण्डं लम्बोदरगजाननौ ॥ १२२ ॥
महोदरञ्च विकट धूम्राभं विघ्ननाशनम् ॥ १२३ ॥
ततो ब्राह्मीमुखाः शक्रोर्दिक्पालांश्च प्रपूजयन् ।
तेषामस्त्राणि सम्भूज्य विघ्नराजं विसर्ज्जयेत् ॥ १२४ ॥
एवं सम्भूज्य विघ्नेशमधिवासनमाचरेत् ।
भोजयेच्च पञ्चतत्त्वैर्ब्रह्मज्ञान् कुलसाधकान् ॥१२५ ॥
ततः परदिने स्नातः कृतनित्योदितक्रियः ।
आजन्मकृतपापानां क्षयार्थं तिलकाञ्चनम् ।
उत्सृजेत् कौलतृप्त्यर्थं भोज्यञ्चैकमपि प्रिये ! ॥ १२६॥
अर्घ्यं दत्वा दिनेशाय ब्रह्मविष्णुशिवग्रहान् ।
अर्च्चयित्वा मातृगणान् वसुधारां प्रकल्पयेत् ॥ १२७ ॥
कर्म्मणोऽभ्युदयार्थाय वृद्धिश्राद्धं समाचरेत् ।
ततो गत्वा गुरोः पार्श्वं प्रणम्य प्रार्थयेदिदम् ॥ १२८ ॥

पुनरित्यादि । कौलिकसत्तम पुनर्गणेशानं ध्यात्वा पञ्चतत्त्वोपचारकै पूर्वोक्तमन्त्रबोधितैर्नवादिभिः पञ्चतत्त्वैरन्यैश्च पाद्यार्घ्याचमनीयादिभिरुपचारैरभ्यर्च्च च तच्चतुर्दिक्षु नमोऽन्तनाममन्त्रेण गन्धपुष्पादिभिर्गणेशादीन् क्रमतो यजेत् ॥ १२१—१२३ ॥

तत इत्यादि । ततः परं प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभिर्ब्राह्मीमुखा ब्राह्मीप्रभृतीरष्टशक्तीरिन्द्रादीन् दिक्पालाश्च प्रपूजयेत् तेषां दिक्पालानामस्त्राणि च सम्भूज्य विघ्नराज ! त्वमस्वेति वाक्येन विघ्नराजं विसर्जयेत् ॥ १२४ ॥

एवमित्यादि । एवं विघ्नेशं सम्भूज्य वक्ष्यमाणेन विधिना अधिवासनमाचरेत् कुर्य्यात् ॥ १२५ ॥

त्राहि नाथ! कुलाचार! नलिनीकुलवल्लभ!।
त्वत्पादाम्भोरुहच्छायां देहि मूर्ध्नि कृपानिधे। ॥१२९॥
आज्ञां देहि महाभाग! शुभपूर्णाभिषेचने।
निर्विघ्नं कर्मणः सिद्धिमुपैमि त्वत्प्रसादतः ॥१३०॥
शिवशक्त्याज्ञया वत्स! कुरु पूर्णाभिषेचनम्।
मनोरथमयो सिद्धिर्ज्जायतां शिवशासनात् ॥ १३१ ॥
इत्यमाज्ञां गुरोः प्राप्य सर्वोपद्रवशान्तये।
आयुर्लक्ष्मीबलारोग्यावाप्त्यै सङ्कल्पमाचरेत् ॥ १३२ ॥
ततस्तु कृतसङ्कल्पो वस्त्रालङ्कारभूषणैः।
कारणैः शुद्धिसहितैरभ्यर्च्य वृणुयाद् गुरुम् ॥ १३३ ॥

तत इत्यादि। ततो दिनात् परदिने स्नातः कृतनित्योदितक्रियश्च सन् ओं अद्यामुकगोत्र श्रीमदमुकदेवशर्मा आजन्मकृतानेकदुष्कृतक्षय-कामोऽमुकगोत्रायामुकदेवशर्मणे ब्राह्मणाय दातुं काञ्चनसहितास्तिला-नहमुत्सृजे इति वाक्येनाजन्मकृतपापानां क्षयार्थं तिलकाञ्चनमुत्-सृजेत् तथैव कल्पितेन वाक्येन कौलदप्रार्थनैकं भोज्यमप्युत्-सृजेत् ॥ १२६—१२८ ॥

यत् प्रार्थनेत्यादि त्राहि नाथेत्यादिभ्यां द्वाभ्याम् ॥ १२९—१३१॥

इत्यमित्यादि। इत्थं गुरोराज्ञां प्राप्य सर्वोपद्रवशान्तये आयुर्लक्ष्मी-बलारोग्यप्राप्तये ओं अद्यामुकगोत्रः श्रीमदमुकदेवशर्मा निःशेषोप-द्रवध्वंसकाम आयुर्लक्ष्मीबलारोग्यकामश्च शुभपूर्णाभिषेचनसङ्कल्पं करिष्ये इति सङ्कल्पमाचरेत् कुर्यात् ॥ १३२ ॥

ततस्त्वित्यादि। ततस्तु कृतसङ्कल्पः शिष्यो वस्त्रालङ्कारभूषणैः शुद्धिसहितैर्मांसादिसहितैः कारणैर्मद्यैश्च गुरुमभ्यर्च्य तत्र ओम् अद्यामुकगोत्र श्रीमदमुकदेवशर्मामुकगोत्रं श्रीमन्तममुकानन्दनाथं गुरुत्वेन भवन्तं वस्त्रादिभिरहं वृणे इति वाक्येन गुरुं वस्त्रा-दिभिर्वृणुयात् ॥ १३३ ॥

गुरुर्मनोहरे गेहे गैरिकादिविचित्रिते ।
चित्रध्वजपताकाभिः फलपल्लवशोभिते ॥ १२४ ॥
किङ्किणीजालमालाभिश्चन्द्रातपविभूषिते ।
घृतप्रदीपावलिभिस्तमोलेशविवर्जिते ॥ १२५ ॥
कर्पूरसहितैर्धूपैर्यत्नधूपैः सुवासिते ।
व्यजनैश्चामरैर्वर्हैर्हंसपक्षैरलङ्कृते ॥ १२६ ॥
सार्द्धहस्तमितां वेदीमृत्वकैश्चतुरङ्गुलाम् ।
रचयेन्मृण्मयीं तत्र चूर्णैरक्षतसम्भवैः ॥ १२७ ॥
पीतरक्तासितश्वेतश्यामलैः सुमनोहरम् ।
मण्डलं सर्वतोभद्रं विदध्यात् श्रीगुरुस्ततः ॥ १२८ ॥
स्वस्वकल्पोक्तविधिना मानसार्चावधिं क्रियाम् ॥
कृत्वा पूर्वोक्तमन्त्रेण पञ्चतत्त्वानि शोधयेत् ॥ १२९ ॥

गुरुरित्यादि । ततो गुरुर्गेहे गृहे सार्द्धहस्तमितां चतुरङ्गुलत्वे चतुरङ्गुलां चतुरङ्गुलिपरिमितां मृण्मयीं वेदीं रचयेत् कल्पयेत् इति चतुर्थश्लोकगतै पदैरन्वयः । मनोहरै इत्यादीनि सप्तम्यन्तानि पदानि गेहस्य विशेषणानि भवन्तीति ज्ञेयम् । चित्रध्वजपताकाभिश्च शोभिते ॥ १२४ ॥

किङ्किणीजालमालाभिः क्षुद्रघण्टिकासमूहमालाभिश्च भूषिते ॥ १२५ ॥
यत्नधूपैः यत्नसञ्चरणैः बर्हैः मयूरपक्षैः ॥ १२६ ॥

तत्र चूर्णैरित्यादि । ततः परं श्रीगुरुस्तत्र रचितायां वेद्यां पीतरक्तासितश्वेतश्यामलैरक्षतसम्भवैश्चूर्णैः सुमनोहरं सर्वतोभद्रं मण्डलं विदध्यात् कुर्यात् । असितैर्नीलवर्णैः श्यामलैर्हरिद्वर्णैः ॥ १२७ ॥ १२८ ॥

स्वस्वेत्यादि ततः स्वस्वकल्पोक्तविधिना मानसार्चावधिक्रिया मानसपूजापर्यन्तां क्रियां कृत्वा पूर्वोक्तमन्त्रेण मद्यादीनि पञ्चतत्त्वानि शोधयेत् ॥ १२९ ॥

संशोध्य पञ्चतत्त्वानि पुरः कल्पितमण्डले।
स्वार्णं वा राजतं ताम्र मृण्मयं घटमेव वा॥ १४०॥
क्षालितञ्चास्त्रबीजेन दध्यक्षतविचर्चितम्।
स्थापयेद्ब्रह्मबीजेन सिन्दूरेणाङ्कयेत् श्रिया॥ १४१॥
चकारादैरकारान्तैर्वर्णैर्विन्दुविभूषितैः।
मूलमन्त्रत्रिजापेन पूरयेत् कारणेन तम्॥ १४२॥
अथवा तीर्थतोयेन शुद्धेन पायसापि वा॥
नवरत्नं सुवर्णं वा घटमध्ये विनिःक्षिपेत्॥ १४३॥
पनसोडुम्बराश्वत्थवकुलाम्रसमुद्भवम्।
पल्लवं तन्मुखे दद्यात् वाग्भवेन कृपानिधिः॥ १४४॥
शरावं मार्त्तिकं वापि फलाक्षतसमन्वितम्।
रमां मायां समुच्चार्य्य स्थापयेत् पल्लवोपरि॥ १४५॥

संशोध्येत्यादि। मन्त्रेण पञ्चतत्त्वानि संशोध्य पुरःकल्पिते सर्व्वतोभद्रमण्डलेऽस्त्रबीजेन फट् मन्त्रेण क्षालितं धौतं दध्यक्षतविचर्चितं दध्यक्षतैर्व्विलिप्तं स्वार्णं सुवर्णभवं राजतं रजतोद्भवं ताम्रोद्भवं मृण्मयमेव वा घटं ब्रह्मबीजेन प्रणवेन स्थापयेत् श्रिया श्रीं बीजेन सिन्दूरेणाङ्कयेच्च॥ १४०। १४१॥

चकारादीत्यादि। ततो विन्दुविभूषितैरनुस्वारालङ्कृतैश्चकारादैरकारान्तैर्व्वर्णैः सह मूलमन्त्रस्य त्रिजापेन कारणेन मद्येनाथवा तीर्थतोयेन शुद्धेन पवित्रेणान्येन पायसा जलेनापि वा तं घटं पूरयेत्। ततो घटमध्ये नवरत्नं सुवर्णं वा विनिक्षिपेत्॥ १४२। १४३॥

तन्मुखे घटमुखे वाग्भवेन ऐमिति मन्त्रेण॥ १४४॥

शरावमित्यादि। तत फलाक्षतसमन्वितं सुवर्णादिभवं मार्त्तिकं मृत्तिकोद्भवं वापि शरावं रमां श्रीमिति मायां ह्रीमिति च बीजं समुच्चार्य्य पल्लवोपरि स्थापयेत्॥ १४५॥

वक्षीयाद्दक्षयुग्मेन ग्रीवां तस्य वरानने ।।
शक्तौ रक्तं शिवे विष्णौ श्वेतवासः प्रकीर्त्तितम् ॥ १४६ ॥
स्यां स्त्रीं मायां रमां स्मृत्वा स्थिरीकृत्य घटान्तरे ।
निक्षिप्य पञ्चतत्त्वानि नवपात्राणि विन्यसेत् ॥ १४७ ॥
राजतं शक्तिपात्रं स्यात् गुरुपात्रं हिरण्मयम् ।
श्रीपात्रन्तु महाशङ्खं ताम्राण्यन्यानि कल्पयेत् ॥ १४८ ॥
पाषाणदारुलौहानां पात्राणि परिवर्জ্জयेत् ।
शक्त्या प्रकल्पयेत् पात्रं महादेव्याः प्रपूजने ॥ १४९ ॥
पात्राणां स्थापनं कृत्वा गुरून् देवीं प्रतर्पयेत् ।
ततस्त्वमृतसम्पूर्णघटमभ्यर्चयेत् सुधीः ॥ १५० ॥
दर्शयित्वा धूपदीपौ सर्व्वभूतबलिं हरेत् ।
पीठदेवान् पूजयित्वा षड़ङ्गन्यासमाचरेत् ॥ १५१ ॥
प्राणायामं ततः कृत्वा ध्यात्वावाह्य महेश्वरीम् ।
स्वशक्त्या पूजयेदिष्टां वित्तशाठ्यं विवर्জ্জयेत् ॥ १५२ ॥

ननु किं वर्णेन वस्त्रयुग्मेन घटस्य ग्रीवा बध्नीयादित्यपेक्षायामाह शक्तौ रक्तमित्यादि ॥ १४६ ।

स्यां स्त्रीमित्यादि । तत स्यां स्त्री मायां रमा स्मृत्वा स्या स्त्रीं श्री स्थिरीभवेति मन्त्र पठित्वा स्थिरीकृतघटान्तरे पञ्चतत्त्वानि निः-क्षिप्य पूर्व्वोक्तविधिना नवपात्राणि विन्यसेत् स्थापयेत् ॥ १४७ ॥

ननु किं द्रव्योद्भवानि नवपात्राणि विन्यसेत्तत्राह राजतमित्यादि । महाशङ्ख नरकपालम् ॥ १४८ । १४९ ॥

गुरून् देवीमिति श्रानन्दभैरवादीनामप्युपलक्षणम् । प्रतर्पयेत् पूर्व्वोक्तेन तत्तन्मन्त्रेण ॥ १५० ॥

दर्शयित्वेत्यादि । ततो घट प्रति धूपदीपौ दर्शयित्वा पूर्व्वोक्त मन्त्रेण सर्व्वभूतबलिं हरेत् दद्यात् ॥ १५१ । १५२ ॥

होमान्तकृत्यं निष्पाद्य कुमारीशक्तिसाधकान् ।
पुष्पचन्दनवासोभिरर्चयेत् सद्गुरुं शिवे ! ॥ १५३ ॥
अनुगृह्णन्तु कौलाः मे शिष्यं प्रति कुलव्रताः ।
पूर्णाभिषेकसत्कारे भवद्भिरनुमन्यताम् ॥ १५४ ॥
एवं पृच्छति चक्रेशे तं ब्रूयुर्गुरुमादरात् ।
महामायाप्रसादेन प्रभावात् परमात्मनः ।
शिष्यो भवतु पूर्णस्ते परतत्त्वपरायणः ॥ १५५ ॥
शिष्येण च गुरुर्देवीमर्चयित्वार्चिते घटे ।
कामं मायां रमां जप्त्वा चालयेद्विमलं घटम् ॥ १५६ ॥
उत्तिष्ठ ब्रह्मकलश ! देवतात्मक ! सिद्धिद ! ।
त्वत्तोयपल्लवैः सिक्तः शिष्यो ब्रह्मरतोऽस्तु ते ॥ १५७ ॥
इत्थं सञ्चाल्य कलशमुत्तराभिमुखं गुरुः ।
मन्त्रैरतैर्व्व्यमाणैरभिषिञ्चेत् कृपान्वितः ॥ १५८ ॥
शुभपूर्णाभिषेकस्य सदाशिवऋषिः स्मृतः ।
छन्दोऽनुष्टुप् देवताद्या प्रणवं बीजमीरितम् ।
शुभपूर्णाभिषेकार्थे विनियोगः प्रकीर्त्तितः ॥ १५९ ॥

होमान्तकृत्यम् होमपर्य्यन्तं कर्त्तव्यं कर्म्म निष्पाद्य समाप्य ॥ १५३ । १५४ ॥

परतत्त्वपरायणः परं ब्रह्म तत्परः ॥ १५५ ॥

शिष्येणेत्यादि । ततो गुरुः शिष्येण देवीमर्चयित्वार्चिते पूजिते घटे कामं मायां रमां क्लीं ह्रीं श्रीमिति मन्त्रं जप्त्वा वक्ष्यमाणमन्त्रैः विमलं घटं चालयेत् ॥ १५६ ॥

घटचालनमन्त्रमेवाह उत्तिष्ठेत्याद्यम् ॥ १५७ ॥

इत्थमित्यादि । इत्थं कलशञ्चालयित्वा सञ्चाल्य कृपान्वितो गुरुरुत्तराभिमुखं शिष्यं वक्ष्यमाणैरेतैर्मन्त्रैरभिषिञ्चेत् ॥ १५८ ॥

गुरवस्त्वाभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
दुर्गालक्ष्मीभवान्यस्त्वामभिषिञ्चन्तु मातरः ॥ १६० ॥
षोडशी तारिणी नित्या स्वाहा महिषमर्द्दिनी ।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥ १६१ ॥
जयदुर्गा विशालाक्षी ब्राह्मणी च सरस्वती ।
एतास्त्वामभिषिञ्चन्तु वगला वरदा शिवा ॥ १६२ ॥
नारसिंही च वाराही वैष्णवी वनमालिनी ।
इन्द्राणी वारुणी रौद्री त्वाभिषिञ्चन्तु शक्तयः ॥ १६३ ॥
भैरवी भद्रकाली च तुष्टिः पुष्टिरुमा क्षमा ।
श्रद्धा कान्तिर्द्दया भ्रान्तिरभिषिञ्चन्तु ते सदा ॥ १३४ ॥
महाकाली महालक्ष्मीर्म्महानीलसरस्वती ।
उग्रचण्डा प्रचण्डा त्वामभिषिञ्चन्तु सर्व्वदा ॥ १६५ ॥
मत्स्यः कूर्म्मो वराहश्च नृसिंहो वामनस्तथा ।
रामो भार्गवरामस्त्वामभिषिञ्चन्तु वारिणा ॥ १६६ ॥
असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तो भयङ्करः ।
कपाली भीषणश्च त्वामभिषिञ्चन्तु वारिणा ॥ १६७ ॥

अथ पूर्णाभिषेकमन्त्राणामृष्यादिकमाह शुभपूर्णाभिषेकस्येत्यादिना सार्द्धेन । एषां शुभपूर्णाभिषेकमन्त्राणां सदाशिवऋषिरनुष्टुप्छन्दः आद्या काली देवता प्रणवो बीजं शुभपूर्णाभिषेकार्थे विनियोगः शिरसि सदाशिवाय ऋषये नमः मुखेऽनुष्टुप्छन्दसे नमः हृदये आद्यायै कालिकायै देवतायै नमः गुह्ये प्रणवाय बीजाय नमः शुभपूर्णाभिषेकार्थे विनियोगः इत्यृष्यादिन्यासो विधातव्यः ॥ १५९ ॥

अथ गुरवस्त्वाभिषिञ्चन्त्वित्यादीनभिषेकमन्त्रानेवाह गुरव इत्यादि । त्वा त्वाम् ॥ १६०—१६२ ॥

त्वा त्वाम् ॥ १६३ ॥

काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ।
विप्रचित्ता महोग्रा त्वामभिषिञ्चन्तु सर्व्वदा ॥ १६८ ॥
इन्द्रोऽग्निः शमनो रक्षो वरुणः पवनस्तथा ।
धनदश्च महेशानः सिञ्चन्तु त्वान्दिगीश्वराः ॥ १६९ ॥
रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः ।
राहुः केतुः सनक्षत्रा अभिषिञ्चन्तु ते ग्रहाः ॥ १७० ॥
नक्षत्रं करणं योगो वाराः पक्षो दिनानि च ।
ऋतुर्म्मासो हायनस्त्वामभिषिञ्चन्तु सर्व्वदा ॥ १७१ ॥
लवणेक्षुसुरासर्पिर्द्दधिदुग्धजलान्तकाः ।
समुद्रास्त्वाभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥ १७२ ॥
गङ्गा सूर्य्यसुता रेवा चन्द्रभागा सरस्वती ।
सरयुर्गण्डकी कुन्ती खेतगङ्गा च कौशिकी ।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥ १७३ ॥
अनन्ताद्या महानागाः सुपर्णाद्या पतत्रिणः ।
तरवः कल्पवृक्षाद्याः सिञ्चन्तु त्वां महीधराः ॥ १७४ ॥
पातालभूतलव्योमचारिणः क्षेमकारिणः ।
पूर्णाभिषेकसन्तुष्टास्त्वाभिषिञ्चन्तु पार्थसा ॥ १७५ ॥
दौर्भाग्यं दुर्यशो रोगा दौर्म्मनस्यं तथा शुचः ।
विनश्यन्त्वभिषेकेन परमब्रह्मतेजसा ॥ १७६ ॥

ते इति कर्म्मत्वेन विवक्षितत्वात् षष्ठी ॥ १६४—१६८ ॥
जीवो बृहस्पतिः सितः शुक्रः ॥ १७०—१७२ ॥
सूर्य्यसुता सूर्य्यपुत्री यमुना ॥ १७३ ॥
अनन्ताद्याः शेषप्रभृतयः । सुपर्णाद्याः गरुडादयः । पतत्रिणः पक्षिणः ॥ १७४ । १७५ ॥

अलक्ष्मीः कालकर्णी च डाकिन्यो योगिनीगणाः ।
विनश्यन्त्वभिषेकेण कालीबीजेन ताडिताः ॥ १७७ ॥
भूताः प्रेताः पिशाचाश्च ग्रहा येऽरिष्टकारकाः ।
विद्रुतास्ते विनश्यन्तु रमाबीजेन ताडिताः ॥ १७८ ॥
अभिचारकृता दोषा वैरिमन्त्रोद्भवाश्च ये ।
मनोवाक्कायजा दोषाः विनश्यन्त्वभिषेचनात् ॥ १७९ ॥
नश्यन्तु विपदः सर्वाः सम्पदः सन्तु सुस्थिराः ।
अभिषेकेण पूर्णेन पूर्णाः सन्तु मनोरथाः ॥१८० ॥
इत्येकाधिकविंशत्या मन्त्रैः संसिक्तसाधकम् ।
पशोर्मुखान्नलब्धमन्नं पुनः संप्रावयेद् गुरुः ॥ १८१ ॥
पूर्वोक्तनाम्ना सम्बोध्य ज्ञापयन् शक्तिसाधकान् ।
दद्यादानन्दनाथान्तमाख्यानं कौलिको गुरुः ॥ १८२ ॥
श्रुतमन्त्रो गुरोर्यन्त्रे सम्पूज्य निजदेवताम् ।
पञ्चतत्त्वोपचारेण गुरुमभ्यर्चयेत्ततः ॥ १८३ ॥
गोभूहिरण्यवासांसि दासानालङ्करणानि च ।
गुरवे दक्षिणां दत्वा यजेत् कौलान् शिवात्मकान् ॥१८४॥

शुचः शोकाः ॥ १७६ । १७७ ॥
अरिष्टकारका अशुभोत्पादकाः ॥ १७८–१८१ ॥
पशोर्मुखा॰ इत्यादि । ततः कौलिको गुरुः शक्तिसाधकान् ज्ञापयन् सन् पूर्वोक्तनाम्ना शिष्यं सम्बोध्य तस्यानन्दनाथान्तमाख्यानं नाम दद्यात् यथा अमुकदेवशर्मन् । त्वमेतदिनमारभ्यामुकानन्दनाथाख्योऽसीति ॥ १८२ । १८३ ॥
गोभूहिरण्येत्यादि । ओं अद्येत्यादि कृतैतच्छ्रुतपूर्णाभिषेककर्मणः साङ्गतार्थं गोभूहिरण्यादिदक्षिणामसुकगोत्रायामुकानन्दनाथाय

कृतकौलार्चनो धीरः शान्तोऽतिविनयान्वितः ।
श्रीगुरोश्चरणौ स्पृष्ट्वा भक्त्या नत्वेदमर्थयेत् ॥ १८५ ॥
श्रीनाथ ! जगतां नाथ ! सनाथ ! करुणानिधे ! ।
परामृतप्रदानेन पूरयास्मन्मनोरथम् ॥ १८६ ॥
आज्ञां मे दीयतां कौलाः प्रत्यक्षशिवरूपिणः ।
मच्छिष्याय विनीताय ददामि परमामृतम् ॥ १८७ ॥
चक्रेश ! परमेशान ! कौलपङ्कजभास्कर ! ।
कृतार्थं कुरु सत्शिष्य टेङ्कमुखै कुलामृतम् ॥ १८८ ॥
आज्ञामादाय कौलानां परमामृतपूरितम् ।
सशुद्धिकं पानपात्रं शिष्यहस्ते समर्पयेत् ॥ १८९ ॥
हृद्याकृत्य गुरुर्देवीं स्रुवसंलग्नभस्मना ।
स्वस्य शिष्यस्य कौलानां मूर्ध्नि च तिलकं न्यसेत् ॥ १९० ॥
ततः प्रसादतत्त्वानि कौलेभ्य परिवेशयन् ।
चक्रानुष्ठानविधिना विदध्यात् पानभोजनम् ॥ १९१ ॥
इति ते कथितं देवि ! शुभपूर्णाभिषेचनम् ।
ब्रह्मज्ञानैकजननं शिवत्वफलसाधनम् ॥ १९२ ॥
नवरात्रं सप्तरात्रं पञ्चरात्रं त्रिरात्रकम् ।
अथ वाप्येकरात्रञ्च कुर्य्यात् पूर्णाभिषेचनम् ॥ १९३ ॥
सत्कारैरीप्सितान् कुलेशानि ! पञ्चकल्या प्रकीर्त्तिता ।
नवरात्रे विधातव्यं सर्वतोभद्रमण्डलम् ॥ १९४ ॥

गुरवे तुभ्यमहं सम्प्रदद इति वाक्येन यथाशक्ति गोभूहिरण्यादीनि दक्षिणा गुरवे दत्वा शिवात्मकान् शिवस्वरूपान् कौलान् व्रजेत् ॥ १८४ ॥

अर्थयेत् याचेत् ॥ १८५ ॥

यत् प्रार्थयेत्तदाह श्रीनाथेत्यादर्धेन ॥ १८६–१८८ ॥

नवनाभं सप्तरात्रे पञ्चाब्जं पञ्चरात्रके ।
त्रिरात्रे चैकरात्रे च पद्ममष्टदलं प्रिये ! ॥ १९५ ॥
मण्डले सर्वतोभद्रे नवनाभेऽपि साधकैः ।
स्थापनीया नवघटाः पञ्चाब्जे पञ्चसङ्ख्काः ॥ १९६ ॥
नलिनेऽष्टदले देवि । घटस्त्वेकः प्रकीर्त्तितः ।
अङ्गावरणदेवांश्च केशवादिषु पूजयेत् ॥ १९७ ॥
पूर्णाभिषेकसिद्धानां कौलानां निर्म्मलात्मनाम् ।
दर्शनात् स्पर्शनाद् घ्राणाद् द्रव्यशुद्धिर्विधीयते ॥ १९८ ॥
शाक्तैर्वा वैष्णवैः शैवैः सौरैर्गाणपतैरपि ।
कौलधर्म्माश्रितः साधुः पूजनीयोऽतियत्नतः ॥ १९९ ॥
शाक्ते शाक्तो गुरुः श्रस्त. शैवे शैवो गुरुर्म्मतः ।
वैष्णवे वैष्णवः सौरे सौरो गुरुरुदाहृतः ॥ २०० ॥
गाणपे गाणपश्चैव कौलः सर्वत्र सद्गुरुः ।
अतः सर्वात्मना धीमान् कौलाद् दीक्षां समाचरेत्॥२०१
पञ्चतत्त्वेन यत्नेन भक्त्या कौलान् यजन्ति ये ।
उद्धृत्य पुरुषान् सर्वांस्ते यान्ति परमाकृतिम् ॥ २०२ ॥
पशोर्वक्त्रालब्धमन्त्रः पशुरेव न संशयः ।
वीरास्यलब्धमनुर्वीरः कौलाद्भवति ब्रह्मवित् ॥ २०३ ॥
शाक्ताभिषेकी वीरः स्यात् पञ्चतत्त्वानि शोधयेत् ।
स्वेष्टपूजाविधावेव न तु चक्रेश्वरो भवेत् ॥ २०४ ॥
वीरघाती हरापायी वीराणां स्त्रीगमस्तथा ।

विदध्यात् कुर्य्यात् ॥ १९१—१९६ ॥
नवमे पद्मे ॥ १९७—२०० ॥
सर्वात्मना सर्वप्रयत्नेन ॥ २०१—२०४ ॥

स्तेयी महापातकिनस्तत्संसर्गी च पञ्चमः ॥ २०५ ॥
कुलवर्त्म कुलद्रव्यं कुलसाधकमेव च।
ये निन्दन्ति दुरात्मानस्ते गच्छन्त्यधमाङ्गतिम् ॥ २०६ ॥
नृत्यन्ति रुद्रडाकिन्यो नृत्यन्ति रुद्रभैरवा.।
मांसास्थिचर्वणानन्दाः सुराः कौलद्विषां नृणाम् ॥२०७॥
दयालवः सत्यशौलाः सदा परहितैषिणः।
तान् गर्हयन्तो नरकान्निष्कृतिं यान्ति न क्वचित्॥२०८॥
उक्ता प्रयोगा बहवः कर्म्माणि विविधानि च।
ब्रह्मैकनिष्ठकौलस्य त्यागानुष्ठानयोः समम् ॥ २०९ ॥
एकमेव परं ब्रह्म जगदाहत्य तिष्ठति।
विश्वार्चया तदर्चा स्यात् यतः सर्व्वं तदन्वितम् ॥२१०॥
फलाशक्ताः कामपरा कर्म्मजालरताः प्रिये!।
पृथक्त्वेन यजन्तोऽपि तत् प्रयान्ति विशन्ति च ॥ २११
सर्व्वं ब्रह्मणि सर्वत्र ब्रह्मैव परिपश्यति।
ज्ञेयः सएव सत्कौलो जीवन्मुक्तो न संशयः ॥२१२॥

इति श्रीमहानिर्व्वाणतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे सर्व्वधर्म्मनिर्णय-
सारे श्रीमदाद्यासदाशिवसंवादे दक्षिणाद्याहिस्थतक्रिया-
पूर्णाभिषेककथनं नाम दशमोल्लासः।

अथ पञ्चमहापातकिन आह वीरघातीत्याद्येकेन ॥ २०५—२०७॥
गर्हयन्तः निन्दन्तः ॥ २०८। २०९ ॥
तदर्चा परब्रह्मार्च्चनम्। तदन्वितम् परब्रह्मान्वितम् ॥ २१० ॥
फलाशक्ता इत्यादि। अत इति शेषः. कर्म्मजालरताः कर्म्मसमूहा-
नुरक्ताः। तत्परं ब्रह्म ॥ २११। २१२ ॥

इति श्रीमहानिर्व्वाणतन्त्रटीकायां दशमोल्लासः।

एकादशोल्लासः।

श्रुत्वा शाम्भवधर्माणि वर्णाश्रमविभेदतः।
अपर्णा परया प्रीत्या पप्रच्छ शङ्करं प्रति ॥ १ ॥

श्रीदेव्युवाच।

वर्णाश्रमाचारधर्माः संस्कारा लोकसिद्धये।
कथिताः कृपया मह्यं सर्वज्ञेन त्वया प्रभो! ॥ २ ॥
कलौ दुर्वृत्तयो लोकाः कामक्रोधान्धचेतसः।
नास्तिकाः संशयात्मानः सदेन्द्रियसुखैषिणः ॥ ३ ॥

कलौ लोकाना प्रायशो नास्तिकत्वात् सर्वापद्ग्रस्तत्वात् कामक्रोधाद्यभिभूतत्वात् सर्वदेन्द्रियसुखाकाङ्क्षित्वाच्च सदाशिवप्रोक्त-सन्मार्गानुष्ठानासम्भवेन दुर्वर्तनेन सेवनाद्वापेक्षविध पापसत्पद्यते ततश्च तेषा कथ निष्कृतिरित्याशयवती पार्वती शङ्कर पृच्छति त्वेत्याद्य श्रुत्वेत्यादिना। वर्णा ब्राह्मणादयश्चाश्रमौ गार्हस्थ्यभैक्षुकौ च तेषा विभेदत शाम्भवधर्माणि शम्भुप्रोक्तधर्माणि श्रुत्वा अपर्णा व्रतलक्ष-यत्वा पार्वती परयोत्तमया प्रीत्या शङ्करं कल्याणकर्तारं महादेव प्रति पप्रच्छ ॥ १ ॥

किं पप्रच्छेत्याकाङ्क्षायां प्रष्टव्यमेवाभिधातुमुपक्रमते वर्णाश्र-मेत्यादि वक्तुमर्हसीत्यन्त श्लोकत्रयम्। प्रभो! हे स्वामिन्! यद्यपि लोकसिद्धये लोकनिर्वाहनिष्पत्तये वर्णानामाश्रमाणां चाचारा धर्मा. सस्काराश्च सर्वज्ञेन! सर्वं जानता त्वया कृपया मह्यं मामुद्दिश्य कथिता उक्ता. ॥ २ ॥

तथापि कलौ लोका जना भवद्भिर्गदित भवता कथित वर्त्म मार्ग

भवन्निगदितं वर्त्म नानुष्ठास्यन्ति दुर्धियः ।
तेषाङ्का गतिरोशान ' विशेषाद्वक्तुमर्हसि ॥ ४ ॥

श्रीमदाशिव उवाच ।

साधु पृष्टं त्वया देवि ! लोकानां हितकारिणि ! ।
त्वं जगज्जननी दुर्गा जन्मसंसारमोचनी ॥ ५ ॥
त्वमाद्या जगतां धात्री पालयित्री परात्परा ।
त्वयैव धार्य्यते देवि ! विश्वमेतच्चराचरम् ॥ ६ ॥

नानुष्ठास्यन्तीति द्वितीयेनान्वयः विशेषोक्तवर्त्मानानुष्ठाने हेतुं दर्शयन् लोकान्विशिनष्टि कलौ दुर्वृत्तत्व इत्यादिना । कथम्भूता लोका दुर्वृत्तत्व दुष्टे कर्मणि वृत्तिर्दुर्वृत्तता वा वृत्तिर्येषां ते । दुष्टे कर्मणि वर्त्तमाना इत्यर्थः पुनः कामक्रोधान्वचेतसः कामक्रोधाभ्यामन्धचेतो येषां तथाभूता नास्तिका परलोकादिकं नास्तीति बुद्धिशालिन्न सन्तया त्मान परलोकादिकमस्ति नास्ति वेति सन्देहापन्नमानसाः सदेन्द्रियसुखैषिणः सर्व्वदा रसनादीन्द्रियसुखाकाङ्क्षिण ॥ ३ ॥

दुर्द्धिय दुर्बुद्धय ईशान ! हे ऐश्वर्य्यशालिन् ! तेषां लोकानां का गतिः को विशेषरूपाव. स्थादिति विशेषाद्वक्तुं कथयितुमर्हसि त्वं भवसि । गतिर्ज्ञानेशायां च मार्गे वर्त्तास्युपायवोरिति कोषः ॥ ४ ॥

शम्भुरिदानीमपर्णाप्रश्न स्तौति साधु पृष्टमित्यादिना । देवि ! हे द्युतिमति ! त्वया साधु मनोरमं पृष्टम् । साधुप्रश्ने हेतुं वदन्नाह लोकानामिति । कीदृशि देवि ! लोकानां हितकारिणि जनानामभीष्टोत्पादयित्रि ! लोकानां हितकारिणीत्वे बीजं दर्शयन्नाह त्वमित्यादि । त्व जगज्जननी जगतां जनयित्री जगज्जननीत्वाल्लोकानां हित कारिणी लोकानां हितकारिणीत्वाच्च साधु पृष्टमिति योज्यम् । जन्मसंसारमोचनी जन्मन उत्पत्तेः संसारात् पुन पुनर्यातायातकर्त्तुः कर्त्तव्यपुत्रादेश्च मुक्तिकर्त्रीम् । अतएव दुःखेन गम्यते ज्ञायते वा सा दुर्गा दुर्ज्ञेया च त्वम् ॥ ५ ॥

त्वमेव पृथ्वी त्वं वारि त्व वायुस्त्वं हुताशनः ।
त्वं वियत्त्वमहङ्कारस्त्वं महत्तत्त्वरूपिणी ॥ ७ ॥
त्वमेव जीवो लोकेऽस्मिंस्त्वं विद्या परदेवता ।
इन्द्रियाणि मनोबुद्धिर्विश्वेषां त्वं गतिः स्थितिः ॥ ८ ॥
त्वमेव वेदाः प्रणवः स्मृतयस्त्वं हि संहिता ।
निगमागमतन्त्राणि सर्व्वशास्त्रमयी शिवा ॥ ९ ॥
महाकाली महालक्ष्मीर्महानीलसरस्वती ।
महोदरी महामाया महारौद्री महेश्वरी ॥ १० ॥

त्वमिति । त्वं जगतामाद्या आदिभूतासि । जगता धात्री पोष्त्री च त्वम् । पालयित्री जगतां रक्षिका च त्वमेव । परात् श्रेष्ठादपि परा श्रेष्ठा च त्वम् । हे देवि! कालिमति ! चराचरं जङ्गमस्थावरमेतद्विश्वं त्वयैव धार्य्यते ॥ ६ ॥

त्वमेवेति ।त्वं वाहङ्कार । महत्तत्त्वरूपिणी च त्वमेव ॥ ७ ॥

त्वमेवेति अस्मिंल्लोके यो जीवस्तद्रूपा च त्वमेव । विद्या आत्मज्ञानरूपा च त्वम् । परदेवता श्रेष्ठदेवता च त्वमेवासि । इन्द्रियाणि नेत्रादीनि मनो हृदयं बुद्धिः शास्त्रादितत्त्वज्ञानम् तत्तद्रूपा च त्वम् भासि विश्वेषा या गतिः स्थितिश्च तद्रूपा च त्वमेव ॥ ८ ॥

त्वमेवेति । वेदा यजुरादयः तद्रूपा च त्वमेवासि । प्रणव ओङ्काररूपा च त्वम् । स्मृतयो मन्वादिकथितधर्म्मशास्त्राणि तद्रूपा च त्वम् । संहिता महाभारताद्यस्तद्रूपा च त्वमेवासि । निगमः शम्भुप्रश्नः पार्व्वतीसुखजातः पद्यरूपो ग्रन्थविशेषः । आगमश्च शिवसुखागतमिरिजाननयातवासुदेवमतः पद्यरूपग्रन्थविशेष एव । तन्त्रं चास्विकासुद्दिश्य शिवोक्तो गणेशलिखितो ग्रन्थविशेष एव तत्तद्रूपा च त्वमेव । सर्व्वशास्त्रमयो वेदान्तादिसकलशास्त्ररूपा च त्वम् । शिवा कल्याणैकनिलयभूता च त्वमसि ॥ ९ ॥

महेति । जगत्संहर्त्रीत्वान्महाकाली त्वम् । सम्पत्तिबुद्धिहेतुत्वा-

सर्व्वज्ञा त्वं ज्ञानमयी नास्त्यवेद्यं तवान्तिके।
तथापि पृच्छसि प्राज्ञे! प्रीतये कथयामि ते ॥ ११ ॥
सत्यमुक्तं त्वया देवि! मनुजानां विचेष्टितम्।
जानन्तोऽपि हितं मर्त्ताः पापैराशु सुखप्रदैः ॥ १२ ॥
नाचरिष्यन्ति सद्धर्म्मं हिताहितबहिष्कृताः।
तेषां निश्रेयसार्थाय कर्त्तव्यं यत्तदुच्यते ॥ १३ ॥
अनुष्ठानं निषिद्धस्य त्यागो विहितकर्म्मणः।

महालक्ष्मीश्च त्वमेव। विद्याप्रदात्रीत्वान्महानीलसरस्वती च त्वमेवासि। अशेषजगत्सृष्टित्वान्महोदरी त्वम्। जगन्मोहयित्रीत्वान्महामाया च त्वम्। महारौद्री अत्युग्रा च त्वम्। महेश्वरी महैश्वर्यविशिष्टा च त्वम् ॥ १० ॥

सर्व्वज्ञेति। सर्व्वज्ञा अशेषपदार्थज्ञात्री। ज्ञानमयी मोक्षविषयप्रज्ञास्वरूपा च त्वमसि अतस्तवान्तिके त्वन्निकटेऽवेद्यमप्रज्ञेयं किञ्चिदपि नास्ति। ननु किञ्चिदपि ममावेद्यं नास्ति चेत् कथं पृच्छामीत्याशङ्क्यमानां प्रत्याह तथापीति। यद्यप्येवं तथापि प्राज्ञे! हे प्रकृष्टज्ञानवति! प्रीतये पृच्छसि ममेति शेषः अहमपि ते तव प्रीतये कथयामि। ते तवाग्रतः ते तुभ्यमिति वा। काकाक्षिगोलकन्यायेन प्रीतये इति पूर्व्वोत्तराभ्यां क्रियाभ्यां सम्बध्यते ॥ ११ ॥

अधुना पूर्व्वोक्तमेवानुवदन्नुत्तरं दातुं प्रक्रमते सत्यमुक्तमित्यादि। हे देवि! मनुजानां मानवानां विचेष्टितं विरुद्धं चेष्टितं त्वया सत्यमुक्तम्। विचेष्टितमेवाह जानन्त इत्यादिना। आत्मनो हितं जानन्तोऽपि मनुजा सद्धर्म्मं साधुमार्गं नाचरिष्यन्ति नानुष्ठास्यन्ति। सद्धर्म्माचरणे हेतुं वदन्नुजानन् विशिनष्टि कथम्भूता मनुजाः आशु सुखप्रदैर्भ्रष्टिति सुखप्रापकैरवैधस्लोभमनसुरापानादिभिः पापैः कर्म्मभिर्म्मत्ताः अतएव हिताहिताभ्यां बहिष्कृताः अतो नाचरिष्यन्तीति भावः। तेषां मनुजानां निश्रेयसार्थाय मुक्तये यत् कर्त्तव्यं विधेयं तदुच्यते ॥१२।१३॥

नृणां जनयत. पापं क्लेशशोकामयप्रदम् ॥ १४ ॥
स्वानिष्टमात्रजननात् परानिष्टोपपादनात् ।
तदेव पापं द्विविधं जानीहि कुलनायिके ! ॥ १५ ॥
परानिष्टकरात् पापात् मुच्यते राजशासनात् ।
अन्यस्मान्मुच्यते मर्त्यः प्रायश्चित्तात् समाधिना ॥ १६ ॥
प्रायश्चित्यैरथवा दण्डैर्न पूता ये कृतांहसः ।
नरकान्न निवर्त्तन्ते इहामुत्र विगर्हिताः ॥ १७ ॥
तत्रादौ कथयाम्यद्ये ! नृपशासननिर्णयम् ।

प्रथमतो निषिद्धकर्म्मानुष्ठानविहितकर्म्माननुष्ठानाभ्यां पापोत्पत्तिरिति ब्रूते अनुष्ठानमित्यादिना । निषिद्धस्य कर्म्मणोऽननुष्ठानमाचरणं विहितकर्म्मणस्त्यागोऽनाचरणं नृणां क्लेशशोकामयप्रद दुःखशोकव्याधिप्रदायक पापं जनयत उत्पादयत. ॥ १४ ॥

अथ पूर्व्वोक्तपापस्य सहेतुकं द्वैविध्यं सम्पादयति स्वानिष्टेत्यादिना । कुलनायिके हे कुलेश्वरि ! स्वानिष्टमात्रजननादात्मन एवानीप्सितस्योत्पादनात् तथा परानिष्टोपपादनादन्यानाकाङ्क्षितस्यापि जननात्तदेव पूर्व्वोक्त पापं द्विविध द्विप्रकारक जानीहि प्रतीहि ॥ १५ ॥

एवं द्विविधपापोत्पत्ति प्रदर्श्येदानीं तस्माद्विमुक्तेरुपायं वदति परानिष्टेत्यादिना । परानिष्टकरादन्यस्याप्यनाकाङ्क्षितोत्पादकात् पापात् राजशासनात् राजदण्डात् मर्त्यो जनो मुच्यते मुक्तो भवति । कर्म्मकर्त्तरि लट् । अन्यस्मात् स्वानिष्टमात्रजनकात् पापात्तु प्रायश्चित्त्या प्रायश्चित्तेन समाधिना चित्तवृत्तिनिरोधेन च मुच्यते ॥ १६ ॥

जातद्विविधपापाना प्रायश्चित्तदण्डाभ्यां पूतत्वाभावे सर्व्वदा नरकस्थायित्वं दर्शयितुमाह प्रायश्चित्यैरिति । ये कृतांहसः कृतपापा जनाः प्रायश्चित्त्या दण्डैर्वा पूताः पवित्रा न बभूवुः इह लोके परलोके च विगर्हिता विनिन्दिताः सन्तस्ते नरकान्न निवर्त्तन्ते तत्रैव तिष्ठन्तीत्यर्थः ॥ १७ ॥

यस्याङ्गनाक्षैर्यानि राजा यात्यधमाकृतिम् ॥ १८
भृत्यान् पुत्रानुदासीनान् प्रियानपि तथाप्रियान् ।
शासने च तथा न्याये समदृष्टावलोकयेत् ॥ १९ ॥
स्वयं चेत् कृतपापः स्यात् पीडयेदकृतांहसः ।
उपवासैश्च दानैस्तान् परितोष्य विशुध्यति ॥ २० ॥
वधार्हं मन्यमानः स्वं कृतपापो नराधिपः ।
त्यक्त्वा राज्यं वनं प्राप्य तपसात्मानमुद्दरेत् ॥ २१ ॥
गुरुदण्डं नैव राजा विदध्याल्लघुपापिषु ।

अथ राजशासननिर्णयं वदन्तमुल्लङ्घतो भूपतेर्नरकगामित्वमाह तत्रादावित्यादिना । हे आद्ये ! हे सर्वज्ञार्हत ! तत्र प्रायश्चित्तदण्डशासनयोर्मध्ये आदौ प्रथमतो दण्डशासननिर्णयं कथयामि । यस्य लङ्घनात् राजाऽधमाकृतिं याति ॥ १८ ॥

दण्डशासननिर्णयमेवाह भृत्यानित्यादिना । भृत्यान् भर्त्तव्यानित्यादीन् पुत्रानात्मजान् उदासीनान् अत्यन्तमित्रातिमित्रान् प्रियान् कृतान् तथा अप्रियान् अहितांश्च शासने तथा न्याये च राजा समदृष्ट्या तुल्यदृष्ट्यावलोकयेत् पश्येत् ॥ १९ ॥

नन्वकृतकिल्बिषान् पुरुषान् दण्डयतः स्वयं कृतकल्मषस्य कथं शुद्धिस्तत्राह स्वयं चेदित्यादिना । चेद्यदि राजा स्वयं कृतपापः स्यात् तदा उपवासैर्दानैश्च विशुध्यति । चेद्यदि अकृताऽसोऽकृतपापान् अन्यान् पीडयेद्दण्डयेत् तदा तानकृतांहस परितोष्य उपवासैर्दानैश्च विशुध्यति अत्र पापतारतम्यादुपवासदानयोस्तारतम्यं बोद्धव्यम् ॥ २० ॥

अथात्मानं वधार्हं मन्यमानस्य कृतदुष्कृतस्य भूपतेः प्रायश्चित्तमाह वधार्हमित्यादिना । स्वमात्मानं वधार्हं वधयोग्यं मन्यमानः कृतपापो नराधिपो राज्यं त्यक्त्वा वनं प्राप्य तपसात्मानमुद्दरेत् शोधयेत् ॥ २१ ॥

न लघुं गुरुपापेषु विना हेतु विपर्य्यये ॥ २२ ॥
तस्मिन् यत् शासने शास्ता अनेकोन्मार्गवर्त्तिनः ।
पापेभ्यो निर्भये शस्तो लघुपापे गुरुर्दमः ॥ २३ ॥
सकृत्कृतापराधेन सत्रपे बहुमानिनि ।
पापाङ्गीरौ प्रशस्तः स्याद् गुरुपापे लघुर्दम ॥ २४ ॥
स्वल्पापराधी कौलश्चेत् ब्राह्मणो लघुपापकृत् ।
बहुमान्योऽपि दण्ड्यः स्याद्वचोभिरवनीभृता ॥ २५ ॥
न्यायं दण्ड प्रसादं च विचार्य्य सचिवैः सह ।
यो न कुर्य्यान्महीपालः स महापातकी भवेत् ॥ २६ ॥

अथ दण्डवैपरीत्ये हेतावसति लघुपापे गुरुदण्ड गुरुपापे च लघुदण्डं निषेधति गुर्व्वित्यादिना । विपर्य्यये दण्ड वैपरीत्ये हेतु विना लघुपापिषु जनेषु गुरुदण्ड राजा नैव विदध्यान्न कुर्यात् । गुरुपापेषु जनेषु लघुदण्डं न विदध्यात् ॥ २२ ॥

विना हेतु विपर्य्यये इत्यनेन वैपरीत्ये कारणसत्त्वे विपरीतदण्ड विदध्यादेवेति ध्वनितमतो हेतुदर्शनपूर्व्वक विपरीतदण्ड विदधाति तस्मिन्नित्यादिना श्लोकद्वयेन । यत् शासने यस्योन्मार्गवर्त्तिनो जनस्य शासनेऽनेकोन्मार्गवर्त्तिनो बहवोऽसद्वर्त्मसु वर्त्तमाना जना शास्ता भवन्ति । तस्मिन् पापेभ्यो बहुभ्योऽपि दुरितेभ्यो निर्भये भयहीनेऽपि जने लघुपापेऽपि गुरुर्दमः शस्त ॥ २३ ॥

सकृत्कृतापराधेन सत्रपे लज्जे बहुमानिनि सम्मानिते पापाटेकस्मादपि भीरौ भयशीले जने गुरुपापेऽपि लघुर्दमः प्रशस्त ॥ २४ ॥

अथ कृतात्यापराधयोर्बहुमान्ययोरपि कौलब्राह्मणयोर्दण्डमाह स्वल्पापराधीत्यादिना । बहुमान्योऽपि कौल स्वल्पापराधी चेत् स्यात् तादृग् ब्राह्मणोऽपि लघुपापकृच्चेत्तदावनीभृता राज्ञा वचोभिर्दण्ड्य स्यात् ॥ २५ ॥

अथ महीपालैर्विचारमकृत्वैव दण्डादिकं विदधतो महीपालस्य

न त्यजेत् पितरौ पुत्रो न त्यजेयुर्नृपं प्रजाः।
न त्यजेत् स्वामिनं भार्या विनतानतिपापिनः ॥२७॥
राज्यं धनं जीवनं च धार्मिकस्य महीपतेः।
संरक्षेयुः प्रजा यत्नैरन्यथा यान्त्यधोगतिम् ॥ २८ ॥
मातरं भगिनीञ्चापि तथा दुहितरं शिवे!।
गन्तारो ज्ञानतो ये च महागुरुनिघातकाः ॥ २९ ॥
कुलधर्मं समाश्रित्य पुनस्त्यक्तकुलक्रियाः।
विश्वासघातिनो लोका अतिपातकिनः स्मृताः ॥३०॥
मातरं भगिनीं कन्यां गच्छतो निधनं दमः।

महापातकित्वमाह न्यायसिद्धान्तिना। सर्वैर्मन्त्रिभिः सह विचार्य न्यायदण्डप्रसादं च यो महीपालो न कुरुते स महापातकी भवेत् ॥२६॥

अथ स्त्रीपुत्रप्रजानां धर्म्मभाङ्न त्यजेदित्यादिना। पुत्रः पितरौ मातापितरौ न त्यजेत्। प्रजाः क्रूरं राजानं न त्यजेयुः भार्या स्वामिनं पतिं न त्यजेत् नन्वतिपातकिनोऽपि पित्राद्यो न हातव्या इत्याह विनेति। अनतिपापिनस्तान् पित्राद्यान्विनतान्। अतिपातकिनस्तु त्याज्या एवेत्यर्थः ॥ २७ ॥

धार्म्मिकभूपते राज्यादिकमरक्षतां प्रजानां दोषमाह राज्यमित्यादिना। धार्मिकस्य महीपते राज्यं धनं जीवनं च प्रजाः यत्नैः संरक्षेयुः अन्यथा राज्यादिकमरक्षन्त्यस्ता अधोगतिं यान्ति ॥ २८ ॥

पित्राद्योऽतिपातकिनस्त्वेतत्याज्या इत्युक्तं ते च के इत्याकाङ्क्षायामतिपातकिनो निरूपयति मातरमित्यादिना श्लोकद्वयेन। हे शिवे! मातरं जननीं भगिनीं स्वसारं तथा दुहितरं पुत्रीं चापि ज्ञानतो ये गन्तारो भवन्ति तथा ज्ञानतो महागुरूणां मात्रादीनां निघातका हन्तारो ये। कुलधर्मं समाश्रित्य पुनस्त्यक्तकुलक्रियाः ये। ये च विश्वासघातिनो लोकाः तेऽतिपातकिनः स्मृताः ॥ २९। ३० ॥

तासामपि सकामानां तदेव विहितं शिवे ! ॥ ३१ ॥
मातापितृस्वसुस्तल्पं स्नुषां श्वश्रुं गुरुस्त्रियम् ।
पितामहस्य वनितां तथा मातामहस्य च ॥ ३२ ॥
पित्रोर्भ्रातुः सुतां जायां भ्रातुःपत्नीं सुतामपि ।
भागिनेयीं प्रभो पत्नीं तनयाञ्च कुमारिकाम् ॥ ३३ ॥
गच्छतां पापिनां लिङ्गच्छेदो दण्डो विधीयते ।
आसामपि सकामानां दमो नासानिकृन्तनम् ।
गृहान्निर्व्यापणं चैव पापादस्माद्विमुक्तये ॥ ३४ ॥
सपिण्डदारतनयाः स्त्रियं विश्वासिनामपि ।
सर्वस्वहरणं केशवपनं गच्छतो दमः ॥ ३५ ॥

अथ मात्रादिगामिनः पुरुषस्य सकामानां तासां च दण्डमाह मातरमिति । हे शिवे ! मातरं जनयित्रीं तथा भगिनीं तथा कन्यां पुत्रीं च गच्छतः पुंसो निधनं मरणमेव दमो दण्डः । सकामानामासामपि तदेव मरणमेव दमनं निर्दिष्टम् । अथ मातृस्वस्रादिगामिनां पुंसां तासामपि सकामानां दण्डमाह मातापित्रित्यादिना पापादस्मादित्यन्तेन सार्द्धश्लोकेन । मातापित्रोः स्वसुस्तल्पं शय्यां मैथुनेच्छया गच्छतां तथा स्नुषां पुत्रवधूं तथा श्वश्रुं श्वशुरपत्नीं तथा गुरुस्त्रियं तथा पितामहस्य मातामहस्य च वनितां स्त्रियं तथा पित्रोर्भ्रातुः सुतां मातुलपितृव्ययोः पुत्रीम् । तयोरेव जायां भार्यां च तथा भ्रातुःपत्नीं तस्यैव सुतामपि तथा भागिनेयीं स्वसृतनयाम् । तथा प्रभोः पत्नीं तस्यैव तनयां पुत्रीं च तथा कुमारिकामविवाहितां स्त्रियं गच्छतां पापिनां लिङ्गच्छेदेन शस्त्रकर्त्तनेन दण्डो विधीयते । सकामानामासामप्यस्मात् पापात् विमुक्तये नासानिकृन्तनं नासिकाच्छेदनं गृहान्निर्व्यापणं दमो दण्डो निर्दिष्टः ॥ ३१—३४ ॥

अथ सपिण्डपत्नीतनयागामिनो विश्वासितस्त्रीगामिनश्च दण्डमाह सपिण्डेत्यादिना । सपिण्डानां दारास्तेषां तनयां च विश्वासिनामपि स्त्रियं

स्त्रीभिरेताभिरज्ञानाद् भवेत् परिणयो यदि ।
ब्राह्मेण वापि शैवेन ज्ञात्वा तास्तत्त्यजेत् ॥ ३६ ॥
सवर्णदारान् यो गच्छेत् अनुलोम परस्त्रियम् ।
दमस्तस्य धनादानं मासैक कणभोजनम् ॥ ३७ ॥
राजन्यवैश्यशूद्राणां सामान्यानां वरानने ।
ब्राह्मणीं गच्छतां ज्ञानाल्लिङ्गच्छेदो दमः स्मृतः ॥ ३८ ॥
ब्राह्मणीं विक्रतां कृत्वा दैवान्निर्यापयेन्नृपः ।
वीरस्त्रीगामिनां तासामिवमेव दमो विधिः ॥ ३९ ॥

स्त्रीभिरेताभिरज्ञानाद् भवेत् परिणयो यदि । ब्राह्मेण वापि शैवेन ज्ञात्वा तास्तत्त्यजेत् ॥ ३६ ॥

अथाज्ञानतो वेदोक्तविधिवैपरीत्येन सपिण्डादिनिषिद्धां ब्राह्मस्य यद्विधेयं तदाह स्त्रीभिरित्यादिना । एताभिः सपिण्डाद्यितनयादिभिः स्त्रीभिर्ब्राह्मेण वेदोक्तविधिना शैवेन शिवोक्तविधिना वा यद्यज्ञानात् परिणयो विवाहो भवेत् तदा ज्ञात्वा ताः स्त्रीस्तत् क्षणमेव त्यजेत् ॥ ३६ ॥

ननु सवर्णदारान् सवर्णेतरवर्णदारांश्च गच्छतः कथं पुंसस्त्याह सवर्णेत्यादिना । यः पुमान् सवर्णदारान् गच्छेत् तयानुलोमं परस्त्रियं च यो गच्छेत् यथा ब्राह्मण क्षत्रिया क्षत्रियो वैश्यस्त्रियम् । तस्य धनादानं मासैक कणभोजनं च दमो ज्ञेयः ॥ ३७ ॥

अथ ज्ञानपूर्वकब्राह्मणागमने ज्ञात्वयादीनां सकामायास्त्वस्य दण्डमाह राजन्येत्यादिना । वरानने ! श्रेष्ठाङ्गने ! च पुनर्ब्राह्मणीं गच्छतां राजन्यवैश्यशूद्राणां सामान्यानामन्त्यजानां च लिङ्गच्छेदो दमो दण्ड स्मृतः ॥ ३८ ॥

सकामां ब्राह्मणीमपि विक्रतां अथवाङ्गहीनां कृत्वा नृपो दैवान्निर्यापयेन्निःसारयेत् । अथ वीरस्त्रियो गच्छतां तासां च दण्डमाह वीरेति । वीरस्त्रीगामिनां सकामानां तासां दैवेन दुर्भाग्येन दमो

दुरात्मा यस्तु रमते प्रतिलोम परस्त्रिया ।
दण्डस्तस्य धनादानं त्रिमासं कणभोजनम् ॥ ४० ॥
सकामायाः स्त्रियाश्चापि दण्डस्तद्विधीयते ।
बलात्कारगता भार्य्या त्याज्या पाल्या भवेत् शिवे ॥ ४१ ॥
ब्राह्मी भार्य्याथवा शैवी कामतो वाप्यकामत ।
सर्वथा हि परित्याज्या स्याच्चेत् परगता सकृत् ॥ ४२ ॥
गच्छता वारनारीषु गवादिपशुयोनिषु ।
शुद्धिर्भवति देवेशि त्रिरात्रं कणभोजनात् ॥ ४३ ॥

विधिर्विधातव्य इत्यर्थ । विधिरिति वि-पूर्वकाद्धाञ. उपसर्गे धो किरिति कर्मणि कि ॥ ३९ ॥

अथ सवर्णोनसवर्ण स्त्रीगामिनां पुंसां तस्याश्च सकामाया दण्ड माह दुरात्मेत्यादिना । यो दुरात्मा दुष्टचित्तो दुर्बुद्धिर्दुःस्वभावो वा प्रतिलोम परस्त्रिया सह रमत यथा शूद्रो वैश्यस्त्रियम् । तस्य पुंसो धनादान त्रिमासं कणभोजन च दण्डो भवति ॥ ४० ॥

सकामाया स्त्रियाश्च तद्वत् पूर्ववद्दण्डो विधीयते । "आत्मा देह मनोब्रह्मस्वभावधृतिबुद्धिषि"ति कोष । अथ बलात्कारेण परपुरुष गमिताया अबलायास्त्याग पालन च पुंसा विधेयमित्याह *बलादित्यादिना । हे शिवे ! बलात्कारेण परपुंसा गता या भार्य्या सा त्याज्या पालादिभि पालनीया भवेत् ॥ ४१ ॥

अथ कामाकामाभ्या परगतयोर्ब्राह्मीशैव्योर्भार्य्ययोस्त्याग एवोचित इत्याह ब्राह्मीत्यादिना । ब्राह्मी वेदोक्तविधिना परिणीता अथवा शैवी शिवोक्तविधानेन परिणीता भार्य्या सकृदेकवारमपि परगता चेत्तदा सर्वथा सर्वप्रकारेण परित्याज्या स्यात् ॥ ४२ ॥

अथ वेश्यागामिना पशुयोनिगामिना च प्रायश्चित्तमाह गच्छतेत्यादिना । हे देवेशि ! वारनारीषु वेश्यासु तथा गवादिपशु योनिषु गच्छता जनानां त्रिरात्र कणभोजनाच्छुद्धिर्भवति ॥ ४३ ॥

गच्छतां कामतः पुंसः स्त्रियाः पायुं दुरात्मनाम् ।
वध एव विधातव्यो भूभृता शम्भुशासनात् ॥ ४४ ॥
बलात्कारेण यो गच्छेदपि चाण्डालयोषितम् ।
वधस्तस्य विधातव्यो न चन्तव्यः कदापि सः ॥ ४५ ॥
परिणीतासु या नार्य्यो ब्राह्मैर्वा शैववर्त्मभिः ।
ता एव दारा विज्ञेया अन्याः सर्वाः परस्त्रियः ॥ ४६ ॥
कामात् परस्त्रियं पश्यन् रहः सम्भाषयन् स्पृशन् ।
परिष्वज्योपवासेन विशुध्येद् द्विगुणक्रमात् ॥ ४७ ॥
कुर्वन्येवं सकामा या परपुंसा कुलाङ्गना ।

अथ स्त्रीपुंसयोः पायुं गच्छता दण्डमाह गच्छतामित्यादिना । पुंसः पुरुषस्य स्त्रियाश्च पायुं गुदं कामतो गच्छतां दुरात्मनां कष्टतां राज्ञा शम्भुशासनाद्वध एव विधातव्यः ॥ ४४ ॥

बलात्कारेण परस्त्रीगामिनामपि वध एव दण्ड इत्याह बलादित्यादिना । बलात्कारेण चाण्डालयोषितमपि यो गच्छेत्तस्यापि वधो विधातव्यः । कदापि स न चन्तव्यः अपि शब्देन ब्राह्मणादिगामिनां तु सुतरामेव वधो विधातव्य इति ध्वनितम् ॥ ४५ ॥

अथोक्तवक्ष्यमाणेषु तत्तल्लोकेष्वाकाङ्क्षितत्वात् स्वस्त्रीः परस्त्रीश्च निरूपयति परिणीता इत्यादिना । ब्राह्मैर्वेदोक्तवर्त्मभिः शैवोक्तवर्त्मभिर्वा यास्तु नार्य्यः परिणीता उद्वाहितास्ता एव दाराः स्वस्त्रियो विज्ञेया अन्यास्तद्भिन्नाः सर्वाः परस्त्रियो विज्ञेयाः ॥ ४६ ॥

अथ कामतः परस्त्रीदर्शनादिकं कुर्वतः प्रायश्चित्तमाह कामादित्यादिना । कामात् परस्त्रियं पश्यन् तथा रहः एकान्ते सम्भाषयन् तथा सम्भाषणं कुर्वन् तथा स्पृशंश्च परिष्वज्य नामालिङ्गनं च द्विगुणक्रमादुपवासेन जनो विशुध्येत् । यथा कामतः परस्त्रीदर्शने एकोपवासेन सम्भाषणे उपवासद्वयेन स्पर्शने उपवासचतुष्टयेन आलिङ्गने अष्टभिस्तथा शुद्धिः ॥ ४७ ॥

उक्तोपवासविधिना स्वात्मानं परिशोधयेत् ॥ ४८ ॥
ब्रुवन्निन्द्रां वचः स्त्रीषु पश्यन् गुह्यं परस्त्रियाः ।
हसन् गुरुतरं मर्त्यः शुध्येद् द्विरुपवासतः ॥ ४९ ॥
दर्शयन्नग्नमात्मानं कुर्वन्नग्नं तथापरम् ।
त्रिरात्रमशनं त्यक्त्वा शुद्धो भवति मानवः ॥ ५० ॥
पत्न्याः पराभिगमनं प्रमाणयति चेत् पतिः ।
नृपस्तदा तां तज्जारं शास्यात् शास्त्रानुसारतः ॥ ५१ ॥
प्रमाणं यद्यशक्तः स्यात् दयितोपपतेः पतिः ।
त्यक्त्वा तां पोषयेद् ग्रासैस्तिष्ठेच्चेत् पतिशासने ॥ ५२ ॥

अथ स्वइ परपुंसा सम्भाषणादिकं कुर्वत्या सकामायाः स्त्रियाश्चापि तदेव प्रायश्चित्तमित्याह कुर्वतीत्यादिना । या कुजाङ्गना कुलपालिका स्त्री सकामा सती परपुंसा सइ एव सम्भाषणादिकं कुर्वती बभूव सा पूर्वोक्तोपवासविधिना आत्मानं परिशोधयेत् ॥ ४८ ॥

ननु स्त्रीषु दुर्वचो वदत परस्त्रीगुह्य पश्यतो गुरुतरान् हसतश्च कथं शुद्धिस्तत्राह ब्रुवन्नित्यादिना । स्त्रीषु निन्द्यमव्यक्त वचो ब्रुवन् तथा परस्त्रिया गुह्य गोप्यप्रदेश पश्यन् तथा गुरुतर हसन्मर्त्यो द्विरुपवासत शुध्येत् ॥ ४९ ॥

नन्वात्मान नग्न दर्शयत परञ्च तादृग कुर्वत कथं शुद्धिस्तत्राह दर्शयन्नित्यादिना । आत्मान नग्न दर्शयन् तथापरं नग्न कुर्वन्मानवो त्रिरात्रमशनं भोजनं त्यक्त्वा शुद्धो भवति ॥ ५० ॥

अथ स्वपतिप्रमाणितान्यपुरुषगमनाया स्त्रिया तज्जारस्य च दण्डमाह पत्न्या इत्यादिना । पतिश्चेद्यदि पत्न्याः पराभिगमन प्रमाणयति तदा नृपस्तया जारं च शास्त्रानुसारत पूर्वोक्तविधानात् शास्यात् ॥ ५१ ॥

अथोपपतिप्रमाणेऽशक्तपतिकायाः शङ्कितव्यभिचारायाः स्त्रियास्तु गपोषणे विधातव्ये इत्याह प्रमाणेत्यादिना । दयितोपपतेः पत्न्या

रममाणामुपपतौ पश्यन् पत्नीं पतिस्तदा ।
निघ्नन् वनितया जार वधार्हो नैव भूभृतः ॥ ५३ ॥
भर्तुर्निवारणं यत्र गमने येन भाषणे ।
प्रयाणाङ्गाषणात्तत्र त्यागार्हा स्यात् कुलाङ्गना ॥ ५४ ॥
मृते पत्यौ स्वधर्मेण पतिबन्धुवशे स्थिता ।
अभावे पितृबन्धूनां तिष्ठन्ती दायमर्हति ॥ ५५ ॥
द्विर्भोजन परान्नं च मैथुनामिषदूषणम् ।
पर्यङ्कं रत्नवासश्च विधवा परिवर्जयेत् ॥ ५६ ॥

जारस्य प्रसङ्गे यदि पतिरयक्तः स्यात्तर्हि तां दयिता त्यक्त्वा चेद् यदि पतियासने तिष्ठेत् भर्तुराज्ञां न लङ्घेत तदा ग्रासैकवस्त्रौ त्यजेत् ॥ ५२ ॥

ननु मूढोपपतिना रममाणां पत्नीमवलोक्य सजारां तां हन्तुर्भर्तुर्वधार्हत्वं स्याद्वा नेति सन्दिहाना गिरिजा प्रति ब्रूते रममाणामित्यादिना । पतिर्भर्त्ता यदोपपतौ रममाणां पत्नीं पश्यन्नासीत्तदा वनितया सह जार निघ्नन् पतिर्भूभृतो राज्ञो वधार्हो नैव भवेत् तदा निघ्नन्निति वनेनान्यकाले निघ्नतो वधार्हत्वं स्यादेवेति ध्वनितम् ॥ ५३ ॥

अथ भर्तृनिषिद्धस्थाने गच्छन्त्यास्तन्निषिद्धमन्यपुरुषेण सह भाषणं च कुर्वत्या स्त्रियास्त्यागार्हत्वं विदधाति भर्तुरित्यादिना । यत्र स्थाने गमने येन पुंसा सह भाषणे च भर्तुर्निवारणं जात तत्र प्रयाणाङ्गाषणाच्च कुलाङ्गनापि त्यागार्हा स्यात् ॥ ५४ ॥

अथ प्रसङ्गात् पतिबान्धवादिवशे स्वधर्मेण तिष्ठन्त्या मृतपतिकाया दायभाङ्गमाह मृते इत्यादिना । पत्यौ मृते सति पतिबन्धुवशे स्वधर्मेण स्थिता । पतिबन्धूनामभावे पितृबन्धूनां वशे तिष्ठन्ती सती स्त्री दायमर्हति ॥ ५५ ॥

अनन्तरोक्तश्लोके विधवा धर्मेणासाकाङ्क्षितत्वात्तामिङ्गयति द्वि-

नाङ्गमुद्वर्त्तयेद्वासैर्नाभ्यालापमपि त्यजेत् ।
देवव्रता नयेत् कालं वैधव्यं धर्ममाश्रिताः ॥ ५७ ॥
न विद्यते पिता यस्य शिशोर्माता पितामहः ।
नियतं पालने तस्य मातृबन्धु प्रशस्यते ॥ ५८ ॥
मातुर्माता पिता भ्राता मातुर्भ्रातुः सुतास्तथा ।
मातुः पितुः सोदराश्च विज्ञेयाः मातृबान्धवाः ॥ ५९ ॥
पितुर्माता पिता भ्राता पितुर्भ्रातुः स्वसुः सुता ।
पितुः पितुः सोदराश्च विज्ञेया पितृबान्धवाः ॥ ६० ॥

भोजनमित्यादिश्लोकद्वयेन । विधवा स्त्री द्विर्भोजनं परस्यान्न मैथुनं रतिम् । आमिषं मत्स्यादिकं भूषणमलङ्कारं पर्य्यङ्कं खट्वां रक्तवासो रक्तं वस्त्रं च परिवर्জ্জयेत् ॥ ५६ ॥

नाङ्गमिति । वैधव्यं धर्ममाश्रिता विधवा वासैः पिष्टैर्दृष्टैर्वा सुगन्धिद्रव्यैः अङ्गं नोद्वर्त्तयेत् नोत्सादयेत् । वासते वैस्ते वासाः. कैरङ्गेऽच् । आभ्यमालापमपि त्यजेत् ननु आभ्यालापाभावे कथं कालं क्षिपेत्तत्राह देवेत्यादिना । देवव्रता सती काल नयेत् स्नेहनाभादिकीर्त्तनादिना काल क्षिपेदित्यर्थः ॥ ५७ ॥

ननु मृतमातापितृपितामहस्य शिशोः पालने पितृबन्धु मातृबन्धोर्मध्ये कतरस्य प्राशस्त्यमिति पृच्छन्तीं देवीं प्रत्याह न विद्यत इत्यादिना । यस्य शिशो पिता माता पितामहश्च न विद्यते तस्य पालने नियत निश्चित मातृबन्धु प्रशस्यते ॥ ५८ ॥

ननु के ते मातृबन्धवाद्य इत्याह मातुरित्यादिना । मातुर्माता मातामही मातु पिता मातामहश्च मातुर्भ्राता मातुलः तथा मातुर्भ्रातु सुता मातुलसुताः मातृ पितुर्भ्रातामहस्य सोदराश्च मातृबान्धवा विज्ञेया ॥ ५९ ॥

अथ पितृबान्धवानाह पितुरित्यादिना । पितुर्माता पितामही पितु.पिता पितामहः पितुर्भ्राता पितृव्य. पितुर्भ्रातुः सोदर्याः सुताः

पत्युर्माता पिता भ्राता पत्युर्भ्रातुः स्वसुः सुताः ।
पत्युःपितुः सोदराश्च विज्ञेया: पतिबान्धवाः ॥ ६१ ॥
पित्रे मात्रे पितुः पित्रे पितामह्यै तथा स्त्रियै ।
अयोग्यसूनवे पुत्रहीनमातामहाय च ॥ ६२ ॥
मातामह्यै दरिद्रेभ्य एभ्यो वासस्तथाशनम् ।
दापयेन्नृपतिः पुंसा यथाविभवमम्बिके ! ॥ ६३ ॥
दुर्वाच्यं कथयन् पत्नीमेकाहमशनं त्यजेत् ।
ताडयन् सप्ताहं रक्तं पातयन् सप्तवासरान् ॥ ६४ ॥
क्रोधाद्वा मोहतो भार्यां मातरं भगिनीं सुताम् ।

पितुःस्वसुर्भगिन्याश्च सुताः पितृव्यपितृव्यामह्याश्च मातुलाः मातुः स्वसा विज्ञेयाः ॥ ६० ॥

अथ पतिबान्धवानाह पत्युरित्यादिना । पत्युर्भ्राता श्वशुरः पत्युः पिता श्वशुरः पत्युर्भ्राता सोदर पत्युर्भ्रातुः सुताः पुत्राः पत्युः स्वसुर्भगिन्याश्च सुताः पत्युःपितुः श्वशुरस्य सोदराश्च पतिबान्धवा विज्ञेयाः ॥ ६१ ॥

अथ दरिद्रेभ्यः पित्रादिभ्यो भोजनादिकं पुरुषेण नरपतिर्दापयेदित्याह पित्रे इत्यादिना द्वयेन हि । अम्बिके ! जगज्जननि ! पित्रे तथा मात्रे तथा पितुःपित्रे पितामह्यै च तथा अयोग्यसूनवे अयोग्यपुत्रायै स्त्रियै पुत्रहीनमातामहाय च ॥ ६२ ॥

तादृश्यै मातामह्यै च दरिद्रेभ्य एभ्यः पित्रादिभ्यो यथाविभवं विभवमनतिक्रम्य वासो वस्त्रं तथाशनं भोज्यं नृपतिः पुंसा दापयेत् ॥ ६३ ॥

अथ पत्न्यै दुर्वाच्यं कथयन्तां ताडयतस्तस्या रक्तं च पातयत क्रमतः प्रायश्चित्तमाह दुर्वाच्यमित्यादिना । पत्नीं पतिर्दुर्वाच्यमवक्तव्यं वचः कथयन् जन एकाहमशनं भोजनं त्यजेत् तां सप्ताहं ताडयंस्तदहमशनं त्यजेत् । तस्या रक्तं पातयन् सप्तवासरानशनं त्यजेत् ॥ ६४ ॥

वदन्नुपोष्य सम्माहं विशुध्येच्छिवशासनात् ॥ ६५ ॥
अखण्डेनोद्वाहितां कन्यां कालातीतेऽपि पार्थिवः ।
जानन्नुद्वाहयेत् भूयो विधिरेषः शिवोदितः ॥ ६६ ॥
परिणीता न रमिता कन्यका विधवा भवेत् ।
साप्युद्वाह्या पुनः पित्रा शैवधर्मेष्वयं विधिः ॥ ६७ ॥
उद्वाहाद् द्वादशे पक्षे पत्यन्तात् गतहायने ।
प्रसूते तनयं योग्यं न सा पत्नी न सः सुतः ॥ ६८ ॥

क्रोधादमर्षान्मोहतोऽविवेकाद्वा भार्य्यायां मातृत्वादि वदतः प्रायश्चित्तमाह क्रोधादित्यादिना । क्रोधादमर्षान्मोहतोऽविवेकाद्वा भार्य्यां मातर भगिनी सुतां पुत्रीं वा वदन् पुमान् शिवशासनात् सम्माहमुपोष्य विशुध्येत् ॥ ६५ ॥

नन्वसंस्कृतपरिणीतायाः कन्यायाः पुनरुद्वाहो राज्ञा विधापयितव्य इत्याह अखण्डेनेत्यादिना । कालेऽतीतेऽपि जानन् पार्थिवो भूय अखण्डेन नखभङ्गेनोद्वाहिता कन्या भूय पुनरुद्वाहयेत् । ननु वेदाद्यसम्मतत्वात् कथं तत्र शास्त्रं विधिरिति तत्र आह विधिरेष शिवोदित शिवभाषितो विधि । अखण्ड इति नखभङ्गेऽखण्ड इति ठः ॥ ६६ ॥

अथ परिणीतायाः स्खलितभर्तृकायाः कन्यायाः पुनरुद्वाहः पित्रा कार्य इत्याह परिणीतेत्यादिना । या परिणीता विवाहिता कन्या भर्त्रा न रमिता सती विधवा भवेत् सा परिणीतापि कन्या पित्रा पुनरुद्वाह्या भवेत् । अत्र प्रमाणं दर्शयति शैवेति विधिरय शैवधर्मेषु निरूपितः ॥ ६७ ॥

अथोद्वाहात् षष्ठे मासि प्रस्खलनपुष्टतनयायाः भर्तृमरणात् प्रस्खलतनयायाश्च स्त्रियास्तत्पत्नीत्वं बालस्य तत्सुतत्वञ्च व्यावर्त्तयति उद्वाहादित्यादिना । उद्वाहाद् द्वादशे पक्षे षष्ठे मासि योग्यं पुष्टं यं तनय या प्रसूते उत्पादयति पत्यन्तात् गतहायने पतिमरणात् पति-

आगर्भात् पञ्चमासान्तगर्भं या स्रावयेद्धिया ।
तदुपायकृत ताञ्च यातयेत्तीव्रताड़नैः ॥ ६९ ॥
पञ्चमात् परतो मासात् या स्त्री भ्रूणं प्रपातयेत् ।
तत्प्रयोक्तुश्च तस्याश्च पातक स्याद्वधोद्भवम् ॥ ७० ॥
यो हन्ति ज्ञानतो मर्त्तं मानवः क्रूरचेष्टितः ।
वधस्तस्य विधातव्य. सर्वथा धरणीभृता ॥ ७१ ॥
प्रमादाद् भ्रमतोऽज्ञानात् घ्नन्तवरमरिन्दम: ।
द्रविणादानतस्तीव्रताड़नैस्तं विशोधयेत् ॥ ७२ ॥

वर्षे य तनय प्रसूते सा पत्नी न स्यात् स च सुतो न स्यात् । ता पुत्र-लोप्त्रं च जारजात विदित्वा तयोस्त्यागं कुर्यादिति भाव ॥ ६८ ॥

अथ गर्भाधयमारभ्य पञ्चमासाभ्यन्तर एव गर्भं स्रावयन्त्या स्त्रिया-स्तदुपायकर्त्तुश्च दण्डमाह आगर्भादित्यादिना । आगर्भाद्गर्भमारभ्य पञ्चमासान्त पञ्चमासाभ्यन्तरे गर्भे धिया बुद्ध्या या स्रावयेत्ताम् । तदुपायकृतं गर्भस्रावोपायकर्त्तारं च तीव्रताड़नैर्भूयो यातयेत् पीडयेत् ॥ ६९ ॥

अथ पञ्चमासादूर्द्ध्वं गर्भं स्रावयन्त्या स्त्रियास्तत्प्रयोक्तुश्च वध-जन्य पातकमाह पञ्चमादित्यादिना । पञ्चमान्मासात् परतो या स्त्री भ्रूणं गर्भं प्रपातयेत् तस्यास्तत्प्रयोक्तुर्जनस्य च वधोद्भवं मनुष्यवधजन्यं पातकं स्यात् ॥ ७० ॥

ततश्च कथं विशुद्धि: स्यादिति पृच्छन्तीं पार्व्वतीं प्रत्याह य इत्यादिना । यः क्रूरचेष्टितो मानवो ज्ञानतो मर्त्त्यं मनुष्यं हन्ति तस्य सर्व्वथा सर्व्वप्रकारेण धरणीभृता राज्ञा वधो विधातव्यः तत एव तस्य शुद्धिर्नान्यथेति भावः ॥ ७१ ॥

अथ प्रमादादिभिर्मानवमारयतो विशुद्धिं दर्शयति प्रमादादित्यादिना । प्रमादादनवधानत या भ्रमतोऽज्ञानाद्वा यो नर हन्ति त

स्वतो वा परतो वापि बधोपाय प्रकुर्वत. ।
अज्ञानबधिनां दण्डो विहितस्तस्य पापिन ॥ ७३ ॥
मिथ: सङ्ग्रामयोद्धारमाततायिनमागतम् ।
निहत्य परमेशानि ! न पापार्हो भवेन्नर: ॥ ७४ ॥
अङ्गच्छेदे विधातव्यं भूभृताङ्गनिकृन्तनम् ।
प्रहारे च प्रहरणं नृषु पापं चिकीर्षुषु ॥ ७५ ॥
विप्रान् गुरूनवगुरेत् प्रहरेद् यो दुरासद: ।
धनादानाद्वस्तदाहात् क्रमतस्तं विशोधयेत् ॥ ७६ ॥

प्रजां जनमरिन्दमो विपक्षदमनकर्त्ता राजा द्रविणादानतो द्रव्यहरण-तस्तीव्रताडनैश्च विशोधयेत् ॥ ७२ ॥

अथ स्वत परतो वा नरबधोपायं कुर्वतो दण्डमाह स्वत इत्यादि-र्द्वना । स्वत परतो वा यो बधोपाय करोति तस्य बधोपायं प्रकुर्वत. पापिन अज्ञानबधिनामज्ञानतो नरहत्यया यो दण्ड स विहित ॥ ७३ ॥

ननु सङ्ग्रामहतबोधकस्य निहतागतातताथिनश्च वधार्हत्वं स्याच्च नेत्याशङ्क्याहाह मिथ इत्यादिना । हे परमेशानि ! मिथ परस्पर संग्रामे योद्धारं निहत्य तथाऽगतमाततायिनं च निहत्य नर: पापार्ह: पापभाक् न भवेत् । आततायिनो यथा अग्निदो गरदश्चैव शस्त्रपाणिर्धनापह । क्षेत्रदारापहारी च षड्ते आततायिन इति ॥ ७४ ॥

अथाङ्गच्छेदादिक कुर्वतो दण्डमाह अङ्गेत्यादिना । पापं चिकी र्षुषु कर्त्तुमिच्छुषु नृषु भूभृता भूपेनाङ्गच्छेदे सत्यङ्गनिकृन्तनमङ्गच्छेदनं प्रहारे च प्रहरणं विधातव्यम् ॥ ७५ ॥

अथ ब्राह्मणगुरुहननार्थं दण्डादिकमुदृयच्छतस्तान् प्रहरतश्च क्रमत प्रायश्चित्तमाह विप्रानित्यादिना । यो दुरासदो दुष्टो जनो

शस्त्रादिक्षतकायस्य षण्मासात् परतो मृतौ ।
प्रहर्त्ता दण्डनीयः स्यात् वधार्हो न हि भूभृतः ॥ ७७ ॥
राष्ट्रविप्लाविनो राज्ञ जिहीर्षून्नृपवैरिणाम् ।
रहोऽहितैषिणो भृत्यात् भेदकान्नृपसैन्ययोः ॥ ७८ ॥
योद्धुमिच्छुः प्रजा राज्ञा शस्त्रिणः पान्थपीडकान् ।
हत्वा नरपतिस्त्वेतान् नैव किल्बिषभाग् भवेत् ॥७९॥
यो हन्यान्मानवं भर्त्तुराज्ञयापरिहार्य्यया ।
भर्त्तुरेव वधस्तत्र प्रहर्तुर्न शिवाज्ञया ॥ ८० ॥

विप्रान् गुरूंश्च हन्तुमिति शेषः । अवगुरेत् दण्डादिकमुत्क्षिपेत् तान् प्रहरेद्वा तं क्रमतो धनादानात् हस्तदेहद्वारा विशोधयेत् ॥ ७६ ॥

अथ शस्त्रादिक्षतशरीरस्य षण्मासात् परतो मरणे सति प्रहर्तुर्दण्डनीयत्वं वधानर्हत्वं चाह शस्त्रादित्यादिना । शस्त्रादिना क्षतं कायो यस्य तस्य पुंस षण्मासात् परतो मृतौ सत्यां प्रहर्त्ता भूभृता राज्ञो दण्डनीयः स्यात् वधार्हो नैव स्यात् ॥ ७७ ॥

अथ देशोपद्रविणः राज्यहरणेच्छून् नृपतिविप्लावार्थं रहोऽहिताकाङ्क्षिणो नृपसैन्यभेदकर्त्तॄन् राज्ञा सह योद्धुमिच्छुः प्रजाः पान्थपीडकत्वशस्त्रिणश्च हतो महीपते पातकभागित्व नेत्याह राष्ट्रेत्यादि श्लोकद्वयेन । राष्ट्रविप्लाविनो देशोपद्रावकात् राज्ञ जिहीर्षून् राज्यहरणेच्छून्नृपवैरिणां राज्ञ शत्रूणां रहो हितैषिणो रहसि हिताकाङ्क्षिणो नृपसैन्ययोर्भेदकात् नृपस्य सैन्यस्य च भेद कुर्वतो भृत्यात् अमात्यादीन् तथा राज्ञा सह योद्धुमिच्छुः प्रजा तथा पान्थपीडकान् शस्त्रिणश्चैतान् हत्वा नरपतिः किल्बिषभाङ्न एव भवेत् ॥ ७८ । ७९ ॥

अथापरिहार्यप्रभ्राजिष्णुनाशस्त्रेण शस्त्रेण भृत्येन वा सतो घातयतो भर्त्तुरेव वधो विधातव्यो न भृत्यस्येत्याह य इत्यादिना । भर्त्तुरपरिहार्यया वाक्यलङ्घनीयया आज्ञया यो मानव हन्यात् तस्य प्रहर्तुस्तत्र हनने वध किन्तु शिवाज्ञया भर्तुरेव वधो विहित, अपरिहार्य

अयत्नपुंसः पशुना शस्त्रैर्वा म्रियते नरः ।
धनदण्डेन वा कायदण्डेनास्य विशोधनम् ॥ ८१ ॥
वह्निर्मुखान्नृपात्रासु नृपाग्रे प्रौढ़वादिनः ।
दूषकान् कुलधर्म्माणां शास्याद्राजा विगर्हितान् ॥ ८२ ॥
स्याप्यापहारिणं क्रूरं वञ्चक भेदकारिणम् ।
विवादयन्त लोकांश्च देशान्निर्य्यापयेन्नृप ॥ ८३ ॥
शुल्केन कन्यां दातृ च पुत्रं शस्ते प्रयच्छतः ।
देशान्निर्य्यापयेद्राजा पतितान् दुष्कृतात्मनः ॥ ८४ ॥

येत्नेन भर्त्राग्रालङ्घनशक्तो भ्रष्टो यदि मानवं हन्यात् तदा तस्यैव वध इति सूचितम् ॥ ८० ॥

नन्वनवधानस्य यस्य पुंसः शस्त्रादिभिर्मनुष्यो म्रियते तस्य विशुद्धिः कथं स्यात्तत्राह अयत्नेत्यादिना । अयत्नपुंसो यत्नहीनस्य यस्य पुरुषस्य पशुना गवाश्वादिना शस्त्रैः खड्गादिभिर्वा नरो म्रियते अस्य पुंसो धनदण्डेन कायदण्डेन वा विशोधनं भवेत् ॥ ८१ ॥

अथ राजाज्ञालङ्घिनस्तद्वध्ये प्रौढवादिन कुलधर्मदूषकाश्च राजा दण्डे प्रेदित्याह वह्निरित्यादिना । नृपात्रासु वह्निर्मुखान् राजाज्ञालङ्घिनो नृपाग्रे प्रौढवादिन प्रौढं वदत तथा कुलधर्माणा दूषकाश्च विगर्हितान्निन्दितानेतान् राजा शास्यात् ॥ ८२ ॥

अथ न्यासापहारकादिकान्निजदेशतो नृपो निष्कासयेदित्याह स्याप्येत्यादिना । स्याप्यापहारिण न्यासस्यापहर्त्तारं क्रूरं कठिन निर्दयं वा तथा वञ्चक तथा भेदकारिण तथा लोकान् विवादयन्तञ्च जनं नृपो देशान्निर्य्यापयेन्निष्कासयेत् ॥ ८३ ॥

अथ शुल्कग्रहणपूर्वक कन्यां पुत्र च ददतो जनान् भूपो देशान्निःसारयेदित्याज्ञापयति शुल्केनेत्यादिना । शुल्केन दाननिमित्तकधनेन हेतुना कन्यां विज्ञजनाय विशेषत. शस्ते क्लीबे कन्या दातृन् तथा शुल्केनैव कस्मिन् विशेषत. शस्ते पुत्र च प्रयच्छतो ददतो दुष्कृतात्मनः

मिथ्यापवादव्याजेन परानिष्टं चिकीर्षवः ।
यथापवादं ते शास्या धर्मज्ञेन महीभृता ॥ ८५ ॥
यो यत्परिमितानिष्टं कुर्यात्तेन मन्मितं धनम् ।
नृपतिर्दापयेत्तेन जनायानिष्टभागिने ॥ ८६
मणिमुक्ताहिरण्यादिधातूनां स्तेयकारिणः ।
करस्य वाङ्गोच्छेदो वा कार्यो मूल्यं विचारयन् ॥८७॥
महिषाश्वगवादीनां रत्नादीनां तथा स्त्रियः ।
बलेनापहृतां नृणां स्तेयिवद्दण्डितो दमः ॥८८ ॥
अज्ञानामल्पमूल्यस्य वस्तुनस्तेयिनं नृपः ।

यापहृत्यात् यावनुद्वेत् वा पतितान् जनान् राजा देशान्निर्व्यापयेत् । शास्ये इति सम्प्रदानस्याधिकरणत्वेन विवक्षितत्वात् सप्तम्यधिकरणे चेति सप्तमी ॥ ८४ ॥

अथ मिथ्यापवादच्छलेन परानिष्टजननाकाङ्क्षिणां दण्डमाह मिथ्येत्यादिना । मिथ्यापवादव्याजेन असत्यापवादच्छलेन परानिष्टमन्यानाकाङ्क्षिन् चिकीर्षवो ये मानवास्ते धर्मज्ञेन धर्मं जानता महीभृता राज्ञा यथापवादं शास्या गुर्वपवादे गुरुशासन लघुपवादे च लघुशासनं विधेयमित्यर्थः ॥ ८५ ।

ननु विनैवापराध परानिष्टं कुर्वतः पुंसः कोदण्डो विधास्यत इत्याह य इत्यादिना । यो नरो यस्य यत् परिमितमनिष्टं कुर्यात्तेन तस्मै अनिष्टभागिने जनाय तन्मन्मित धन नृपतिर्दापयेत् ॥ ८६ ॥

अथ मणिमुक्तादिधातुस्तेयिना दण्डमाह मणीत्यादिना । मणिमुक्ताहिरण्यादीनां धातूना स्तेयकारिणो नरस्य करस्य वाङ्गोवा छेदं मूल्यादीना मूल्य विचारयन् नृप कुर्यात् । अल्पमूल्यकमणिवादिस्तेये करच्छेदो बहुमूल्यकमणिवादिस्तेये वाङ्गोच्छेद कार्य इत्यर्थः ॥ ८७ ॥

अथ बलात्कारेण महिषाश्वादीनामपहारकृद्दण्डमाह महिषेत्या-

विशोधयेत्त पचैकं सप्ताहं वाशयन् क्षणम् ॥८९॥
विश्वासघातके पुंसि कृतघ्ने सुरवन्दिते ! ।
यज्ञैर्व्रतैस्तपोदानैः प्रायश्चित्तैर्न निष्कृतिः ॥९०॥
ये कूटसाक्षिणो मर्त्या मध्यस्था पक्षपातिन. ।
शास्यात्तास्तीव्रदण्डेन देशान्निर्व्यापयेन्नृपः ॥ ९१ ॥
षट् साक्षिणः प्रमाणं स्युश्चत्वारस्त्रय एव वा ।
अभावे द्वावपि शिवे ! प्रसिद्धौ यदि धार्म्मिकौ ॥ ९२॥

दिना । मक्षिकाश्वगवादीनां पशूनां तथा रत्नादीनां तथा शिशोश्च वलेनापहृतासूपहरता स्तेयं विवृणोति विहितं ॥ ८८ ॥

अथान्नस्य मद्यादिभिन्नाल्पमूल्यवस्तुनश्च स्तेयिनो विशुद्धिमाह अज्ञानादित्यादिना । अज्ञानात्तथाल्पमूल्यं वस्तुनश्च स्तेयी यो नरस्तं पचैकं सप्ताहं वा क्षणमाशयन् भोजयन्गुरुः शिशोधयेत् ॥ ८९ ॥

अथानेकयज्ञव्रतादिकं कुर्वतोरपि विश्वासघातककृतघ्नयोरनिष्कृतित्वमाह विश्वासेत्यादिना । हे सुरवन्दिते ! सुरवन्द्ये तथा कृतघ्ने उपकृतविनाशके च पुंसि यज्ञैरश्वमेधादिभिर्व्रतैः कृच्छ्रचान्द्रायणादिभिस्तपोभिर्दानैश्च प्रायश्चित्तैः पापविनाशनैरेनैर्निष्कृतिर्निष्कृतास्तन्निर्न स्यात् ॥ ९० ॥

अथ साक्षित्वे मिथ्याभिधायिनां पक्षपातिमध्यस्थानां च दण्डमाह ये कूटेत्यादिना । कूटसाक्षिणः साक्ष्ये मृषाभिधायिनो ये मर्त्यास्तथा पक्षपातिनो मध्यस्थाश्च ये तानृपस्तीव्रदण्डेन शास्यात्तथा देशान्निर्व्यापयेत् ॥ ९१ ॥

ननु कति साक्षिणः प्रमाणं भवेयुरित्यपेक्षायामाह षडित्यादिना । षट्चत्वारस्त्रयो वा साक्षिणः प्रमाणं स्युः । हे शिवे ! अभावे त्रिचतुरादिसाक्ष्यसत्त्वे यदि प्रसिद्धौ धार्म्मिकौ भवेतां तदा द्वावपि साक्षिणौ प्रमाणं स्यातां ॥ ९२ ॥

देशतः कालतो वापि तथा विषयतः प्रिये !।
परस्परसयुक्तश्चेद् अग्राह्यं साक्षिणां वचः ॥ ९३ ॥
अन्धानां वाक् प्रमाणं स्याद्बधिराणां तथा प्रिये !।
मूकानामेडमूकानां गिरसाङ्गीकृतिर्लिपिः ॥ ९४ ॥
लिपिः प्रमाणं सर्वत्र सर्वदा व प्रशस्यते।
विशेषाद्व्यवहारेषु न विनश्येच्चिरं यतः ॥ ९५ ॥
स्वीयार्थमपरार्थं वा कुर्वतः कल्पितां लिपिम्।
दण्डस्तस्य विधातव्यो द्विपाद्य कूटसाक्षिणः ॥ ९६ ॥

स्थानादिभेदत परस्परसयुक्त साक्षिणा वचो न प्रमाणमित्याह देशत इत्यादिना। हे प्रिये ! देशत स्थानत कालतो दिनप्रहरभेदत तथा विषयतो वस्तुतो वा चेद् यदि परस्परसयुक्तं सबन्ध साक्षिणो वचस्तदाऽग्राह्यं स्यात् ॥ ९३ ॥

ननु दर्शनाद्यशक्ता अन्धादय साक्षिणो भवितुमर्हन्ति न वेत्या शङ्कायामाह अन्धानामित्यादिना। हे प्रिये ! अन्धानामचक्षुषा तथा बधिराणां श्रोत्रहीनानां वाक् प्रमाणं स्यात् मूकानामवाचां तथा एड मूकानां श्रोत्रवचोरहितानां गिरसाङ्गीकृतिः स्वीकारो लिपिरक्षर च प्रमाण स्यात् ॥ ९४ ॥

अथान्यप्रमाणाल्लिपिप्रमाणस्य बलवत्त्वात् प्राशस्त्यमाह लिपिरित्यादिना। सर्वत्रैव कर्मणि विशेषात् क्रयविक्रयादिरूपव्यवहारेषु सर्वदा लिपि प्रमाणं प्रशस्यते। प्राशस्त्ये हेतुं दर्शयन्नाह न विनश्येदित्यादिना। यतश्चिर बहुकाल लिपिर्न विनश्येच्चिर तिष्ठेदित्यर्थः ॥ ९५ ॥

अथाक्षर कल्पयतो दण्डमाह स्वीयार्थमित्यादिना। स्वीयार्थमपरार्थं वा कल्पिता लिपि य. करोति तस्य तादृशीं लिपिं कुर्वतो जनस्य कूटसाक्षिण. साक्ष्येऽमुत्र वदतो द्विपाद्य द्विगुणो दण्डो राज्ञा विधातव्य ॥ ९६ ॥

अभ्रमस्याप्रमत्तस्य यदङ्गीकरणं सकृत् ।
स्वीयार्थे तत्प्रमाणं स्याद्वचसो बहुसाक्षिणाम् ॥ ९
यथा तिष्ठन्ति पुण्यानि सत्यमाश्रित्य पार्वति ! ।
तथानृत समाश्रित्य पातकान्यखिलान्यपि ॥ ९८ ॥
अतः सत्यविहीनस्य सर्वपापाश्रयस्य च ।
ताड़नाद्दमनाद्राजा न पापार्हः शिवाज्ञया ॥ ९९ ॥
सत्यं ब्रवीमि सङ्कल्प्य स्पृष्ट्वा कौल गुरु द्विजम् ।
गङ्गातोय देवमूर्त्तिं कुलशास्त्रं कुलामृतम् ॥ १०० ॥
देविनिर्म्माल्यमथवा कथनं शपथो भवेत् ।
तत्रानृत वदन् मर्त्यः कल्पान्त नरकं व्रजेत् ॥ १०१ ॥

बहुसाक्षिवचोभ्योऽप्रमत्ताऽभ्रान्तजन स्वयं कृतैकवारस्वीकार-रूपप्रमाणस्यातिप्राशस्त्यं दर्शयितुमाह अभ्रमस्येत्यादिना । अभ्रमस्य भ्रान्तिरहितस्याप्रमत्तस्य सावधानस्य यत् सकृदेकवारमपि अङ्गीकरण स्वीकारस्तत् स्वीयार्थे बहु साक्षिणामपि वचसो भाषणादधिक प्रमाण स्यात् ॥ ९७ ॥

अथाऽसत्यस्याखिलपातकाश्रयत्वं व्याहरंस्तदाश्रयान्नानवान् दण्ड-यतो राज्ञः पापानर्हत्वमाह यथेत्यादिना शिवाज्ञयेत्यन्तेन श्लोकद्वयेन । हे पार्वति ! यथा सत्यमाश्रित्य पुण्यानि तिष्ठन्ति तथाऽनृतमसत्य समाश्रित्याऽखिलान्यपि पातकास्तिष्ठन्ति ॥ ९८ ॥

अतः सत्यविहीनस्य सर्व्वपापाश्रयस्य च जनस्य ताडनाद्दमनाद्वन दण्डाच्च राजा शिवाज्ञया पापार्हः पापभाक् न स्यात् ॥ ९९ ॥

अथ शपथस्वरूप निरूपयंस्तत्रानृतं ब्रुवतो मर्त्यस्य नरकगा-मित्वं विदधाति सत्यमित्यादिना श्लोकद्वयेन । सत्यमहं ब्रवीमीति सङ्कल्प्य कौलं कुलीनं गुरुं निषेकादिकर द्विजं ब्राह्मण गङ्गातोय गङ्गाजल देवमूर्त्तिं देवताप्रतिमा कुलशास्त्र तन्त्रादिकं कुलामृतमा-

अपापजनिकार्य्याणां त्यागे वा ग्रहणेऽपि वा ।
तत् कार्य्यं सर्वथा मर्त्यैः स्वीकृतं शपथेन यत् ॥ १०२ ॥
स्वीकारोल्लङ्घनाच्छुध्येत् पञ्चमैकमभोजनैः ।
भ्रमेणापि तमुल्लङ्घ्य द्वादशाहं कणाशनैः ॥ १०३ ॥
कुलधर्म्मोऽपि सत्येन विधिना चेन्न सेवितः ।
मोक्षाय श्रेयसे न स्यात् कौले पापाय केवलम् ॥ १०४ ॥
सुरा द्रवमयी तारा जीवनिस्तारकारिणी ।
जननी भोगमोक्षाणां नाशिनी विपदां रुजाम् ॥ १०५ ॥

सत्यम् । देविनिर्माल्यं वा स्पृष्ट्वा कथनं शपथो भवेत् तत्र शपथेऽन्यथा मिथ्यां वदन् मर्त्त्यः कल्पान्तं कल्पपर्य्यन्तं नरकं व्रजेत् नरकाच्चरकान्तरं गच्छेत् ॥ १०० । १०१ ॥

अथ शपथपूर्व्वं स्वीकृतस्यापापजनककार्य्याणामवश्यकर्त्तव्यत्वमाह अपापेत्यादिना । न पापस्य जनिरुत्पत्तिर्येभ्यस्तेषां कार्य्याणां त्यागे वा ग्रहणेऽपि वा शपथेन मर्त्यैर्यत् स्वीकृतं तत् सर्व्वथा कार्य्यं न लङ्घनीयमित्यर्थः । ग्रहणेऽपि नेत्यनेन पापजनककर्म्मणां त्यागे एव यत् स्वीकृतं तस्यैवावश्यकर्त्तव्यत्वमिति ध्वनितम् ॥ १०२ ॥

ननूल्लङ्घिनामेकं पञ्चमभोजनैर्ज्जनं शुध्येत् भ्रमेणापि तं स्वीकारमुल्लङ्घ्य द्वादशाहं कणाशनैः शुध्येत् ॥ १०३ ॥

अथाऽविधिसेवितस्य कुलधर्मस्यापि पापजनकत्वमाह कुलेत्यादिना । सत्येन विधिना चेद् यदि सेवितो न स्यात् तदा कुलधर्मोऽपि कौले कुत्सिते मोक्षाय अपवर्गाय तथा श्रेयसे भद्राय च न स्यात् केवलं पापायैव भवति अतो विधिनैव सेव्यः कुलधर्म इति भावः ॥ १०४ ॥

अथ सुरेत्यादिभिस्त्रिभिः पद्यैर्द्यां स्तौति । सुरा द्रवमयी द्रवरूपा तारा भवति या जीवनिस्तारकारिणी जीवानां निस्तारकर्त्री या भोगमोक्षाणां जननी उत्पादयित्री या विपदां विपत्तीनां रुजां रोगाणां च नाशिनी ॥ १०५ ॥

दाहिनी पापसङ्घानां पावनी जगतां प्रिये ! ।
सर्वसिद्धिप्रदा ज्ञानबुद्धिविद्याविवर्द्धिनी ॥ १०६ ॥
मुक्तैर्मुमुक्षुभिः सिद्धैः साधकैः क्षितिपालकैः ।
सेव्यते सर्वदा देवैराद्ये ! स्वाभीष्टसिद्धये ॥ १०७ ॥
सम्यग्विधिविधानेन सुसमाहितचेतसा ।
पिबन्ति मदिरां मर्त्या अमर्त्या एव ते क्षितौ ॥ १०८ ॥
प्रत्येकतत्त्वस्वीकारादिधिना स्याच्छिवो नरः ।
न जाने पञ्चतत्त्वानां सेवनात् किं फलं भवेत् ॥ १०९ ॥
इयञ्चेत् वारुणी देवी निपीता विधिवर्जिता ।
नृणां विनाशयेत् सर्वं बुद्धिमायुर्यशोधनम् ॥ ११० ॥

या पापसङ्घानां पापसमूहानां दाहिनी दग्धी । हे प्रिये ! या जगतां पावित्री शुद्धिकर्त्री या सर्वसिद्धिप्रदा सर्वासां सिद्धीनां प्रदात्री या ज्ञानबुद्धिविद्याविवर्द्धिनी । मोक्षे धीर्ज्ञानम् ज्ञानादितत्त्वज्ञान बुद्धि आत्मज्ञान विद्या तेषां विवर्द्धयित्री ॥ १०६ ॥

हे आद्ये ! मुक्तैर्मुक्तिगामिभिः मुमुक्षुभिर्मोक्षेप्सुभिः सिद्धैः साधकैः क्षितिपालकैः राजभिर्देवैश्च स्वाभीष्टसिद्धये सर्वदा या सेव्यते सा सुरा द्रवमयी तारा बोद्धव्येति पूर्वेणान्वयः या सेव्यध्याहारलभ्ये ॥ १०७ ॥

सुरेत्यादिश्लोकत्रयेण मदिरां स्तुत्वेदानीं विधिपूर्वकृततत्पानकर्त्तुः साक्षाद्देवत्वं प्रतिपादयति सम्यगित्यादिना । ये मर्त्या सम्यग्विधिविधानेन सुसमाहितचेतसाऽतिसावधानमनसा मदिरा पिबन्ति ते क्षितौ पृथिव्यामप्यमर्त्या देवा एव भवन्ति ॥ १०८ ॥

अथ विधिसेवितमद्यादिपञ्चतत्त्वानामनिर्व्वचनीयफलत्वं दर्शयति प्रत्येकेत्यादिना । विधिना प्रत्येकतत्त्वस्वीकारात् मद्याद्येकैकतत्त्वाङ्गी, कारात्परः शिवः स्यात् पञ्चानामपि तत्त्वानां मद्यादीनां सेवनात् किं फलं भवेदिति तु न जाने ॥ १०९ ॥

अत्यन्तपानान्मद्यस्य चतुर्वर्गप्रसाधनी ।
बुद्धिर्विनश्यति प्रायो लोकानां मत्तचेतसाम् ॥ १११ ॥
विभ्रान्तबुद्धेर्मनुजात् कार्याकार्यमजानतः ।
स्वानिष्टं च परानिष्टं जायतेऽस्मात् पदे पदे ॥ ११२ ॥
अतो नृपो वा चक्रेशो मद्ये मादकवस्तुषु ।
अत्यासक्तजनान् कायधनदण्डेन शोधयेत् ॥ ॥ ११३ ॥
सुरामेदात् व्यक्तिभेदात् न्यूनेनाप्यधिकेन वा ।
देशकालविभेदेन बुद्धिभ्रंशो भवेन्नृणाम् ॥ ११४ ॥

अथ विधिवर्ज्जितसुरापानस्य बुद्ध्यायुरादिसकलपदार्थविनाशकत्वमाह इत्यमित्यादिना । वेद्मि यदि विधिवर्ज्जितेयं वारुणी मदिरा देवी निपीता स्यात्तदा नृणां बुद्धिमायुर्यशोधनमित्यादि सर्व्वं विनाशयेत् ॥ ११० ॥

सुरात्यन्तपानस्य बुद्धिविनाशकत्वेऽतिपीतमद्यानां स्वपरानिष्टोत्पादकत्वस्य हेतुत्वात्तदत्यासक्तचेतस पुंसांसो नरेशचक्रेशाभ्यां दण्डप्राप्त्याह अत्यन्तेत्यादिना शोधयेदित्यन्तेन श्लोकत्रयेण । मद्यस्यात्यन्तपानान्मत्तचेतसां लोकानां चतुर्वर्गप्रसाधनी धर्म्मार्थकाममोक्षाणां साधयित्री बुद्धिः प्रायो विनश्यति ॥ १११ ॥

कार्याकार्यमजानतोऽस्माद्विभ्रान्तबुद्धेर्मनुजात् स्वानिष्टं परानिष्टं च पदे पदे जायते ॥ ११२ ॥

अतो मद्ये मादकवस्तुषु चात्यासक्तान् जनान् नृपश्चक्रेशो वा कायधनदण्डेन शोधयेत् ॥ ११३ ॥

मद्यादिविभेदतो न्यूनस्याधिकस्य च तस्य बुद्धिभ्रंशजनकत्वात्तन्नानादेत्यत्यपानाच्च ज्ञातमशक्यत्वात् खलहागादिभिस्तल्लक्षणीयमित्याह सुरेत्यादिना विचारयेदित्यन्तेन श्लोकद्वयेन । सुरामेदात् व्यक्तिभेदाज्जनविशेषाद्देशकालयोर्विभेदेन च न्यूनेनापि अधिकेन वा मद्येन नृणां बुद्धिभ्रंशो भवेत् ॥ ११४ ॥

अतएव सुरामानादतिपानं न लक्ष्यते ।
स्खलद्वाक्पाणिपादेक्षणभिरतिपानं विचारयेत् ॥११५॥
नेन्द्रियाणि वशे यस्य मद्विह्वलचेतसः ।
देवतागुरुमर्य्यादोल्लङ्घिनो भयरूपिणः ॥ ११६ ॥
निखिलानर्थयोग्यस्य पापिनः शिवघातिनः ।
दहेज्जिह्वां हरेदर्थान् ताड़येत्तं च पार्थिवः ॥ ११७ ॥
विचलत्पादवाक्पाणिं भ्रान्तमुन्मत्तमुद्धतम् ।
तमुग्रं यातयेद्राजा द्रविणं चाहरेत्ततः ॥ ११८ ॥
अपवाच्यादिनं मत्तं लज्जाभयविवर्जितम् ।
धनादानेन तं शास्यात् प्रजाप्रीतिकरो नृपः ॥११९॥
शताभिषिक्तः कौलस्येत् अतिपानात् कुलेश्वरि ! ।

अतएव सुरामानादतिपानं न लक्ष्यते किन्तु स्खलद्वाक् पाणिपादेक्षणभिरितस्ततो विचलद्भिर्वचो हस्तपादनेत्रैः इति पानं विचारयेत् लक्ष्येत् ॥ ११५ ॥

अथोल्लङ्घितदेवतागुरुमर्य्यादाऽवशेन्द्रियमदिरामत्तस्य दण्डमाह नेन्द्रियाणीत्यादि श्लोकद्वयेन । यस्येन्द्रियाणि वशे न सन्ति तस्य मदविह्वलचेतसो मदिराविह्वलचित्तस्य देवतागुरुमर्य्यादोल्लङ्घिनो लङ्घितदेवनिषेकादिकरमर्य्यादस्य भयरूपिणो भीतिस्वरूपस्य निखिलानर्थयोग्यस्यार्थेषानर्थार्हस्य पापिनः पातकाश्रयस्य शिवघातिनः शिवाज्ञालङ्घनात्तदन्तर्निजभद्रहन्तुर्वा नरस्य जिह्वां पार्थिवो दहेत् अर्थात् हरेत् तं च ताड़येत् ॥ ११६ । ११७ ॥

अथ विचलत्पादादिकस्य मद्यमत्तस्य दण्डमाह विचलदित्यादिना । विचलत्पादवाक्पाणिं स्खलद्वरणवचोहस्तं भ्रान्तं भ्रमयुतमुन्मत्तमुन्मादवन्तमुद्धतमविनीतन्तं तमुग्रं रौद्रं राजा यातयेत् ततो द्रविणं च आहरेत् ॥ ११८ ॥

अथाऽपाच्यवादिनो मत्तस्य दण्डमाह अपवाच्यित्यादिना । अप-

पशुरेव स मन्तव्यः कुलधर्मबहिष्कृतः ॥ १२० ॥
पिबन्नतिशयं मद्यं शोधितं वाप्यशोधितम् ।
त्याज्यो भवति कौलानां दण्डनीयोऽपि भूभृतः ॥१२१॥
ब्राह्मीं भार्यां सुरां मत्ताः पाययन्तो द्विजातयः ।
शुध्येयुर्भार्यया सार्द्धं पञ्चाहं कथभोजनात् ॥ १२२ ॥
असंस्कृतसुरापानात् शुध्येदुपवसंस्त्र्यहम् ।
भुक्त्वाप्यशोधितं मांसमुपवासद्वयं चरेत् ॥ १२३ ॥
असंस्कृते मौनमुद्रे खादन्नुपवसेदहः ।
प्रवेधं पञ्चमं कुर्वन् राज्ञो दण्डेन शुध्यति ॥ १२४ ॥

वाग्वादिनं अवक्तव्यं वचो वदन्तं लज्जाभयविवर्जितं तं मत्तं प्रजापीतिकरो नृपो धनादानेन शास्यात् ॥ ११९ ॥

यताभिभिक्तकौलस्याप्यत्यन्तमद्यपानेन कुलधर्मबहिष्कृतत्वात् पशुत्वशालित्वाच्च यतेत्यादिना । चेच्छब्दोऽप्यर्थे । हे कुलेश्वरि ! यताभिभिक्तः कौलोऽप्यतिपानात् पशुरेव मन्तव्यः यतः स कुलधर्मबहिष्कृतः ॥ १२० ॥

अथ संस्कृतासंस्कृतातिशयितमद्यपायिनो नरस्य राज्ञा दण्डनीयत्वं कौलत्वेयत्व चाह पिबन्नित्यादिना । शोधितमशोधितं वातिशयं बहुलं मद्यं पिबन्नर्त्य कौलानां त्याज्यो भूभृतो दण्डनीयोऽपि भवति ॥ १२१ ॥

ननु ब्राह्मीं भार्यां मद्यं पाययन्तो द्विजाः कथं शुध्येयुस्तत्राह ब्राह्मीमित्यादिना । ब्राह्मीं वेदोक्तविधिना परिणीतां भार्यां सुरां पाययन्तो मत्ताः द्विजातयो भार्यया सार्द्धं पञ्चाहं कथभोजनाच्छुध्येयुः ॥ १२२ ॥

नन्वशोधितमद्यपानात् तादृङ्मांसभक्षणाच्च कथं शुध्येत्तत्राह असंस्कृतेत्यादिना । असंस्कृतसुरापानात् त्र्यहं त्रिदिनमुपवसन् शुध्येत् अशोधितं मांसमपि भुक्त्वा उपवासद्वयं चरेत् कुर्यात् ॥ १२३ ॥

भुञ्जानो मानवं मांस गोमांसं ज्ञानतः शिवे ।।
उपोष्य पञ्चं शुद्धः स्यात् प्रायश्चित्तमिदं स्मृतम्॥१२५॥
नराकृतिपशोर्मांसं मांसं मांसादनस्य च ।
अत्वा शुध्येन्नरः पापादुपवासैस्त्रिभिः प्रिये ।॥ १२६ ॥
म्लेच्छानां श्वपचानां च पशूनां कुलवैरिणाम् ।
खादन्नन्नं विशुद्ध स्यात् पञ्चमेकमुपोषितः ॥ १२७ ॥
उच्छिष्टं यदि भुञ्जीत ज्ञानादेषां कुलेश्वरि ।।

अथाशोधितमत्स्यसङ्करयोर्भोक्तुरवैधसुरतकर्त्तुश्च प्रायश्चित्तमाह असंस्कृतं इत्यादिना । असंस्कृते अशोधिते मीनसङ्करे खादन्नरोऽहर्दिनमेकमुपवसेत् अवैध विधिवर्জ্জितं पञ्चमं सुरतं कुर्व्वन्नरो राज्ञो दण्डेन शुध्यति ॥ १२४ ॥

ननु ज्ञानतो नरमांसं गोमांसञ्च खादतः पुंसः कथं शुद्धिरित्यत आह भुञ्जान इत्यादिना । हे शिवे ! ज्ञानतो मानव मानवसम्बन्धिमांसं गोमांसञ्च भुञ्जानो नर पञ्चमेकमुपोष्य शुद्धः स्यात् इदं तयोर्भक्षणे प्रायश्चित्तं स्मृतम् ॥ १२५ ॥

ननु भुक्तमनुष्याकृतिपशुमांसो मांसादकमांसभक्षकस्य पुमान् कथं शुध्येत्तत्राह नरेत्यादिना । हे प्रिये ! नराकृतिपशोर्व्वानरादेर्मांसादनस्य मांसभक्षकस्य व्याघ्रादेश्च मांसं मत्त्वा भुक्त्वा नरस्त्रिभिरुपवासैः पापात् शुध्येत् ॥ १२६ ॥

अथ भुक्तम्लेच्छाद्यन्नस्य पुंसः प्रायश्चित्तमाह म्लेच्छानामित्यादिना । म्लेच्छानां यवनानां श्वपचानां चाण्डालानां कुलवैरिणां पशूनां चान्नं खादन् जनः पञ्चमेकमुपोषितः सन् विशुद्धः स्यात् ॥ १२७ ॥

ननु ज्ञानाज्ञानाभ्यां म्लेच्छाद्युच्छिष्टभक्षादिकं भुञ्जान कथं शुध्येत्तत्राह उच्छिष्टमित्यादिना । हे कुलेश्वरि ! ज्ञानादेषां म्लेच्छादीनामुच्छिष्टभक्षादिकं यदि भुञ्जीत तदा मासोपवासेन नरः शुध्येत् । अज्ञानाद्यदि भुञ्जीत तदा पक्षोपवासतः शुध्येत् ॥ १२८ ॥

मध्ये मासोपवासेनाज्ञानात् पक्षोपवासतः ॥ १२८ ॥
अनुलोमेन वर्णानामन्नं भुक्त्वा सकृत् प्रिये ! ।
दिनत्रयोपवासेन विशुद्धः स्यान्मनाज्ञया ॥ १२९ ॥
पशुस्पर्शास्पृश्यानामन्नं चक्रार्पितं यदि ।
वीरहस्तार्पितं वापि तदश्नन्नेव पापभाक् ॥ १३० ॥
अन्नाभावे च दौर्भिक्षे विपदि प्राणसङ्कटे ।
निषिद्धेनाद्यनेनापि रक्षन् प्राणान्न पातकी ॥ १३१ ॥
करिपृष्ठे तथानेकोडाद्यपाषाणदारुषु ।
अलक्षितेऽपि दुष्टानां भक्ष्यदोषो न विद्यते ॥ १३२ ॥

अथ क्रमतः क्षत्रियाद्यन्नभक्षतां ब्राह्मणादीनां प्रायश्चित्तमाह अनुलोमेनेत्यादिना । हे प्रिये ! अनुलोमेन क्रमेण वर्णानां सकृदन्नं भुक्त्वा ब्राह्मणादिर्दिनत्रयोपवासेन मनाज्ञया विशुद्धः स्यात् । यथा ब्राह्मणः क्षत्रियान्नमेवम् ॥ १२९ ॥

अथ चक्रार्पितस्य वीरहस्तार्पितस्य च पशुस्पर्शास्पृश्यान्नस्य भोक्तुरपातकित्वमाह पशुस्पर्शेत्यादिना । पशुस्पर्शास्पृश्यानामन्नं यदि चक्रार्पितं चक्रदत्तं वीरहस्तार्पितं वा स्यात्तदा तदश्नन् खादन् नरः पापभाक् नैव भवेत् ॥ १३० ॥

ननु दुर्भिक्षादौ निषिद्धवस्तुभोजनेन प्राणान् रक्षतो मनुष्यस्य पातकं भवेन्न वेत्याशङ्क्याह अन्नेत्यादिना । दुर्लभा भिक्षा यत्र तत्र दुर्भिक्षे समये विपदि च देशोपद्रवपलायनादौ अन्नाभावे प्राणसङ्कटे सति निषिद्धेनाद्यनेनाभोज्यस्यापि भोजनेन प्राणान् रक्षन् पातकी न भवेत् ॥ १३१ ॥

नौकादावन्नादिकमश्नतां न दोष इत्याह करीत्यादिना । करिपृष्ठे हस्तिनः पृष्ठे तथानेकेष्वडाद्येषु पाषाणेषु दारुषु च तथा दुष्टानां यवनादीनामलक्षितेऽपि यवनादीनामिदं भवति यवनादयोऽत्र वर्त्तन्ते

पशूनभक्ष्यमांसांश्च व्याधियुक्तानपि प्रिये ! ।
न हन्याद्देवतार्थेऽपि हत्वा च पातकी भवेत् ॥ १२२ ॥
कृच्छ्रव्रतं नरः कुर्याद् गोवधे बुद्धिपूर्वके ।
अज्ञानादाचरेद्दर्द्धं व्रतं शङ्करशासनात् ॥ १२४ ॥
न केशवपनं कुर्यात् न नखच्छेदनं तथा ।
न चारयोगं वसने यावन्न व्रतमाचरेत् ॥ १२५ ॥
उपवासैर्नयेत् मासं मासमेकं कणाशनैः ।
मासं भैक्षान्नमश्नीयात् कृच्छ्रव्रतमिदं शिवे ! ॥ १२६ ॥
व्रतान्ते वापितशिराः कौलान् ज्ञातींश्च बान्धवान् ।
भोजयित्वा विमुक्तः स्याद् ज्ञानगोवधपातकात् ॥ १२७ ॥

एवमविज्ञानेऽपि स्थाने यद्वा द्विजाणां मद्यभूतादीनामलक्षितेऽपि तत्स्थेषु तेषामविज्ञानेऽपि भक्ष्यदोषो न विद्यते ॥ १२१ ॥

अथ देवतार्थमभक्ष्यमांसान् व्याधियुतांश्च पशूल्लिङ्गत पातकित्वमाह पशूनित्यादिना । हे प्रिये ! अभक्ष्यमांसान् व्याधियुतांश्च पशून् देवतार्थे न हन्यात् अपीति निश्चितम् । ननु हनने कोदोषस्तत्राह हत्वेति । हत्वा च जन पातकी भवेत् ॥ १२२ ॥

अथ ज्ञानाज्ञान कृतगोवध प्रायश्चित्तमाह कृच्छ्रेत्यादिना प्रिये इत्यन्तेन । ज्ञानपूर्वके गोवधे सति नरः कृच्छ्रव्रतं कुर्यात् । अज्ञानाद्गोवधे सति शङ्करशासनादर्द्ध व्रतमाचरेत् कुर्यात् ॥ १२३ ॥

न केशेति । यावद् व्रत नाचरेत् तावत् केशानां मुण्डनं न कुर्यात्, तथा नखच्छेदनं न कुर्यात्, वसने वस्त्रे चारयोगं च न कुर्यात् ॥ १२५ ॥

ननु किं नाम कृच्छ्रव्रतमतस्तल्लिङ्गमुपयति उपवासैरित्यादिना । हे शिवे ! उपवासैर्मासमेकं नयेत् यापयेत् । मासमेकं कणाशनैर्नयेत्

अपालनवधाद्गोश्च शुध्येद्दृष्टोपवासतः ।
बाडुजाद्या विशुध्येयुः पादन्यूनक्रमात्प्रिये ! ॥१३८॥
गजोष्ट्रमहिषाश्वांश्च हत्वा कौलिनि ! कामतः ।
उपवासैस्त्रिभिः शुध्येन्मानवः कृतकिल्बिषः ॥ १३९ ॥
मृगमेषाजमार्जारान् निघ्नन्नुपवसेदहः ।
मयूरशुकहंसांश्च सज्योतिरहनं त्यजेत् ॥ १४० ॥
निहत्य साक्षिजन्तूंश्च नक्तमश्नात् निरामिषम् ।
निरक्षिजीविनो हत्वा मनस्तापेन शुद्ध्यति ॥ १४१ ॥

मासमेकं च नैत्यानं भिक्षासम्भक्षनक्षमश्चीयात् इदं कृच्छ्रव्रतं त्रैयम् ॥ १३६ ॥ १३७ ॥

व्रतान्ते इति । व्रतान्ते व्रतसमाप्तौ वापितशिरा· क्षुरितनखश्मश्रुक· सन् कौलान् ज्ञातीन् सगोत्रांश्च भोजयित्वा ज्ञानगोवधपातकाज्जनो विमुक्तः स्यात् ॥ १३७ ॥

अपालने गोरपालनवधादज्ञानतो वधादृष्टोपवासतः शुध्येत् । हे प्रिये ! बाडुजाद्याः क्षत्रियादयः पादन्यूनक्रमाद्विशुध्येयुः । क्षत्रियादिभिः क्रमतः पादपादन्यूनं व्रतं करणीयमिति भावः ॥ १३८ ॥

अथ गजोष्ट्रादिवधप्रायश्चित्तमाह गजोष्ट्रेत्यादिना । हे कौलिनि ! गजोष्ट्रमहिषाश्वान् हत्वा कामतोऽज्ञानतः कृतकिल्बिषो मानवस्त्रिभिरुपवासैः शुध्येत् ॥ १३९ ॥

अथ मृगमेषादिवधप्रायश्चित्तमाह मृगेत्यादिना । मृगमेषाजमार्जारान् हरिणादिछागविड़ालान् निघ्नन्नरोऽहरेकदिनमुपवसेत्, मयूरशुकहंसांश्च निघ्नन्नरो ज्योतिषा सूर्येण सह वर्त्तमानं सज्योतिर्दिनमहनं त्यजेत्, दिवसेऽयनं त्यजन्नस्तं याते सूर्ये भुञ्जीतेत्यर्थः । ज्योतिर्नाम भास्करोऽग्निश्च ज्ञेयं खद्योतदृष्टिस्थिति कृद्र ॥ १४० ॥

अथ ज्ञानाज्ज्ञानतश्च क्षुद्रजन्तूंश्चिरस्थिजन्तूंश्च निघ्नतो नरस्य

पशुमीनाण्डजान्निघ्नन् मृगयायां महीपतिः ।
न पापार्हो भवेद्देवि ! राज्ञो धर्म्मः सनातनः ॥ १४२ ॥
देवोद्देशं विना भद्रे ! हिंसां सर्व्वत्र वर्জ्जयेत् ।
कृतायां वैधहिंसायां नरः पापेन लिप्यते ॥ १४३ ॥
संकल्पितव्रतापूर्त्तौ देवनिर्म्माल्यलङ्घने ।
अशुचौ देवतास्पर्शे गायत्रीजपमाचरेत् ॥ १४४ ॥
माता पिता ब्रह्मदाता महान्तो गुरवः स्मृता ।

प्रायश्चित्तमाह निहत्येत्यादिना । निरस्थिसाहचर्य्यात् सास्थिजन्तून् अस्थितत्र कृकलासादीन् क्षुद्रान् शरीरिणो निहत्य नक्तं रात्रौ निरामिषमामिषवर्জ्जितमद्यात् भुञ्जीत मयूरादिहननापेक्षया कृकलासादिहनने प्रवृत्तेराधिक्यात्तद्धननिमित्तकदण्डतः कृकलासादिहननिमित्तकदण्डस्य गुरुत्वमवगन्तव्यम् । निरस्थिजीविनोऽस्थिरहितजन्तून् हत्वा मनस्तापेन शुध्यति ॥ १४१ ॥

ननु मृगयायां मृगमीनादीन्निघ्नतो महीपालस्य मृगादिवधहेतुक पाप भवेच्च नेति पृच्छन्तीं प्रत्याह पशुमीनादिना । हे देवि ! पशुमीनाण्डजान् मृगव्याघ्रादिसत्त्वमत्स्यिनो मृगयाया निघ्नन् महीपतिः पापार्हो न भवेत् यतोऽयं राज्ञ सनातनो नित्यो धर्म्मो भवति ॥ १४२ ॥

अथाऽवैधहिंसायाः पापजनकत्वादकर्त्तव्यतामाह देवेत्याद्यर्द्धेन । हे भद्रे ! भद्रकारिणि देवोद्देश्यं कर्म विना सर्व्वत्र हिंसां वर्জ्जयेत् वैधहिंसाया पापाऽजनकत्वात् कर्त्तव्यतामाह कृतायामित्याद्यर्द्धेन । वैधहिंसायां कृतायां सत्यां नरः पापेन लिप्यते ॥ १४३ ॥

ननु सङ्कल्पितं व्रतमसमाप्नुवतो देवनिर्माल्यं लङ्घयतोऽशौचानगमे देवता. स्पृशतश्च पुंस कथ शुद्धित्वमाह सङ्कल्पितेत्यादिना । सङ्कल्पितव्रतापूर्त्तौ सङ्कल्पितस्य व्रतस्यासमाप्तौ देवनिर्माल्यलङ्घने सति अशुचावशौचे देवतास्पर्शे च गायत्रीजपमाचरेत् ॥ १४४ ॥

निन्दन्नेतान् वदन् क्रूरं शुध्येत् पञ्चोपवासतः ॥१४५॥
एवमन्यान् गुरून् कौलान् विप्रान् गर्हन्नपि प्रिये ! ।
सार्द्धद्वयोपवासेन मुक्तो भवति पातकात् ॥ १४६ ॥
वित्तार्थी मानवो देशानखिलान् गन्तुमर्हति ।
निषिद्धकौलिकाचार देश शास्त्रमपि त्यजेत् ॥१४७॥
गच्छंस्तु स्वेच्छया देशं निषिद्धकुलवर्त्मनि ।
कुलधर्मात् पतेद्भ्रय. शुध्येत् पूर्णाभिषेकतः ॥१४८॥
तपनोदयमारभ्य यामाष्टकमभोजनम् ।
उपवासः स विज्ञेयः प्रायश्चित्ते विधीयते ॥ १४९ ॥

अथ महतो गुरूञ्निरूपयंस्तान्निन्दन् क्रूरं ब्रुवतश्च पुंस प्रायश्चित्तमाह मातेत्यादिना । माता जननी पिता जनको ब्रह्मदाता वेदाध्यापकश्चैते महान्तो गुरव स्मृता एतान् महागुरूञ्निन्दन् क्रूरं वदन् नर पञ्चोपवासत शुध्येत् ॥ १४५ ॥

अथ मात्राद्यान्य गुरुकौलब्राह्मणनिन्दकाना प्रायश्चित्तमाह एवमित्यादिना । हे प्रिये ! एवमन्यान् मात्रादिभिन्नान् गुरून् कौला विप्राश्च गर्हन्निन्दन् अपिना क्रूरं वदश्च जनः सार्द्धद्वयोपवासेन पातकात मुक्तो भवति ॥ १४६ ॥

अथ वित्तोद्देश्यकसर्वदेशगमनार्हस्यापि मानवस्य कौलाचाररहितदेशाटनानर्हत्वमाह वित्तार्थीत्यादिना । वित्तार्थी मानवोऽखिलान् सर्वान् देशान् गन्तुमर्हति निषिद्धः कौलिकानामाचारो यत्र तं देशं तादृश शास्त्रमपि मानवस्त्यजेत् ॥ १४७ ॥

अथ धनलोभेन निषिद्धकौलिकाचारं देशं गच्छतो नरस्य कुलधर्मात् पतितत्वं पुनः पूर्णाभिषेकत प्रतत्वमाह गच्छंस्त्वित्यादिना । निषिद्धकुलवर्त्मनि देशे स्वेच्छया गच्छंस्तु नर. कुलधर्मात् पतेत् भ्रय पुन. पूर्णाभिषेकत शुध्येत् ॥ १४८ ॥

अथोक्ततत्तद्गच्छ्वाकाङ्क्षितत्वादुपवास निरूपयति तपनोदयमि-

पिबंस्तोयाञ्जलिञ्चैकं भक्षन्नपि समीरणम् ।
मानवः प्राणरक्षार्थं न भ्रश्येदुपवासतः ॥ १५० ॥
उपवासासमर्थश्चे द्रुजा वा जरसापि वा ।
तदा प्रत्युपवासञ्च भोजयेद्द्वादश द्विजान् ॥ १५१ ॥
परनिन्दा निजोत्कर्षं व्यसनायुक्तभाषणम् ।
अयुक्तं कर्म्म कुर्वाणो मनस्तापैर्विशुध्यति ॥ १५२ ॥
अन्यानि यानि पापानि ज्ञानाज्ञानकृतान्यपि ।
नश्यन्ति जपनाद्देव्याः सावित्र्याः कौलभोजनात् ॥ १५३ ॥

त्यादिना । तपनोदयं सूर्य्योदयमारभ्य यामाष्टकं प्रहराष्टकं यदभोजनं स उपवासो विज्ञेयः प्रायश्चित्ते स विधीयते क्रियते ॥ १४९ ॥

अथ एकाञ्जलितोयपानेनोपवासस्याविनाशित्वं कथयन्नाह पिबन्निति । प्राणरक्षणार्थमेकं तोयाञ्जलिं पिबन् समीरणं वायुं चापि भक्षन्नानवः उपवासतो न भ्रश्येत् एकाञ्जलितोयपानादुपवासो न विनश्येदिति तत्त्वम् ॥ १५० ॥

अथ रोगादिनोपवासं कर्त्तुमशक्नुवता जनेन प्रत्युपवासं द्वादश ब्राह्मणा भोजयितव्या इत्याह उपवासेत्यादिना । रुजा रोगेण वा जरसा जीर्णत्वेन वा चेद्यदि उपवासासमर्थो नरः स्यात् तदा प्रत्युपवासमुपवासं प्रति द्वादश द्विजान् ब्राह्मणान् भोजयेत् ॥ १५१ ॥

अथ परनिन्दां निजोत्कर्षमात्मोत्कृष्टतां व्यसनायुक्तभाषणं परीवादादिसम्बद्धं कथनम् अयुक्तमनुचितं कर्म च कुर्वाणो नरो मनस्तापैर्विशुध्यति ॥ १५२ ॥

अथ ज्ञानाज्ञानकृतावशिष्टपापानां गायत्रीजपात् कौलानामाशनाच्च विनाश इत्याह अन्यानीत्यादिना । ज्ञानाज्ञानाभ्यां कृतान्यन्यान्यपि यानि पापानि तानि सावित्र्याः सवितृदेवताकाया गायत्र्या देव्या जपनात् कौलाना भोजनाच्च नश्यन्ति ॥ १५३ ॥

सामान्यनियमान् पुंसां स्त्रीषु षण्ढेषु योजयेत्।
योषितान्तु विशेषोऽयं पतिरेको महागुरुः॥ १५४॥
महारोगान्विता ये च ये नराश्चिररोगिणः।
सर्वदानेन पूताः स्युर्दैवे पैत्र्येऽधिकारिणः॥ १५५॥
अपघातहतेनापि दूषित विद्युदग्निना।
गृहं विशोधयेद्भौमैर्व्याहृत्या भूतसंख्यकैः॥ १५६॥
वापीकूपतडागेषु साम्यं श्वनिरीक्षणात्।
उद्धृत्य कुणपं तेभ्यस्ततस्तान् परिशोधयेत्॥ १५७॥
पूर्णाभिषेकमनुभिर्मन्त्रितैः शुद्धवारिभिः।

अथ पुरुषाणां साधारणनियमा स्त्रीषु नपुंसकेष्वपि योजयितव्या इत्याह सामान्येत्यादिना। पुंसां पुरुषाणां सामान्यनियमान् स्त्रीषु षण्ढेषु नपुंसकेषु च योजयेत् योषितां स्त्रीणान्तु पतिरेको महागुरुः स्मृतोऽयं विशेषः॥ १५४॥

अथ कुष्ठादिमहारोगान्वितचिररोगिणोरपि सर्वदानेन पूतत्वसत्त्वाद्दैवपित्र्यकर्माधिकारित्वमाह महारोगेत्यादिना। ये नरा महारोगान्विता ये च चिररोगिणश्च ते सर्वदानेन पूताः सन्तो दैवे पैत्र्ये च कर्मणि चाधिकारिणः स्युः॥ १५५॥

नन्वपघातहतेन विद्युदग्निना च दूषितवेश्मनः कथं शुद्धिस्तत्राह अपघातेत्यादिना। अपघातहतेनापघातप्राप्तमृत्युना सर्पव्याघ्रोदुम्बनादिजातमरणेनेति यावत्, विद्युदग्निना वापि दूषितं गृहं व्याहृत्या भूराद्या भूतसंख्यकैर्भौमैर्विशोधयेत्॥ १५६॥

अथास्थिमज्जन्वादिदूषितवापीकूपादीनां सामान्यतः शोधनमाह वापीत्यादिना। वापीकूपतडागेषु साम्यमस्थिमतां श्वनिरीक्षणात् कुणपदर्शनात्तेभ्यो वाप्यादिभ्यः कुणपं श्वसूदृत्य ततस्तान् वाप्यादीन् परिशोधयेत्॥ १५७॥

पूर्णैस्त्रिसप्तकुम्भैस्तान् प्लावयेदिति शोधनम् ॥ १५८ ॥

यदि स्वल्पजलास्ते स्युः शवदुर्गन्धिदूषिताः।
सपङ्कं सलिलं सर्वमुद्धृत्याप्लावयेत्तु तान् ॥ १५९ ॥

सन्ति भूरीणि तोयानि गजदन्नानि तेषु च।
शतकुम्भजलोद्भारैरभिषेकेण शोधयेत् ॥ १६० ॥

यद्येवं शोधिता न स्युस्तत्सृष्टजलाश्रयाः।
अपेयसलिलास्तेषां प्रतिष्ठामपि नाचरेत् ॥ १६१ ॥

स्नानमेषु जलैरेषां कुर्वन् कर्म्म तथा भवेत्।
दिनमेकं विनाहारः शुध्येत् पञ्चामृताशनात् ॥ १६२ ॥

कथं शोधयेदित्याकाङ्क्षायां शोधनप्रकारमाह पूर्णैत्यादिना। पूर्णाभिषेकमन्त्रैः पूर्णाभिषेकस्य मन्त्रैर्मन्त्रितैः शुद्धवारिभिः पवित्रजलैः पूर्णैस्त्रिसप्तकुम्भैरेकविंशतिघटैस्तान् वाप्यादीन् प्लावयेत् इति शोधनं स्वयं शोधनकारः ॥ १५८ ॥

अथाल्पजलत्वगजभितदुजलत्वाभ्यां वाप्यादीनां भेदवत्त्वाच्छोधनविशेषमाह यदीत्यादिना श्लोकद्वयेन। शवदुर्गन्धदूषितास्ते वाप्यादयो यदि स्वल्पजला स्युस्तदा तेभ्यः सपङ्कं सर्वं जलमुद्धृत्योक्तप्रकारेण तानाप्लावयेत् ॥ १५९ ॥

सन्तीति। तेषु वाप्यादिषु चेत् यदि गजदन्नानि हस्तिपरिमाणानि भूरीणि बहूनि तोयानि जलानि सन्ति तदा शतकुम्भजलोद्भारैरेकविंशतिकुम्भजलैरभिषेकेण च तान् शोधयेत् ॥ १६० ॥

अथाशोधितवाप्यादीनामपेयजलत्वं प्रतिष्ठानर्हत्वञ्चाह यदीत्यादिना। सृतसृष्टजलाश्रया मृतसृष्टवाप्यादयो यद्येवं शोधिता न स्युस्तदा तेऽपेयसलिला भवन्ति तेषामशोधितवाप्यादीनां प्रतिष्ठामपि नाचरेन्न कुर्य्यात् ॥ १६१ ॥

अथाशोधितवाप्यादिजलैः स्नानादिकं कुर्वतो नरस्य प्राय-

याचकं धनिनं दृष्ट्वा वीरं युद्धपराङ्मुखम् ।
दूषकं कुलधर्म्माणां मद्यपाञ्च कुलस्त्रियम् ॥ १६२ ॥
मित्रद्रोहकरं मर्त्तं स्वयं पापरतं बुधम् ।
पश्यन् सूर्य्यं स्मरन् विष्णुं सचेलः स्नानमाचरेत् ॥१६४॥
खरकुक्कुटकोलांश्च विक्रीणन्तो द्विजातयः ।
नीचवृत्तिं चरन्तोऽपि शुध्येयुस्त्रिदिनव्रतात् ॥ १६५ ॥
दिनमेकं निराहारो द्वितीयं कक्षभोजनः ।
अपरन्तु नयेद्विप्रस्त्रिदिनव्रतमम्बिके ! ॥ १६६ ॥

चित्तं क्रियमाणस्य कर्मणो निष्फलत्वञ्चाह स्नानमित्यादिना । एवं शोधितवाग्यादिषु स्नानं कुर्वन् तथैषां जलैरन्यच्च कर्म कुर्वन् नरो दिनमेकं निराहारः सन् पश्चात्तताशनाद् शुध्येत् क्रियमाणञ्च कर्म च हृतं भवेत् ॥ १६२ ॥

अथ दृष्टधनिकयाचकयुद्धपराङ्मुखवीरादिकस्य पुंसः प्रायश्चित्तमाह याचकमित्यादिश्लोकद्वयेन । याचकं भिक्षुकं धनिनं दृष्ट्वा तथा युद्धपराङ्मुखं रणाजिरमुखं वीरं शूरं कुलधर्म्माणां दूषकं जनं कुलस्त्रियञ्च मद्यपा मित्रद्रोहकरं मर्त्यं स्वयं पापरतं बुधपण्डितं च दृष्ट्वा सूर्य्यं पश्यन् विष्णुं स्मरन्नरः सचेलं सवस्त्रं स्नानमाचरेत् ॥ १६३ । १६४ ॥

नन्वेतादृशान् विक्रीणता नीचवृत्तिं च कुर्वता द्विजातीनां कथं शुद्धिस्तत्राह खरेत्यादिना । खरकुक्कुटकोलान् गर्दभचरखायुधभूकरान् विक्रीणन्तो नीचवृत्तिञ्चापि चरन्तः कुर्वन्तो द्विजातयो ब्राह्मणास्त्रिदिनव्रतात् शुध्येयुः ॥ १६५ ॥

नन्वेतत्किं त्रिदिनव्रतमत आह दिनमित्यादिना । निराहारः सन् दिनमेकं नयेत् यापयेत् कक्षभोजनः सन् द्वितीयं दिनं नयेत् अपरन्तु

गृहेऽनुद्घाटितद्वारेऽनाहूतः प्रविशन्नरः ।
वारितार्थप्रवक्तापि पञ्चाहमशनं त्यजेत् ॥ १६७ ॥
आगच्छतो गुरून् दृष्ट्वा नोत्तिष्ठेद्यो मदान्वितः ।
तथैव कुलशास्त्राणि शुध्येदेकोपवासतः ॥ १६८ ॥
एतस्मिन् शाम्भवे शास्त्रे व्यक्तार्थपदगर्हिते ।
कूटेनार्थं कल्पयन्त पतिता यान्त्यधोगतिम ॥ १६९ ॥
इति ते कथितं देवि ! सारात्सारं परात्परम् ।

तृतीयं त्रिवन्तु अङ्गिर्ज्वलैर्नमेत् । हे अम्बिके ! त्रिदिनव्रतमिदं स्मृतम् ॥ १६६ ॥

अथ पिहितद्वारागारेऽनाहूतस्यैव प्रविशतो वारितार्थं कथयतश्च प्रायश्चित्तमाह गृहे इत्यादिना । अनुद्घाटितद्वारे पिहितद्वारे गृहे अनाहूत एव प्रविशन्नरो वारितार्थप्रवक्तापि वारितस्यार्थस्य प्रकथयितापि नरः पञ्चाहमशनं त्यजेत् ॥ १६७ ॥

आगच्छतः पित्रादीन् कुलशास्त्राणि च समीक्ष्यानुत्थितः पुंसः प्रायश्चित्तमाह आगच्छत इत्यादिना । आगच्छतो गुरून् पित्रादीन् तथैवागच्छन्ति शास्त्राणि च दृष्ट्वा यो मदान्वितो नोत्तिष्ठेत् स एकोपवासतः शुध्येत् मदान्वितो दम्भेन लोभादिनिमित्तकयाऽशक्त्यानुत्थित इत्यनुक्तं न दोषभागित्वमिति ध्वनितम् ॥ १६८ ॥

अधुना शाम्भवोक्तेऽस्मिन् शास्त्रे शब्दव्याजेनार्थान्तरं कल्पयतां प्रतिनरकभागित्वञ्चाह एतस्मिन्नित्यादिना । व्यक्तार्थपदगर्हिते विरुद्धार्थपदवर्जिते शाम्भवे शम्भुप्रोक्ते एतस्मिन् शास्त्रे कूटेन शब्दव्याजेनार्थं कल्पयन्तो नराः पतिताः सन्तोऽधोगतिं यान्ति । मायानिर्णयतन्त्रेषु जैनवाक्तरादिषु । अयोधने धैलङ्कृते वीराङ्के कूटमस्तिरास्तिस्यमरः ॥ १६९ ॥

इहामुत्रार्थदं धर्म्यं पावनं हितकारकम् ॥ १७० ॥

इति श्रीमहानिर्वाणतन्त्रे सर्वधर्मोत्तमोत्तमे सर्वधर्मनिर्णय-
सारे श्रीसदाशिवकुलवाद स्वपरानिष्ट-
जनकपापप्रायश्चित्तकथनं
नाम एकादशोल्लासः ।

प्रकरणार्थमुपसंहरन्नाह इदमित्यादिना । हे देवि ! सारात्सार-न्यायादपि नाथ परात्परतमादुत्तमं इहामुत्रार्थदमिहलोके परलोके च फलद धर्म्यं धर्मादनपेतं पावन पावित्र्यप्रकारकं हितकारकमिदं ते तुभ्यं कथितम् । सारो बले स्थिरांशे च न्याये क्लीबे वरे स्थिरे । अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिष्वियमरः ॥ १७० ॥

इति श्रीमहानिर्वाणतन्त्रटीकायामेकादशोल्लासः

अथ द्वादशोल्लासः

श्रीसदाशिव उवाच ।

भूयस्ते कथयाम्यद्ये ! व्यवहारान् सनातनान् ।
यानुक्त्वा प्रविशन्राजा स्वच्छन्दं पालयेत् प्रजाः ॥ १ ॥

इदानीं लोकशुभाकाङ्क्षया परमकारुणिको महादेवः सनातन व्यवहारान् पार्वतीं प्रति पुनः कर्तुमारभते भूय इत्यादिना । हे आद्ये ! ते तुभ्यं तवाग्रे वा तान् सनातनान् शाश्वतान् व्यवहारान् भूयः पुनरहं कथयामि यान् व्यवहारान् रक्षन् पालयन् प्रविशन् प्रजानन् राजा स्वच्छन्दं स्वैरं प्रजाः पालयेदुक्त्वा ॥ १ ॥

नियमेन विना राज्ञो मानवा धनलोलुपाः ।
मिथस्ते विवदिष्यन्ति गुरुस्वजनबन्धुभिः ॥ २ ॥
व्यतिघ्नन्ति तदा देवि ! स्वार्थिनो वित्तहेतवे ।
पापाश्रया भविष्यन्ति हिंसया च जिहीर्षया ॥ ३ ॥
अतस्तेषां हितार्थाय नियमो धर्मसम्मतः ।
नियोज्यते यमाश्रित्य न भ्रश्येयुः शुभान्नराः ॥ ४ ॥
दण्डयेत् पापिनो राजा यथा पापापनुत्तये ।
तथैव विभजेद्दायान् नृणां सम्बन्धभेदतः ॥ ५ ॥
सम्बन्धो द्विविधो ज्ञेयो विवाहाज्जन्मनस्तथा ।

महीपतेर्नियमस्याभावादुदृङ्व्याभिलाषिणो मनुजा. पित्रादिभिः सार्द्धं मिथो विवादादिकं करिष्यन्ति तन्निराकरणाय लोकहिताकाङ्क्षुः ऋषिर्नियमं विदधातीत्येवाह नियमेनेत्यादिना। शुभान्नरा· इत्यन्तेन श्लोकत्रयेण । हे देवि ! यतो राज्ञो ऋषस्य नियमेन विना धनलोलुपाः वित्तविषयकलालसाक्रान्तास्ते मानवा मनुष्या गुरुस्वजनबन्धुभि· सार्द्धं मिथो विवदिष्यन्ति तथा तदा नियमाभावे स्वार्थिनो धनार्थिनस्ते वित्तहेतवे धनार्थं व्यतिघ्नन्ति परस्परं हनिष्यन्ति जिहीर्षया वित्तहरणेच्छया हिंसया च पापाश्रया भविष्यन्ति अतस्तेषां मानवानां हितार्थाय धर्मसम्मतः स नियमो मया नियोज्यते प्रवर्त्यते यं नियममाश्रित्य नराः शुभाद्भद्राद्न भ्रश्येयुर्न पतेयुः व्यतिघ्नन्तीत्यत्र वर्त्तमानसामीप्ये वर्त्तमानवद्वेति भविष्यति लट् ॥ २ । ३ । ४ ॥

ननु यन्नियमाश्रयणान्मनुष्या भद्राद्न भ्रश्येयु· कोऽसौ नियमस्तत्राह दण्डयेदित्यादिना । यथा राजा नराधिप· पापापनुत्तये किल्बिषनाशाय पापिनो जनान् दण्डयेत्तथैव नृणां मनुष्याणां सम्बन्धभेदतो दायान् विभवान् विभजेत् विभक्तान् कुर्यात् । दायो दाने धने युक्ति वाच्यलिङ्गस्तु दातरि ॥ ५ ॥

अथोद्वाहजननाभ्यां दायविभागोपयोगिनः सम्बन्धस्य द्वैविध्य

तत्रौद्वाहिकसम्बन्धादपरो बलवत्तरः ॥ ६ ॥
दायेतूर्ध्वेतनाज्ज्यायान् सम्बन्धोऽधस्तनः स्त्रिये ! ।
अध ऊर्ध्वक्रमादेव पुमान् सुखतरः स्मृतः ॥ ७ ॥
तत्रापि सन्निकर्षेण सम्बन्धो दायमर्हति ।
अनेन विधिना धीरा विभजेयुः क्रमादनम् ॥ ८ ॥
सुतस्य पुत्रे पौत्रे च कन्यासु पितरि स्थिते ।
भार्य्यायामपि दायार्हः पुत्र एव न चापरः ॥ ९ ॥

भावसाधो सङ्घातेवत्तत्व वैवाहिकसम्बन्धतो जननसम्बन्धस्य प्राबल्य प्रतिपादयति सम्बन्ध इत्यादिना । विवाहात्तया जन्मन स्त्रीपुरुषे· सम्बन्धो द्विविधो द्विप्रकारको ज्ञेयो बोद्धव्य· तत्र तयोः सम्बन्धयो- रौद्वाहिकसम्बन्धादपरो जननसम्बन्धो बलवत्तरो ज्ञेयः ॥ ६ ॥

दायहरणे ऊर्द्ध्वतनसम्बन्धतोऽधोभवस्यैव सम्बन्धस्य ज्येष्ठत्वमध- ऊर्द्ध्वक्रमतो योषिद्भ्य पुरुषस्यैव प्रधानतरत्व चाह दाये त्यादिना । हे स्त्रिये ! दाये तु धने तूर्द्ध्वतनादूर्द्ध्वभवात् सम्बन्धादधस्तनोऽधोभवः सम्बन्धो ज्यायान् श्रेष्ठ स्मृत. तुशब्देनाभिवादनादावधस्तनात् सम्बन्धा- दूर्द्ध्वतनस्यैव सम्बन्धस्य ज्यावस्त्वमिति ध्वनितम् । अत दायहरणेऽध- ऊर्द्ध्वक्रमात् स्त्रीत पुमान् पुरुषो सुखतर प्रधानतर स्मृत ॥ ७ ॥

नन्वासन्नानासन्नयोर्मध्ये कतरस्य दायार्हत्व स्याद् तत्राह तत्रा- पीति । तत्रापि सुखतरेषु पुरुषेषि सन्निकर्षेण सान्निध्येन सम्बन्ध दायमर्हति धनार्हो भवति अनेन पूर्वोक्तेन विधिना धीरा मनीषिणो धनं क्रमाद्विभजेयुर्व्यष्टयेयु· ॥ ८ ॥

नन्वु प्राग्मृतत्वस्य पुसो विद्यमानाना पत्नीकन्याना तातसुत- पौत्राणाञ्च मध्ये कतमस्य तद्धनग्राहकत्वमत आह मृतस्येत्यादिना । मृतस्य मानवस्य पुत्रे पौत्रे पितरि च स्थिते कन्यास्वात्मजासु च स्थितासु भार्य्याया पत्न्यामपि स्थिताया सन्निकृष्टत्वात् पुंस्त्वेन मुख्यत रत्वादधोभवत्वेन ज्यायस्त्वाच्च पुत्र एव न [illegible] च चा-

बहवस्तनया यत्र सर्वे तत्र समांशिनः ।
ज्येष्ठे राज्याधिकारित्वं तत्तु वंशानुसारतः ॥ १० ॥
ऋणं यत् पैतृकं तच्च शोधयेत् पैतृकैर्धनैः ।
तस्मिन् स्थिते विभागार्हं न भवेत् पैतृकं वसु ॥ ११ ॥
विभज्य यदि गृह्णीयुर्विभवं पैतृक नराः ।
तेभ्यस्तद्धनमाहृत्य पितृणां दापयेन्नृपः ॥ १२ ॥

द्विज. पौत्रादिर्दायार्ह पौत्रस्य पुत्रतो विप्रकृष्टत्वात् भार्यायाः कन्यानां च स्त्रीत्वेनाप्रधानत्वात् पितुरूर्द्ध भवत्वेनाजग्रायत्वाद्दायार्हत्वं नेत्यर्थः ॥ ९ ॥

तत्र बहुपुत्रस्य प्रमीतस्य पृथ्वीपते स्थावर स्थावरेतरद्रव्येषु सर्वेषामात्मजानां समांशग्राहित्वं न्यूनाधिकांशग्राहित्वं वेत्यत आह बहव इत्यादिना । राज्ञो यत्र स्थावरे जङ्गमे वापि द्रव्ये बहव. तनया पुत्रा भागार्हत्वात् सर्वे समांशिनस्तुल्यभागिनः स्युर्न तु न्यूनाधिकांशिन इत्यर्थः । नन्वत्र महीपतेर्ज्येष्ठ एवात्मजे प्रायशो राज्याधिकारित्वं श्रूयते दृश्यते च तत् कथमुच्यते सर्वे तत्र समांशिन इत्यत आह ज्येष्ठे राज्ञ पुत्रे यद्राज्याधिकारित्वं तत्तु वंशानुसारतो ज्ञेयम् । वंशे यदि ज्येष्ठ एव राजपुत्रो राज्यं लभमानो भवेत्तदा तस्मिन्नेव राज्याधिकारित्वम् । अन्येषां आसाच्छादनभाजनत्वम्, अन्यथा तु पृथ्व्यादिकं सकलं द्रविणं विभज्य सर्वे गृह्णीयुरिति भाव ॥ १० ॥

पैतृकस्यर्णं दत्त्वाऽवशिष्टं पितृद्रव्यं भ्रातृभिर्विभक्तव्यमित्याह ऋणमित्यादिना । पैतृकं पितृसम्बन्धि यदृणं तत् पैतृकैः पितृसम्बन्धिभिर्धनैः शोधयेत् तस्मिन्नृणे स्थिते सति पैतृक वसु धन विभागार्हं वण्टनयोग्यं न भवेत् ॥ ११ ॥

पैतृकमृणं शोधयित्वैव विभज्य गृहीततावद्द्रव्यैर्मर्त्यैर्नरैरधिमर्त्यं दापयेदित्याह विभज्येत्यादिना । पैतृकं विभज्य धनं विभज्य

यथा स्वकृतपापेन निरयं यान्ति मानवाः ।
ऋणेनापि तथा बद्धः स्वयमेव न चापरः ॥ १३ ॥
साधारणं धनं यच्च स्थावरं स्थावरेतरम् ।
अंशिनः प्राप्नुमर्हन्ति स्व स्वमंश विभागतः ॥ १४ ॥
अंशिनां सम्मतावेव विभागः परिसिद्ध्यति ।
तेषामसम्मतौ राजा समदृष्ट्यांशमाचरेत् ॥ १५ ॥
स्थावरस्य चरस्यापि विभागानर्हवस्तुनः ।
मूल्यं वा तदुपसत्वमंशिनां विभजेन्नृपः ॥१६॥

नरा यदि ऋणं गृह्णीयुस्तदा तेभ्यो नरेभ्यस्तत् पैतृकं धनमाकृष्य गृहीत्वा ऋणी राजा पितृस्थ तातसम्बन्धृणं तैर्दापयेत् ॥ १२ ॥

ऋणानयने ऋणग्रहीतरेव सदृष्टान्त तद्दोषभागित्वमाह यथेत्यादिना । यथा स्वकृतपापेन मानवा नरा निरय नरक यान्ति तथा ऋणेनापि स्वयमेव बद्धो भवति न चापरस्तदन्य कश्चन बद्धो भवेत् ॥ १३ ॥

सामान्ये स्थावरे जङ्गमे च द्रव्ये सर्वेषामेव दायादाना तुल्यांशग्राहकत्वमित्याह साधारणमित्यादिना । स्थावर स्थावरेतरं जङ्गम च यत् साधारण सामान्यं तत्र विभागत सर्वेऽंशिनः स्व स्वमंश प्राप्नुं लब्धुमर्हन्ति योग्या भवन्ति ॥ १४ ॥

सर्वेषामधिकाना मिथ सम्मतौ सत्यामेव विभागस्य सुसिद्धि स्यादित्याह अंशिनामित्यार्द्धेन । अंशिनां भागग्राहकाणां सम्मतावेव सत्या विभाग. परिसिद्ध्यति निष्पद्यते न त्वन्यथा । ननु पैतृकद्रव्यविभागे सर्वेषा दायादाना सम्मतेरभावे कथ विभागो भवेत्तत्राह तेषामित्यादिना । तेषामंशिनामसम्मतौ सत्या राजा समदृष्ट्या तुल्यदृष्ट्या अंश भागमाचरेत् कुर्यात् ॥ १५ ॥

ननु विभागायोग्यस्य स्थावरादेर्वस्तुनः कथ विभाग स्यादत आह स्थावरस्येत्यादिना । स्थावरस्य चरस्य जङ्गमस्यापि हि विभागान -

विभक्तेऽपि धने यस्तु स्वीयांशं प्रतिपादयेत् ।
पुनर्विभज्य तद्द्रव्यमप्राप्तांशाय दापयेत् ॥ १७ ॥
कृते विभागे द्रव्याणामंशिनां सम्मतौ शिवे ! ।
पुनर्विवादयंस्तत्र शास्यो भवति भूभृतः ॥ १८ ॥
स्थिते प्रेतस्य पौत्रे च भार्य्यायाञ्च पितर्य्यपि ।
पौत्र एव धनार्हः स्यादधस्ताज्जन्मगौरवात् ॥ १९ ॥

ईप्सितस्य विभाजनायोग्यस्य पदार्थस्य मूल्यमथवा तदुपस्वत्वं तदतिरिक्तं तत्र एवोपजातं द्रव्यं नृपो राजा अंशिना दायादानां विभजेत् तेभ्यो दापयित्वा विभक्तं कुर्य्यात् । अंशिनामिति सम्मदानस्य श्रेष्ठत्वेन विवक्षितत्वात् षष्ठी श्रेष्ठे इति षष्ठी ॥ १६ ॥

अथांशिभिर्विभज्य गृहीतेष्वपि द्रव्येषु स्वकीय भागं साक्षिभिर्दर्शयित्वा ज्ञापयते मानवाय राजा पुनस्तानि द्रव्याणि विभज्य तैर्दापयेदित्याह विभक्तेऽपीत्यादिना । विभक्तेऽपि वण्टितेऽपि धने यस्तु मनुष्य स्वीयांशमात्मीयं भाग प्रतिपादयेन्नृपस्याग्रे साक्षिभिर्दर्शयेत् तस्मै अप्राप्तांशाय मनुष्याय पुनस्तत् द्रव्य विभज्य नृपो दायादैर्दापयेत् ॥ १७ ॥

सर्वेषा दायानां सम्मतौ सत्या द्रव्यविभागे जाते पुनस्तत्र विवाद कुर्वन्नरो महीपालेन शासनीयो भवेदित्याह कृत इत्यादिना । हे शिवे ! अंशिना सम्मतौ सत्या द्रव्याणां विभागे कृते सति पुनस्तत्र द्रव्यविभागे विवादयन् विवादं कुर्वन्नरो भूभृतो राज्ञः शास्यः शासनीयो भवति ॥ १८ ॥

नन्वमीतस्य मानवस्य विद्यमानाना तातभार्य्यापौत्राणा मध्ये कस्य तद्धनभागित्वमत आह स्थिते इत्यादिना । प्रेतस्य मृतस्य मनुष्यस्य पौत्रे पितरि चापि स्थिते भार्य्याया च स्थितायामधस्ताज्जन्म येषां तेषा गौरवाद्गुरुत्वाद्धेतो पौत्र एव धनार्हो धनयोग्य स्यात् ॥ १९ ॥

अपुत्रस्य स्थिते ताते सोदरे च पितामहे ।
जन्मतः सन्निकर्षेण पितैवास्य धनं हरेत् ॥ २० ॥
विद्यमानासु कन्यासु सन्निकृष्टास्वपि प्रिये ! ।
मृतस्य पौत्रो धनभाक् यतो मुख्यतरः पुमान् ॥ २१ ॥
धनं सुतेन पुत्रेण पौत्रं याति पितामहात् ।
अतोऽत्र गीयते लोकैः पुत्ररूपः स्वयं पिता ॥ २२ ॥
औद्वाहिकेऽपि सम्बन्धे ब्राह्मो भार्या वरीयसी ।
अपुत्रस्य हरेत्कृत्स्नं पत्युर्दैवार्हहारिणी ॥ २३ ॥

नन्वपुत्रस्य मृतस्य पुंसो वर्त्तमानानां जनकपितामहसमानोद-र्य्याणां मध्ये कतमस्य तद्वित्तहारित्वमत आह अपुत्रस्येत्यादिना । अपुत्रस्य मृतस्य जनस्य ताते पितरि सोदरे भ्रातरि पितामहे च स्थिते सति जन्मन· सन्निकर्षेण सान्निध्येन हेतुनाऽस्याऽपुत्रस्य धनं पितैव हरेत् स्वीकुर्यात् ॥ २० ॥

स्वर्यातरपुत्रस्यासन्नतरास्वपि कन्यासु स्थितासु पुंस· प्रधान-तरत्वात् पौत्रस्यैव धनभागित्वमित्याह विद्यमानास्वित्यादिना । हे प्रिये ! मृतस्य पुरुषस्य विद्यमानासु सन्निकृष्टास्वासन्नास्वपि कन्यासु यत· पुमान् पुरुषो मुख्यतर प्रधानतरो भवेदत· पौत्र एव धनभाग् भवेत् ॥ २१ ॥

अधुना पितुरेव सहेतुकं पुत्ररूपत्व व्याहरन् पुत्रहीनस्य मृतस्य पुंस· पौत्रस्यैव धनाधिकारित्वमनुवदति धनमित्यादिना । यतो धनं पितामहात् सकाशान्मृतेन पुत्रेण पौत्र याति गच्छति अतोऽत्र संसारे लोकैर्जनैः पिता स्वयं पुत्ररूप इति गीयते शब्द्यते ॥ २२ ॥

इदानीं ब्राह्मीदैव्योर्भार्य्ययोर्मध्ये ब्राह्म्या एवातिश्रेष्ठा पुत्ररहितस्य मृतस्य पत्युर्वित्तस्य हारिका चेत्याह औद्वाहिकेऽपीत्यादिना । औद्वाहिकेऽपि विवाहनिमित्तकेऽपि सम्बन्धे ब्राह्मो वेदोक्तविधिना परिणीता भार्या दैव्यभार्यायां वरीयसतिवरा भवेत् पत्यु स्वामिनो

पतिपुत्रविहीना तु सम्प्राप्य स्वामिनो धनम् ।
नैव दातु न विक्रेतुं समर्था स्वधनं विना ॥ २४ ॥
पितृभिः श्वशुरैर्व्वापि दत्तं यद्धर्म्मसम्मतम् ।
स्वकृत्योपार्जितं यच्च स्त्रीधनं तत् प्रकीर्त्तितम् ॥ २५ ॥
तस्यां मृतायां तत्कृत्स्नं तत् पुनः स्वामिपदं व्रजेत् ।
तदासन्नतरो रिक्थमध ऊर्द्ध्वक्रमाद्धरेत् ॥ २६ ॥
मृते पत्यौ स्वधर्म्मेण पतिबन्धुवशे स्थिता ।
तदभावे पितृबन्धोश्चिष्ठन्ती दायमर्हति ॥ २७ ॥

यतो देहार्द्धहारिणी स्यादतो ब्राह्मेव भार्य्याऽपुत्राश्च पुत्रवतीनाञ्च मृतस्य पत्युरकृत्स्नं धनं वक्ष्यमाणम् ॥ २३ ॥

अथ स्वामिपुत्राभ्यां रहिता स्त्री लब्धभर्त्तृविभवा सती तद्धनविक्रयौ कर्त्तुं न शक्नोतीत्याह पतिपुत्रेत्यादिना । पतिपुत्रविहीना स्त्री स्वामिनो धनं सम्प्राप्य लब्ध्वा नैव तद्दातुं न च विक्रेतुं समर्था शक्ता भवेत् । परन्तु स्वधनं विना, स्वकीयं तु धनं दातुं विक्रेतुं शक्नोतीत्यर्थः ॥ २४ ॥

ननु किं नाम स्त्रीधनमत आह पितृभिरित्यादिना । षष्ठ वचनस्य बहुपलक्षकत्वात् पितृभिर्ज्जनकादिभिः श्वशुरैः पतिपित्रादिभिर्व्वा धर्म्मसम्मतं यद्धनं दत्तं यच्च स्वकृत्या स्वीयया शिल्पादिक्रिययोपार्जितं तत् स्त्रीधनं प्रकीर्त्तितं कथितम् ॥ २५ ॥

ननु सम्प्राप्तस्वामिवित्ताया योषितो मृतौ सत्यां कस्य तद्धनहारितेत्यत आह तस्यामित्यादिना । तस्यां सम्प्राप्तस्वामिधनायां स्त्रियां मृतायां सत्यां तत्कृत्स्नं धनं पुनः स्वामिपदं व्रजेद्गच्छेत् स्वामिपदगतं च तत्कृत्स्नमध-ऊर्द्ध्वक्रमात्तदासन्नतरः स्वामिनोऽतिसन्निकृष्टो जनो हरेत् गृह्णीयात्तु सामान्यतः उक्तं विशेषतस्त्वग्रे वक्ष्यते ॥ २६ ॥

भर्त्तुर्जीवत्यपि सति भर्त्रादिबान्धवे स्वधर्म्मेण तिष्ठत्येव स्त्री स्वामिनो दायमर्हतीत्याह मृते पत्यादिना । पत्यौ स्वामिनि मृते स्व

अङ्गितव्यभिचारापि न पत्युर्हार्यभागिनी।
लभते जीवनं मात्रं भर्तुर्विभवहारिणः॥ २८॥
बह्वाश्वेदनितास्तस्य स्वर्यातुर्धर्मतत्पराः।
भजेरन् स्वामिनो वित्तं समांशेन शुचिस्मिते!॥ २९॥
पत्युर्धनहरायाश्च मृतौ भर्तृसुतास्थितौ।
पुनः स्वामिपदं गत्वा धनं दुहितरं व्रजेत्॥ ३०॥

पतिबन्धुवशे स्वधर्मेण स्थिता तदभावे पतिबन्धुभावे पितृबन्धोर्वशे तिष्ठन्ती स्त्री दाय पत्युर्धनमर्हति॥ २७॥

अङ्गितव्यभिचारा नारी तु यावच्छादनमात्रभागिनी न तु स्वामिधनभागिनीत्याह अङ्गितेत्यादिना। अङ्गितव्यभिचारापि स्त्री पत्युर्हार्यभागिनी न भवति किन्तु भर्तुर्विभवहारिणः पुरुषाज्जीवनं मात्रं जीवनमेव लभते प्राप्नोति। अपीति वदता सदाशिवेन प्रकटितव्यभिचारायाः नार्याः नितरामेव भर्तृदायभाजनत्वं नेति सूचितम्। जीव्यते येनादादिना तज्जीवनम् करणाधिकरणयोश्चेति करणे ल्युट्। मात्रं कर्तृक्षेत्रविभारणे इत्यमरः॥ २८॥

प्रेतस्य धर्मपरायणा बह्वीनां भार्याणां चेत् सर्वाः स्वामिनो द्रव्यं विभज्य गृह्णायुरित्याह बह्वीत्यादिना। हे शुचिस्मिते! शुभ्रे-ऽच्छाम्ले पवित्रेऽङ्गासे वा तस्य स्वर्यातुः स्वर्गगामिनः पुंसो धर्मतत्परा पुण्यपरायणाश्चेद्यदि बह्वीनां वनितानां स्त्रियः व्युत्पन्ना सर्वाः स्वामिनो वित्तं समांशेन तुल्यभागेन भजेरन् सेवेरन्॥ २९॥

लब्धभर्तृवित्तायां वनितायां मरणे सति तद्वित्तं पुनस्तत्स्वामिनं प्राप्य ततश्च तत्तनयां गच्छेदित्याह पत्युरित्यादिना। पत्युर्धनहरायाः स्वामिनो वित्तहारिण्याः स्त्रियाः मृतौ भर्तुः सुतायाः स्थितौ च सत्यां धनं पुनस्तत्स्वामिपदं गत्वा दुहितरं ततसुतां व्रजेद्गच्छेत् भर्तृसुतेति व्याहरन्नाहवेः क्रीतादिसुतां तद्धनं न गच्छेदिति सूचयाञ्चक्रे॥ ३०॥

एवं स्थितायां कन्यायामृक्थं पुत्रवधूगतम् ।
तन्मृता स्वामिन प्राप्य श्वशुरात्तत्सुतामियात् । ३१ ॥
तथा पितामहे सत्त्वे वित्तं मातृगत शिवे ! ।
तस्यां मृतायां पुत्रेण भर्त्रा श्वशुरगश्चवेत् ॥ ३२ ॥
मृतस्योर्ध्वगतं वित्तं यथा प्राप्नोति तत्पिता ।
जनन्यपि तथाप्नोति पतिहीना भवेद्यदि ॥ ३३ ।
अतः सत्यां जनन्यां तु विमाता न धन हरेत् ।
मृते जनन्यास्तं प्राप्य पिता गच्छेद्विमातरम् ॥ ३४ ॥

स्वीकृतपतिद्रव्याया नार्या मृतौ सत्यां तत् द्रव्यं भर्त्रृगतं तत श्वशुरगतं च सत् श्वशुरकन्यां यायादित्याह एवमित्यादिना । एवमनेन प्रकारेण कन्यायां स्थितायां सत्यां पुत्रवधूगतमृक्थं धनं तन्मृते पुत्रवधूमरणे सति स्वामिनं तद्भर्त्तारं प्राप्य ततश्च श्वशुर प्राप्य श्वशुरात्च तत्सुतां श्वशुरतनयामियाद्गच्छेत् । तन्मृते इत्यत्र ननु सप्तम्यर्थे भावे क्त इति क्तेन भावे क्त प्रत्यय । एतच्च भर्त्तुर्दुहित्रादिभ्यो दायीयपर्य्यन्ताभावे बोद्धव्यम् ॥ ३१ ॥

ननु प्राक्पुत्रवित्तायां मातुर्मरणे सति कस्य तद्वित्तभागितेत्यत आह तथेत्यादिना । हे शिवे ! तथा तेनैव प्रकारेण पितामहे सत्त्वे वर्त्तमानो मातृगत जननीप्राप्तं वित्तं धनं तस्यां मातरि मृतायां सत्यां पुत्रेणात्मजेन भर्त्रा पत्या च श्वशुरग भवेत् श्वशुर गच्छेदित्यर्थः । सत्त्वे सत्त्वमिति स्वार्थिकस्य दृश्यं पुत्रस्य बोदराणां तत्पुत्राणाञ्चाभावे बोध्यम् ॥ ३२ ॥

पुत्रादिपितृपर्य्यन्तरहितस्य प्राग्मृतपत्नीकस्य पुंसो जनकस्य जनन्या अपि दृष्टान्तद्वारीत्वं तन्मृतौ च तस्य विमातृरपीत्याह मृतस्येत्यादिद्वयेन । मृतस्य जनस्योर्द्ध्वगतमूर्द्धं प्राप्तं वित्तं तत्पिता मृतस्य जनको यथाप्नोति लभते तथैव यदि पतिहीना स्वामिरहिता भवेत् तदा तज्जनन्यर्थमाप्नोति ॥ ३३ ॥

अधस्तनानां विरहाद्यथा रिक्थं न यात्यधः।
येनैवाधस्तनं प्राप्तं तेनैवार्द्धं तदा व्रजेत् ॥ ३५ ॥
अतः स्थितौ पितव्यस्य धनं स्वहृगतञ्च सत्।
पत्यौ स्थितेऽनपत्याया मृतौ पितव्यमाश्रयेत् ॥ ३६ ॥
जङ्घादितमधः प्राप्य पुमांसमवलम्बते।
अतः सत्यां सोदरायां वैमात्रेया धनं हरेत् ॥ ३७ ॥
स्थितायां सोदरायाञ्च विमातुः पत्रसन्ततौ।
वैमात्रेयगतं वित्तं वैमात्रेयान्वयो भजेत् ॥ ३८ ॥

अत एव। अतो जनन्यान्तु सत्यां विमाता तस्य धनं न हरेत् किन्तु मातैव। एवं जनन्या मृते मरणे तु तद्धनं पुत्रः प्राप्य पितृव्या विमातरं गच्छेत् ॥ ३४ ॥

अधोऽधः [illegible]मुरुथं प्राप्तकाणामभावादधस्तादगच्छतो वित्तस्यो[illegible]र्द्ध-गामित्वेनो[illegible]नायां लब्धभर्तृवित्तायां पतिवत्नायाः स्वतुर्भृतौ सत्यां तद्धनं [illegible]धनस्य पितृव्याश्रयत्वं स्मृत्यादित्याह अधस्तनानामित्यादिद्वयेन। अधस्तनानामधोभव जनं धनं प्राप्तं तेनैव जनेनोर्द्धं व्रजेदूर्द्धगच्छेत् ॥ ३५ ॥

अत एव। अतोऽधस्तनानां विरहादूर्द्धगामित्वादेव पितृव्यस्थिते विद्यमानत्वायां पुत्रेण पुत्रया च रहितायां स्वतुर्भृतौ च सत्यां पत्यौ भर्तरि मृतेऽपि स्वहृगतं च सत् धनं पितृव्यमाश्रयेत्तस्या भ्राता पित्रादिना च पितृभ्रातरं भजेत्, अनपत्याया इति विशेषणेनापत्यवत्यास्तु मृतौ तद्गतस्य धनस्य तदपत्यगामित्वेनाश्रयत्वं सूचयत् ॥ ३६ ॥

जङ्घादधःप्राप्तस्य धनस्य पुरुषावलम्बित्वात् सोदरायां विद्यमानायामपि वैमात्रेयगामित्वेनैव स्मृत्यादित्याह जङ्घादित्यादिना। अतो वित्तं धनमूर्द्धादधः प्राप्य पुमांसं पुरुषमवलम्बते आश्रयत्वेन सोदरायां भगिन्यां सत्यामपि वैमात्रेयो विमातृजो धनं हरेत् ॥ ३७ ॥

मृतस्य सोदरो भ्राता वैमात्रेयस्तथा शिवे ! ।
धनं पितृगतत्वेन विभजेतां समांशिनौ ॥ ३९ ॥
कन्यायां जीवितायाञ्च तदपत्यं न दायभाक् ।
यत्र यद्बाधितं वित्तं तन्मृतावपरं व्रजेत् ॥ ४० ॥
विभजेयुर्दुहितरः पुत्राभावे पितुर्धनम् ।
उद्वाह्यन्त्योऽनूढाश्च पितुः साधारणैर्धनैः ॥ ४१ ॥

ननु सोदरायां वैमात्रेयसत्त्वे च विद्यमानायां वैमात्रेयमरणे सति तद्धनं कथं प्राप्नुयात्तत्राह मृतस्येत्यादिना । सोदरायां भगिन्यां विमातुः पुत्रसत्त्वे च स्थितायां सत्यां वैमात्रेयगतं वित्तं तन्मरणे सति वैमात्रेयान्वयो विमातृजसन्ततिर्भजेत् सेवेत् ॥ ३८ ॥

पुत्रादिमातृपर्य्यन्तरहितस्य प्रमीतस्य पुत्र सोदरवैमात्रेययोरुभयोरपि तद्धने समभागित्वमित्याह मृतस्येत्यादिना । हे शिवे ! मृतस्य जनस्य सोदरो भ्राता तथा वैमात्रेयश्चैतौ तद्धनस्य पितृगतत्वेन हेतुना तत्र समांशिनौ सन्तौ तद्धनं विभजेतां विभज्य गृह्णीयातामित्यर्थः ॥ ३९ ॥

जीवन्त्यां कन्यायां तदपत्यस्य दायभागित्वं नेत्याह कन्यायामित्यादिना । कन्यायां जीवितायां सत्यां तदपत्यं दायभाग्भवेत्, किन्तु कन्यैव दायभागिनी स्यादित्यर्थः । यत्र जने यद्वित्तं धनं यद्बाधितं भवेत् तन्मृतौ तस्य बाधकजनस्य मरणे सति तद्वित्तं तदपरं जनं व्रजेत् ॥ ४० ॥

अपरिणीतां भगिनीं सामान्यैस्तातदेयैरुद्वाह्यन्त्यो दुहितरो मृतस्याऽपुत्रस्य पितुर्द्रविणं सर्वा विभज्य गृह्णीयुरित्याह विभजेयुरित्यादिना । पितुः पुत्राभावे सति पितुः साधारणैः सामान्यैर्धनैरनूढामपरिणीतां पितुः पुत्रीमुद्वाह्यन्त्यो दुहितरः पुत्राः पितुर्वसु द्रव्यं विभजेयुः । तच्छब्देन विवाह्यमानापि पितृद्रव्यं विभजेत् ॥ ४१ ॥

असन्तत्या मृतायाश्च स्त्रीधनं स्वामिनं भजेत् ।
अन्यत्तु द्रविणं यस्मान्नाप्तं तत् पतिमाश्रयेत् ॥ ४२ ॥
प्रेतलब्धधनैर्नारी विदध्यादात्मपोषणम् ।
पुत्रस्तु तदपत्यत्वे शक्ता दानविक्रये ॥ ४३ ॥
पितामहस्य भार्यायाश्च सत्यां तातविमातरि ।
पितामहगतं रिक्थं तत् पुत्रेण स्नुषां व्रजेत् ॥ ४४ ॥
पितामहे पितव्ये च तथा भ्रातरि जीवति ।
अधोभवानां सुव्यत्वात् भ्रातैव धनभाग् भवेत् ॥४५॥

अनपत्यायां प्रमीतायां भार्यायां स्त्रीधनस्य तत्स्वामिगामित्वमपरस्य तु तल्लब्धस्य द्रव्यस्य यतः प्राप्तिकालोत्तरप्रदानाश्रयत्वमित्याह असन्तत्या इत्यादिना । असन्तत्या असन्निरूपितायां भार्यायां स्त्रीधनं तद्भर्तारं भजेत् सेवेत् अन्यत्तु तद्भिन्नन्तु द्रविणं द्रव्यं यस्माज्जनादाप्तं लब्धं तत्पतिमाश्रयेद्भजेत ॥ ४२ ॥

प्रेतप्राप्तानि पित्राणि दातुं विक्रेतुं वाशक्नुवती नारी मरणपर्यन्तं भुञ्जीत तदपत्यत्वेस्तु धर्मतोपि क्वचीत्याह प्रेतेत्यादिना । प्रेतलब्धधनैर्मृता तत्प्राप्तैर्वित्तैर्नारी योषिदात्मपोषणमात्मनो भरणं विदध्यात कुर्यात् पुत्रस्य धर्मं तु तदपत्यत्वैस्तन्निमित्तैस्तत एवोपजातैर्धनैर्विदध्यात्, तेषां दाने विक्रये च शक्ता समर्था न भवेत् ॥ ४३ ॥

ननु पुत्रादिपित्रव्यपर्यन्तरहितस्य मृतस्य पुंसो द्रविणस्य तत्पितृव्यपत्नीगामित्वं तातविमातृगामित्वं वेत्याशङ्क्याह पितामहेत्यादिना । पितामहस्नुषायां पितामहपुत्रभार्यायां तातविमातरि च सत्यां विद्यमानायां पितामहगतं रिक्थं धनं तत्पुत्रेण पितामहस्यात्मजेन स्नुषां पत्नपत्नीं व्रजेत् ॥ ४४ ॥

ननु पुत्रादिमातृपर्यन्तरहितस्य प्रेतस्य पुंसो विद्यमानायां पितामहपितृव्यभ्रातॄणां मध्ये कतमस्य तद्धनभागित्वं तत्राह पितामह इत्यादिना श्लोकद्वयेन । पितामहे पितृव्ये तथा भ्रातरि च

पितृव्यात् सन्निकर्षेऽत्र तुल्यौ भ्रातृपितामहौ ।
धनं पितृपदं गत्वा प्रयातुर्भ्रातरं व्रजेत् ॥ ४६ ॥
स्थितेऽप्यपत्ये दुहितुः प्रेतस्य पितरि स्थिते ।
दुहितृपत्यं धनभाग् धनं यस्मादधोमुखम् ॥ ४७ ॥
स्वःप्रयातुः स्थिते तातेतथा मातरि कालिके ! ।
पुंसो मुख्यतरत्वेन धनहारी भवेत् पिता ॥ ४८ ॥
स्थितः स्वपितृसापिण्ड्ये वर्त्तमानेऽपि मातुले ।
प्रेतस्य धनहारी स्यात् पितुः सम्बन्धगौरवात् ॥ ४९ ॥

जीवति सति अधोभवानां जनानां मुख्यत्वात् प्रधानत्वाद्धेतोर्भ्रातैव धनभाग् भवेत् मृतात् पुत्रात् पितृगत धनमृतस्य भ्रातैव भजेदित्यर्थः ॥ ४५ ॥

पितृव्यादिति । अत्र लोके पितृव्यात् सन्निकर्षे सामीप्ये सत्यपि भ्रातृपितामहौ तुल्यौ समानौ भवतस्तथाप्यधोभवानां सुख्यदात् स प्रयातुर्जनस्य धनं पितृपदं गत्वा भ्रातरं भजेत् ॥ ४६ ॥

ननु पुत्रादिपुत्रीपर्य्यन्तहीनस्य मृतस्य पुंसो विद्यमानयोस्तात दुहितृपत्नयोर्मध्ये कतरस्य तद्धनग्राहकत्वमत आह स्थित इत्यादिना । प्रेतस्य मृतस्य जनस्य पितरि स्थिते दुहितुरपत्येऽपि स्थिते सति यस्माद्धनमधोमुखं स्यात्तो दुहितृपत्यमेव धनभाग् भवेत् ॥ ४७ ॥

प्रेतस्य पुंसो जीवतोर्मातापित्रोर्मध्ये पुरुषस्य प्रधानत्वात् पितुरेव तद्वित्तहारित्वमित्याह स्व० प्रयातुरित्यादिना । हे कालिके ! स्व० प्रयातुर्मृतस्य जनस्य तातेपितरि स्थिते सति तथा मातरि स्थितायां सत्यां पुंसो मुख्यतरत्वेन हेतुना पिता धनहारी भवेत् ॥ ४८ ॥

ननु मृतस्य पुंसो विद्यमानयोर्मातृत्वपितृसपिण्ड्योर्मध्ये कतरस्य तद्वित्तभागित्वमत आह स्थित इत्यादिना । मातुले वर्त्तमानेऽपि पितुः सम्बन्धस्य गौरवाद्धेतोः स्थितः स्वपितृसापिण्ड्ये प्रेतस्य

अधस्ताद्गमनाभावे धनमूर्ध्वभवं गतम् ।
तत्रापि पुंसां मुख्यत्वादितं पितृकुलं शिवे ।।
अतोऽत्र सन्निकृष्टोऽपि मातुलो नाप्नुयाद्धनम् ॥ ५० ॥
अजीवत्पितृकः पौत्रः पितृव्यैः सह पार्वति ।।
पितामहस्य द्रविणात् स्वपितुर्हार्यमर्हति ॥ ५१ ॥
भ्रातृहीना तथा पौत्री पितृव्यैः समभागिनी ।
पितामहधनं सौम्या हरेच्चेन्मृतमातृका ॥ ५२ ॥
सत्यां पौत्र्याः पितामह्यां पौत्र्याः पितृष्वसर्यपि ।
वित्ते पितृगते देवि । पौत्री तत्राधिकारिणी ॥ ५३ ॥

धनहारी स्यात् सपिण्ड एव सापिण्ड्यं प्रज्ञादिभ्यश्चेति स्वार्थेऽण् ॥ ४९ ॥

ननु पितुः सपिण्डात् सन्निकृष्टस्य मातुलस्यैव प्रेतधनहर्तृत्वं सम्भवति न तु विप्रकृष्टस्य पितुः सपिण्डस्येतीमामाशङ्कां परिहरन्नाह अधस्तादित्यादिधनमित्यन्तं सार्द्धम् । हे शिवे ! अधस्ताद्गमनाभावे सति प्रेतस्य धनमूर्ध्वभवं जनं गतं प्राप्तं भवेत् तत्राप्यूर्ध्वभवेऽपि पुंसां मुख्यत्वाद्धेतोः पितृकुलमितं प्राप्तं स्यात् अतो हेतोरत्र लोके सन्निकृष्टोऽप्यासन्नोऽपि मातुलः प्रेतस्य धनं नाप्नुयाच्च लभेत् ॥ ५० ॥

भ्रातृभ्योऽविभक्तस्य पुरुषस्य मृतौ सत्यां ततपुत्रः पितृव्यैः सार्द्धं पैतामहकद्रव्यात् पैतृकमंशं प्राप्नुयादित्याह अजीवदित्यादिना । हे पार्वति ! अजीवत्पितृको मृतजनकः पौत्र पितृव्यैः पितुर्भ्रातृभिः सह पितामहस्य द्रविणात् द्रव्यात् स्वपितुर्हार्यं प्राप्तुमर्हति ॥५१॥

अजीवन्मातृका भ्रातृरहिता पौत्रीपि पितामहात् द्रव्यात् प्रमीतस्य पितुरंशं प्राप्तुमर्हतीत्याह भ्रातृहीनेत्यादिना । चेदादि मृतमातृका भ्रातृहीना सोदरवैमात्रेयरहिता सौम्या व्यभिचाराख्यदोषहीना च भवेत् तदा तथा तेन प्रकारेण पौत्री पुत्रदुहिता पितृव्यैः समभागिनी सती पितामहधनं हरेत् गृह्णीयात् ॥ ५२ ॥

अधोगामिषु वित्तेषु पुमान् ज्यायानधस्तनः ।
ऊर्द्ध्वगामिधने श्रेष्ठः पुमानूर्द्ध्वोद्भवो भवेत् ॥ ५४ ॥
अतः स्नुषायां पौत्र्यां च सत्यां दुहितरि प्रिये ।
प्रेतस्य विभवं हर्त्तुं नैव शक्नोति तत् पिता ॥ ५५ ॥
यदा पितृकुले न स्यान्मृतस्य धनभाजनम् ।
पूर्वोक्तविधिना रिक्थं मातामहकुलं भजेत् ॥ ५६ ॥
मातामहगतं वित्तं मातुलैस्तत्सुतादिभिः ।

ननु प्राप्तपञ्चत्वस्य पुंसो विद्यमानानां जननीभगिनीपुत्रीणां मध्ये तद्वित्ते काधिकारिणी स्यात् तत्राह सत्यामित्यादिना । हे देवि ! पौत्र्याः पितामह्याः तथा पौत्र्याः पितृष्वस्रर्यपि सत्यां विद्यमानायामधस्ताज्जन्मगौरवात् पौत्री तत्र पितृगते वित्तेऽधिकारिणी स्यात् ॥ ५३ ॥

ननु प्रेतस्य स्नुषाया दुहितृतः पौत्र्याश्च तज्जनकस्य पुत्रेण श्रेष्ठत्वाद्विद्यमानस्य तस्यैव तद्धनहारित्वं सङ्गच्छते न तु तत्स्नुषादीनामितीमं सन्देहं दूरीकुर्वन्नाह अधोगामिष्वित्यादिना तत्पितेत्यन्तं श्लोकद्वयम् । अधोगामिषु वित्तेषु धनेष्वधस्तनोऽधोभवः पुमान् ज्यायान् श्रेष्ठो भवेन्नूर्द्ध्वोद्भवः ऊर्द्ध्वगामिधने तूर्द्ध्वोद्भव पुमान् श्रेष्ठो भवेत् ॥ ५४ ॥

अत इति । हे प्रिये ! अतोऽधोगामिधने ऊर्द्ध्वोद्भवस्याश्रेष्ठत्वाद्धेतोः प्रेतस्य स्नुषाया पुत्रभार्यायां पौत्र्यां दुहितरि च सत्यां वर्त्तमानायां प्रेतस्य विभवं धनं हर्त्तुं ग्रहीतुं तत्पिता नैव शक्नोति किन्तु यथाक्रमं तत्र प्रेतधनं हर्त्तुं शक्तुवन्तीत्यर्थः ॥ ५५ ॥

ननु प्रेतपुरुषस्य पितुर्वंशे धनग्राहकाभावे तद्दृष्टव्यस्य किं कुलगामित्वं स्यादत आह यदेत्यादिना । यदा मृतस्य जनस्य पितृकुले धनभाजनं धनस्य ग्राहकं न स्यात्तदा पूर्वोक्तविधिना पूर्वकथितविधानेन रिक्थं प्रेतस्य धनं मातामहकुलं भजेत् सेवेत् ॥ ५६ ॥

अथ-ऊर्द्ध्वक्रमेणैवं पुमांसं स्त्रियमाश्रयेत् ॥ ५७ ॥
ब्राह्मप्रन्वये विद्यमाने पित्राः सापिण्डने स्थिते ।
मृतस्य शैवौ तनया न पितुर्दायभाग् भवेत् ॥ ५८ ॥
शैवौ पत्नौ च तत्पुत्रा लभेरन् धनभागिनः ।
ग्रासमाच्छादनं भर्त्रे । स्वप्रयातुर्यथा धनम् ॥ ५९ ॥
शैवाद्वाह प्रकुर्व्वन्तीं शैवभर्त्तैव पालयेत् ।
सौम्याच्चेन्नाधिकारोऽस्याः पित्रादीना धने प्रिये ॥ ६० ॥

मातामहकुलयातस्य द्रव्यस्याथ-ऊर्द्ध्वक्रमेणैव पुरुषाश्रयत्वं तदस्त्रे नार्याश्रयत्व च स्मृतित्याह मातामहेत्यादिना । मातामहगत मातामहं प्राप्त वित्तं धन मातुर्लैस्तत्सुतादिभिर्मातुलपुत्रादिभिश्चाथ-ऊर्द्ध्वक्रमेण एव पितृकुले इव पुमांस पुरुषं तदभावे स्त्रियमाश्रयेत् सेवेत् ॥ ५७ ॥

अथ प्रेतपुरुषस्य ब्राह्मभार्य्याया अन्वये मातापित्रो. सपिण्डे वा स्थिते शैवापुत्रस्य तद्विभवभागित्व नेत्याह ब्राह्मप्रन्वये इत्यादिना । ब्राह्मप्रन्वये ब्राह्मया भार्य्याया वशे विद्यमाने पित्रोर्मातुः पितुश्च सापिण्डने सपिण्डे वा स्थिते सति शैवी तनयः शैव्याभार्य्यायाः पुत्रो मृतस्य पितुर्दायभाग् न भवेत्, किन्तु विद्यमानयोस्तयोरेव क्रमत तद्दायभागित्वमित्यर्थ । एतन ब्राह्मप्रन्वयस्त्र मातापित्रोः सपिण्डस्त्र चाभावे शैवीतनयस्येव मृतजनकदायभागित्वमिति ध्वनितम् ॥ ५८ ॥

ननु ब्राह्मप्रन्वयस्थ पित्रो सपिण्डस्य वा वर्त्तमानत्वे शैवीपुत्राणा मृतपितृदायभा गत्वाभावे कथञ्चदरभरणादिनिर्वाहस्तत्राह शैवीत्यादिना । हे भद्रे ! स्व प्रयातु. स्वर्गतस्य पुंस शैवी पत्नी तत्पुत्रा शैव्यास्तनजाश्च तस्य धनभागिन पुरुषाद्यथा धनं यथा विभवं ग्रासमाच्छादनं च लभेरन् प्राप्नुयु ॥ ५९ ॥

ननु शैवसुद्वाहं कुर्वती नारी पित्रादिभि पालनीया भवेच्छैवेन भर्त्तृा वेत्याशङ्कायामाह शैवोद्वाहमित्यादिना । हे प्रिये ! यतोऽस्याः

अतः सत्कुलजां कन्यां शैवैरुद्वाहयन् पिता ।
क्रोधाद्वा लोभतो वापि स भवेल्लोकगर्हितः ॥ ६१ ॥
शैवी तदन्वयाभावे सोदको ब्रह्मदो नृप ।
हरेयुः क्रमतो वित्तं मृतस्य शिवशासनात् ॥ ६२ ॥
पिण्डदात् सप्तपुरुषाः सपिण्डा कथिताः प्रिये ! ।
सोदका दशमान्ताः स्युस्तत' केवलगोत्रजाः ॥ ६३ ॥

शैव्या स्त्रिया पित्रादीनां धनेऽधिकारो नास्त्यत शैवोद्वाहं प्रकुर्वन्तीं तां वेद्यादि सौम्यामव्यभिचारिणीं जानीयात्तदा शैवमर्चां च पालयेत् रक्षेत् । जानीयादिति त्वध्याहारेणान्वयः । प्रकुर्वन्तीमित्यत्र नुसागमस्त्वार्षः ॥ ६० ॥

अथ शैवेन विधिना सत्कुलजा कन्यामुद्वाहयतोऽजनकस्य लोकनिन्द्यत्वं दर्शयितुमाह अत इत्यादिना । अतो ब्राह्मत्वे मातापित्रोः सपिण्डे वा स्थिते भर्तुर्द्रव्ये स्वपित्रादिद्रव्ये चाधिकारस्याभावाद्धेतोः क्रोधाद्वा लोभतो वापि शैवैर्विधिभिः सत्कुलजां सद्वंशजातां कन्यामुद्वाहयन् य स पिता लोकगर्हितो लोकनिन्दितो भवेत् ॥६१ ॥

पुत्त्रादिशैवीसन्ततिपर्य्यन्तरक्षितस्य प्राप्तपञ्चत्वस्य पुरुषस्य स्थावरादिसकलद्रव्येषु सोदकस्य वेदाध्यापकगुरोर्नरपतेश्च क्रमशोऽधिकारित्वमस्तीत्याह शैवीत्यादिना । शैवी तदन्वयाभावे सति सोदको ब्रह्मदो वेदाध्यापक गुरु रूपो राजा च मृतस्य वित्त धन शिवशासनात् शिवाज्ञात क्रमतो हरेयु यथा शैवी तदन्वयाऽसत्वे प्रथमत सोदको मृतस्य वित्तं हरेत्, तदभावे वेदाध्यापकः तदसत्वे तु राजा वेति ॥ ६२ ॥

ननु केषां सपिण्डत्वं केषां सोदकत्वं केवलगोत्रजत्वं च केषामत आह पिण्डदात्यादिना । हे प्रिये ! पिण्डदात् पिण्डदातारं पुरुषमारभ्य सप्तपुरुषा. सपिण्डा. कथिता. तत ऊर्द्धं दशमान्ता.

विभक्तं द्रविणं यच्च संसृष्टं स्वेच्छया तु चेत् ।
अविभक्तविधानेन भजेरंस्तद्धन पुनः ॥ ६४ ॥
अविभक्ते विभक्ते वा यस्य यादृग्विभागिता ।
मृतेऽपि तस्य दायादास्तादृग्विभवभागिनः ॥ ६५ ॥
ये यस्य धनहर्त्तारो भवेयुर्जीवनावधि ।
दद्युः पिण्डं तएवास्य श्रैवभार्य्यासुं . विना ॥ ६६ ॥
लोकेऽस्मिन् जन्मसम्बन्धाद् यथाशौचं विधीयते ।
धनभागित्वसम्बन्धात् त्रिरात्रं विहितं तथा ॥ ६७॥

दशमपुरुषान्ता· सोदका स्यु। तत परं केवलगोत्रजा भवेयु पिण्डदादिति ल्यब्लोपे कर्मणीति कर्मणि.पञ्चमी ॥ ६३ ॥

विभक्तस्य पश्चात् स्वेच्छया संसृष्टस्य द्रव्यस्याविभक्तविधानेनैव पुनर्विभागमाह. विभक्तमित्यादिना । चेद्यदि विभक्तं यत् द्रविणं द्रव्यं स्वेच्छया संसृष्टं मिश्रीकृतं स्यात्तदा तद्धन पुनरविभक्तविधानेन दायादा भजेरन् ॥ ६४ ॥

जीवतो यस्य पुरुषस्य विभक्ताऽविभक्ताखिलद्रव्येषु येषा यादृग्विभागित्वं तस्य मरणेऽपि तत्र तेषां तादृग्विभागित्वं स्यादेवेत्याह अविभक्ते इत्यादिना । यस्य पुरुषस्याविभक्ते विभक्ते वा द्रव्ये येषां दायादानां यादृग्विभागिता स्यात्तस्य पुंसो मृतेऽपि मरणेऽपि ते दायादास्तादृग्विभवभागिनो भवेयु· ॥ ६५ ॥

प्रमीतस्य यस्य पुंसो द्रविणं ये लभेरंस्तएव यावज्जीवनं तएव पिण्डं दद्युरित्याह ये इत्यादिना । ये पुमांसो यस्य पुंसो धनहर्त्तारो भवेयुस्तएव जीवनावधि जीवनपर्य्यन्तमस्य पुरुषस्य पिण्डं दद्यु· परन्तु श्रैवभार्य्यासुतं विना तस्य तत्पिण्डदानेऽधिकारो नास्तीत्यर्थ. । श्रैवभार्य्यासुतमिति श्रैव्यास्तद्धितादीना चोपलक्षणम् ॥ ६६ ॥

यथा जन्मसम्बन्धात् सर्वेषां बान्धवानां मरणजनननिमित्तकम-

पूर्णेऽशौचेऽथवाऽपूर्णे तत्कालाभ्यन्तरे श्रुते।
अवणाच्छेषदिवसैर्विशुद्ध्येयुर्द्विजादयः॥ ६८॥
कालातीते तु विज्ञाते खण्डेऽशौचे न विद्यते।
पूर्णे त्रिरात्रं विहितं न चेत् संवत्सरात् परम्॥६९॥
वर्षातीतेऽपि चेन्मातुः पितुर्वा मरणश्रुतौ।
त्रिरात्रमशुचिः पुत्रस्तथा भर्तुः पतिव्रता॥ ७०॥

शौचं जायते एव धनभागित्वसम्बन्धाद्धनहारिणामपि त्रिरात्रमशौचं स्यादित्याह लोके इत्यादिना। जन्मसम्बन्धाद्यथाऽस्मिन् लोके जने मरणजननिमित्तकमशौचं विधीयते तथा धनभागित्वसम्बन्धाद्धनहर्त्तॄणामपि त्रिरात्रमशौचं विहितम्। लोक. स्याद्धुवने जने इत्यमर.॥ ६७॥

नन्वशौचकालाभ्यन्तर एव पूर्णे खण्डे वाऽशौचं श्रुत्वतामपरदेशस्थानां ब्राह्मणादीनामशौचश्रवणवासराद्दशभिरेवाशौचवासैर्विशुद्धिः स्यात्तद्वासरमारभ्यापरैर्वा दशाहादिभिरित्याशङ्क्याहाः पूर्णे इत्यादिना। पूर्णेऽशौचेऽथवाऽपूर्णे खण्डेऽशौचे तत्कालाभ्यन्तरेऽशौचकालमध्ये श्रुते सति श्रवणादशौचश्रवणदिवसाच्छेषदिवसैरवशिष्टैरहोरात्रैर्द्विजादयो ब्राह्मणाद्यो विशुध्येयुः शूयतेऽस्मिन्निति श्रवणं तस्मात्। करणाधिकरणयोश्चेत्यधिकरणे ल्युट्॥ ६८॥

नन्वशौचकालव्यपगमे सति संवत्सराभ्यन्तर एव ज्ञातिमरणं श्रुत्वतो ब्राह्मणादयः कियद्भिरहोरात्रैर्विशुध्येयुरत आह कालातीते इत्यादिना। कालातीते त्वशौचकालातिक्रमणे तु खण्डेऽशौचे विज्ञाते सत्यशौचं न विद्यते चेद्यदि संवत्सराद्वर्षात् परमूर्द्ध्वं दिनादिकमतीतं न भवेत्तदा अतीतेऽप्यशौचकाले पूर्णेऽशौचे विज्ञाते सति त्रिरात्रमशौचं विहितम्। काजस्यातीतं कालातीतमिति षष्ठीति, स्तलोप षष्ठीतत्पुरुष.। अतीतमित्यतिपूर्वादिणो भावे क्तः। नाशौचं प्रसवस्यास्ति व्यतीतेषु दिनेष्वपीति देवलवचनात् मरणविषयकमिदं वचनम्॥६९॥

अशौचाभ्यन्तरे यस्मिन्नशौचान्तरमापतेत् ।
गुर्वशौचेन मर्त्यानां शुद्धिस्तत्र विधीयते ॥ ७१ ॥
अशौचानां गुरुत्वञ्च कालव्यापित्वगौरवात् ।
व्याप्यव्यापकयोर्मध्ये गरीयो व्यापकं स्मृतम् ॥ ७२ ॥
यद्यशौचान्तदिवसे पतेदपरसूतकम् ।
पूर्वाशौचेन शुद्धिः स्यादन्यद्वा दिनद्वयम् ॥ ७३ ॥

सवत्सरे व्यतीतेऽपि मातापित्रोर्मरण श्रुत्वा पुत्रस्य स्वामिनो मरण श्रुत्वा पतिव्रतायाश्च त्रिरात्रमशौच स्यादित्याह वर्षातीते-ऽप्यौत्यादिना । वर्षातीतेऽपि सवत्सरातिक्रमेऽपि वेद्यादि भवेत् पितृव्यौ मरणश्रुतिः स्यात्तदा तयोर्मरणश्रुतौ सत्यां पुत्र त्रिरात्र-मशुचि स्यात् तथा भर्तुः स्वामिनो मरणश्रुतौ पतिव्रता स्त्री त्रिरात्र-मशुचि स्यात् ॥ ७० ॥

एकस्मिन्नशौचे सति तच्छेषवासरादसमाप्तावेव विषमकालव्यापका-शौचान्तरनिपाते सत्यधिकदिनव्यापकेनाशौचेन मर्त्यानां शुद्धि स्यादित्याह अशौचाभ्यन्तर इत्यादिना । यस्मिन्नशौचे सत्यशौचाभ्यन्तरे-ऽशौचमध्येऽशौचान्तरं विषमकालव्याप्यकमपरमशौचमापतेदागच्छेत्त स्मिन्नशौचे जाते सति गुर्वशौचेनाधिकदिनव्यापकेनाशौचेनागतेन मर्त्यानां शुद्धिर्विधीयते ॥ ७१ ॥

अथाशौचानां गुरुत्वं निरूपयति अशौचानामित्यादिना । काल-व्यापित्वगौरवात् कालव्यापकत्वे गुरुत्वाङ्गेतोरशौचानां गुरुत्वं भवेत्, अधिककालव्यापकत्वादशौचानां गुरुत्वमल्पकालव्यापकत्वाच्च लघुत्व-मित्यर्थः । व्याप्यव्यापकयोरशौचयोर्मध्ये व्यापकमशौचं गरीयो गुरु-तरं स्मृतम् ॥ ७२ ॥

नन्वशौचान्तदिनेऽपरस्मिन्नशौचे सति ते पूर्वाशौचेनैव शुद्धिः स्यात् पराशौचेन वेत्याशङ्कायामाह यदीत्यादिना । अशौचान्तदिवसे

तावत् पितृकुलाशौचं यावच्चोद्वहनं स्त्रियाः ।
जाते परिणये पित्रार्मृतौ त्वाहमुदाहृतम् ॥ ७४ ॥
विवाहानन्तरं नारी पतिगोत्रेण गोत्रिणी ।
तथा गृहीतगोत्रेण दत्तपुत्रस्य गोत्रिता ॥ ७५ ॥
सुतमादाय सम्भूता जनन्या जनकस्य च ।

जननाशौचव्याप्तिमेऽहोरात्रे यद्यपरस्मिन्क तद्दिनजननिमित्तक-खण्डाशौचं पतेत्तदा पूर्वाशौचेनैव व्याप्तेन शुद्धिः स्यात् । यदि त्वशौचान्तदिवसे पूर्वाशौचान्तरोपनिपाते सत्यद्यत्वद्वित्वं भवेत् तदाद्यदृष्ट्या पूर्वाशौचान्तदिवसावधिक दिनद्वयमशौचं स्यात् सूतकमिति तु सूतक-स्याप्युपलक्षणम् । तत्राप्येवमेवावगन्तव्यम् ॥ ७३ ॥

ननु स्त्री तातकुल एवाशौचे सत्यशौचं भवेद्भर्तृकुल एव वा किमु-भयत्राशौचाशङ्कायामाह तावदित्यादिना । यावदुद्वहनमुद्वाहो न भवेत्तावत्कालपर्यन्तं स्त्रियाः पितृकुलाशौचं पितृकुलसम्बन्धशौचं स्यात्, एतेन विवाहात् परतो भर्तृकुलसम्बन्धेन स्त्रिया अशौचं भवे-दिति सूचितम् । नन्वेवोद्वाहादूर्ध्वं सुतोत्पादकयोर्ज्ञातापित्रोरपि मृतौ नार्या अशौचं न श्रूयते आह जाते इत्यादिना । परिणये विवाहे जाते सत्यपि पित्रोर्मृतौ सति पितुश्च मरणे सति स्त्रियाः त्र्याहं त्रिदिनमशौचमुदाहृतम् ॥ ७४ ॥

ननु वैवाहिकसम्बन्धाज्जननसम्बन्धस्य बलवत्त्वस्यौत्सर्गिकत्वाच्चार्या पितृकुल एवाशौचे सत्यशौचं युक्तं न तु पतिकुलाशौचे सतीत्यत आह विवाहानन्तरमित्यादिना । विवाहानन्तरमुद्वाहात् परतो नारी स्त्री पतिगोत्रेण गोत्रिणी स्यात् । विवाहाद्ध्वं पितृगोत्रा अभूतत्वात्त-त्राशौचे सति स्त्रिया अशौचं न स्यादिति भावः । ननु दत्तकपुत्रस्य जनकगोत्रेण गोत्रवत्त्वमादातृगोत्रेण वेति सन्देह पूर्वार्द्धाह तथेत्यादिना । तथा तेन प्रकारेण दत्तपुत्रस्य गृहीतगोत्रेण गोत्रिता गोत्रवत्ता स्यात् ॥ ७५ ॥

स्वगोत्रनामान्युल्लिख्य संस्कुर्यात् स्वजनैः सह ॥ ७६॥
औरसेऽपि यथा पित्रोर्धने पिण्डेऽधिकारिता ।
आदात्रोर्दत्तके तद्वत्यतोऽस्य पितरौ हि तौ ॥ ७७॥
आपञ्चाब्दं शिशुं गृह्णन् सवर्णात् परिपालयेत् ।
पञ्चवर्षाधिको बालो दत्तको न प्रशस्यते ॥ ७८ ॥
भ्रातृपुत्रोऽपि दत्तश्चेद् गृहीतैव भवेत् पिता ।
उत्पादकः पितव्यः स्यात् सर्वकर्मसु कालिके ! ॥ ७९॥

इदानीं मातापित्रोः सम्मत्या पुत्रमादाय गृहीत्वा स्वगोत्रनामान्युच्चार्य तत्संस्कारो विधेय इत्याह सुतमित्यादिना । जनन्या जनयित्या जनकस्योत्पादकस्य च सम्मत्या सुतं तत्पुत्रमादाय गृहीत्वा स्वगोत्रनामान्युल्लिख्यात्मगोत्रनामध्येयान्युच्चार्य गृहीता स्वजनैर्बान्धवैः सह संस्कुर्यात् ॥ ७६ ॥

आदात्रोर्मातापित्रोर्धने पिण्डे च दत्तकपुत्रस्य सदृष्टान्तमधिकारित्वमाह औरसेऽपीत्यादिना । अपिशब्द पिण्डेन योजनीय । पित्रोर्धने पिण्डेऽपि यथौरसे पुत्रेऽधिकारिता वर्त्तते तद्वदादात्रोरपि धने पिण्डे च दत्तकेऽधिकारिता स्यात् । दत्तकस्यादात्रोः पिण्डादावधिकारे हेतुं दर्शयन्नाह यत इत्यादिना । यतोऽस्य दत्तकस्य तावादातारौ हीति निश्चितौ पितरौ स्यातामतस्तज्जनपिण्डयोस्तस्याधिकारितेत्यर्थः ॥ ७७ ॥

ननु कियद्वयस्को बालो दत्तकः प्रशस्तोऽत आह आपञ्चाब्दमित्यादिना । सवर्णात् समानवर्णादापञ्चाब्दं पञ्चाब्दपर्य्यन्तं शिशुं बालं गृह्णन् ब्राह्मणादिः परिपालयेद्रक्षेत् पञ्चाब्दा वर्षाणि यस्य सपञ्चाब्दस्तस्मादा इत्यापञ्चाब्दम् । आङ्मर्यादाभिविध्योरित्यव्ययीभाव । पञ्चवर्षाधिको यो बालो ऽसौ दत्तको न प्रशस्यते ॥ ७८ ॥

दत्तस्य भ्रातृपुत्रस्याप्यादाता तत्पितव्य एव पिता स्यात्तज्जनकस्तु तत्पितव्यः स्यादित्याह भ्रातृपुत्रोऽपीत्यादिना । हे कालिके !

यो यस्य धनहर्त्ता स्यात् स तद्धर्म्माणि पालयेत् ।
सरक्षेन्नियमान् तस्य तद्बन्धून् परितोषयेत् ॥ ८० ॥
कानीना गोलकाः कुण्डाः अतिपातकिनश्च ये ।
नाशौचं मरणे तेषां नैव दायाधिकारिता ॥ ८१ ॥
लिङ्गच्छेदी दमो येषां यासां नासानिकृन्तनम् ।
महापातकिनाञ्चापि मृतौ नाशौचमाचरेत् ॥ ८२ ॥
नृणामुद्दे शहीनानां परिवारान् धनान्यपि ।
पालयेद्वत्सरं राजा यावद्दाहादशवत्सरम् ॥ ८३ ॥

वेदादि भ्रातृपुत्रोऽपि दत्तो भवेत्तदा सर्वेषु कर्मसु पतीतैव तस्य पिता भवेत् उत्पादको जनकस्तु तस्य पितृव्य स्यात् ॥ ७९ ॥

धनहारिणा पुरुषेण धनस्वामिनो धर्मा नियमाश्च संरक्षणीयास्तद्बान्धवाश्च सन्तोषणीया इत्याह यइत्यादिना । यः पुमान् यस्य पु सो धनहर्त्ता स्यात् स तस्य धर्माणि पालयेत् तस्य नियमांश्च सरक्षेत् तस्य बन्धूनपि परितोषयेत् ॥ ८० ॥

कानीनगोलकादीनां दायाधिकारित्वं तेषां मरणेऽशौचं च नेत्याह कानीना इत्यादिना । ये कानीनाः पितुर्वेश्मन्यप्रकाशं कन्योत्पादिता ये च गोलका मृते भर्त्तरि जाराज्जाता ये च कुण्डा जीवत्येव पत्यौ जारजाः ये चोक्तलक्षणा अतिपातकिनस्तेषां मरणेऽशौचं न स्यात् तेषां दायाधिकारिता च नैव स्यात् । यदुक्तं जारज कुण्डो मृते भर्त्तरि गोलकः इत्यमरः ॥ ८१ ॥

नासाकर्त्तनदण्डकापराधकर्त्रीणां स्त्रीणां लिङ्गच्छेदनदण्डकापराधकारिणां महापातकिनाञ्च पुंसामपि मृतावशौच नाचरणीयमित्याह लिङ्गच्छेदन इत्यादिना । येषां पुरुषाणां लिङ्गच्छेद. शिश्नकर्त्तनं दमो दण्डो विहितस्तेषां यासां नासानिकृन्तनं नासिकाकर्त्तन दण्डस्तासां स्त्रीणां महापातकिनां ब्रह्मघातकादीनाञ्चापि मृतौ मरणेऽशौचं नाचरेत् न कुर्यात् ॥ ८२ ॥

द्वादशाब्दे गते तेषां दर्भदेहान् विदाहयेत् ।
त्रिरात्रान्ते ततस्तुताद्यै प्रेतत्वं परिमोचयेत् ॥ ८४ ॥
ततस्तत् परिवारेभ्यः पुत्रादिक्रमतो धनम् ।
विभज्य नृपतिर्द्द्यादन्यथा पातकी भवेत् ॥ ८५ ॥
न कोऽपि रक्षिता यस्य दीनस्यापद्गतस्य च ।
तस्यैव नृपतिः पाता यतो भूपः प्रजाप्रभुः ॥ ८६ ॥
यद्यागच्छेदनुद्दिष्टो विभागान्तेऽपि कालिके ! ।

अनुद्दिष्टानां मनुष्याणां परिवारान् धनानि च द्वादशवर्षपर्यन्तं राज्ञा रक्षितव्यानीत्याह नष्टाग्नित्यादिना । उद्देशहीनानामनुद्दिष्टानां नष्टानां मनुष्याणां परिवारान् यावद् द्वादशवत्सरं द्वादशवर्षपर्यन्तं राजा पालयेत्, तेषां धनान्यपि स एव रक्षयेत् ॥ ८३ ॥

द्वादशवर्षादूर्द्ध्वमनुद्दिष्टानां पुंसां कृमयमयानि शरीराणि राज्ञा तत्पुत्रादिभिर्दाहयितव्यानि त्रिरात्रान्ते तेषां प्रेतत्वञ्च मोचयितव्यमित्याह द्वादशाब्दे इत्यादिना । द्वादशाब्दे द्वादशवर्षे गते याते सति तेषामुद्देशहीनानां नष्टानां दर्भदेहान् कृमयशरीराणि राजा तत्सुताद्यैरनुद्दिष्टानां पुत्रादिभिर्विदाहयेत्, त्रिरात्रान्ते तेषां प्रेतत्वञ्च तैरेव परिमोचयेत् ॥ ८४ ॥

ततः परमुद्देशरहितजनस्वामिकं द्रव्यं विभज्य पुत्रादिक्रमतस्तत्परिवारेभ्यो नृपतिर्द्द्यात् । नन्वेवमकुर्वतो नरपतेः को दोषोऽत आह अन्यथेति । अन्यथा एतदकुर्वन्नृपतिः पातकी भवेत् ॥ ८५ ॥

विपत्तिं प्राप्तोऽनन्यरक्षको मर्त्यो राज्ञैव पालनीय इत्याह न कोऽपीत्यादिना । आपद्गतस्य विपत्तिं प्राप्तस्य दीनस्य दरिद्रस्य यस्य पुंसः कोऽपि रक्षिता न विद्यते तस्य नृपतिरेव पाता रक्षकः स्यात्, यतो भूप एव प्रजानां प्रभुः स्वामी भवेत् । निस्स्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि स इत्यमरः ॥ ८६ ॥

तस्यैव दाराः पुत्राश्च धनं तस्यैव नान्यथा ॥ ८७ ॥
न समर्थः पुमान् दातुं पैतृकं स्थावरञ्च यत् ।
स्वजनायाथवान्यस्मै दायादानुमतिं विना ॥ ८८ ॥
यत्तु स्वोपार्जितं रिक्थं स्थावरं स्थावरेतरम् ।
अस्थावरं पैतृकं च स्वेच्छया दातुमर्हति ॥ ८९ ॥
स्थिते पुत्रेऽथवा पत्न्यां कन्यायां तत्सुतेऽपि वा ।
जनके च जनन्यां वा भ्रातर्य्येवं स्वसर्य्यपि ॥ ९० ॥

द्रव्यविभागान्तेऽप्यागतस्यानुद्दिष्टस्यैव पत्न्यादयो भवेयुरित्याह यदीत्यादिना । हे कालिके ! विभागान्तेऽप्यनुद्दिष्टो जनो यद्यागच्छेत् तदा तस्यैव दारा भार्य्यापुत्त्रांश्च तस्यैव धनमपि तस्यैव एतत् सर्वमन्यथा न भवेत् ॥ ८७ ॥

अधिकानामनुमतौ पितृस्वामिकस्थावरद्रव्यं कस्मैचिदपि दातुं न कोऽपि शक्नुयादित्याह न समर्थ इत्यादिना । नगस्थावर चेत्यत्रावधारणार्थकश्च शब्द पैतृकस्थावराभ्या द्वाभ्यामपि सम्बध्यते तदाय मर्थ । दायादानुमति विना अधिकानामनुमतेरभावे पैतृकमेव स्थावरमेव यत् द्रव्यं तत् स्वजनायान्यस्मै वा दातुं पुमान् समर्थ. शक्तो न भवेत् । अन्वाचयसमाहारेतरेतरसङ्घये विनियोगे तुल्यधोगितावधारणहेतुषु पादस्य पूर्णेऽप्युक्तं न वस्त्वर्थेषु चाव्ययम् ॥ ८८ ॥

पैतृक स्थावरञ्च यदित्यनेन स्वोपार्जितस्थावरादाद्यखिलद्रव्यस्वस्वस्य पैतृकस्य च जङ्गमद्रव्यस्य स्वेच्छन्दं दानं कुर्य्यादिति सूचितं, तदेव पुनर्विस्पष्टयितुमाह यत्त्वित्यादिना । यत्तु स्वोपार्जितं स्थावरं स्थावरेतरं जङ्गमं च रिक्थं धनं यच्च लब्ध पैतृक पितृसम्बन्धिस्थावर जङ्गमं धन तत्तु स्वेच्छया दातुमर्हति ॥ ८९ ॥

अतिसन्निकृष्टतरपुत्राद्यननुमतावप्यात्मोपार्जितस्थावरादिसकल-द्रव्यं पैतृकञ्चास्थावरधन दातुं पुमान् समर्थो भवेदित्याह स्थित इत्यादिना—क्षमो भवेदित्यन्तेन श्लोकद्वयेन । पुत्त्र आत्मजेऽपि स्थिते

स्वार्जितं स्थावरधनमस्थावरधनञ्च यत् ।
अस्थावरं पैतृकञ्च दातुं सर्व्वं क्षमो भवेत् ॥ ९१ ॥
धनमेवं विधानेन दत्तं वा धर्म्मसात्कृतम् ।
पुंसा तदन्यथा कर्त्तुं पुत्राद्यैर्नैव शक्यते ॥ ९२ ॥
धर्म्मार्थं स्थापितं रिक्थं दाता रक्षितुमर्हसि ।
न प्रभुः पुनरादातुं धर्म्मो ह्यस्य यतः प्रभुः ॥ ९३ ॥
मूलं वा तदुपस्वत्वं यथासङ्कल्पमम्बिके ! ।
स्वयं वा तत्प्रतिनिधिर्धर्म्मार्थं विनियोजयेत् ॥ ९४ ॥

सति पत्न्यां भार्य्यायामथवा कन्यायां दुहितरि स्थितायां तत्सुते कन्यापुत्रे वा जनके पितरि वा स्थिते जनन्यां मातरि स्थितायामेव भ्रातरि सोदरे स्थिते स्वसर्य्यपि भगिन्यामपि स्थितायां स्वार्जितमात्मोपार्जितं यत् स्थावरं धनं यच्चास्थावरधनं जङ्गम-द्रव्यं यच्च पैतृकमप्यस्थावरं धनं तत् सर्वं दातुं पुमान् क्षम समर्थो भवेत् ॥ ९० । ९१ ॥

शङ्करोक्तेन विधानेन पुरुषेण दत्तं धर्मार्थं स्थापितं च द्रव्यं तत् पुत्रादिभिश्चैवान्यथा कर्त्तुं शक्यमित्याह धनमित्यादिना । पुंसा पुरुषेणैव विधानेन शिवोक्तेनैतादृशेन विधिना यत् धनं दत्तं यद्वा धर्मसात् कृतं धर्माधीनं कृतं धर्मार्थं स्थापितमिति यावत् तत् धनं पुत्राद्यैरन्यथा कर्त्तुं नैव शक्यते ॥ ९२ ॥

धर्मार्थंस्थापितद्रव्यस्य धर्मस्वामिकत्वाद्दातुः पुनरग्राह्यत्वं तद्रक्ष्यत्वञ्चाह धर्मार्थमित्यादिना । धर्मार्थं स्थापितं यद्रिक्थं धनं तद्रक्षितुं दातार्हति तत् धनं पुनरादातुं गृहीतुं दाता न प्रभुरधिप यतोऽस्य धनस्य हीति निश्चितो धर्मः प्रभुः स्वामी ॥ ९३ ॥

मूलधनं तदुपस्वत्वं वात्मनात्मप्रतिनिधिना वा यथासङ्कल्पं धर्मार्थं विनियोजयितव्यमित्याह मूलमित्यादिना । हे अम्बिके ! यथासङ्कल्पं सङ्कल्पमनतिक्रम्य मूलं वा धनं तदुपस्वत्वं वा तत्प्रति-

स्वोपार्ज्जितधनस्यार्द्धं दायादायापि चेत् धनी ।
दद्यात् स्नेहेन तच्चान्यो नान्यथा कर्त्तुमर्हति ॥ ९५ ॥
यदि स्वोपार्ज्जितस्यार्द्धमेकस्मै धनहारिणाम् ।
ददात्यन्यैश्च दायादैः प्रतिरोद्धुं न शक्यते ॥ ९६ ॥
एकेन पित्र्यवित्तेन यत्र वित्तमुपार्ज्जितम् ।
पित्र्ये समांशा दायादा न लाभार्हा विनार्जकम् ॥ ९७ ॥
पैतृकाणि च वित्तानि नष्टेऽप्युद्धारयेत्तु यः ।

निधिरात्मन प्रतिनिधिर्वा धर्मार्थं विनि-योजयेत् मुख्यस्याभावे तत्सदृशो य उपादीयते स प्रतिनिधिः ॥ ९४ ॥

ननूपार्ज्जकजनेन प्रेमतो दायहारिणेऽपि दत्तं स्वोपार्ज्जितद्रव्यस्यार्द्धमन्य. पुमानन्यथा कर्त्तुमर्हति न वेत्यत आह स्वोपार्ज्जितधनस्येत्यादिना । धनी पुमांश्चेद्यदि स्नेहेन प्रेम्णा स्वोपार्ज्जितधनस्यार्द्धं दायादायापि धनहारिणेऽपि दद्यात्तदान्यो जनस्तत्स्नेहेन स्वोपार्ज्जितधनार्द्धमन्यथा कर्त्तुं नार्हति न योग्यो भवति । इतोऽनन्तर वक्ष्यमाणस्य वचनस्य बहुशिविषयत्वात् द्वयंशिविषयकमिदं वचनम् ॥ ९५ ॥

ननु बहूनां दायादानामेकस्मै दीयमानं स्वोपार्ज्जितधनस्यार्द्धमन्ये दायादा प्रतिरोद्धुं शक्नुवन्ति न वेत्यत आह यदीत्यादिना । यद्यर्जको धनहारिणां दायादाना मध्ये एकस्मै धनहारिणे स्वोपार्ज्जितस्य द्रव्यस्यार्द्धं ददाति तदान्यैर्दायादै प्रतिरोद्धु वारयितु न शक्यते ॥ ९६ ॥

ननु पैतृकद्रविणेनोपार्जिते वित्ते सर्वे दायादा भागार्हा भवेयुर्न वेत्याशङ्कायामाह एकेनेत्यादिना । यत्र येषु दायादेषु मध्ये येनैकेन दायादेन येन पित्र्यवित्तेन पैतृकेण धनेन वित्तं धनमुपार्ज्जितं ते सर्वे दायादास्तस्मिन् पित्र्ये पैतृके वित्ते समांशा समभागिन स्यु: तमर्जकं विना लाभार्हास्तु न स्यु किन्त्वर्जक एवैको लाभार्ह इत्यर्थ. ॥ ९७ ॥

दायादानां तद्धनेभ्य उद्धर्त्ता द्वयंशमर्हति ॥९८॥
पुण्यं वित्तं च विद्या च नाश्नयेदशरीरिणम्।
शरीरन्तु पितुर्यस्मात् किन्न स्यात् पैतृकं वसु ॥९९॥
पृथगग्नैः पृथग्वित्तैर्मनुजैर्यदुपार्जितम्।
सर्वं तत् पितृसंक्रान्तं तदा स्वोपार्जितं कुतः?॥१००॥
अतो महेशि! स्वायासैर्येन यत् धनमर्जितम्।
स्वोपार्जितं तदेव स्यात् स तत्स्वामी न चापरः॥१०१॥

विनष्टानि पैतृकाणि द्रव्याण्युद्धरतो जनस्य तत्र भागद्वयहारित्वसम्बन्धान्तु समभागित्वमित्याह पैतृकाणीत्यादिना। दायादानां मध्ये यस्तु दायादो नष्टेऽपि नाशेऽपि सति पैतृकाणि वित्तान्युद्धरेत् स उद्धर्त्ता तद्धनेभ्यो द्वयंश भागद्वयमर्हति अन्ये तु समभंश लभन्त इत्यर्थ ॥९८॥

वसुधः पैतृकत्वेन वसुधादाश्रितानां विद्यावित्तादीनामपि पैतृकत्वसत्त्वात् पृथगग्नद्रव्यैरपि मनुष्यैस्तैरेवोपार्जितानां सर्वेषां धनानां पितृसम्बन्धिता न यायात् स्वोपार्जितत्व न सिद्धेदतो निजायासैरर्जितानां सकलद्रव्याणा स्वोपार्जितत्वमर्जकसात्स्वामिकत्वञ्च ज्ञातव्यमित्येतदेवाह पुण्यमित्यादिना न चापर इत्यन्तेन श्लोकत्रयेण। यस्माद्धेतो पुण्यं धर्मं वित्त धनं च विद्या शास्त्रादितत्त्वज्ञान चाशरीरिणमदेहिनं नाश्नयेन्नावलम्बेत्, किन्तु शरीरिणमेवाश्नयेत् शरीरन्तु पितु. पितृसम्बन्धि भवति। अत कि वसु धन पैतृकं पितृसम्बन्धि न भवेदपि तु सर्वं वसु पैतृकमेव स्यात् ॥९९॥
पृथगग्नैरिति। अतः पृथगग्नैर्विभिन्नभक्तै पृथग्वित्तैर्विभक्तधनैरपि मनुजैर्मनुष्यैर्यदुपार्जितं तत्सर्वं पितृसंक्रान्तं पितृसम्बन्धं जातं तदा स्वोपार्जितं धन कुतो भवेत्, धनस्य स्वोपार्जितत्व न सिद्धेदित्यर्थ ॥१००॥

अत इति। हे महेशि! अतो हेतो. स्वायासैरात्मपरिश्रमैर्येन

मातरं पितरं देवि ! गुरुं चैव पितामहान् ।
मातामहान् करेणापि प्रहरन्नैव दायभाक् ॥ १०२ ॥
निघ्नन्नन्यानपि प्राणैर्न तेषां धनमाप्नुयात् ।
हतानामन्यदायादा भवेयुर्धनभागिनः ॥ १०३ ॥
नपुंसका पङ्गवश्च ग्रासाच्छादनमम्बिके ! ।
यावज्जीवनमर्हन्ति न ते स्युर्दायभागिनः ॥ १०४ ॥
सस्वामिकं प्राप्तधनं पथि वा यत्र कुत्रचित् ।
नृपस्तत् स्वामिने प्राप्ता दापयेत् सुविचारयन् ॥ १०५ ॥

पृथगन्नादिनाऽपृथगन्नादिना वा पुंसा यत् धनमर्জ্জিতं तदेव धनं स्वोपार्जितं स्यात् । सोऽर्জ্জक एव तत्स्वामी सोपार्জ্জितस्य धनस्य प्रभुर्न चापरोऽর্জ্জकभिन्नः स्वामी ॥ १०१ ॥

मात्रादीन् पाणिनापि प्रहरतो मानवस्य दायभागित्वं नैव स्यादित्याह मातरमित्यादिना । हे देवि ! मातरं जननीं पितरं जनकं गुरुं मन्त्रोपदेष्टारं बहुवचनस्य बहूपलक्षकत्वात् पितामहान् पितामहादीन् मातामहानपि मातामहादीनपि करेण पाणिनापि प्रहरन्नरो दायभाङ्नैव भवेत् । अपि शब्देन दण्डादिना मात्रादीन् प्रहरतस्तु सुतरामेव दायभागित्वं न भवेदिति सूचितम् ॥ १०२ ॥

भ्रात्रादीनपि धनार्थं मारयतः पुरुषस्य हतस्वामिकद्रव्ये निरंशकत्वमपरदायादानाञ्च समांशकत्वं स्यादित्याह निघ्नन्नित्यादिना । अन्यानपि जनान् प्राणैर्निघ्नन्मारयन्नरस्तेषां हतानां धनं नाप्नुयाच्च लभेत किन्तु हतानामन्ये हन्तुर्भिन्ना दायादा धनभागिनो भवेयुः ॥ १०३ ॥

अथाऽनंशानां पङ्गुक्लीबानां यावज्जीवनं ग्रासाच्छादनभागित्वं स्यादित्याह नपुंसका इत्यादिना । हे अम्बिके ! जगज्जननि ! नपुंसका पङ्गवश्च यावज्जीवन जीवनपर्यन्तं केवलं ग्रासाच्छादनमर्हन्ति दायभागिनो न स्युः ॥ १०४ ॥

अस्वामिका ये जीवानामस्वामिकधनस्य च।
प्राप्ता तत्र भवेत् स्वामी दशमांश नृपेऽर्पयेत् ॥ १०६ ॥
स्थावरं धनमन्यस्मै स्थिते सान्निध्यवर्त्तिनि।
योग्ये क्रेतरि विक्रेतुं न शक्तः स्थावराधिपः ॥१०७॥
सान्निध्यवर्त्तिनां ज्ञातिः सवर्णो वा विशिष्यते।
तयोरभावे सुहृदो विक्रेतिच्छा गरीयसी ॥ १०८ ॥

नन्वध्वादौ लब्धस्य स्वस्वामिकद्रव्यस्य प्राप्तृजनगामित्व स्यादात्मस्वामिगामित्व वेत्यत आह स्वस्वामिकमित्यादिना। पथि मार्गे यत्र कुत्रचिद्वा स्थाने स्वस्वामिक प्राप्त धन सुविचारयन्नृपस्तत् स्वामिने प्राप्तधनस्यापि पतये प्राप्तुं स दापयेत् ॥ १०५ ॥

नन्वस्वामिका प्राप्ता गवाश्वादयो जीवास्तद्धनानि प्राप्तानि धनानि च प्राप्तारं पुमांस गच्छेयुर्वेत्युधाधिप वेत्याशङ्कायामाह अस्वामिकानामित्यादिना। अस्वामिकानां स्वामिरहितानां जीवाना गवाश्वादीनामस्वामिकस्य धनस्य च प्राप्ता जनस्तत्र तेषु प्राप्तेषु स्वामी भवेत् तत्र च दशमसंख्य प्राप्ता नृपेऽर्पयेद्दद्यात्। जीवानामिति धनस्येति च कर्त्तृकर्मणो· कृतीति कर्मणि षष्ठी ॥ १०६ ॥

ननु स्थावरद्रव्यस्वामिना दूरस्थं योग्यसमीपस्थयो. क्रायकयोर्मध्ये कतरस्मै स्थावरं धन विक्रेतुं शक्यते तत्राह स्थावरमित्यादिना। सान्निध्यवर्त्तिनि समीपस्थायिनि योग्ये क्रयार्हे क्रेतरि क्रायके स्थिते सत्यन्यस्मै दूरवर्त्तिने पुंसे स्थावरं धनं विक्रेतुं स्थावराधिपो जन· शक्तो न भवेत्, किन्तु सान्निध्यवर्त्तिने एव विक्रेतुं शक्नुयादित्यर्थः। सन्निधिरेव सान्निध्यम्। चतुर्वर्णादीनां स्वार्थे उपसंख्यानमिति स्वार्थे ष्यञ् ॥ १०७ ॥

नन्वनेकेषा सन्निधिवर्त्तिना मध्ये कतमस्य स्थावरद्रव्यक्रयणे वैशिष्ट्यमत आह सान्निध्येत्यादिना। सान्निध्यवर्त्तिनां मध्ये ज्ञातिर्गोत्रजो विशिष्यते, सवर्णः समानवर्णो वा विशिष्यते, तयोर्ज्ञातिसवर्णयोरभावे सुहृदो मित्राणि विशिष्यन्ते। ननु बन्धनं गोत्रजाना

निर्णीतमूल्येऽप्यन्येन स्थावरस्य क्रयोद्यमे ।
तन्मूल्यं चेत् समीपस्थोराति क्रेता न चापरः ॥ १०९॥
मूल्यं दातुमशक्तश्चेत् सम्मतो विक्रयेऽपि वा ।
सन्निधिस्थस्तदान्यस्मै गृह्णीयात्तिविक्रये ॥ ११० ॥
क्रीतं चेत् स्थावरं देवि ! परोक्षे प्रतिवासिनः ।
श्रवणादेव तन्मूल्यं दत्वासौ प्राप्नुमर्हति ॥ १११ ॥

सवर्णानां सुहृदाञ्च मध्ये कतमस्मै स्थावरं द्रव्यं तत्स्वामी विक्रीणीतेत्यत आह विक्रेतिच्छेति विक्रेतुर्विक्रयकर्तुरिच्छा गरीयसी गुरुतरा भवेत् । क्रमत एव तेषां मध्ये यस्मै विक्रेतुमिच्छेत्तस्मै एव विक्रीणीतेति भावः ॥ १०८ ।

नन्वन्यनिर्णीतमूल्यं स्थावरं वित्तं तन्मूल्यं ददता समीपस्थायिना क्रीयेत निर्णीतमूल्येनान्येन वेत्याशङ्क्यायामाह निर्णीतेत्यादिना । स्थावरस्य वित्तस्य क्रयोद्यमे सत्यन्येन समीपस्थभिन्नेन पुंसा निर्णीतमूल्येऽपि मूल्ये निर्णीतेऽपि सति तन्मूल्यमन्यनिर्णीतमूल्यकस्थावरद्रव्यमूल्यं चेद्यदि समीपस्थो जनो राति ददाति तदाऽपर समीपस्थभिन्नो जन क्रेता क्रायको न भवेत्, किन्तु समीपस्थ एव मूल्यं दत्त्वा क्रीणीयादित्यर्थः ॥ १०९ ॥

स्थावरधनस्य मूल्यं दातुमशक्नुवति तद्विक्रये सम्मतिं वापि कुर्वति समीपस्थायिनि जने दूरस्थाय तद्विक्रेतुं तत्स्वामी शक्नोतीत्यत आह मूल्यमित्यादिना । सन्निधिस्थः समीपस्थायी जनश्चेद्यदि स्थावरस्य मूल्यं दातुमशक्तो भवेत्, तस्य विक्रयेऽपि वा सम्मतः सम्मतिमान् भवेत्, तदा गृही गृहस्थोऽन्यस्मै सन्निधिस्थभिन्नाय विक्रये शक्नोति शक्तो भवति ॥ ११० ॥

ननु समीपस्थायिनः परोक्ष एवान्येन क्रीतं स्थावरं वित्तं क्रेतैव प्राप्नुमर्हति तत् श्रुत्वैव तन्मूल्यं ददत् समीपस्थायी वेत्याशङ्क्यायामाह क्रीतञ्चेदित्यादिना । हे देवि ! चेद्यदि प्रतिवासिनः

क्रेता तत्र गृहारामान् विनिर्म्माति भनक्ति वा ।
मूल्यं दत्वापि नाप्नोति स्थावरं सन्निधिस्थितः ॥ ११२ ॥
करहीना प्रतिहता वन्यारण्यातिदुर्गमा ।
अनादिष्टोऽपि तां भूमिं सम्पन्नां कर्त्तुमर्हति ॥ ११३ ॥
बहुप्रयाससाध्यायास्तस्या भूमेर्म्महीभृते ।
दत्त्वा दशांशं भुञ्जीयात् भूमिस्वामी यतो नृपः ॥ ११४ ॥

सन्निधिस्थायिनो जनस्य परोक्षे स्थावरं द्रव्यमन्येन क्रीतं भवेत् तदा श्रवणादेव तन्मूल्यमन्यक्रीतस्थावरद्रव्यं प्राप्तुं नार्हतीति सूचितम् ॥ १११ ॥

क्रायकजनविनिर्मितमन्दिरारामं तद्भग्नमन्दिरोपवनं वा क्रीतं स्थावरधनं मूल्यं दत्त्वापि समीपस्थायी नाप्तुमर्हतीत्याह क्रेतेत्यादिना । क्रेता=जनस्तत्र क्रीते स्थावरे यदि गृहारामान् गृहाण्युपवनानि च विनिर्म्माति करोति तत्र विनिर्मितानेव तान् भनक्त्यामर्हति वा तदा सन्निधिस्थितो जनो मूल्यं दत्त्वापि स्थावरधनं नाप्नोति न लभ्यते ॥ ११२ ॥

भूमिपालेनानाज्ञापितेनापि पुंसा जलोद्भवा काननोद्भवा च करहीनाखिलाभूमिः सम्पन्ना कर्त्तव्येत्याह करहीनेत्यादिना । वन्या जलोद्भवाऽरण्या काननोद्भवा चातिदुर्गमात्वाऽप्रतिहताखिलाऽतएव करहीना राजभाग्यांशभागरहिता या भूमिस्तां भूमिमनादिष्टोऽपि भूपेनानाज्ञप्तोऽपि पुरुषः सम्पन्नां शस्याढ्यां कर्त्तुमर्हति ; वने जले भवा, वन्याद्यित्यादिभ्यो यदिति यत् । पद्यः कौलालमम्बुजं जीवनं भुवनं वनमित्यमरः । अरण्ये भवा आरण्या अरण्यात्सु इति यः ॥ ११३ ॥

अनेकायाससाध्यवन्यारण्यक्षितिजातवस्तुनो दशमांशं भूमिस्वामित्वाद्राज्ञे समर्प्यावशिष्टं सर्वं स्वयं भोक्तव्यमित्याह वक्ष्यित्यादिना । यतो नृपो राजा भूमिस्वाम्यतो बहुप्रयाससाध्यायां अनेक-

वापीकूपतड़ागानां खननं वृक्षरोपणम् ।
परानिष्टकरे देशे न गृहं कर्त्तुमर्हति ॥ ११५ ॥
देवार्थं दत्तकूपादौ तथा स्रोतस्वतीजले ।
पानाधिकारिणः सर्वे सेचनेऽन्तिकवासिनः ॥ ११६ ॥
यत्तोयसेचनाल्लोका भवेयुर्जलकातराः ।
न सिञ्चेयुर्जलं तस्मादपि सन्निधिवर्त्तिनः ॥ ११७ ॥
धनानामविभक्तानामंशिनां सम्मतिं विना ।
तथा निर्णीतवित्तानामसिद्धौ न्यासविक्रयौ ॥ ११८ ॥

परिश्रमनिष्पाद्यावास्तस्या वन्याया अरण्यायाश्च भूमेर्जातस्य वस्तुनो दशांश दशमांशं महीभृते राज्ञे दत्त्वाऽवशिष्टं स्वय भुञ्जीत ॥ ११४ ॥

अन्यानाकाङ्क्षितोत्पादके स्थाने वाप्यादीनां खनन वृक्षाणा-मारोपणं गेहस्य निर्माण च न विधेयमित्याह वापीत्यादिना । वाप्यादिखननवृक्षरोपणगृहकरणसत्त्वात् परानिष्टकरेऽन्यानीपप्सि-तोत्पादके देशे वापीकूपतड़ागाना खननं तथा वृक्षस्य रोपण तथा वृक्षस्य रोपणं तथा गृहमपि कर्त्तुं जनो नार्हति ॥ ११५ ॥

देवार्थदत्तकूपादिजले नदीजले च सर्वेषां पानाधिकारिता सेकाधिकारिता तु तच्चिकटस्थायिनामेवेत्याह देवार्थमित्यादिना । देवार्थं दत्तकूपादौ तदा स्रोतस्वतीजले नदीवारिणि सर्वे पानाधि-कारिणः सेचने त्वन्तिकवासिनो निकटस्थायिन एवाधिकारिणो भवेयुः ॥ ११६ ॥

नन्वु यत् पानीयसेचनतस्तत्समीपस्थायिनो लोका जना व्याकुला भवेयुस्तज्जलं सेचनीयं न वेत्यत आह यत्तोयेत्यादिना । यत्तोयसे-चनादस्य कूपादेर्वारिण. सेकाल्लोका जना जलकातराः पानीयव्या-कुला भवेयुस्तस्माज्जलं सन्निधिवर्त्तिनोऽपि न सिञ्चेयु· दूरवर्त्तिनान्तु का वार्त्ता ॥ ११७ ॥

दायादा सम्मतवोरविभक्तद्रव्यन्यासविक्रययोर्निर्णयरहितद्रव्य

स्थाप्यानां वहवित्तानां ज्ञानान्नष्टेऽप्ययत्नतः ।
तन्मूल्यं दापयेत्तेन स्वामिने सर्वथा नृपः ॥ ११९ ॥
अभिमत्या स्थापकस्य पश्वादिन्यस्तवस्तुनाम् ।
व्यवहारे कृते तत्र धार्त्ता सम्मोषयेत् पशून् ॥ १२० ॥
लाभे नियोजयेद्यत्र स्थावरादीनि मानवः ।
नियमेन विना कालल्लाभयोरन्यथा भवेत् ॥ १२१ ॥

न्यासविक्रययोश्च सिद्धत्व न भवेदित्याह धनानामित्यादिना । अधिनां दायादाना सम्मति विना अविभक्तानां धनानां न्यासविक्रयावसिद्धौ सिद्धौ न भवेताम् । तथा निर्णीतवित्ताना वित्तानीमान्यस्यैवेति वित्तानीमानीयन्ति वेति निर्णयरहितद्रव्याणा स्थापनविक्रयौ सिद्धौ न स्याताम् ॥ ११८ ॥

यस्मादये न्यस्तद्रव्याणाञ्च ज्ञानपूर्वकादयत्नाद्यागो भवेत् तेन पुसा तन्मूल्यं तत्स्वामिने नृपतिना दापयितव्यमित्याह स्थाप्यानामित्यादिना । ज्ञानादयत्नतो ज्ञानपूर्वकादयत्नात् स्थाप्यानां न्यासवित्तानां वहवित्तानाञ्च नष्टेऽपि नाशेऽपि सति यदेहे स्थापितानि वहूनि च वित्तानि नष्टानि तेन पुसा तन्मूल्यं स्थापितवहुवित्तमूल्य स्वामिने तद्वित्ताधिपतये नृपो राजा सर्वथा सर्वप्रकारेण दापयेत् ; ज्ञानान्नष्टेऽप्ययत्नत इति वदता सदाशिवेन तद्रक्षायै यत्नसत्त्वेऽपि कथञ्चित्तन्नाशे सति तन्मूल्यं नृपेण न दापयितव्यमिति सूचयामास ॥ ११९ ॥

स्थापकसम्मत्या कृतन्यस्तपश्वादिवस्तुव्यवहारेणैव पुसा स्थापिता. पशव. सम्मोषयितव्या इत्याह अभिमत्येत्यादिना । स्थापकस्य द्रव्यन्यासकस्याभिमत्या सम्मत्या पश्वादिन्यस्तवस्तुना व्यवहारे कृते सति तत्र तेषु न्यस्तवस्तुषु मध्ये पशून् धार्त्ता धारक. पुरुष सम्मोषयेत् । सम्पूर्वकविधेरनित्यत्वात् पश्वादिन्यस्तवस्तुनामित्यत्र नामीति न दीर्घत्वम् । आगमशास्त्रनित्यत्वात् धार्त्तेत्यत्रार्द्धधातुकस्येड्वा-देरिति नेडागमः ॥ १२० ॥

साधारणानि वस्तूनि लाभार्थं नैव योजयेत् ।
मृते पितरि सर्वेषामग्निना सम्मतिं विना ॥ १२२ ॥
क्रमव्यत्ययमूल्येन द्रव्याणां विक्रये सति ।
नृपस्तदन्यथा कर्त्तुं क्षमो भवति पार्वति ! ॥ १२३ ॥
जननञ्चापि मरणं शरीराणां यथा सकृत् ।
दानं तथैव कन्याया ब्राह्मोद्वाहः सकृत् सकृत् ॥१२४॥

काललाभयोर्नियमं कृत्वैव यस्मिँल्लाभे स्थावरादिद्रव्याणि प्रयोज्यन्ते तस्य अन्यथात्वं भवेदित्याह लाभे इत्यादिना । काललाभयोर्नियमेन विना यत्र लाभे फले स्थावरादीनि वस्तूनि मानवो नियोजयेत् स लाभोऽन्यथा भवेत् । नीवीपरिपणं मूलधनं लोभोऽधिकं फलमित्यमरः ॥ १२१ ॥

पितुर्मरणादूर्द्धं सर्वभ्रातॄणां सम्मतेरभावे सामान्यद्रव्याणि लाभार्थं नैव प्रयोक्तव्यानीत्याह साधारणानीत्यादिना । पितरि मृते सति सर्वेषामग्निना सम्मतिं विना साधारणानि सामान्यानि वस्तूनि लाभार्थं फलार्थं नैव योजयेत् ॥ १२२ ॥

विपरीतक्रमकेण मूल्येन स्थावरादिद्रव्याणां जातं विक्रयणमन्यथा कर्त्तुं नृपेण शक्यत इत्याह क्रमेत्यादिना । हे पार्वति ! क्रमस्य व्यत्ययो विपर्य्ययो यत्र तथाभूतेन मूल्येन द्रव्याणां विक्रये सति स्वल्पमूल्येन भूयिष्ठमूल्यानां भूयिष्ठमूल्येन च स्वल्पमूल्यानां द्रव्याणां विक्रयणे सति तद्विक्रयणमन्यथा कर्त्तुं नृपो नराधिपः क्षमो भवति ॥ १२३ ॥

नन्वु वेदोक्तविधिभिरेकेनोद्वाहिता कन्या जीवत्येव तस्मिन्मृते वा पुनस्तैरेव विधिभिरन्येनोद्वाह्या भवेन्न वेत्यत आह जननमित्यादिना । यथा शरीराणां जननस्तदुत्पत्तिर्मरणं मृतिश्चापि सकृदेकवारमेव भवति, तथैव दानं कन्याया ब्राह्मोद्वाहश्च सकृत् सकृदेव भवति, ब्राह्मोद्वाह इति व्याहरता महादेवेनैकेनोद्वाहितायाः

नैकपुत्रः सुतं दद्यान्नैकस्त्रीकस्तथा स्त्रियम्।
नैककन्यः सुतां शैवोद्वाहे पितृहितः पुमान्॥ १२५॥
दैवे पित्र्ये च वाणिज्ये राजद्वारे विशेषतः।
यद्विदध्यात् प्रतिनिधिस्तन्नियन्तुः कृतिर्भवेत्॥ १२६॥
न दण्डार्हः प्रतिनिधिस्तथा दूतोऽपि सुव्रते!।
नियोक्तृकृतदोषेण विधिरेष सनातनः॥ १२७॥
ऋणे क्षयो च वाणिज्ये तथा सर्वेषु कर्मसु।

अपि कन्यायाः शैवविधिभिस्तु पुनरुद्वाहो भवत्येवेति सूचयाम्बभूवे॥ १२४॥

एकपुत्रेणैकस्त्रीकेणैकपुत्रीकेण च पितृहितेन पुंसा पुत्रदानं स्त्रीदानं शैवोद्वाहे कन्यादानञ्च नैव कार्य्यमित्याह नैकपुत्र इत्यादिना। एकपुत्र पुमान् सुतं पुत्रं कस्मैचिन्न दद्यात्, तथैकस्त्रीक स्त्रियं न दद्यात्, ऐककन्यश्च शैवोद्वाहे सुतां कन्या नं दद्यात्, पत्न्यादीनामदाने हेतुं दर्शयन् पुमान्स विशिनष्टि कथम्भूतः पुमान् पितृहित यतः पितृभ्यो हितोऽतो न दद्यादित्यर्थः॥ १२५॥

प्रतिनिधिना विहितं यद्यद्दैवादिकं कर्म सर्वमात्मनैव विहितं भवेदित्याह दैव इत्यादिना। दैवे पित्र्ये वाणिज्ये च कर्मणि विशेषतो राजद्वारे च प्रतिनिधिर्यद्विदध्यात्तन्नियन्तुः प्रवर्त्तयितुः कृतिर्भवेत् दैवे पित्र्ये वाणिज्ये इति निर्द्धारणे सप्तमी क्रियते इति कृति। स्त्रियां क्तिन्निति कर्मणि क्तिन्॥ १२६॥

ननु नियन्त्राकृतेनापराधेन प्रतिनिधिदूतौ दण्डनीयौ भवेतां न वेत्यत आह नेत्यादिना। हे सुव्रते! शोभनव्रतशालिनि! नियोक्तृकृतदोषेण नियन्तृविहितापराधेन प्रतिनिधि तथा दूतश्चारोऽपि दण्डार्हौ न भवेत्। एष सनातनो नित्यो विधिर्विधानम्॥ १२७॥

यद्यदङ्गीकृतं लोकैस्तत् कार्यं धर्मसम्मतम् ॥ १२८ ॥
अधीशेनावितं विश्वं नाशं यान्ति निनञ्चवः।
तत्पातॄन् पाति विश्वेशस्तस्माल्लोकहितो भवेत् ॥१२९॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णय-
सारे श्रीसदाद्यासदाशिवसंवादे सनातनव्यव-
हारकथनं नाम द्वादशोल्लासः।

कृषिकृष्यादावन्येषु च सकलकर्मसु निखिलस्वाङ्गीकृतस्यावश्यक-
रणीयतामाह कृषे इत्यादिना। कृषे कृषौ वाणिज्ये वणिक्क-
र्मणि च तथान्येषु सर्वेषु कर्मसु लोकैर्जनैर्धर्मसम्मतं यद्यदङ्गीकृत
तत् सर्वं कार्यं विधातव्यम्। धर्मसम्मतमित्यनेन पापसम्मतं
स्वीकृतं सर्वथा लोकानामकरणीयमिति ध्वनितम् ॥ १२८ ॥

स्वात्मनो भद्रमभिलषद्भिर्मानवैर्लोकहितैरेव भवितव्यमित्याह
अधीशेनेत्यादिना। यतोऽधीशेन जगदीश्वरेणावित रक्षितं विश्वं
संसारं निनङ्गवो नाशयितुमिच्छवो जना स्वयं नाशं यान्ति प्राप्नुवन्ति
तत्पातॄन् विश्वपालकर्तॄन् विश्वेशः पाति रक्षति तस्माद्धेतोर्लोकहितो
जनो भवेत्, नश्यत्यवान्तर्भावितोण्यर्थः ॥ १२९ ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां द्वादशोल्लासः।

अथ त्रयोदशोल्लासः ।

इति निगदितवन्तं देवदेवं महेशं
निखिलनिगमसार स्वर्गमोक्षैकबीजम् ।
कलिमलकलितानां पावनैकान्तचित्ता
त्रिभुवनजननाता पार्वती प्राह भक्त्या ॥ १ ॥

देव्युवाच ।

महद्योनेरादिशक्तेर्महाकाल्या महाद्युतेः ।
सूक्ष्मातिसूक्ष्मभूतायाः कथं रूपनिरूपणम् ॥ २ ॥
रूपं प्रकृतिकार्य्याणां सा तु साक्षात् परात्परा ।
एतन्मे संशय देव ! विशेषाच्छेत्तुमर्हसि ॥ ३ ॥

श्रीसदाशिव उवाच ;

उपासकानां कार्य्याय पुरैव कथितं प्रिये ! ।
गुणक्रियानुसारेण रूपं देव्याः प्रकल्पितम ॥ ४ ॥

इतीत्यादिना । निगदितवन्तम् कथितवन्तम् कलिमलकलितानां पावनैकान्तचित्ता कलिमलैः संयुक्तानां जनानां पावने दृढमानसा ॥ १ ॥

पार्वती महेशं प्रति किमाहेत्यपेक्षायामाह महद्योनेरित्यादिना । महद्योनेः महत्तत्त्वोत्पत्तिस्थानभूतायाः ॥ २ ॥

सा महाकाली एतत् एतस् ॥ ३ ॥

अतोत्तरं श्रीसदाशिव उवाच । उपासकानामित्यादिभिर्दशभिः । हे प्रिये ! उपासकानां जनानां कार्य्याय गुणक्रियानु-

श्वेतपीतादिको वर्णो यथा कृष्णे विलीयते ।
प्रविशन्ति तथा काल्यां सर्वभूतानि शैलजे ! ॥ ५ ॥
अतस्तस्याः कालशक्तेर्निर्गुणाया निराकृतेः ।
हितायाः प्राप्तयोगानां वर्णः कृष्णो निरूपितः ॥ ६ ॥
नित्यायाः कालरूपायाः अव्ययायाः शिवात्मनः ।
अस्तत्वात्ललाटेऽस्याः शशिचिह्नं निरूपितम् ॥ ७ ॥
शशिसूर्य्याग्निभिर्नित्यैरखिलं कालिकं जगत् ।
सम्पश्यति यतस्तस्मात् कल्पित नयनत्रयम् ॥ ८ ॥
ग्रसनात् सर्वसत्त्वानां कालदन्तेन चर्वणात् ।
तद्रक्तसङ्गो देवेशाः वासो रूपेण भाषितम् ॥ ९ ॥
समये समये जीवरक्षणं विपदः शिवे ! ।

सारेण देव्या महाकाल्या रूपं कल्पितं न तु वास्तवमिति पुनैव मया कथितम् ॥ ४ ॥

श्वेतेत्यादिना । हे शैलजे ! पार्वति ! यथा कृष्णे वर्णे श्वेत-पीतादिको वर्णो विलीयते विशेषेण लीनो भवति, तथैव काल्यामपि भूतानि प्रविशन्ति प्रलीयन्ते अतो हेतोस्तस्या काल्या वर्ण कृष्णो निरूपित कथित इत्यन्वय । प्राप्तयोगानाम् लब्धज्ञानरूपमोक्षोपायानाम् ॥ ५ । ६ ॥

नित्याया इत्यादिना । नित्याया इत्वशून्याया अव्ययाया अपक्षयरहिताया शिवात्मन कल्याणस्वरूपाया कालरूपाया अस्याः काल्या अस्तत्वात् हेतोर्ललाटे शशिचिह्नं निरूपित कथितम् ॥ ७ ॥

कालिकम् कालसम्भवम् ॥ ८ ॥

सर्वसत्त्वानाम् अशेषजन्तूनाम् कालदन्तेन कालरूपेण दन्तेन तद्रक्तसङ्गः सर्वसत्त्वरुधिरसमूहः ॥ ९ ॥

प्रेरणं स्वस्वकार्येषु वरश्चाभयमीरितम् ॥ १० ॥
रजोजनितविघ्नानि विष्टभ्य परितिष्ठति ।
अतो हि कथितं भद्रे ! रक्तपद्मासनस्थिता ॥ ११ ॥
क्रीड़न्ती कालिकं कालं पीत्वा मोहमयीं सुराम् ।
पश्यन्ती चिन्मयी देवी सर्वसाक्षिस्वरूपिणी ॥ १२ ॥
एव गुणानुसारेण रूपाणि विविधानि च ।
कल्पितानि हितार्थाय भक्तानामल्पमेधसाम् ॥ १३ ॥

श्रीदेव्युवाच ।

ध्यानं यत् कथितं काल्या जीवनिस्तारहेतवे ।
तस्यानुरूपतो मूर्त्तिं मृण्मयीं वा शिलामयीम् ॥ १४ ॥
दारुधातुमयीं वापि निर्माय यदि साधकः ।
विचित्रभवनं कृत्वा वस्त्रालङ्कारभूषिताम् ॥ १५ ॥
स्थापयेत्तत्र देवेशीं किं फलं तस्य जायते ।
प्रतिष्ठा केन विधिना तस्याः प्रतिकृतेः प्रभो ! ।
कर्त्तव्या तदशेषेण कृपया मे प्रकाश्यताम् ॥ १६ ॥
वापीकूपसरःहारामदेवप्रतिकृतेस्तथा ।
प्रतिष्ठा सूचिता पूर्वं गदिता न विशेषतः ॥ १७ ॥

समये इत्यादिना । हे शिवे ! समये समये काले काले विपद्रूपकालात् जीवानां रक्षणं स्वस्वकार्येषु प्रेरणं च कालिकाया वरश्चाभयमीरितम् । विपत्तौ जीवानां रक्षणमभयं कथितं स्वस्वकार्येषु प्रेरणं वरः कथित इत्यर्थः ॥ १० ॥

विष्टभ्य अवलम्ब्य ॥ ११ ॥

कालिकम् कालसम्भवं जगत् । चिन्मयी ज्ञानस्वरूपा ॥ १२ । १३ ॥

आद्यायाः कालिकायास्तद्भिन्नानां च देवतानां प्रतिमायाः स्वरूपा-

तद्विधानमपि श्रोतुमिच्छामि त्वन्मुखाम्बुजात् ।
कथ्यतां परमेशान ! कृपया यदि रोचते ॥ १८ ॥

श्रीसदाशिव उवाच ।

गुह्यमेतत् परं तत्त्वं यत् पृष्टं परमेश्वरि ! ।
कथयामि तव स्नेहात् समाहितमनाः शृणु ॥ १९ ॥
सकामाश्चैव निष्कामा द्विविधा भुवि मानवाः ।
अकामानां पदं मोक्षः कामिनां फलमुच्यते ॥ २० ॥
यो यद्देवप्रतिकृतिं प्रतिष्ठापयति प्रिये ! ।
स तल्लोकमवाप्नोति भोगानपि तदुद्भवान् ॥ २१ ॥
मृण्मये प्रतिबिम्बे तु वसेत् कल्पायुतं दिवि ।
दारुपाषाणधातूनां क्रमाद्दशगुणाधिकम् ॥ २२ ॥
तृणकाष्ठादिरचितं ध्वजवाहनसंयुतम् ।
मन्दिरं देवमुद्दिश्य काममुद्दिश्य वा नरः ।

देवाश्च प्रतिष्ठा विधानं, फलं गृहादिप्रदानफलञ्च श्रोतुमिच्छन्ती । श्रीदेव्युवाच—ध्यानमित्यादिना । हे प्रभो ! जीवनिस्तारहेतवे काम्या यद्यान कथितं तस्य ध्यानस्यानुरूपतो मृण्मयीं मृत्तिकाविकारभूतां शिलामयीं दारुधातुमयीं वा मूर्त्तिं निर्माय विचित्रं भवनं कृत्वा तत्र भवने वस्त्रालङ्कारभूषितां देवेशीं कालीं साधको यदि स्थापयेत्तदा तस्य साधकस्य किं फलं जायते इत्यन्वयः । प्रतिकृतेः प्रतिमायाः ॥ १८—१७ ॥

अपिनः फलम् ॥ १८ ॥

श्रीदेव्यैवं प्रार्थितः सन् श्रीसदाशिव उवाच गुह्यमेतदित्यादिना ॥ १९—२१ ॥

प्रतिबिम्बे प्रतिमायाम् अत्र प्रतिष्ठापिते सति इत्यध्याहार्य्यम् ॥ २२ ॥

संस्कुर्यादुत्सृजेदापि तस्य पुण्यं निशामय ॥ २३ ॥
तृणादिनिर्मितं गेहं यो दद्यात् परमेश्वरि ! ।
वर्षकोटिसहस्राणि स वसेद्देववेश्मनि ॥ २४ ॥
इष्टकागृहदाने तु तस्माच्छतगुणं फलम् ।
ततोऽयुतगुणं पुण्यं शिलागेहप्रदानतः ॥ २५ ॥
सेतुसङ्क्रमदातारो ! यमलोकं न पश्यति ।
सुखं सुरालयं प्राप्य मोदते स्वर्निवासिभिः ॥ २६ ॥
वृक्षारामप्रतिष्ठाता गत्वा त्रिदशमन्दिरम् ।
कल्पपादपवृन्देषु निवसन् दिव्यवेश्मनि ।
भुङ्क्ते मनोरमान् भोगान् मनसो यानभीप्सितान्॥ २७
प्रीतये सर्वसत्त्वानां ये प्रदद्युर्जलाशयम् ।
विधूतपापास्ते प्राप्य ब्रह्मलोकमनामयम् ।
निवसेयुः शतं वर्षानभसां प्रतिशीकरम् ॥ २८ ॥
यो दद्याद्वाहनं देवि ! देवताप्रीतिकारकम् ।
स तेन रचितो नित्यं तल्लोके निवसेच्चिरम् ॥ २९ ॥
मृण्मये वाहने दत्ते यत् फलं जायते भुवि ।
दारुजे तद्दशगुणं शिलाजे तद्दशाधिकम् ॥ ३० ॥
रिन्तिका कांस्यताम्रादिनिर्मिते देववाहने ।
दत्ते फलमवाप्नोति क्रमात् शतगुणाधिकम् ॥ ३१ ॥

निशामय शृणु ॥ २३–२७ ॥

जलाशयम् वापीकूपादिकम् अनामयम् निरुपद्रवम् प्रतिशीकरम् प्रत्यम्बुकरम् ॥ २८ ॥

तल्लोके तस्य देवस्य लोके ॥ २९ ॥ ३० ॥

देव्यागारे महासिंह वृषभ शङ्करालये ।
गरुड़ कैशवे गेहे प्रदद्यात् साधकोत्तम. ॥ ३२ ॥
तीक्ष्णदृष्टः करालास्यः शटाशोभितकन्धरः ।
चतुरङ्घ्रिर्वज्रनखो महासिंहः प्रकीर्त्तितः ॥ ३३ ॥
शृङ्गायुधः शुद्धकाय चतुष्पादसितक्षुरः ।
बृहत् ककुत् कृष्णपुच्छः श्यामस्कन्धो वृष. स्मृत. ॥३४॥
गरुड़ पक्षिवङ्गेषु नरास्यो दीर्घनासिकः ।
पादसङ्कोचसंविष्टः पक्षयुक्तः कृताञ्जलिः ॥ ३५ ॥
पताकाध्वजदानेन देवप्रीतिः शतं समा. ।
ध्वजदण्डस्तु कर्त्तव्यो द्वात्रिंशद्धस्तसम्मितः ॥ ३६ ॥
सुदृढ़ोच्छिद्ररहितः सबलः शुभदर्शनः ।
वेष्टितो रक्तवस्त्रेण कोटौ चक्रसमन्वितः ॥ ३७ ॥
पताका तत्र संयोज्या तत्तद्वाहनचिह्निता ।
प्रशस्तमूला सूक्ष्माग्रा दिव्यवस्त्रविनिर्मिता ।

रिन्तिका पिच्छलम् ॥ ३१ ॥ ३२ ॥

महासिंहस्वरूपमाह तीक्ष्णदृष्ट इत्याद्येकेन । करालास्य दन्तुर वदन शटाशोभितकन्धरः शटया परस्परश्लिष्टरोमश्रेणिसमूहेन शोभिता कन्धरा यस्य तथाभूतः चतुरङ्घ्रिः चतुष्पात् ॥ ३३ ॥

वृषभस्वरूपमाह शृङ्गायुध इत्याद्येकेन । असितक्षुरः नील-क्षुरः ॥ ३४ ॥

गरुड़स्वरूपमाह गरुड इत्याद्येकेन । नरास्यः मनुष्यमुख. ॥३५॥

पताकेत्यादिना । पताकाध्वजदानेन पताकासहितध्वजसमर्पणेन शतं समाः शतवर्षाणि देवप्रीतिर्भवति, तयोर्मध्ये पूर्वे ध्वजस्वरूपमाह ध्वजदण्ड इत्यादिना सार्द्धेन । कोटौ अग्रभागे ॥ ३६ ॥ ३७ ॥

शोभमाना ध्वजाग्रे या पताका सा प्रकीर्त्तिता ॥३८॥
वासोभूषणपर्य्यङ्कयानसिंहासनानि च।
पानप्राशनताम्बूलभाजनानि पतद्ग्रहम् ॥ ३९ ॥
मणिमुक्ताप्रवालादिरत्नान्यात्मप्रियञ्च यत्।
यो दद्याद्देवमुद्दिश्य श्रद्धाभक्तिसमन्वितः।
स तल्लोकं समासाद्य तत्तत् कोटिगुणं लभेत् ॥ ४० ॥
कामिनां फलमित्युक्तं चयिष्णुः स्वप्नराज्यवत्।
निष्कामानान्तु निर्वाणं पुनरावृत्तिवर्जितम् ॥ ४१ ॥
जलाशयगृहारामसेतुसक्रमशाखिनाम्।
देवतानां प्रतिष्ठायां वास्तुदैत्यं प्रपूजयेत् ॥ ४२ ॥
अनर्च्चयित्वा यो वास्तुं कुर्य्यात् कर्म्माणि मानवः।
विघ्नन्तस्याचरेद्वास्तुः परिवारगणैः सह ॥ ४३ ॥
कपिलास्यः पिङ्गकेशो भीषणो रक्तलोचनः।
कोटराक्षो लम्बकर्णो दीर्घजङ्घो महोदरः ॥ ४४ ॥
अश्वतुण्डः काककण्ठो वज्रबाहुर्व्रतान्तकः।
एते परिकरा वास्तोः पूजनीयाः प्रयत्नतः ॥ ४५ ॥
मण्डलं शृणु वक्ष्यामि यत्र वास्तुं प्रपूजयेत् ॥ ४६ ॥
वेद्यां वा समदेशे वा शस्ताद्विरुपलेपिते।

तत्र ध्वजदण्डपताकामाह तत्तद्दानचिह्नितेत्यादिना सपादश्लोकेन। ध्वजाग्रे ध्वजदण्डाग्रभागे ॥ ३८ ॥

पतद्ग्रहम् सुखात् पततो जलताम्बूलादेर्व्याहकं पात्रविशेषम्॥३९

समासाद्य सम्प्राप्य ॥ ४०-४३ ॥

अथ वास्तुदैत्यस्य परिवारानाह कपिलास्य इत्यादिना सार्द्धेन। परिकराः परिवाराः ॥ ४४ ४६ ॥

वाय्वीशकोणयोर्मध्ये हस्तमात्रप्रमाणतः ।
सूत्रपातक्रमेणैव रेखामेकां प्रकल्पयेत् ॥ ४७ ॥
ईशानादग्निपर्य्यन्तमपरां रचयेत्तथा ।
आग्नेयान्नैऋतं यावत् नैऋताद्वायवावधि ॥ ४८ ॥
दत्वा रेखे चतुष्कोणमेकं मण्डलमालिखेत् ॥ ४९ ॥
कोणसूत्रे पातयित्वा चतुर्द्धा विभजेत्तु तत् ।
यथा तत्र भवेद्देवि । मत्स्यपुच्छचतुष्टयम् ॥ ५० ॥
ततो भित्त्वा पुच्छमूलं वारुणाद्दासवावधि ।
कोवेराद् याम्यपर्य्यन्तं दद्याद्रेखाद्वयं सुधीः ॥ ५१ ॥
ततश्चतुर्षु कोणेषु कोणरेखान्वितेष्वपि ।
कर्णाकर्णिप्रयोगेण न्यसेद्रेखाचतुष्टयम् ॥ ५२ ॥

वास्तुप्रपूजनार्थं मण्डलमेवाह वेद्यां वेत्यादिभिः । वेद्यां वा शस्त्राद्भि प्रशस्तैर्जलैरुपलेपिते समदेशे वा वाय्वीशकोणयोर्मध्ये सूत्रपातक्रमेणैव हस्तमात्रप्रमाणत एकां रेखा प्रकल्पयेत्, तथा तेनैव प्रकारेण ईशानादीशानकोणमारभ्याग्निकोणपर्य्यन्तमपरामन्यां रेखा रचयेत्, तथैवाग्नेयादग्निकोणमारभ्य नैऋत यावत् नैऋतकोणावधि नैऋतात् नैऋतमपि कोणमारभ्य वायवावधि वायुकोणपर्य्यन्त क्रमतो द्वे रेखे दत्वा एवं विधानेन एकं चतुष्कोणं मण्डलमालिखेत् ॥ ४७-४९ ॥

कोणसूत्रे इत्यादिना । हे देवि ! तत्र चतुष्कोणे मण्डले यथा मत्स्यपुच्छचतुष्टय भवेत्तथा तत् चतुष्कोण मण्डलं कोणसूत्रे पातयित्वा चतुर्द्धा विभजेत् विभक्त कुर्य्यात् ॥ ५० ॥

तत इत्यादिना । ततः सुधीर्जनो वारुणात् पश्चिममारभ्य याम्यपर्य्यन्तं दक्षिणावधि च पुच्छमूलं भित्त्वा रेखाद्वयं दद्यात् ॥ ५१ ॥

एव सङ्केतविधिना कोष्ठानां षोड़शं लिखन् ।
पञ्चवर्णेन चूर्णेन रचयेद्यन्त्रमुत्तमम् ॥ ५३ ॥
चतुर्षु मध्यकोष्ठेषु पद्मं कुर्य्यात् मनोहरम् ।
चतुर्दल पीतरक्तकर्णिकं रक्तकेशरम् ॥ ५४ ॥
दलानि शुक्लवर्णानि यद्वा पीतानि कल्पयेत् ।
यथेष्टं पूरयेत् पद्मसन्धिस्थानानि वर्णकैः ॥ ५५ ॥
ग्राग्नेय कोष्ठमारभ्य कोष्ठानां द्वादश क्रमात् ।
श्वेतकृष्णपीतरक्तैश्चतुर्वर्णैः प्रपूरयेत् ॥ ५६ ॥
दक्षिणावर्त्तयोगेन कोष्ठानां पूरणं प्रिये ! ।
वामावर्त्तेन देवानां पूजनं तेषु साधयेत् ॥ ५७ ॥
पद्मे समर्चयेद्वास्तुदैत्यं विघ्नोपशान्तये ।
ईशादिद्वादशे कोष्ठे कपिलास्यादिदानवान् ॥ ५८ ॥
कृष्णखण्डोक्तविधिना कुर्वन्नलसंस्कृतिम् ।
यथाशक्त्याहुतिं दत्वा वास्तुयज्ञं समापयेत् ॥ ५९ ॥

तत इत्यादिना । तत परं कोष्ठरेखान्वितेषु चतुर्ष्वपि कोष्ठेषु कर्णाकर्णिप्रयोगेण रेखाचतुष्टय न्यसेत्, अपिना कोष्ठरेखान्वितेषु चतुर्षु कोष्ठेषु पश्चिमात् पूर्व्वावधि रेखाद्वयमुत्तरस्माद्दक्षिणावधि च रेखाद्वय न्यसेत् ॥ ५२ ॥

एवमित्यादिना । एवं सङ्केतविधिना इत्थं सङ्केतविधानेन कोष्ठानां षोड़शमालिखेत् । ननु केन द्रव्येण मण्डलमालिखेदित्यपेक्षायामाह पञ्चवर्णेनेत्यादिना ॥ ५३ ॥

चतुर्ष्वित्यादिना । ततश्चतुर्षु मध्यकोष्ठेषु मनोहरं चतुर्दल चतुष्पत्रक पीतरक्तकर्णिकं पीतरक्तवर्णबीजकोषकं रक्तकेशरं पद्म कुर्य्यात् ॥ ५४-५६ ॥

एव वास्तुमण्डलं कथयित्वेदानीं तत्र सपरिवारस्य वास्तो-

इति ते कथिता देवि ! वास्तुपूजा शुभप्रदा ।
यां साधयन्नरः क्वापि वास्तुविघ्नैन बाध्यते ॥ ६० ॥

देव्युवाच ।

मण्डलं कथितं वास्तोर्विधानमपि पूजने ।
ध्यानं न गदितं नाथ ! तदिदानीं प्रकाशय ॥ ६१ ॥

श्रीसदाशिव उवाच ।

ध्यानं वक्ष्यामि महेशानि ! शृणुतां वास्तुरक्षसः ।
यस्यानुशीलनात् सद्यो नश्यन्ति सकलापदः ॥ ६२ ॥
चतुर्भुजं महाकायं जटामण्डितमस्तकम् ।
त्रिलोचनं करालास्यं हारकुण्डलशोभितम् ॥ ६३ ॥
लम्बोदरं दीर्घकर्णं लोमशं पीतवाससम् ।
गदात्रिशूलपरशुखट्वाङ्गं दधतं करैः ॥ ६४ ॥
असिचर्म्मधरैर्वीरैः कपिलाद्यादिभिर्वृतम् ।
शत्रूणामन्तकं साक्षादुद्यदादित्यसन्निभम् ॥ ६५ ॥
ध्यायेद्देवं वास्तुपतिं कूर्म्मपद्मासनस्थितम् ।

पूजाया विधानमाह वास्तोरित्यादिना सार्द्धत्रयेण । तेषु द्वादशकोष्ठेषु वास्तोरित्यं देवानां दीयतां कपिलाद्यादीनां द्वादशानां पूजनं साधयेत् ॥ ५७-६० ॥

एवं वास्तुमण्डलं तत्र [illegible] वास्तोः पूजाया विधानञ्च [illegible] श्रोतुमिच्छन्ती श्रीदेव्युवाच मण्डलमित्यादिना ॥ ६१ ॥

एवं प्रार्थित [illegible] श्रीसदाशिव उवाच ध्यानमित्यादिना ॥ ६२ ॥

वास्तोर्ध्यानमेवाह चतुर्भुजमित्यादिना सार्द्धत्रयेण ॥ ६३ ॥

कूर्मपद्मं मण्डलोर्ध्वविधेयम् ॥ ६५ ॥

मारीभये रोगभये डाकिन्यादिभये तथा ॥ ६६ ॥
औत्पातिकापघटादौ व्यालरक्षोभयेऽपि च ।
ध्यात्वैव पूजयेद्वास्तुं परिवारसमन्वितम् ॥ ६७ ॥
तिलान्यवायसेर्हुत्वा सर्वशान्तिमवाप्नुयात् ।
यथा वास्तुः पूजनीयः प्रोक्तकर्मसु सुव्रते ! ॥ ६८ ॥
ग्रहाश्चापि तथा पूज्या दशदिक्पतिभिर्युताः ।
ब्रह्मा विष्णुश्च रुद्रश्च वागीशो लक्ष्मीश्च शङ्करी ॥ ६९ ॥
मातरः सगणेशाश्च सम्पूज्या वसवस्तथा ।
पितरो यद्यदा स्युः कर्मस्वेतेषु कालिके ! ॥ ७० ॥
सर्वत्रैव भवेदर्थे विघ्नस्तत्र पदे पदे ।
अतो महेशि ! यत्नेन प्रोक्तसत्कारकर्मसु ॥ ७१ ॥
पितृणां तर्पणेत्वाभ्युदयिकं श्राद्धमाचरेत् ।
ग्रहयज्ञं प्रवक्ष्यामि सर्वशान्तिविधायकम् ॥ ७२ ॥
यत्र सम्पूजिता सेज्या ग्रहा यच्छन्ति वाञ्छितम् ।
त्रिरेखाभिस्त्रिकोणं तद्बहिर्वृत्तमालिखेत् ॥ ७३ ॥
विदध्याद्वलयानि दलान्यष्टौ च तद्बहिः ।
चतुर्द्वारान्वितं कुर्यात् भूपुरं सुमनोहरम् ॥ ७४ ॥
वासवेशानयाम्येषु भूपुरस्य बहिःस्थले ।
वृत्तं विरचयेदेक प्रादेशपरिमाणकम् ॥ ७५ ॥
दक्षोदारुणयाम्येषु च परं कल्पयेत्तथा ॥ ७६ ॥

उदयादित्यस्य क्षणम उदास्तमयपङ्कजम् ॥ ६५-७१ ॥
सेन्द्रा इन्द्रादिदशदिक्पतिसहिता यच्छन्ति वाञ्छितम् ॥ ७३ ॥
ग्रहयज्ञमेवाह त्रिरेखाभिरित्यादिभिः । प्रथमतस्त्रिकोणं यन्त्रं लिखेत् तत्पश्चाद्वृत्तत्रिकोणयोर्मध्ये यन्त्रं लिखेत् तत्तद्वृत्तत्रिकोणेभ्यो बहिर्वृत्तं वर्तुलमेकं

नवग्रहाणां वर्णेन नवकोणानि पूरयेत् ।
मध्यत्रिकोणद्वौ पार्श्वौ सव्यदक्षिणभेदतः ॥ ७७ ॥
श्वेतपीतौ विधातव्यौ पृष्ठभागः सितेतरः ।
अष्टदिक्पतिवर्णेन पर्णान्यष्टौ प्रपूरयेत् ॥ ७८ ॥
सितरक्तासितैश्चूर्णैः पुरः प्राकारमाचरेत् ।
पुरो बहिःस्थे द्वे वृत्ते देवि ! प्रादेशसम्मिते ॥ ७९ ॥
उपर्य्यधःक्रमेणैव रक्तश्वेते विधाय च ।
सन्निधानानि यन्त्रस्य स्वेच्छया रचयेत् सुधीः ॥ ८० ॥
यत्कोष्ठे यो ग्रहः पूज्यो यत्पत्रे यश्च दिक्पतिः ।
यद्वारेऽवस्थिता ये च तत्क्रमं शृणु साम्प्रतम् ॥ ८१ ॥
मध्यकोणे यजेत् सूर्य्यं पार्श्वयोररुणं शिखाम् ।
पश्चात् प्रचण्डयोर्दण्डौ पूजयेदंशुमालिनः ॥ ८२ ॥
भानूर्ध्वकोणे पूर्वस्यामर्च्चयेद्रजनीकरम् ।

मण्डलमालिखेत्, ततो वृत्तलग्नान्यष्टौ दलानि पत्राणि विदध्यात् कुर्यात् तद्बहिश्चतुर्द्वारान्वित सुमनोहर भूपुरं कुर्यात्, ततो वायवेशानयोर्मध्ये भूपुरस्य बहिःस्थले प्रादेशपरिमाणकमेकं वृत्तं वर्त्तुलं मण्डलं विरचयेत्, ततो वरुणयोर्नऋत्यपश्चिमयोर्मध्ये भूपुरस्य बहिःस्थले तथैव प्रादेशपरिमाणकमपरं वृत्तं मण्डलं कल्पयेच्चयेत् ॥ ७४—७६ ॥

नवग्रहाणामित्यादिना । तत् सूर्य्यादीनां नवग्रहाणां वर्णेन विशिष्टैश्चूर्णैर्नवकोणानि पूरयेत्, तत सव्यदक्षिणभेदतो मध्यत्रिकोणस्य द्वौ पार्श्वौ क्रमत श्वेतपीतौ विधातव्यौ, मध्यत्रिकोणस्य पृष्ठभागः सितेतर कृष्णवर्णो विधातव्य तत इदानीमष्टानां दिक्पतीनां वर्णेन विशिष्टैश्चूर्णैरष्टौ पत्राणि प्रपूरयेत् ॥ ७७ ॥ ७८ ॥

आग्नेये मङ्गलं याम्ये बुधं नैऋतकोणके ॥ ८३ ॥
बृहस्पतिं वारुणे च दैत्याचार्य्यं प्रपूजयेत् ।
शनैश्चरन्तु वायव्ये कौवेरेज्ञानयोः क्रमात् ।
राहुं केतुं यजेत् चन्द्र परितस्तारकागणान् । ८४ ॥
सूरो रक्तः शशी शुक्लो मङ्गलोऽरुणविग्रहः ।
बुधजीवौ पाण्डुपीतौ श्वेतः शुक्रोऽसितः शनिः ॥ ८५ ॥
राहुकेतू विचित्राभौ ग्रहवर्णाः प्रकीर्त्तिताः ।
चतुर्भुजं रविं ध्यायेत् पद्मद्वयवराभयैः ॥ ८६ ॥
चिन्तयेच्छशिनं दानमुद्राऽमृतकराम्बुजम् ।
कुजमौषत्कुजतनुं हस्ताभ्यां दण्डधारिणम् ।
ध्यायेत् सोमात्मजं बालं भालंलोलितकुन्तलम् ॥८७॥
यज्ञसूत्रान्वितं ध्यायेत् पुस्तकाचकरं गुरुम् ।

सितेत्यादिना । ततः सितरक्तासितैः श्वेतलोहितकृष्णवर्णैश्चूर्णैः पुरो भूपुरस्य प्राकारमाचरेत् कुर्यात् । हे देवि! पुरो भूपुरस्य वह्नि स्थे ग्नेयसंस्थिते हे हस्ते वर्तुले मण्डले उपर्य्यधःक्रमेणैव रक्तश्वेते विधाय सुधीः साधको यन्त्रस्य तस्मिन्स्थानानि स्वेच्छया रञ्जयेत् ॥ ७६—८३ ॥

परितः सर्व्वतः ॥ ८४ ॥

अथ क्रमतः सूर्य्यादीनां नवग्रहाणां वर्णमाह सूर इत्यादिना सार्द्धेन । सूरः सूर्य्यः ॥ ८५ ॥

अथ सूर्य्यादीना नवग्रहाणा क्रमतो ध्यानमाह चतुर्भुजमित्यादिभिः । पद्मद्वयवराभयैर्विशिष्टं चतुर्भुजं रविं सूर्य्यं ध्यायेत्, दानमुद्रोऽमृतकराम्बुजं दानमुद्रा चामृतञ्च कराम्बुजयोर्यस्य तथाभूतं शशिन चन्द्रं चिन्तयेत् ॥ ८६ ॥

सोमात्मजम् बुधम् । भालंलोलितकुन्तलम् भाले रोचिनाच-

एवं दैत्यगुरुञ्चापि काणं खञ्जं शनैश्चरम् ॥ ८८ ॥
राहुकेतू शिरः कायौ विकृतौ क्रूरचेष्टितौ ।
स्वैः स्वैर्ध्यानैर्यथानिष्टा यजेदिन्द्रादिदिक्पतीन् ॥ ८९ ॥
दलेष्वष्टसु पूर्वादिक्रमतः साधकोत्तमः ।
सहस्राक्षं यजेदादौ पीतकौषेयवाससम् ॥ ९० ॥
वज्रपाणिं पीतरुचिं स्थितमैरावतोपरि ।
रक्ताभं छागवाहस्थं शक्तिहस्तं हुताशनम् ॥ ९१ ॥
ध्यायेत् कालं लुलापस्थं दण्डिनं कृष्णविग्रहम् ।
निर्ऋतिं खड्गहस्तञ्च श्यामलं वाजिवाहनम् ॥ ९२ ॥
वरुणं मकरारूढं पाशहस्तं सितप्रभम् ।
ध्यायेत् कृष्णत्विषं वायुं मृगस्थञ्चाङ्कुशायुधम् ॥ ९३ ॥
कुबेरं कनकाकारं रत्नसिंहासनस्थितम् ।
सुतं यक्षगणैः सर्वैः पाशाङ्कुशकराम्बुजम् ॥ ९४ ॥
ईशानं वृषभारूढं त्रिशूलवरधारिणम् ।
व्याघ्रचर्माम्बरधरं पूर्णेन्दुसदृशप्रभम् ॥ ९५ ॥
ध्यात्वा चैतान् क्रमादिष्ट्वा ब्रह्मानन्तो पुरा बहिः ।
ऊर्द्धाधोवृत्तयोरर्च्यौ ततोऽर्च्या द्वारदेवताः ॥ ९६ ॥

खिताः कुन्दजा केशा यस्य तथाभूतम् ॥ ८७ । ८८ ॥

दृष्ट्वा पूजयित्वा ॥ ८९ ॥

अथ क्रमत इन्द्रादीनामष्टानां दिक्पतीनां ध्यानं वर्णयन्नाह सहस्राक्षमित्यादिभिः । पीतकौषेयवाससं पीतं कौषेयं क्रमिकोशोत्थं वासो वस्त्रं यस्य तथाभूतम् ॥ ९० । ९१ ॥

कालम् यमम् । लुलापस्थम् महिषस्थं निर्ऋतिम् राक्षसम् ॥ ९२-९५ ॥

ध्यात्वेत्यादिना । एतानिन्द्रादीनष्टौ दिक्पतीनेव ध्यात्वा

उग्रभीमः प्रचण्डेशौ पूर्वद्वाराः प्रकीर्तिताः ।
अवन्तः क्षेत्रपालश्च नकुलेशो बृहत्शिराः ।
याम्यद्वारे पश्चिमे च हुंकाख्यानन्ददुर्जयाः ॥ ९७ ॥
त्रिशिराः पुरजिच्चैव भीमनादो महोदरः ।
उत्तरद्वारपार्श्वे तं सर्वे गच्छालयपालयत. ॥ ९८ ॥
श्रूयतां ब्रह्मणो ध्यानमनन्तस्यापि सुव्रते !।
रक्तोत्पलनिभो ब्रह्मा चतुरास्यश्चतुर्भुजः ॥ ९९ ॥
हंसारूढो वराभीतिमालापुस्तकपाणिकः ॥ १०० ॥
हिमकुन्देन्दुधवलः मत्तश्च. महस्रपात् ।
सहस्रपाणिवदनो ध्यातव्यस्तं सुरासुरैः ॥ १०१ ॥
ध्यानं पूजाक्रमश्चैषां यन्त्रञ्च कथितं प्रिये !।
वास्त्वादिक्रमतो ज्ञेया मन्त्रानपि शृणु प्रिये ! ॥ १०२ ॥
चकारो हव्यवाहस्थ षड्दीर्घैश्वरसंयुत. ।
भूषितो नादविन्द्भ्यां वास्तुमन्त्रः षडक्षरः ॥ १०३ ॥

क्रमादिह्वा पूजयित्वा च परां भूपुरादहिरुद्वाधिस्थितयोर्द्वयोश्च-स्वतयोर्मध्यगतौ द्विभुजौ क्रमतो ऽर्च्यौ पूजनीयौ ततो द्वारदेवता अर्च्याः ॥ ९६ ॥

पूज्या द्वारदेवता एताः उग्रा भीम इत्यादिना ध.द्वदेवेन ॥ ९७ ॥ ९८ ॥

ब्रह्मणो ध्यानमेवाह रक्तोत्पलनिभ इत्यर्धेन ॥ ९९ । १०० ॥
अनन्तस्य ध्यानमाह हिमकुन्देन्दुधवल इत्यर्धेन ॥ १०१ ॥
एषां वास्त्वादीनां मन्त्रानाह ॥ १०२ ॥
वास्त्वादीनां क्रमात् मन्त्रमेवाह चकार इत्यादिभिः । हव्यवाहस्थः हव्यवाहो रेफस्तत्स्थः चकारः षड्दीर्घैश्वरसंयुतो नादवि-

तारं मायां तीव्ररश्मे ङेऽन्तमारोग्यदं वदेत् ।
वह्निजायां ततो दत्वा सूर्यमन्त्रं समुद्धरेत् ॥ १०४ ॥
कामो माया च वाणी च ततोऽमृतकरेति च ।
अमृतं स्रावय द्वन्द्वं स्वाहा सोममनुर्मतः ॥ १०५ ॥
ऐं ह्रां ह्रीं सर्वपदादुष्टान्नाशय नाशय ।
स्वाहावसानो मन्त्रोऽयं मङ्गलस्य प्रकीर्त्तितः ॥ १०६ ॥
ह्रीं श्रीं सौम्यपदञ्चोक्त्वा सर्वान् कामान् ततो वदेत् ।
पूरयान्ते वह्निकान्तामेष सोमाम्बुजे मनुः ॥ १०७ ॥
तारेण पुटिता वाणी ततः सुरगुरो । पदम् ।

न्द्र्या भूषितश्च कर्त्तव्य एवञ्च त्रा त्रीं त्रं त्रैं त्रौं त्रँ इति षड्वरो वास्तुमन्त्र उद्धृत आसीत् ॥ १०३ ॥

तारमित्यादिना । पूर्वम् तार प्रणव वदेत्, ततो माया ह्रीं बीजं वदेत्, ततस्तिग्मरश्मे इति वदेत्, ततो ङेऽन्तमारोग्यं वदेत्, ततो वह्निजाया दत्वा सूर्यमन्त्रं समुद्धरेत् । योजनया ओं ह्रीं तिग्मरश्मे आरोग्यदाय स्वाहेति सूर्यमन्त्र उद्धृत आसीत् ॥ १०४ ॥

काम इत्यादिना । पूर्वं काम क्लीमिति बीजमुच्चेत ततो माया ह्रीं बीजमुच्चेत ततो वाणीरोमिति बीजमुच्चेत ततोऽमृत करेत्युच्चेत ततोऽमृतमुच्चेत ततः स्रावयद्वन्द्वमुच्चेत तत स्वाहोच्चेत योजनया क्लीं ह्रीं ऐं अमृतकराऽमृतं स्रावय स्रावय स्वाहेति सोममनुर्मतः ॥ १०५ ॥

ऐमित्यादिना । पूर्वम् ऐं ह्रां ह्रीं वदेत् ततः सर्वपदतो दुष्टान्नाशय नाशयेति वदेत् । योजनया ऐ ह्रां ह्रीं सर्वदुष्टान्नाशय नाशयेति मन्त्रो जातः स्वाहावसानः स्वाहान्तोऽयं मङ्गलस्य मन्त्र प्रकीर्त्तितः ॥ १०६ ॥

ह्रीमित्यादिना । पूर्वम् ह्रीं श्रीं सौम्यपद चोक्त्वा तत सर्वान् कामान् वदेत् । ततः पूरयान्ते वह्निकान्तां वदेत् । योजनया ह्रीं

अभीष्टं यच्छ यच्छेति स्वाहामन्त्रो बृहस्पतेः ॥ १०८ ॥
शां शीं शूं शैं शौं शः शुक्रमन्त्रः समीरितः ॥ १०९ ॥
ह्रां ह्रां ह्रीं ह्रीं सर्वशत्रून् विद्रावय पदद्वयम् ।
मार्त्तण्डसूनवे पश्चात् नमो मन्त्रः शनैश्चरे ॥ ११० ॥
रां ह्रौं भ्रैं ह्रीं सोमशत्रो शत्रून् विध्वंसय द्वयम् ।
राहवे नम इत्येष राहोर्मन्त्रुरुदाहृतः ॥ १११ ॥
क्रूं क्रूं क्रैं केतवे स्वाहा केतोर्मन्त्र प्रकीर्त्तितः ॥ ११२ ॥
ल र स क्षूं वं यमिति च ह्रौं ब्रीमिति क्रमात् ।
इन्द्राद्यनन्तदिक्पानां द्रशमन्त्राः समीरिताः ॥ ११३ ॥

श्री सौम्य सर्वान् कामान् पूरय स्वाहेत्येष सोमात्मजे बुधे मनुर्मतः ॥ १०७ ॥

तारेणेत्यादिना । तारेण प्रणवेन पुटिता आदावन्ते च संयुक्ता वाणी वक्तव्या ततः सुरगुरो इति पद वदेत् । ततोऽभीष्टं यच्छ यच्छेति वदेत् । ततः स्वाहेति वदेत् । योजनया ओम् ऐं ओं सुरगुरो अभीष्टं यच्छ यच्छ स्वाहेति बृहस्पतेर्मन्त्रो मतः ॥ १०८ ॥

शां शीं शूं शैं शौं शः इति शुक्रमन्त्रः समीरित कथितः ॥ १०९ ॥

ह्रा ह्रामित्यादिना । पूर्वम् ह्रां ह्रां ह्रीं ह्रीं सर्वशत्रूनिति वदेत् । ततो विद्रावयपदद्वयं वदेत् । ततो मार्त्तण्डसूनवे इति वदेत् । पश्चान्नमो वदेत् । योजनया ह्रा ह्रा ह्रीं ह्रीं सर्वशत्रून् विद्रावय विद्रावय मार्त्तण्डसूनवे नमः इति शनैश्चरे मन्त्रो मतः ॥ ११० ॥

रामित्यादिना । पूर्वं रां ह्रौं भ्रैं ह्रीं सोमशत्रो शत्रूनिति वदेत् । ततो विध्वंसयद्वयं वदेत् । ततो राहवे नम इति वदेत् । योजनया रां ह्रौं भ्रैं ह्रीं सोमशत्रो शत्रून् विध्वंसय विध्वंसय राहवे नम इत्येष राहोर्मन्त्रुरुदाहृत कथितः ॥ १११ । ११२ ॥

अन्येषां परिवाराणां नाममन्त्राः प्रकीर्त्तिताः ।
अनुक्तमन्त्रे सर्वत्र विधिरेष शिवोदितः ११४ ॥
नमोऽन्तमन्त्रे देवेशि ! न नमो योजयेत् बुधः ।
स्वाहान्तेऽपि तथा मन्त्रे न दद्याद्वह्निवल्लभाम् ॥ ११५ ॥
ग्रहादिभ्यः प्रदातव्य पुष्पं वासश्च भूषणम् ।
तेषां वर्णानुरूपेण नान्यथा प्रीतये भवेत् ॥ ११६ ॥
कुण्डगोलोक्तविधिना वह्निं संस्थापयेत् सुधीः ।
पुष्पैरुक्तावचैर्यद्वा समिद्भिर्होममाचरेत् ॥ ११७ ॥
शान्तिकर्म्मणि पुष्टौ च वरदो हव्यवाहनः ।
प्रतिष्ठायां लोहिताक्षः शत्रुहा क्रूरकर्म्मणि ॥ ११८ ॥
शान्तौ पुष्टौ महेशानि ! तथा क्रूरेऽपि कर्म्मणि ।
ग्रहयाग प्रकुर्वाणो वाञ्छितार्थमवाप्नुयात् ॥ ११९ ॥
यथा प्रतिष्ठाकार्य्येषु देवार्चा पिण्डतर्पणम् ।
वास्तोर्यागे ग्रहाणाञ्च तद्वदेव विधीयते ॥ १२० ॥
यद्येकस्मिन् दिने द्वित्रि. प्रतिष्ठा यागकर्म्म च ।
तन्त्रेण तत्र देवार्चा पिण्डश्राद्धाग्निसंक्रियाः ॥ १२१ ॥

लांमन्त्रादिना । लमिति , रमिति क्षमितिक्ष्मिति वमिति यमिति हमिति हौमिति ब्रौमिति अमित्येते क्रमादिन्द्रादीनामष्ट स्थानां दिक्पालना दशमन्त्रा· समीरिता कथिता ॥ ११३ । ११४ ॥

वह्निवल्लभाम् स्वाहेति पदम ॥ ११५ ॥

तेषाम् ग्रहादीनाम् ॥ ११६ ॥

समिद्भि· काष्ठै· ॥ ११७ ॥

वरदो वरदनामा लोहिताक्षो लोहिताक्षाख्य· शत्रुहा शत्रु-क्षयंकर ॥ ११८-१२० ॥

जलाशयगृहारामसेतुसंक्रमशाखिन ।
वाहनासनयानानि वासोऽलङ्करणानि च ॥ १२२ ॥
यानाग्नीयपात्राणि देयवस्तूनि यान्यपि ।
असंस्कृतानि देवाय न प्रदद्युः फलेप्सवः ॥ १२३ ॥
काम्ये कर्मणि सर्वत्र बुधः सङ्कल्पमाचरेत् ।
विधिवाक्यानुसारेण सम्पूर्णं सुकृतार्थये ॥ १२४ ॥
संस्कृताभ्यर्चितं द्रव्यं नामोच्चारणपूर्वकम् ।
सम्प्रदानाभिधां वीक्ष्य दत्त्वा सम्यक् फलं लभेत ॥ १२५ ॥
जलाशयगृहारामसेतुसंक्रमशाखिनाम् ।
कथ्यन्ते प्राक्षि मन्त्राः प्रयोज्या ब्रह्मविद्यया ॥ १२६ ॥
जीवनाधार ! जी[illegible] ! जीवनद ! वारुण ! ।
प्रीयन्तां तव तत्स्थास्तु जलेभूचरखेचराः ॥ १२७ ॥
तृणकाष्ठादिसम्भूत्व मेय ब्रह्मण प्रिय· ।
त्वां प्रोक्षयामि तोयेन प्रीतये भव सर्वदा ॥ १२८ ॥
इष्टकादिसमुद्भूत ! पक्वस्त्वन्विष्टकाश्रये ॥ १२९ ॥
फलैः पत्रैश्च शाखाभिश्छायाभिश्च प्रियङ्करः ।

मन्त्रेण गन्धपुष्पैश्च ॥ १२१ ॥ ४ ॥

सुकृतार्थयति । बोधितपूजितस्य सम्प्रदानाभिधानं सम्प्रदानाभिधेयम ॥ १२५ ॥

ब्रह्मविद्या गायत्र्या सह ॥ १२६ ॥

तेषां मध्ये प्रथमतो जलाशयाख्यान्मन्त्रमाह जीवनाधार जीवानामिति जीवनाधार ! जलाधार ! । वारुण ! वरुणदेवताक ! ॥ १२७ ॥

अथ गृहोद्यानमन्त्रमाह तृणकाष्ठादिसम्भूतेति । वास्तव्य वास्तवाय हितं ॥ १२८ ॥

यच्छन्तु मेऽखिलान् कामान् प्रोक्षितास्तीर्थवारिभिः १२०
सेतुस्त्वं भवसिन्धूनां पारदः पथिकप्रियः ।
मया संप्रोक्षितः सेतो ! यथोक्तफलदो भव ॥ १२१ ॥
सक्रम ! त्वा प्रोक्षयामि लोकानां संक्रमं यथा ।
दद्यासीह तथा स्वर्गे सक्रमो मे प्रदीयताम् ॥ १२२ ॥
आरामप्रोक्षणे मन्त्रो य एष कथितः प्रिये ! ।
स एव शाखिसंस्कारे प्रयोक्तव्यो मनीषिभिः ॥ १२३ ॥
प्रणवे वारुणञ्चास्त्र बीजत्रितयमम्बिके ! ।
सर्वसाधारणद्रव्यप्रोक्षणे विनियोजयेत् ॥ १२४ ॥
स्नापनार्हं वाहनं चेत् स्नापयेत् ब्रह्मविद्यया ।
अन्यत्रैवार्घतोयेन कुशाग्रेण विशोधयेत् ॥ १२५ ॥
प्राणप्रतिष्ठामाचर्य्य तत्तदार्हनसन्नया ।
पूजितोऽलङ्कृतो बाहो देवो भवति दैवते ॥ १२६ ॥

इष्टकादीत्यादिना । इष्टकादिमये गृहे प्रोक्षणीये लक्षणाभावात्-सम्भूतेऽत्र इष्टकादिसमुद्भूतेति वक्तव्यम् ॥ १२८ ॥

आरामप्रोक्षणमन्त्रमाह फलैः पत्रैश्च शाखाद्यैरिति ॥ १३० ॥

अथ सेतुप्रोक्षणमन्त्रमाह सेतुस्त्वं भवसिन्धूनामिति ॥ १३१ ॥

अथ संक्रमप्रोक्षणमन्त्रमाह सक्रम ! त्वा प्रोक्षयामीति ; सक्रम्यते सम्यक् पादविक्षेप क्रियते लोकैर्यत्र स संक्रम सेतुविशेषः; तत्सम्बोधने संक्रमेति संक्रमम् सम्यग्गमनम् ॥ १३२ ॥ १३३ ॥

प्रणवमित्यादिना । हे अम्बिके ! प्रणवमुच्चार्य वारुण य अस्त्र फडिति बीजत्रितय सर्वसाधारणद्रव्यप्रोक्षणे विनियोजयेत् ॥ १३४ ॥

ब्रह्मविद्यया गायत्र्या ॥ १३५ ॥

प्राणेत्यादिना । पूर्वोक्तेनोक्तलक्षणेन मन्त्रेण देवीप्राण

जलाशये पूजनीयो वरुणो यादसाम्पतिः ।
गृहे प्रजापतिर्ब्रह्मारामे सेतौ च संक्रमे ।
पूज्यो विष्णुर्जगत्पाता सर्वात्मा सर्वदृग्विभुः ॥ १३७ ॥

देव्युवाच ।

विविधानि विधानानि कथितान्युक्तकर्मसु ।
क्रमो न दर्शितो येन मानवः कर्म साधयेत् ॥ १३८ ॥
क्रमव्यत्ययकर्माणि बह्वायासकृतान्यपि ।
न यच्छन्ति फलं सम्यक् नृणां कर्मानुजीविनाम् ॥ १३९

श्रीसदाशिव उवाच ।

यदुक्तं परमेशानि ! मातेव हितकारिणि ! ।
निश्रेयसल्लोकानां फलव्याप्तचेतसाम् ॥ १४० ॥
एतेषामुक्तकृत्यानामनुष्ठानं पृथक् पृथक् ।
वाक्षुयागक्रमाद्देवि ! कथयाम्यवधीयताम् ॥ १४१ ॥
पूर्वेऽह्नि नियताहारः स्नः प्रातःस्नानमाचरेत् ।
कृत्वा पौर्वाह्णिकं कर्म गुरुं नारायणं यजेत् ॥ १४२

प्रतिष्ठाजन्त्रेण वाहनस्य प्राणप्रतिष्ठामाचार्यः कृत्वा तत्तद्वाहनसंज्ञया पूजितोऽनङ्कृतश्च वाहो वाहन दैवतं देवो भवति ॥ १३६ ॥

सर्वदृक् सकलपदार्थद्रष्टा विभुः व्यापकः ॥ १३७ ॥

अथोक्तकृत्यतत्तत्कर्मक्रमं जिज्ञासुर्देव्युवाच विविधानीत्यादिना ॥ १३८ । १३९ ॥

एवमार्थितः सन् श्रीसदाशिव उवाच यदुक्तमित्यादिना । फलव्याप्तचेतसाम् फलाय व्याप्तं व्यापारविशिष्टं चेतो येषां ते तेषाम् ॥ १४० ॥

अनुष्ठानम् साधनम् ॥ १४१ ॥

ततः स्वकाममुद्दिश्य विधिनाग्नितत्त्वगा ।
कृतसङ्कल्पको मन्त्री गणेशादीन समर्चयेत् ॥ १४३ ॥
वन्यूकाभं त्रिनेत्रं द्विरदवरमुखं नागयज्ञोपवीतम्
शङ्खं चक्रं कृपाणं विमलसरसिज हस्तपद्मैर्दधानम् ।
उद्यद्बालेन्दुमौलिं दिनकरकिरणद्योतवस्त्राङ्गशोभम्
नानालङ्कारयुक्तं भजत गणपतिं रक्तपद्मोपविष्टम् ॥ १४४
एवं ध्यात्वा यथाशक्त्या पूजयित्वा गणेश्वरम् ।
ब्रह्माणञ्च ततो वाणीं विष्णुं लक्ष्मीं समर्चयेत् ॥ १४५ ॥
शिवं दुर्गां ग्रहांश्चापि तथा षोडश मातृकाः ।
घृतधारास्त्रिधा वसूनिष्ट्वा कुर्य्यात् पिण्डक्रियाम् ॥ १४६ ॥
ततः प्रोक्तविधानेन मण्डलं वास्तुरचितम् ।
निर्म्माय पूजयेत्तत्र वास्तुदेवं यथा महा ॥ १४७ ॥
ततस्तु स्थण्डिलं कृत्वा वह्निं संस्कृत्य पूर्ववत् ।
धाराहोमान्तमाचर्य्य वास्तुहोमं समारभेत् ॥ १४८ ॥
यथाशक्त्याहुतीस्तस्मै परिवारगणाय च ।
तथा पूजितदेवेभ्यो दत्त्वा कर्म्म समापयेत् ॥ १४९ ॥

वास्तुयागक्रमादुक्तकल्पानामनुष्ठानस्य क्रममाह पूर्वमङ्गीत्यादिभिः ॥ १४२ । १४३ ॥

अथ गणपतिध्यानमाह वन्यूकाभमित्यर्द्धेकेन । वन्यूकाभम् वन्यूकपुष्पसदृशद्युतिम् उद्यद्बालेन्दुमौलिम् उद्यन् यो बाल इन्दुर्बालचन्द्र स मौलौ किरीटे यस्य तथाभूतम् दिनकरकिरणद्योतवस्त्राङ्गशोभम् दिनकरकिरणवद्द्योतेन वस्त्रेणाङ्गे शोभा यस्य तथाभूतम् ॥ १४४ । १४५ ॥

दृष्ट्वा पूजयित्वा ॥ १४६ । १४७ ॥

आचार्य्यं विधाय ॥ १४८ ॥

वास्तुयागे पृथक्कार्ये एष ते कथितः क्रमः ।
अनेनैव प्रकारेण यज्ञोऽपि विहितः प्रिये ! ॥ १५० ॥
ग्रहाणामत्र मुख्यत्वान्नाङ्गत्वेन प्रपूजनम् ।
सङ्कल्पान्तरं कार्यं वास्वर्चनमिति क्रमः ॥ १५१ ॥
गणेशाद्यर्चनं सर्वं वास्तुयागविधानवत् ।
ग्रहाणां यन्त्रतन्त्रौ च ध्यानं प्रागेव कीर्त्तितम् ॥ १५२ ॥
प्रसङ्गात् कथितो भद्रे ! ग्रहवास्तुक्रतुक्रमौ ।
अथ जलाशयानामुच्यते कूपसंस्क्रिया ॥ १५३ ॥
संकल्पं विधिवत् कृत्वा वास्तुपूजनमाचरेत् ।
मण्डपे कलशे वापि शालग्रामे यथामति ॥ १५४ ॥
ततः पूजा गणेशब्रह्मेन्द्रा वाणी हरो रमा ।
शिव दुर्गा अर्चासप्ति पूज्या दिक्पतयस्तथा ॥१५५॥
मातरो वसवो रुद्रा ततः कार्या गिलक्रिया ।
प्राधान्यं सकलत्वाच्च स हि पूज्यो विशेषतः ॥ १५६ ॥
नानाप्रकारैर्वरुणमर्चयित्वा स्वशक्तितः ।
विधिवत् संस्कृते वह्नौ वारुणं होममाचरेत् ॥ १५७ ॥
पूजितेभ्यश्च देवेभ्यो दत्त्वा प्रत्येकमाहुतिम् ।
पूर्णाहुतिं कलशेन होमकर्म समापयेत् ॥ १५८ ॥
ततो जलाशयाकाखगन्धसिन्दूरचर्चितम् ।
उत्तप्तं तप्तमन्त्रेण प्रोक्षयेत् कूपमुत्तमम् ॥ १५९ ॥

तत्रौ वास्तुनैवाय ॥ १४९ ॥
अनेनैव प्रकारेण ॥ १५० ॥
अत्र मण्डपे ॥ १५१ १५२ ॥
कूपसंस्कारकर्मैवाह संकल्पमित्यादिभिः ॥ १५३ । १५५ ॥

ततः स्वकाममुद्दिश्य देवमुद्दिश्य वा नरः ।
सर्वभूतप्रीणनायोत्सृजेत् कूपजलाशयम् ॥ १६० ॥
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् साधकाग्रणीः ।
सुप्रीयन्तां सर्वभूता नभोभूतोयवासिनः ॥ १६१ ॥
उत्सृष्टं सर्वभूतेभ्यो मयैतज्जलमुत्तमम् ।
तृप्यन्तु सर्वभूतानि स्नानपानावगाहनैः ॥ १६२ ॥
सामान्यं सर्वजीवेभ्यो मया दत्तमिदं जलम् ।
ये च केचिद्विपद्यन्ते स्वकर्मविपाकतः ॥ १६३ ॥
तत्पापैर्न प्रलिप्येऽहं सफलास्तु मम क्रिया ।
ततस्तु दक्षिणां कृत्वा कृतशान्त्यादिकक्रियः ॥ १६४ ॥
ब्राह्मणान् भोजयेत् कौलान् दीनानपि बुभुक्षितान् ।
जलाशयप्रतिष्ठासु सर्वत्रैष क्रमः शिवे ! ॥ १६५ ॥
तड़ागादौ च कर्त्तव्या नागस्तम्भजलेचराः ॥ १६६ ॥
मीनमण्डूकमकरकूर्माश्च जलजन्तवः ।
कार्य्या धातुमयाश्चैते कर्त्तृवित्तानुसारतः ॥ १६७ ॥
मत्स्यौ स्वर्णमयौ कुर्य्यात् मण्डूकावपि हेमजौ ।
राजतौ मकरौ कूर्ममिथुनं ताम्ररित्यिकम् ॥ १६८ ॥

अथ कूपसंस्कारे सः वरुण॰ ॥ १५६-१६० ॥

ननु साधकाग्रणीः किं प्रार्थयेदित्याकाङ्क्षायामाह सुप्रीयन्ता-मित्यादिभिः ॥ १६१-१६५ ॥

तड़ागादिप्रतिष्ठायां यो विशेषस्तमाह तड़ागादौ चेत्यादिभिः । तड़ागादौ संस्कार्य्ये सति नागस्तम्भो जलेचराश्च कर्त्तव्या॰ ॥ १६६ ॥

ननु किं द्रव्यमयाः के वा जलजन्तवः कर्त्तव्या इत्यपेक्षायामाह मीनमण्डूकेत्यादिना ॥ १६७ ॥

एतैर्जलचरैः सार्द्धं तडागमपि दीर्घिकाम् ।
सागरञ्च समुत्सृज्य प्रार्थयन्नागमर्चयेत् ॥ १६९ ॥
अनन्तो वासुकिः पद्मो महापद्मश्च तक्षकः ।
कुलीरः कर्कटः शङ्खः पाथसां रक्षका इमे ॥ १७० ॥
इत्यष्टौ नागनामानि लिखित्वाश्वत्थपल्लवे ।
स्मृत्वा प्रणवगायत्र्यौ घटमध्ये विनिःक्षिपेत् ॥ १७१ ॥
चन्द्रार्कौ साक्षिणौ कृत्वा विलोड्यैकं समुद्धरेत् ।
तत्रोत्तिष्ठति यो नागस्तं कुर्य्यात्तोयरक्षकम् ॥ १७२ ॥
स्तम्भमेकं समानीय विंशहस्तमितं शुभम् ।
सरलं दारुजं तैलैरुक्षितञ्च हरिद्रया ॥ १७३ ॥
स्नापयेत्तोयतोऽनेन व्याहृत्या प्रणवेन च ।

ननु किं धातुमया. कृति वा मीनादयो जलजन्तवो विधातव्या इत्याकाङ्क्षायामाह कनकौ स्वर्णमयावित्यादिना ॥ १६८ ॥

एतैरित्यादिना । एतैर्मीनादिभिर्जलचरैः सार्द्धं तडागं दीर्घिकां सागरञ्चापि समुत्सृज्य नागं प्रार्थयन् सन्नर्चयेत् ॥ १६९ ॥

ननु कस्मिन् स्थाने क वा नागमभ्यर्चयेत् किं वा प्रार्थयेदित्यपेक्षायामाह अनन्त इत्यादिना । एभिरनन्तादयोऽष्टौ नागाः पाथसां जलानां रक्षका भवन्तीत्यन्वयः ॥ १७० ॥

इत्यष्टावित्यादिना । इत्येतान्यनन्तादीन्यष्टौ नागनामान्यश्वत्थपल्लवे लिखित्वा प्रणवगायत्र्यौ स्मृत्वा घटमध्ये विनिःक्षिपेत् ॥ १७१ ॥

चन्द्रार्केत्यादिना । तत्रचन्द्रार्कौ साक्षिणौ कृत्वा लिखितनागनामन्यश्वत्थपल्लवान् विलोड्यैकं लिखितनागनामकमश्वत्थपल्लवं समुद्धरेत्, तत्र यो नाग उत्तिष्ठति तं नागं तोयरक्षकं कुर्यात् ॥ १७२ ॥

स्तम्भमित्यादिना । विंशहस्तमित विंशतिहस्तपरिमितं सरल-

तत्र श्रीश्चमाशान्तिसहितं नागमर्चयेत् ॥ १७४ ॥
नाग ! त्वं विष्णुशय्यासि महादेवविभूषणम् ।
स्तम्भमेनमधिष्ठाय जलरक्षां कुरुष्व मे ॥ १७५ ॥
इति प्रार्थ्य ततो नागस्तम्भं मध्ये जलाशयम् ।
समारोप्य तडागञ्च कर्त्ता कुर्य्यात् प्रदक्षिणम् ॥ १७६ ॥
यूपश्चेत् स्थापित पूर्वं तदा नाग घटेऽर्च्चयन् ।
तज्जलं तत्र निक्षिप्य शिष्टं कर्म समापयेत् ॥ १७७ ॥
एव गृहप्रतिष्ठायां कृतसकल्पको बुधः ।
वास्त्वादिवसुपूजान्त पैत्र्यं कर्म च कूपवत् ॥ १७८ ॥
विधायात्र विशेषेण यजेद्देवं प्रजापतिम् ।
प्राजापत्यञ्च हवनं कुर्य्यात् साधकसत्तमः ॥ १७९ ॥

सवक्रं दारुजं काष्ठसम्भवं तैलैर्हरिद्रया चोक्षितमभ्यक्तं शुभमेक स्तम्भं समानीय व्याहृत्या प्रणवेन तीर्थतोयेन स्नापयेत्, तत्र स्नापिते स्तम्भे श्रीश्चमाशान्तिसहित नागमर्चयेत् ॥ १७३ । १७४ ॥

नाग ! त्वमित्यादिना । हे नाग ! त्वं विष्णुशय्यासि महादेवभूषणञ्चासि एन स्तम्भमधिष्ठाय मे मम जलरक्षा कुरुष्व ॥ १७५ ॥

इतीत्यादिना । इति नागं प्रार्थ्य ततो नागस्तम्भं मध्ये-जलाशयं जलाशयस्य मध्ये समारोप्य कर्त्ता तडागप्रदक्षिणं कुर्य्यात् मध्ये जलाशयमिति, पारेमध्ये षष्ठ्यावेत्यनेनाव्ययीभाव ॥ १७६ ॥

यूप इत्यादिना । चेद्यदि यूपो नागस्तम्भः पूर्वमेव स्थापितो भवेत् तदा नागं घटेऽर्च्चयन् कर्त्ता तज्जलं घटस्थम्बिजलं तत्र तड़ागे निक्षिप्य शिष्टमवशेष कर्म समापयेत् ॥ १७७ ॥

एव जलाशयप्रतिष्ठाविधानमुक्त्वाऽथ गृहप्रतिष्ठाविधानमाह एवं गृहप्रतिष्ठायामित्यादिभिः ॥ १७८ ॥

अत्र गृहसंस्कारे ॥ १७९ ॥

गृहं पूर्वोक्तमन्त्रेण प्रोक्ष्य गन्धादिनार्चयन्।
ईशानाभिमुखो भूत्वा प्रार्थयेद्विहिताञ्जलिः ॥ १८० ॥
प्रजापतिपते। गेहे पुष्पमाल्यादिभूषिते।
अस्माकं शुभवासाय सर्वथा सुखदो भव ॥ १८१ ॥
ततस्तु दक्षिणां कृत्वा शान्त्याशीर्वादमाचरेत्।
विप्रान् कुलीनान् दीनांश्च भोजयेदात्मशक्तितः ॥ १८२ ॥
अन्यार्थन्तु प्रतिष्ठा चेत् तदासाद्य न यो जपेत्।
देवताकृतगृहस्य विधानं शृणु शैलजे। ॥ १८३ ॥
इत्थं सङ्कल्प्य भवनं शङ्खतूर्य्यादिनिःस्वनैः।
देवतासन्निधिं गत्वा प्रार्थयेद्विहिताञ्जलिः ॥ १८४ ॥
उत्तिष्ठ देवदेवेश! भक्तानां वाञ्छितप्रद!।
आगत्य जन्मसाफल्यं कुरु मे करुणानिधे! ॥ १८५ ॥

गृहमित्यादिना। ततः पूर्वोक्तमन्त्रेण गृहं प्रोक्ष्याभिषिच्य गन्धादिना गृहमर्चयेत् कर्त्ता ईशानाभिमुखो भूत्वा विहिताञ्जलिः सन् गृहं प्रार्थयेत् ॥ १८० ॥

गृहं प्रति प्रार्थनामेवाह प्रजापतिपते इत्यर्द्धश्लोकेन। प्रजापतिः पतिर्यस्य स प्रजापतिपतिः तत्सम्बोधने प्रजापतिपते इति ॥ १८१। १८२ ॥

अन्यार्थमित्यादिना। चेद्यद्यन्यार्थं गृहस्य प्रतिष्ठा विधीयते तदाऽत्र गृहप्रतिष्ठायां कर्त्तव्ये संकल्पे तदासाद्येति यो जपेत्। हे शैलजे! पार्वति! देवताधीनकृतगृहस्यदानस्य विधानं त्वं शृणु ॥ १८३ ॥

देवताकृतगेहदानविधानमेवाह इत्यमित्यादिभिः। इत्थं पूर्वोक्तविधानेन भवनं गृहं संकल्प्य शङ्खतूर्य्यादिनिःस्वनैः गृहं देवतासन्निधिं गत्वा विहिताञ्जलिः सन् देवता प्रार्थयेत् ॥ १८४ ॥

इत्यभ्यर्च्य गृहाभ्यर्णे देवमानीय साधकः ।
उपस्थाप्य गृहद्वारि पुरतो वाहनं न्यसेत् ॥ १८६ ॥
त्रिशूलमथवा चक्रं विन्यस्य भवनोपरि ।
रोपयेन्मन्दिरेशाने सपताकं ध्वजं सुधीः ॥ १८७ ॥
चन्द्रातपैः किङ्किणीभिः पुष्पस्रक्चूतपल्लवैः ।
शोभयित्वा गृहं सम्यक् कारयेद्दिव्यवाससा ॥ १८८ ॥
उत्तराभिमुखं देवं वक्ष्यमाणविधानतः ।
स्नापयेद्विहितैर्द्रव्यैस्तत्क्रमं वच्मि ते शृणु ॥ १८९ ॥
ऐं क्रीं श्रीमिति मन्त्रान्ते मूलमन्त्रं समुच्चरन्
दुग्धेन स्नापयामि त्वां मातेव परिपालय ॥ १९० ॥
प्रोक्तबीजत्रयस्यान्ते तथा मूलं नियोजयन् ।
दध्ना त्वां स्नापयाम्यद्य भवतापहरो भव ॥ १९१ ॥

यत् प्रार्थयेत्तदाह उक्तिङ्केत्यादिना ॥ १८५ ॥

इतीत्यादिना । साधको जन इत्यभ्यर्च्य गृहाभ्यर्णे गृहसमीपे देवमानीय गृहद्वारि पुरस्तो वाहनं न्यसेत् स्थापयेत् ॥ १८६ ॥

त्रिशूलमित्यादिना । सुधीर्जनो भवनोपरि त्रिशूलमथ वा चक्रं विन्यस्य सम्यक् मन्दिरेशाने गृहेशानकोणे सपताकं पताकासहितं ध्वजं रोपयेत् ॥ १८७ । १८८ ॥

तत्क्रमम् वक्ष्यमाणेन विधानेन विहितैः द्रव्यैर्देवस्नापनस्य क्रमम् ॥ १८९ ॥

तत्क्रममेवाह ऐं [illegible] श्रीमित्यादिभिः । ऐं क्रीं श्रीमिति मन्त्रान्ते मूलमन्त्रं समुच्चरन् [illegible] च दुग्धेन स्नापयामि त्वां मातेव परिपालयेति समुच्चारयन् [illegible] देवं स्नापयेत् ॥ १९० ॥

प्रोक्तेत्यादिना । तत्परं प्रोक्तबीजत्रयस्यान्ते तथैव मूलं

पुनर्बीजत्रयं मूलं सर्वानन्दकरेति च।
मधुना स्नापितः प्रीतो मामानन्दमयं कुरु ॥ १९२ ॥
प्राग्वन्मूलं समन्त्रार्घ्यं सावित्रीं प्रणवं स्मरन्।
देवप्रियेण हविषा आयुः शुक्रेण तेजसा।
स्नानं ते कल्पयामीश! मामरोगं सदा कुरु ॥ १९३ ॥
तद्वन्मूलञ्च गायत्रीं व्याहृतिं समुदीरयन्।
देवेश! शर्करातोयैः स्नातो मे यच्छ वाञ्छितम् ॥ १९४ ॥
तथा मूलं समन्त्रार्घ्यं गायत्रीं वारुणं मनुम्।
विधात्रा निर्मितैर्दिव्यैः प्रियैः स्निग्धैरलौकिकैः।
नारिकेलोदकैः स्नानं कल्पयामि नमोऽस्तु ते ॥ १९५ ॥

मन्त्रं विनियोजयन् तन्त्रे च, दक्षः त्वां स्नापयाम्यद्य भवतापहरो भवेति, सप्तस्मरन् कर्त्ता दक्षदेवं स्नापयेत् ॥ १९१ ॥

पुनरित्यादिना। पुनरैं ह्रीं श्रीमिति बीजत्रयं सप्तस्मरन्, तदन्ते च मूलं मन्त्रं सप्तस्मरन्, तदन्ते सर्वानन्दकरेति, सप्तस्मरन्, तदन्ते च, मधुना स्नापितः प्रीतो मामानन्दमयं कुरु, इति सप्तस्मरन् कर्त्ता मधुना देवं स्नापयेत् ॥ १९२ ॥

प्राग्वदित्यादिना। प्राग्वदेव मूलं मन्त्रं सप्तस्मार्घ्यं ततः सावित्रीं गायत्रीं प्रणवमोङ्कारं च स्मरन् सन्, देवप्रियेण हविषा आयुः शुक्रेण तेजसा। स्नानन्ते कल्पयामीश! मामरोगं सदा कुरु, इति स्मरन् कर्त्ता हविषा देवं स्नापयेत्। आयुः शुक्रेण आयुःशुक्रवर्द्धकेन तेजसा तेजोजनकेन ॥ १९३ ॥

तद्वदित्यादिना। तद्वदेव मूलमन्त्रं गायत्रीं व्याहृतिञ्च सप्तदीरयन् सन्, देवेश! शर्करातोयैः स्नातो मे यच्छ वाञ्छितमिति च सप्तदीरयन् कर्त्ता शर्करातोयैर्देवं स्नापयेत ॥ १९४ ॥

तथेत्यादिना। तथैव मूलं मन्त्रं गायत्रीं वारुणं मनुं वक्षिति मन्त्रं च समभ्यर्च्य ततो, विधात्रा निर्मितैर्दिव्यैः प्रियैः स्निग्धै-

गायत्र्या मूलमन्त्रेण स्नापयेदिक्षुजैरसैः ॥ १९६ ॥
कामबीजं तथा तार सावित्रीं मूलमीरयन् ।
कर्पूरागुरुकाश्मीरकस्तूरीचन्दनोदकैः ।
सुस्नातो भव सुप्रीतो भुक्तिमुक्ती प्रयच्छ मे ॥ १९७ ॥
इत्यष्टकलसैः स्नान कारयित्वा जगत्पतिम् ।
गृहाभ्यन्तरमानीय स्थापयेदासनोपरि ॥ १९८ ॥
स्नापनार्हा न चेदर्चा तत्र वापि तन्मनौ ।
शालग्रामशिलायां वा स्नापयित्वा प्रपूजयेत् ॥ १९९ ॥
अथवा मूलमन्त्रेण स्नापयेच्छुद्धपाथसाम् ।
अष्टभिः कलसैर्यद्वा पञ्चभिः सप्तभिर्यथा ॥ २०० ॥

रत्नौकिकैः नारिकेलोदकैः स्नान कल्पयामि नमोऽस्तु ते इति सप्तधरन् कर्त्ता नारिकेलजलैर्देवं स्नापयेत् ॥ १९५ ॥

ततो गायत्र्या मूलमन्त्रेण च इक्षुजै रसैर्देवं स्नापयेत् ॥ १९६ ॥

कामबीजमित्यादिना । कामबीजं क्लीमिति बीज तथा तारमोंकार सावित्रीं गायत्री मूलं मन्त्र वेरयन्नुच्चरन् कर्पूरागुरुकाश्मीरकस्तूरीचन्द्रनोदकैः सुस्नातो भव सुप्रीतो भुक्तिमुक्ती प्रयच्छ मे इति चोदीरयन् कर्त्ता कर्पूरादिवासितैर्जलैर्देवं स्नापयेत्, काश्मीरम् कुङ्कुमम् ॥ १९७ ॥

इतीत्यादिना । इत्यनेनैव विधानेन क्रमेण चाष्टकलसैरष्टकलसपरिमितैर्दुग्धादिभिः स्नानं कारयित्वा जगत्पतिं देवमासनोपरि स्थापयेत् ॥ १९८ ॥

स्नापनार्हेत्यादिना । चेद्यत्रार्चा देवप्रतिमा स्नापनार्हा स्नापनयोग्या न भवेत् तदा तत्र तस्मिन् देवतायन्त्रे तत्प्रतौ तद्देवतामन्त्रे वा शालग्रामशिलायां वा स्नापयित्वा देवं प्रपूजयेत् ॥ १९९ ॥

घटप्रमाणं प्रागेव कथितं च जपूजने।
सर्वतन्त्रागमकृत्येषु स एव विहितो घटः ॥ २०१ ॥
ततो यजेन्महादेवं स्वस्वपूजाविधानतः।
तत्रोपचारान् वक्ष्यामि शृणु देवि! परात्परे! ॥ २०२ ॥
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्कस्तथाचम्यं स्नानाय वस्त्रभूषणे ॥ २०३ ॥
गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा।
देवार्चनाय सुनिर्दिष्टा उपचाराश्च षोड़श ॥ २०४ ॥
पाद्यमर्घ्याचमनं मधुपर्काचमौ तथा।
गन्धादिपञ्चकं चैव उपचारा दश स्मृताः ॥२०५॥
गन्धपुष्पे धूपदीपौ नैवेद्यञ्चापि कालिके!।
पञ्चोपचारा. कथिता देवतायाः प्रपूजने ॥ २०६ ॥
अस्त्रेणार्घ्याम्भसा द्रव्यं प्राच्य धेनुं प्रदर्शयन्।
सम्पूज्य गन्धपुष्पाभ्यां द्रव्याख्यानं समुल्लिखेत् ॥ २०७ ॥
वक्ष्यमाणमनुं स्मृत्वा मूलञ्च देवताभिधाम्।
सचतुर्थीं समुच्चार्य त्यागार्थं वचनं पठेत् ॥ २०८ ॥

अथशब्दादित्यादि। दुर्गादिभिर्देवतायाः स्नापनेऽशक्तौ वस्त्रां वृक्षमन्त्रेण शुद्धपात्रस्थं शुद्धानां जलानामष्टभिः कलशैः पञ्चभिर्वा कलशैर्यथाविहितं स्नापयेत् ॥ २०० । २०१ ॥

महादेवम् महान्तं देवम्, तत्र देवयजने ॥ २०२ ॥

उपचारानेवाह आसनमित्यादिभिः ॥ २०३ ॥

निर्दिष्टाः कथिताः ॥ २०४-२०६ ॥

अथासनादिसमर्पणविधिमाह अस्त्रेणेत्यादिना। अस्त्रेण फाडितिमन्त्रेणार्घ्याम्भसार्घ्यं जलेन द्रव्यमासनादिकं प्रोक्ष्याभिषिच्य तदु-

निवेदनविधिः प्रोक्तो देवे देयेषु वस्तुषु ।
अनेन विधिना विद्वान् द्रव्यं दद्याद्दिवौकसे ॥ २०९ ॥
आद्यार्चनविधौ पूर्वं पाद्यार्घ्यादिनिवेदनम् ।
अर्पणं कारणादीनां सर्वमेव प्रदर्शितम् ॥ २१० ॥
अनुक्तमन्त्रा ये तत्र तानेवात्र शृणु प्रिये ! ।
आसनाद्युपचाराणां प्रदाने विनियोजयेत् ॥ २११ ॥
सर्वभूतान्तरस्थाय सर्वभूतान्तरात्मने ।
कल्पयाम्युपवेशार्थमासनन्ते नमो नमः ॥ २१२ ॥
उक्तक्रमेण देवेशि ! प्रदायासनमुत्तमम् ।
कृताञ्जलिपुटो भूत्वा स्वागतं प्रार्थयेत्ततः ॥ २१३ ॥
देवाः स्वाभीष्टसिद्ध्यर्थं यस्य वाञ्छन्ति दर्शनम् ।
सुस्वागतं स्वागतञ्ते तस्मै ते परमात्मने ॥ २१४ ॥

परि धेनुं मुद्रां प्रदर्शयन् साधको गन्धपुष्पाभ्यां द्रव्यं सम्पूज्य द्रव्याख्यानं द्रव्यनाम समुल्लिखेदुच्चारयेत्, वक्ष्यमाणं मन्त्रं मूलं मन्त्रं सचतुर्थीं देवताभिधां च समुच्चार्य त्यागार्थं वचनं पठेत् ॥२०७।२०८॥

दिवौकसे देवाय ॥ २०९-२११ ॥

आद्यार्चनविधावनुक्तान्मन्त्रानेव क्रमेणाह सर्वभूतान्तरस्थायेत्यादिना । हे देव ! सर्वेषां भूतानामन्तरे तिष्ठतीति सर्वभूतान्तरस्थस्तस्मै सर्वभूतान्तरस्थाय सर्वेषां भूतानामन्तरात्मने ते तुभ्यमुपवेशार्थमासनं कल्पयामि समर्पयामि ते तुभ्यं नमो नमोऽस्तु अनेन मन्त्रेण देवायासनं दद्यात् ॥ २१२ ॥

उक्तेत्यादिना । हे देवेशि ! उक्तक्रमेण देवायोत्तममासनं प्रदाय ततः कृताञ्जलिपुटो भूत्वा देवाः स्वाभीष्टसिद्ध्यर्थमित्यादिमन्त्रत्रयमुदीरयन्साधकदेव ! त्वदा स्वागतं सुस्वागतमिति स्वागतं भक्त्या देवं प्रति प्रार्थयेत् ॥ २१३ ॥

अद्य मे सफलं जन्म जीवनं सफलाः क्रियाः ।
स्वागत यत्त्वया तस्मे तपसां फलमागतम् ॥ २१५ ॥
देवमामन्त्र्य सम्प्रार्थ्य स्वागतप्रश्नमम्बिके ! ।
विहित पाद्यमादाय मन्त्रमेतमुदीरयेत् ॥ २१६ ॥
यत्पादजलसस्पर्शाच्छुद्धिमाप जगत्त्रयम् ।
तत्पादाब्जप्रोक्षणार्थं पाद्यन्ते कल्पयाम्यहम् ॥२१७॥
परमानन्दसन्दोहो जायते यत्प्रसादतः ।
तस्मै सर्वात्मभूताय आनन्दार्घ्यं समर्पये ॥ २१८ ॥
जातीलवङ्गकक्कोलैर्जलं केवलमेव वा ।
प्रोक्षितार्चितमादाय मन्त्रेणानेन चार्पयेत् ॥ २१९ ॥

देवा इत्यादिना । हे परमात्मन् ! यस्य भवतो दर्शनं देवा अपि स्वाभीष्टसिद्ध्यर्थं वाञ्छन्ति तेन त्वया मे मदर्थं स्वागत सुस्वागतं तस्मै परमात्मने ते तुभ्यं नम ॥ २१४ ॥

अद्येत्यादि । हे देव ! यद्यतस्त्वया स्वागत ततो हेतोरद्य मे मम जन्मजीवनञ्च सफलं जात क्रिया अपि सफला जाता मे मम तपसामपि फलमागतम् ॥ २१५ ॥

देवमित्यादि । हे अम्बिके ! देवमामन्त्र्य सम्बोध्य उक्तमन्त्रद्वयमुदीरयन् स्वागतप्रश्न सम्प्रार्थ्य विहितं पाद्यमादाय गृहीत्वा एत मन्त्रमुदीरयेद्देवेत् ॥ २१६ ॥

यं मन्त्रमुदीरयेत्तमाह यत्पादजलेति । हे परमेश्वर ! यत्पादजलसस्पर्शाज्जगत्त्रयं शुद्धिमाप जगाम तत्पादाब्जप्रोक्षणार्थं ते तुभ्यं पाद्यमहं कल्पयामि समर्पयामि इमं मन्त्रमुदीर्य देवाय पाद्यं दद्यात् ॥ २१७ ॥

परमानन्दसन्दोह इत्यादि । परमानन्दसन्दोहः परमानन्दसमूहः अनेन मन्त्रेण देवायार्घ्यं दद्यात् ॥ २१८ ॥

यदुच्छिष्टमपस्पृष्टं शुद्धिमेत्यखिलं जगत् ।
तस्मै मुखारविन्दाय आचमं कल्पयामि ते ॥ २२० ॥
मधुपर्कं समादाय भक्त्यानेन समर्पयेत् ॥ २२१ ॥
तापत्रयविनाशार्थमखण्डानन्दहेतवे ।
मधुपर्कं ददाम्यद्य प्रसीद परमेश्वर ! ॥ २२२ ॥
अशुचिः शुचितामेति यत्स्पृष्टस्पर्शमात्रतः ।
अस्मिंस्ते वदनाम्भोजे पुनराचमनीयकम् ॥ २२३ ॥
स्नानार्थं जलमादाय प्राग्वत् प्रोक्षितमर्चितम् ।
निधाय देवपुरतो मन्त्रमेतमुदीरयेत् ॥ २२४ ॥
यत्तेजसा जगद्व्याप्तं यतो जातमिदं जगत् ।
तस्मै ते जगदाधार ! स्नानार्थं तोयमर्पये ॥ २२५ ॥
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ।
अन्यद्द्रव्यप्रदानान्ते दद्यात्तोयं सकृत् सकृत् ॥ २२६ ॥

जातीत्यादि । प्रोक्षितमर्चितं च जातीलवङ्गकङ्कोलैर्वासितं जलं केवलमेव वा जलमादायानेन वक्ष्यमाणेन मन्त्रेण देवाग्रे समर्पयेत् ॥ २१९ ॥

तमेव मन्त्रमाह यदुच्छिष्टमिति । एति प्राप्नोति अनेन मन्त्रेणाचमनीयं देवताग्रे दद्यात् ॥ २२० ॥

ततो भक्त्या मधुपर्कं जलमादायानेन वक्ष्यमाणेन मन्त्रेण देवाग्रे समर्पयेत् ॥ २२१ ॥

तमेव मन्त्रमाह तापत्रयविनाशार्थमिति ॥ २२२ ॥

ततः अशुचिः शुचितामेतीत्यादिना मन्त्रेण पुनर्देवताग्रे आचमनीयं दद्यात् ॥ २२३ ॥

स्नानार्थमित्यादि । ततः प्राग्वत् प्रोक्षितमर्चितं च स्नानार्थं जलमादाय देवपुरतो निधाय संस्थाप्य चैते मन्त्रमुदीरयेत् ॥ २२४ ॥

वस्त्रमानीय देवाग्रे शोधित पूर्ववर्त्मना ।
धृत्वा कर भ्यामुत्तोल्य पठेदेत मनुं सुधीः ॥ २२७ ॥
सर्वावरणहीनाय मायाप्रच्छन्नतेजसे ।
वाससी परिधानाय कल्पयामि नमोऽस्तु ते ॥ २२८ ॥
नानाभरणमादाय स्वर्णरौप्यादिनिर्मितम् ।
प्रोक्ष्यार्चयित्वा देवाय दद्यादेतं समुच्चरन् ॥ २२९ ॥
विश्वाभरणभूताय विश्वशोभैकयोनये ।
मायाविग्रहभूषार्थं भूषणानि समर्पये ॥ २३० ॥
गन्धतन्मात्रया सृष्टा येन गन्धधरा धरा ।
तस्मै परात्मने तुभ्यं परमं गन्धमर्पये ॥ २३१ ॥
पुष्पं मनोहरं रम्य सुगन्धं देवनिर्मितम् ।
मया निवेदित भक्त्या पुष्पमेतत् प्रगृह्यताम् ॥ २३२ ॥
वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वभूतानां धूपो घ्राणाय तेऽर्प्यते ॥ २३३ ॥

यं मन्त्रमुद्धीरयेत्तमाह, यत्तेजसा जगदाप्नमित्यादिना । अनेन मन्त्रेण देवाय क्षारार्घं जलं दद्यात् ॥ २२५-२२७ ॥

य मनुं पठेत्तमाह सर्वावरणहीनायेत्यादिना । अनेन मन्त्रेण देवाय वस्त्रे दद्यात् ॥ २२८ । २२९ ॥

य मन्त्रं समुच्चरन् देवाय भूषणानि दद्यात् तमेव मन्त्रमाह विश्वाभरणभूतायेत्यादिना ॥ २३० ॥

गन्धतन्मात्रयेत्यादिना । धरा पृथ्वी अनेन मन्त्रेण देवाय गन्धं दद्यात् ॥ २३१ ॥

पुष्पमित्यादिना मन्त्रेण देवाय पुष्पं दद्यात् ॥ २३२ ॥

वनस्पतिरस इत्यादि । वनस्पतिरसः वृक्षविशेषरसः अनेन मन्त्रेण देवाय धूपं दद्यात् ॥ २३३ ॥

सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ।
सबाह्याभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥२३४॥
नैवेद्यं स्वादुसयुक्तं नानाभक्ष्यसमन्वितम् ।
निवेदयामि भक्त्येदं जुषाण परमेश्वर ! ॥ २३५ ॥
पानार्थं सलिलं देव ! कर्पूरादिसुवासितम् ।
सर्वतृप्तिकरं स्वच्छमर्पयामि नमोऽस्तु ते ॥ २३६ ॥
ततः कर्पूरखदिरलवङ्गैलादिभिर्युतम् ।
ताम्बूलं पुनराचम्यं दत्त्वा वन्दनमाचरेत् ॥ २३७ ॥
उपचाराधारदाने साधारद्रव्यमुल्लिखेत् ।
दद्याद्वा पृथगाधारं तत्तन्नाम समुच्चरन् ॥ २३८ ॥
इत्यर्चितदेवाय दत्त्वा पुष्पाञ्जलित्रयम् ।
साच्छादनं गृहं प्रोक्ष्य पठेदेतं कृताञ्जलिः ॥ २३९ ॥
गेह ! त्वं सर्वलोकानां पूज्यः पुण्ययशःप्रदः ।
देवतास्थितिदानेन सुमेरुसदृशो भव ॥ २४० ॥
त्वं कैलासश्च वैकुण्ठस्त्वं ब्रह्मभवनं गृह ! ।
यत्त्वया विधृतो देवस्तस्मात्त्वं सुरवन्दितः ॥ २४१ ॥
यस्य कुक्षौ जगत् सर्वं वरीवर्त्ति चराचरम् ।
मायाविधूतदेहस्य तस्य मूर्त्तेर्विधारणात् ॥ २४२ ॥

सुप्रकाश इत्यादिना मन्त्रेण देवाय दीपं दद्यात् ॥ २३४ ॥
नैवेद्यमित्यादि । देवाय नैवेद्यं दद्यात् ॥ २३५ ॥
पानार्थं सलिलमित्यादि । कर्पूरादिसुवासितं पानार्थं जलं देवाय दद्यात् ॥ २३६-२३९ ॥
एतं कः पठेदित्याकाङ्क्षायामाह कृताञ्जलिः गेहत्वमित्यादि ॥ २४० ।२४१ ॥

देवमात्मसमस्त्वं हि सर्वतीर्थमयस्तथा ।
सर्वकाममप्रदो भूत्वा शान्तिं मे कुरु ते नमः ॥ २४३ ॥
इत्यभ्यर्थ्य त्रिरभ्यर्च्य गृहं चक्रादिसंयुतम् ।
आत्मनः काममुद्दिश्य दद्याद्देवाय साधकः ॥ २४४ ॥
विश्वावासाय वासाय गृहं ते विनिवेदितम् ।
अङ्गीकुरु महेशान ! कृपया सन्निधीयताम् ॥ २४५ ॥
इत्युक्त्वार्पितगेहाय देवाय दत्तदक्षिणः ।
शङ्खतूर्य्यादिघोषैस्तं स्थापयेद्वेदिकोपरि ॥ २४६ ॥
स्मृत्वा देवपदद्वन्द्वं मूलमन्त्रं समुच्चरन् ।
स्थां स्थीं स्थिरो भवेत्युक्त्वा वासस्ते कल्पितो मया ।
इति देवं स्थिरीकृत्य भवनं प्रार्थयेत् पुनः ॥ २४७ ॥
गृहं ! देवनिवासाय सर्वथा प्रीतिदो भव ।
उत्कृष्टे त्वयि मे लोकाः स्थिराः सन्तु निरामयाः ॥ २४८ ॥
द्विसप्तातीतपुरुषान् द्विसप्तानागतानपि ।

कुक्षौ उदरे ॥ २४१ । २४२ ॥

इतीत्यादि । इति गृहमभ्यर्च्य त्रिस्त्रिवारमभ्यर्च्य च साधकस्चक्रादिसंयुतं गृहमात्मनः कामसुद्दिश्य देवाय दद्यात् ॥ २४४ ॥

विश्वेत्यादि । विश्वमावासो गृहं यस्य स विश्वावासस्तस्मै ॥ २४५ ॥

इतीत्यादि । इति प्रार्थनावाक्यं देव प्रत्युक्त्वा अर्पितं दत्तं गेहं यस्मै सोऽर्पितगेहस्तस्मै अर्पितगेहाय देवाय दत्तदक्षिणः सन् साधकः शङ्खतूर्य्यादिघोषैस्तं देवं वेदिकोपरि स्थापयेत् ॥ २४६ ॥

स्मृत्वेत्यादि । ततो देवपदद्वन्द्वं स्मृत्वा पूर्वं मूलमन्त्रसंयुतेन स्थां स्थीं स्थिरो भव वासस्ते कल्पितो मयेति मन्त्रेण देवं स्थिरीकृत्य पुनर्भवनं गृहं प्रार्थयेत् ॥ २४७ ॥

मां च मे परिवारांश्च देवधान्नि निवासय ॥ २४९ ॥
यजनात् सर्वयज्ञानां सर्वतीर्थनिषेवणात् ।
यत्फलं तत्फलं मेऽद्य जायतां त्वत्प्रसादतः ॥२५०॥
यावत् वसुन्धरा तिष्ठेत् यावदेते धराधराः ।
यावद्दिवानिशानाथौ तावन्मे वर्त्ततां कुलम् ॥ २५१ ॥
इति प्रार्थ्य गृह प्राज्ञः पुनर्देवं समर्चयन् ।
दर्पणाद्यन्यवस्तूनि ध्वजं चापि निवेदयेत् ॥ २५२ ॥
ततस्तु वाहनं दद्यात् यस्मिन् देवे यथोदितम् ।
शिवाय वृषभं दत्त्वा प्रार्थयेद्विहिताञ्जलिः ॥ २५३ ॥
वृषभ ! त्वं महाकायस्तीक्ष्णशृङ्गोऽरिघातकः ।
पृष्ठे वहसि देवेश पूज्योऽसि त्रिदशैरपि ॥ २५४ ॥
खुरेषु सर्वतीर्थानि रोम्नि वेदाः सनातनाः ।
निगमागमतन्त्राणि दशनाग्रे वसन्ति ते ॥ २५५ ॥
त्वयि दत्ते महाभाग ! सुप्रीतः पार्वतीपतिः ।
वास ददातु कैलासे त्वं मां पालय सर्वदा ॥ २५६ ॥
सिंहं दत्त्वा महादेव्यै गरुड़ विष्णवे तथा ।
यथास्तूयान्महेशानि ! तन्मे निगदतः शृणु ॥२५७॥

नन्वु भवनं प्रति किं प्रार्थयेदित्यपेक्षायामाह गृह ! देवनिधानाय-त्यादिना । उक्तरूपे दत्ते निरामया. उपद्रवशून्याः ॥ २४८—२५० ॥

धराधरा. पर्वताः ॥ २५१—२५२ ॥

नन्वु वृषभं प्रति किं प्रार्थयेदित्यपेक्षायामाह वृषभ ! त्वमित्यादि ॥ २५४ ॥

दशनाग्रे दन्ताग्रे ॥ २५५ ॥

सुप्रीत भवतु इति शेष. ॥ २५६ । २५७ ॥

सुरासुरनियुद्धेषु महाबलपराक्रमः ।
देवानां जयदो भौमो दनुजानां विनाशकृत् ॥ २५८ ॥
सदा देवीप्रियाऽसि त्वं ब्रह्मविष्णुशिवप्रिय ।
देव्यै समर्पितो भक्त्या जहि शत्रून्ममाऽस्तु ते ॥ २५९ ॥
गरुत्मन् ! पतगश्रेष्ठ ! श्रीपतिप्रीतिदायक ! ।
वज्रचञ्चो ! तीक्ष्णनख ! तव पक्षा हिरण्मया. ।
नमस्तेऽस्तु खगेन्द्राय पक्षिराज ! नमोऽस्तु ते ॥ २६० ॥
यथा करपुटेन त्वं संस्थितो विष्णुसन्निधौ ।
तथा मामरिदर्पघ्न ! विष्णोरग्रे निवासय ॥ २६१ ॥
त्वयि प्रीते जगन्नाथः प्रीतः सिद्धिं प्रयच्छति ।
देवाय दत्तद्रव्याणां दद्यादेवांय दक्षिणाम् ॥ २६२ ॥
तथा कर्मफलञ्चापि भक्त्या तस्मै समर्पयेत् ॥ २६३ ॥
नृत्यैर्गीतैश्च वादित्रैः सामात्यः सहबान्धवः ।
वेश्मप्रदक्षिणं कृत्वा देवं नत्वाग्नयेद्विजान् ॥ २६४ ॥
देवागारप्रतिष्ठायां य एष कथितः क्रमः ।
आरामसेतुसंक्रामशाखिनामीरितोऽपि सः ॥ २६५ ॥
विशेषेणात्र कृत्येषु पूज्या विष्णुः सनातनः ।
पूजाहोमो तथा सर्वं गृहदानविधानवत् ॥ २६६ ॥
अप्रतिष्ठितदेवाय नैव दद्यात् गृहादिकम ।

शिवस्तुतिमेव विदधाति सुरासुरेत्यादिभ्यां द्वाभ्याम् ॥२५८।२५९॥

अथ गरुड़स्तुति विदधाति गरुत्मन्नित्यादिभिस्त्रिभिः । गरुत्मन् गरुड पतगश्रेष्ठ ॥ २६०—२६२ ॥

तस्मै देवाय ॥ २६३ ॥

प्रतिष्ठितेऽर्चिते देवे पूजादानं विधीयते ॥ २६७ ॥
अथ तत्र श्रीमदाद्याप्रतिष्ठाक्रम उच्यते ।
येन प्रतिष्ठिता देवी तूर्णं यच्छति वाञ्छितम् ॥ २६८॥
तद्दिने साधकः प्रात स्नात शुचिरदङ्मुखः ।
संकल्पं विधिवत् कृत्वा यजेद्दास्त्वीश्वरं ततः ॥२६९ ॥
ग्रहदिक्पतिहेरम्बार्चन पित्रकर्म च ।
विधाय साधकैर्विप्रैः प्रतिमासन्निधिं व्रजेत् ॥ २७० ॥
प्रतिष्ठितगृहे यद्वा कुत्रचित् शोभनस्थले ।
आनीयार्चामर्चयित्वा स्नापयेत् साधकोत्तमः ॥ २७१ ॥
भस्मना प्रथम स्नानं ततो वल्मीकमृत्स्नया ।
वराहदन्तिदन्तोत्थमृत्तिकाभिस्ततः परम् ।
वेश्याद्वारमृदा चापि प्रद्युम्नह्रदजातया ॥ २७२ ॥
ततः पञ्चकषायेण पञ्चपुष्पैस्त्रिपत्रकैः ।
कारयित्वा गन्धतैलैः स्नापयेत् प्रतिमां सुधीः ॥२७३॥
वाट्यालबदरीजम्बुबकुलाः शाल्मलिस्तथा ।
एते निगदिताः स्नाने कषायाः पञ्च भूरुहाः ॥२७४॥

स्नापयेत् भोजयेत् ॥ २६४ २६८ ॥

श्रीमदाद्याक्रममेवाह तद्दिने साधक इत्यादिना । तद्दिने श्रीमदाद्याप्रतिष्ठादिने ॥ २६९ ॥

हेरम्बो गणेश ॥ २७० ॥

प्रतिष्ठितेत्यादि । ततः साधकोत्तम प्रतिष्ठितगृहे कुत्र चिच्छोभनस्थाने वा अर्चां प्रतिमामानीयार्चयित्वा च स्नापयेत् ॥२७१॥

नन्वत्र केन द्रवेण प्रतिमां स्नापयेदित्यपेक्षायामाह भस्मनेत्यादिना ॥ २७२ । २७३ ॥

करवीरं तथा जातीचम्पकं सरसीरुहम्।
पाटलीकुसुमञ्चापि पञ्चपुष्पं प्रकीर्त्तितम् ॥ २७५ ॥
वर्बुरातुलसीबिल्व पत्रत्रयमुदाहृतम् ॥ २७६ ॥
एतेषु प्रोक्तद्रव्येषु जलयोगो विधीयते।
पञ्चाम्बुते गन्धतैले तोययोगं विवर्जयेत् ॥ २७७ ॥
सव्याहृतिं सप्रणवां गायत्रीं मूलमुच्चरन्।
एतद्द्रव्यस्य तोयेन स्नापयामि नमो वदेत् ॥ २७८ ॥
ततः प्रागुक्तविधिना दुग्धाद्यैरष्टभिर्घटैः।
कवोष्णसलिलैश्चापि स्नापयेत् प्रतिमां बुधः ॥ २७९ ॥
सितगोधूमचूर्णेन तिलकल्केन वा शिवाम्।
शालीतण्डुलचूर्णेन मार्जयित्वा विरूक्षयेत् ॥ २८० ॥
तीर्थाम्बुसामष्टघटैः स्नापयित्वा सुवाससा।
सम्मार्जितार्द्रां प्रतिमां पूजास्थानं समानयेत् ॥२८१॥
अशक्तौ शुद्धतोयाना पञ्चविंशतिसंख्यकैः।
कलसैः स्नापयेदर्चां भक्त्या साधकसत्तमः ॥ २८२ ॥
स्नाने स्नाने महादेव्याः शक्त्या पूजनमाचरेत्।

ननु कैः पञ्चकषायैः, कैः पञ्चपुष्पैस्त्रिपत्रकैश्च कैः, प्रतिमा स्नापयेदित्याकाङ्क्षायामाह वाप्यालेत्यादिना ॥ २७४। २७६ ॥

ननु केवलैर्भस्मादिभि प्रतिमां स्नापयेज्जलसयुक्तैर्वा इत्यपेक्षायामाह एतेष्वित्यादिना ॥ २७७ ॥

ननु केन मन्त्रेण भस्मादिभिः प्रतिमा स्नापयेदित्यपेक्षायामाह सव्याहृतिमित्यादिना। पूर्वं सव्याहृतिं सप्रणवां गायत्रीमुच्चरन्, ततः एतद्द्रव्यस्य तोयेन स्नापयामि नम इति वदेत्। अनेनैव मन्त्रेण जलसयुक्तैः भस्मादिभिः प्रतिमां स्नापयेत् ॥ २७८ ॥

कवोष्णसलिलैः इषदुष्णैर्जलैः ॥ २७९-२८१ ॥

ततो निवेश्य प्रतिमां सदने सुपरिष्कृते ।
पाद्यार्घ्याद्यैरर्चयित्वा प्रार्थयेदिदमञ्जलिः ॥ २८३ ॥
नमस्ते प्रतिमे ! तुभ्यं विश्वकर्म्मविनिर्म्मिते ! ।
नमस्ते देवतावासे ! भक्ताभीष्टप्रदे ! नम ॥२८५॥
त्वयि सम्यग्जयाम्याद्यां परमेशीं परात्परां ।
शिल्पदोषावशिष्टाङ्गं सम्यग्नं कुरु ते नम ॥ २८६ ॥
ततस्तत्प्रतिमामूर्द्ध्नि पाणिं विन्यस्य वाग्यतः ।
अष्टोत्तरशतं मूलं जप्त्वा गात्राणि संस्पृशेत् ॥ २८७ ॥
षड्ङ्गमातृकान्यासं प्रतिमाङ्गे प्रविन्यसन् ।
षड्दीर्घभाजा मूलेन षड्ङ्गन्यासमाचरेत् ॥ २८८ ॥
तारमायारमाद्यैश्च नमोऽन्तैर्बिन्दुसंयुतैः ।
अष्टवर्गैर्देवताङ्गे वर्णन्यासं प्रकल्पयेत् ॥ २८९ ॥
मुखे स्वरान् कवर्गञ्च कण्ठदेशे न्यसेद् बुधः ।
चवर्गमुदरे दक्षबाहौ टाद्यक्षराणि च ॥ २९० ॥
तवर्गञ्च वामबाहौ दक्षवामोरुयुग्मयोः ।
पवर्गञ्च यवर्गञ्च ह्यवगं मस्तके न्यसेत् ॥ २९१ ॥

अर्च्चां प्रतिमाम् ॥ २८२-२८४ ॥

नन्वत्र प्रतिमा प्रति किं प्रार्थयेदित्यपेक्षायामाह नमस्ते प्रतिमे । त्वय्यित्यादिना ॥ २८५-२८७ ॥

षडङ्गेत्यादि । ततः पूर्वविधिना प्रतिमाङ्गे षड्ङ्गमातृकान्यासं प्रविन्यसन् साधकः षड्दीर्घभाजा मूलेन मन्त्रेणापि प्रतिमाङ्गे षडङ्गन्यासमाचरेत् कुर्य्यात् ॥ २८८ ॥

तारेत्यादिना । ततः तारमायारमाद्यैरोङ्कारह्रींश्रीमाद्यैर्नमोऽन्तैर्बिन्दुसंयुतैरनुस्वारसहितैरष्टवर्गैर्देवताङ्गे वर्णन्यासं प्रकल्पयेत् कुर्य्यात् ॥ २८९ ॥

वर्णन्यासं विधायेत्थं तत्त्वन्यासं समाचरेत् ॥ २९२॥
पादयोः पृथिवीतत्त्वं तोयतत्त्वञ्च लिङ्गके ।
तेजस्तत्त्वं नाभिदेशे वायुतत्त्व हृदम्बुजे ॥ २९३ ॥
आस्ये गगनतत्त्वञ्च चक्षुषी रूपतत्त्वकम् ।
घ्राणयोर्गन्धतत्त्वञ्च शब्दतत्त्वं श्रुतिद्वये ॥ २९४ ॥
जिह्वायां रसतत्त्वञ्च स्पर्शतत्त्वं त्वचि न्यसेत् ।
मनस्तत्त्व भ्रुवोर्मध्ये सहस्रदलपङ्कजे ॥ २९५ ॥
शिवतत्त्वं ज्ञानतत्त्वं परतत्त्वं तथोरसि ।
जीवप्रकृतितत्त्वे च विन्यसेत साधकाग्रणीः ।
महत्तत्त्वमहङ्कारतत्त्वं सर्वाङ्गके क्रमात ॥ २९६ ॥
तारमायारमाद्येन ङे नमोऽन्तेन विन्यसेत् ॥ २९७॥
सबिन्दु मातृकावर्णपुटित मूलमुच्चरन् ।
नमोऽन्तं मातृकास्थाने मन्त्रन्यासं प्रयोजयेत् ॥२९८॥
सर्वयज्ञमय तेजः सर्वभूतमय वपुः ।
इयं ते कल्पिता मूर्त्तिरच त्वां स्थापयाम्यहम् ॥ २९९॥

नन्वु कस्मिन् कस्मिन् देवताङ्गे कं कवर्गं न्यसेदित्याकाङ्क्षायामाह शुद्धे खरानिलादिना ॥ २९०-२९२ ॥

नन्वु कस्मिन् कस्मिन् देवताङ्गे किं किं तत्त्वं न्यसेदित्याकाङ्क्षायामाह पादयोः पृथिवीतत्त्वमित्यादिना ॥ २९३-२९६ ॥

नन्वु केन मन्त्रेण पृथिवीतत्त्वादिकं पादादौ न्यसेदित्यपेक्षायामाह तारेत्यादिना । तारमायारमाद्येन ओ ह्रीं श्रीमादिना नमोऽन्तेन पृथिवीतत्त्वादिना मन्त्रेण पृथिवीतत्त्वादिकं पादादौ विन्यसेत् ॥२९७॥

सबिन्दित्यादि । ततः सबिन्दु मातृकावर्णपुटितं शानुस्वारैर्मातृकावर्णैरादावन्ते च संयुक्तं नमोऽन्तं मूलं मन्त्रमुच्चरत् मातृकास्थाने मन्त्रन्यासं प्रयोजयेत् विदध्यात् ॥ २९८ ॥

ततः पूजाविधानेन ध्यानमावाहनादिकम् ।
प्राणप्रतिष्ठां सम्याद्य पूजयेत् परदेवताम् ॥ २०० ॥
देवगेहप्रदाने तु ये ये मन्त्राः समीरिताः ।
त एवात्र प्रयोक्तव्या मन्त्रलिङ्गेन पूजने ॥ २०१ ॥
विधिवत् संस्कृते वह्नावर्चितेभ्योऽर्चिताहुतिः ।
आवाह्य देवीं सम्पूज्य जातकर्माणि साधयेत् ॥२०२॥
जातनाम्नी निष्क्रमणमन्नप्राशनमेव च ।
चूडोपनयनं चैते षट् संस्काराः शिवोदिताः ॥ २०३॥
प्रणवं व्याहृतिं चैव गायत्रीं मूलमन्त्रकम् ।
सामन्त्रणाभिधानं ते जातकर्मादि नाम च ॥ २०४ ॥
सम्पादयाम्यग्निकान्तां समुच्चार्य्य विधानवित् ।
पञ्चपञ्चाहुतीर्दद्यात् प्रति संस्कारकर्म्मणि ॥ २०५ ॥
दत्तनाम्नाहुतिशतं मूलोच्चारणपूर्वकम् ।
देव्यै दत्ताहुतेरग्रं प्रतिमामूर्द्ध्नि निःक्षिपेत् ॥२०६॥
प्रायश्चित्तादिभिः शेषं कर्म्म सम्पादयन् सुधीः ।
भोजयेत् साधकान् विप्रान् दीनानाथांश्च तोषयेत्॥२०७
उक्तकर्म्मस्वशक्तश्चेत् पाथसां सप्तभिर्घटैः ।
स्नापयित्वार्चयन् प्रत्या श्रावयेन्नाम देवताम् ॥२०८॥
इति ते श्रीमदाद्याया प्रतिष्ठा कथिता प्रिये ! ।
एवं दुर्गादिविद्यानां महेशादिदिवौकसाम् ॥ २०९ ॥

ततः सर्वयज्ञमयं तेज इत्यादि । देवीं प्रार्थयेत्, वपुः तवेति शेषः ॥ २९९-३०२ ॥

ननु केन मन्त्रेणेत्याकाङ्क्षायामाह प्रणवमित्यादि प्रणवमोङ्कारं ततो व्याहृतिं भूरादिं ततो गायत्रीं ततो मूलमन्त्रं ततः सामन्त्रणा-

चलतः शिवलिङ्गस्य प्रतिष्ठायामयं विधिः ।
प्रयोक्तव्यो विधानज्ञैर्मन्त्रैर्नामोहपूर्वकम् ॥ ३१० ॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णयसारे
श्रीमदाद्यासदाशिवसंवादे आद्याप्रतिष्ठानुष्ठाने
वास्तुपूजयागजलाशयादिप्रतिष्ठादेवगृहदीना-
द्यादिसर्वदेवप्रतिष्ठाकथनं नाम
त्रयोदशोल्लासः ।

विधानमामन्त्रणसहितदेवीनाम ततस्ते इति पदं ततो जातकर्मादि नाम तत· सम्पादयामीति पदं ततोऽग्निकान्तां स्वाहेति पदञ्च सङ्कल्पार्थं विधानवित् साधको देव्या जातकर्मादि साधयेदिति पूर्वेणान्वयो विधेय· ॥ ३०४-३१० ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां त्रयोदशोल्लासः ॥

अथ चतुर्दशोल्लासः ।

श्रीदेव्युवाच ।

आद्यशक्तेरनुष्ठानात् कृपया भूरिसाधनम् ।
कथितं मे कृपानाथ ! कृतार्थास्मि तव भावतः ॥ १ ॥
सचलस्येशलिङ्गस्य प्रतिष्ठाविधिरीरितः ।
अचलस्य प्रतिष्ठायां किं फलं विधिरेव कः ॥ २ ॥

एवं सकलदेवानां सचलस्य शिवलिङ्गस्यापि प्रतिष्ठाया विधिं फलञ्च श्रुत्वेदानीमचलस्य शिवलिङ्गस्य प्रतिष्ठायाः फलं विधिं च श्रोतुमिच्छन्ती श्रीदेव्युवाच आद्यशक्तेरित्यादिना । भावतः प्रीतितः ॥१॥२॥

कथ्यतां जगतां नाथ! सविशेषेण साम्प्रतम्।
इदं हि परमं तत्त्वं प्रष्टुं वद वृणोमि कम् ॥ ३ ॥
त्वत्तः को वास्ति सर्व्वज्ञो दयालुः सर्व्वविद्विभुः।
आशुतोषो दीननाथो ममानन्दविवर्द्धनः ॥ ४ ॥

श्रीसदाशिव उवाच।

शिवलिङ्गस्थापनस्य माहात्म्यं किं ब्रवीमि ते।
यत्स्थापनान्महापापैर्भुक्तो याति परं पदम् ॥ ५ ॥
स्वर्णपूर्णमहीदानाद्धाजिमेधायुतार्জ্জনात्।
निस्तोये तोयकरणात् दीनार्त्तपरितोषणात् ॥ ६ ॥
यत् फलं लभते मर्त्त्यस्तस्मात् कोटिगुणं फलम्।
शिवलिङ्गप्रतिष्ठायां लभते नात्र संशयः ॥ ७ ॥
लिङ्गरूपी महादेवो यत्र तिष्ठति कालिके!।
तत्र ब्रह्मा च विष्णुश्च सेन्द्रास्तिष्ठन्ति देवताः ॥ ८ ॥
सार्द्धत्रिकोटितीर्थानि दृष्टादृष्टानि यानि च।
पुण्यक्षेत्राणि सर्व्वाणि वर्त्तन्ते शिवसन्निधौ ॥ ९ ॥
लिङ्गरूपधरं शम्भु परितो दिग्विदिक्षु च।
शतहस्तप्रमाणेन शिवक्षेत्रं प्रकीर्त्तितम् ॥ १० ॥
ईदृक्षेत्रं महापुण्यं सर्व्वतीर्थोत्तमोत्तमम्।
यत्रामरा विराजन्ते सर्व्वतीर्थानि सर्व्वदा ॥ ११ ॥

परमकारुणिकमाशुतोषं सर्वज्ञमपरं कञ्चित् पृच्छ मां किं पुनः पुनः पृच्छसि तत्राह इदं हि परमं तत्त्वमित्यादिना ॥ २ ॥

सर्ववित् सर्वविचारकः ॥ ३ ॥

प्रथमतः शिवलिङ्गप्रतिष्ठायाः फलं श्रीसदाशिव उवाच शिवलिङ्गस्थापनस्येत्यादिभिः ॥ ५-९ ॥

क्षणमात्रं शिवक्षेत्रे यो वसेद्भावतत्परः।
स सर्वपापनिर्मुक्तो यात्यन्ते शङ्करालयम् ॥ १२ ॥
अत्र यत् क्रियते कर्म स्वल्पं वा बहुलं तथा।
प्रभावाद्धूर्जटेस्तस्य तत्तत् कोटिगुणं भवेत् ॥ १३ ॥
यत्र तत्र कृतात् पापात् मुच्यते शिवसन्निधौ।
शैवक्षेत्रे कृतं पापं वज्रलेपसमं प्रिये! ॥ १४ ॥
पुरश्चर्यां जपं दानं श्राद्धं तर्पणमेव च।
यत् करोति शिवक्षेत्रे तदनन्ताय कल्पते ॥ १५ ॥
पुरश्चर्याव्रतं कृत्वा ग्रहे ग्रहिदिनेग्रयोः।
यत् फलं तदवाप्नोति सकृज्जप्त्वा शिवान्तिके ॥ १६ ॥
गयागङ्गाप्रयागेषु कोटिपिण्डप्रदो नरः।
यत् प्राप्नोति तदत्रैवं सकृत् पिण्डप्रदानतः ॥ १७ ॥
अतिपातकिनो ये च महापातकिनश्च ये।
शैवतीर्थे कृतश्राद्धास्तेऽपि यान्ति परां गतिम् ॥ १८ ॥
लिङ्गरूपी जगन्नाथो देव्या श्रीदुर्गया सह।
यत्रास्ति तत्र तिष्ठन्ति भुवनानि चतुर्दश ॥ १९ ॥
स्थापितेग्रस्य माहात्म्यं किञ्चिदेतत् प्रकाशितम्।
अनादिभूतभूतेग्रमहिमा वाग्गोचरः ॥ २० ॥
महापीठे तवार्धायामस्पृश्यस्पर्शदूषणम्।
विद्यते सुव्रते! नैतल्लिङ्गरूपधरे हरे ॥ २१ ॥

परितः सर्वतः ॥ १०—१२ ॥
अत्र शिवक्षेत्रे धूर्जटेः शिवस्य ॥ १३—१५ ॥
ग्रहे ग्रहणे ॥ १६ । १७ ॥
कृतं श्राद्धं येषां ते कृतश्राद्धाः ॥ १८—२४ ॥

यथा चक्रार्च्चने देवि ! कोऽपि दोषो न विद्यते ।
शिवक्षेत्रे महातीर्थे तथा जानीहि कालिके ! ॥ २२ ॥
बहुनात्र किमुक्तेन तवाग्रे सत्यमुच्यते ।
प्रभावः शिवलिङ्गस्य मया वक्तुं न शक्यते ॥ २३ ॥
अयुक्तवैदिकं लिङ्गं युक्तं वैदिकयापि वा ।
साधकः पूजयेद्भक्त्या स्वाभीष्टफलसिद्धये ॥ २४ ॥
प्रतिष्ठापूर्व्वसायाह्ने देवतां योऽधिवासयेत् ।
सोऽश्वमेधायुतफलं लभते साधकोत्तमः ॥ २५ ॥
मही गन्धः शिला धान्यं दुर्व्वा पुष्पं फलं दधि ।
घृतं स्वस्तिकसिन्दूरं शङ्खकज्जलरोचनाः ॥ २६ ॥
सिद्धार्थं काञ्चनं रौप्यं ताम्रं दीपश्च दर्पणम् ।
अधिवासविधौ विंशत् द्रव्याण्येतानि योजयेत् ॥ २७ ॥
प्रत्येकं द्रव्यमादाय मायया ब्रह्मविद्यया ।
अनेनामुष्यदेवतः शुभमस्त्वधिवासनम् ॥ २८ ॥
इति स्मृत्वेत् साध्यभालं मन्त्राद्यैः सर्व्ववस्तुभिः ।
ततः प्रशस्तिपात्रेण त्रिधैवमधिवासयेत् ॥ २९ ॥
अनेन विधिना देवमधिवास्य विधानवित् ।

अथाचलस्य शिवलिङ्गस्य प्रतिष्ठाया विधिमाह प्रतिष्ठापूर्वसायाह्ने इत्यादिभिः ॥ २५-२७ ॥

ननु केन केन वस्तुना देवतामधिवासयेदित्याकाङ्क्षायामाह मन्त्रेकमित्यादि । प्रत्येकं मन्त्रादिद्रव्यमादाय गृहीत्वा मायया ह्रीं बीजेन विधिरूपया ब्रह्मविद्यया गायत्र्या संयुक्तेनानेन द्रव्येणामुष्यदेवतस्य शुभमधिवासनमस्तु इति मन्त्रेण मन्त्राद्यैः सर्ववस्तुभिः साध्यदेवस्य भालं स्मृशेत्, ततःपरं प्रशस्तिपात्रेण त्रिधा त्रिवारमेवं विधिना देवमधिवासयेत् ॥ २८ । २९ ॥

गृहदानविधानेन दुग्धाद्यैः स्नापयेत्ततः ॥ ३० ॥
सम्मार्ज्य वाससा लिङ्गं स्थापयित्वासनोपरि ।
पूजानुष्ठानविधिना गणेशादीन् समर्चयेत् ॥ ३१ ॥
प्रणवेन करन्यासौ प्राणायामं विधाय च ।
ध्यायेत् सदाशिवं शान्तं चन्द्रकोटिसमप्रभम् ॥ ३२ ॥
व्याघ्रचर्मपरीधानं नागयज्ञोपवीतिनम् ।
विभूतिलिप्तसर्वाङ्गं नागालङ्कारभूषितम् ॥ ३३ ॥
धूम्रपीतारुणश्वेतरक्तैः पञ्चभिराननैः ।
युक्तं त्रिनयनं बिभ्रज्जटाजूटधरं विभुम् ॥ ३४ ॥
गङ्गाधरं दशभुज शशिशोभितमस्तकम् ।
कपालं पावकं पाशं पिनाकं परशुं करैः ॥ ३५ ॥
वामैर्दधानं दक्षैश्च शूलं वज्राङ्कुशं शरम् ।
वरञ्च बिभ्रत सर्वैर्हस्तैर्वैश्वानिवरैः सुतम् ॥ ३६ ॥
परमानन्दसन्दोहोल्लसत्कुटिललोचनम् ।
हिमकुन्देन्दुसङ्काशं वृषासनविराजितम् ॥ ३७ ॥
परितः सिद्धगन्धर्वैरप्सरोभिरहर्निशम् ।
गीयमानसुमाकान्तमेकान्तशरणप्रियम् ॥ ३८ ॥
इति ध्यात्वा महेशानं मानसैरुपचारकैः ।
सपूज्यावाह्य तल्लिङ्गे यजेच्छक्त्या विधानवित् ॥ ३९ ॥
आसनाद्युपचाराणां दाने मन्त्राः पुरोदिताः ।
मूलमन्त्रमतुं वक्ष्ये महेशस्य महात्मनः ॥ ४० ॥

बिभ्रत् बिभ्रतम् । सुपां सुलुगित्यमोलुक् ॥ ३४ । ३५ ॥
बिभ्रतं दधतम् ॥ ३६ ॥

परमानन्दसन्दोहोल्लसत्कुटिललोचनम् परमानन्दसन्दोहेनोल्ल-

माया तारः शब्दबीजं सन्ध्यर्णान्ताक्षरान्वितम् ।
अर्द्धेन्दुबिन्दुभूषाढ्यं शिवबीजं प्रकीर्त्तितम् ॥ ४१ ॥
सुगन्धिपुष्पमाल्येन वाससाच्छाद्य यत्नतः ।
निवेश्य दिव्यशय्यायां वेदीमेवं विशोधयेत् ॥ ४२ ॥
वेद्यां प्रपूजयेद्देवीमेवमेव विधानतः ।
मायया तत्र करन्यासौ प्राणायामं समाचरेत् ॥ ४३ ॥
उद्यद्भानुसहस्रकान्तिममलां वक्त्रार्कचन्द्रेक्षणाम्
सुक्तायन्वितहेमकुण्डललसत्-स्मेराननाम्भोरुहाम् ।
हस्ताब्जैरभयं वरञ्च दधतीं चक्रं तथाब्जं दधत्
पीनोत्तुङ्गपयोधरां.भयहरां पीताम्बरां चिन्तये ॥ ४४ ॥

सन्ति कुटिलानि च लोचनानि यस्य तथाभूतम् । सन्दोहः समूहः ॥ ३७—४० ॥

मन्त्रेशस्य मूलमन्त्रमेवाह मायेत्यादि । पूर्वं माया ह्रीं बीजमुच्यते ततस्तारः प्रणवो वाच्यः तत सन्ध्यर्णान्ताक्षरान्वितं सन्ध्यक्षरान्ताक्षरसंयुक्तमर्द्धेन्दुबिन्दुभूषाढ्यञ्च शब्दबीजं हकाररूपमक्षरं वाच्यम् । सकलपदयोजनया ह्रीं ओं ह्रौं इति शिवबीज प्रकीर्त्तितम् ॥ ४१ ॥ ४२ ॥

मायया ह्रींबीजेन ॥ ४३ ॥

अथ महादेव्याध्यानमाह्रैकेन उद्यद्भानुत्यादिना । महादेवीमहं चिन्तये कथम्भूतां महादेवीम्, उद्यद्भानुसहस्रकान्तिम् उद्यतां भानूनां सूर्याणां सहस्रस्येव कान्तिर्दीप्तिर्यस्याः तथाभूताम् । पुन कीदृशीम्, अमलां निर्मलाम् । पुन कीदृशीम्, वक्त्रार्कचन्द्रेक्षणाम् वक्त्रार्कचन्द्रा इक्षणानि लोचनानि यस्यास्तथाभूताम् । पुनः कीदृशीम्, सुक्तायन्वितहेमकुण्डललसत्स्मेराननाम्भोरुहाम्, सुक्ताभिर्मन्वितास्याभ्यां सच्छाभ्यां हेमकुण्डलाभ्यां लसद्दीप्यमानं स्मेरमीषद्धसनशीलमाननाम्भोरुहं मुख-

इति ध्यात्वा महादेवीं पूजयेन्निजशक्तितः।
ततस्तु दश दिक्पालान् वृषभञ्च समर्चयेत् ॥ ४५ ॥
भगवत्या मनुं वक्ष्ये येनाराध्या जगन्मयी ॥ ४६ ॥
मायां लक्ष्मीं समुच्चार्य्य सान्तं षष्ठस्वरान्वितम्।
बिन्दुयुक्तं तदन्ते च योजयेद्वह्निवल्लभाम् ॥ ४७ ॥
पूर्ववत् स्थापयन् देवीं सर्व्वदेवबलिं हरेत्।
दधियुक्तमाषभक्तं शर्करादिसमन्वितम् ॥ ४८ ॥
ऐशान्यां बलिमादाय वारुणेन विशोधयेत्।
संपूज्य गन्धपुष्पाभ्यां मन्त्रेणानेन चार्पयेत् ॥ ४९ ॥
सर्वे देवाः सिद्धगणा गन्धर्व्वोरगराक्षसाः।
पिशाचा मातरो यक्षा भूताश्च पितरस्तथा ॥ ५० ॥
ऋषयो येऽन्यदेवाश्च बलिं गृह्णन्तु संयताः।
परिवार्य्य महादेवं तिष्ठन्तु गिरिजामपि ॥ ५१ ॥

पद्मं यस्याः तथाभूताम्। पुनः कीदृशीम्, हस्ताब्जैः पार्श्विकमब्जैरभयं वरं चक्रं तथा सुगन्धादिकं दधदब्जं कमलं च दधतीम्। पुनः कीदृशीम्, पीनोत्तुङ्गपयोधराम्, पीनौ महान्तावुत्तुङ्गावुन्नतौ पयोधरौ स्तनौ यस्यास्तथाभूताम्। पुन कीदृशीम्, भयङ्करीम्, भयङ्करीं, पुनः कीदृशीम्, पीताम्बराम्, पीतमम्बरं वस्त्रं यस्यास्तथाभूताम् ॥४४-४६॥

भगवत्या मन्त्रमेवाह मायामित्यादि। मायां ह्रींबीजं लक्ष्मीं श्रीं बीजं च समुच्चार्य्य ततः षष्ठस्वरान्वितं बिन्दुयुक्तं च सान्तं वर्णं समुच्चार्य्य तदन्ते, वह्निवल्लभां योजयेत्। सकलपदयोजनया ह्रीं श्रीं क्रं स्वाहेति मन्त्रो जातः ॥ ४७ ॥

पूर्ववदित्यादि। ततः पूर्ववच्छिवबलिवत् सुगन्धिपुष्पमाल्येन वाससा चाच्छाद्य दिव्यशय्यायां देवीं स्थापयन् सन् दधियुक्तं शर्करादिसमन्वितं च माषभक्तं सर्वदेवबलिं हरेद्दद्यात् ॥ ४८ ॥

ततो जपेन्महादेव्या मन्त्रमेतं यथेप्सितम् ।
गीतवाद्यादिभिः सद्भिर्विदध्यान्मङ्गलक्रियाम् ॥ ५२ ॥
अधिवासं विधायेत्थं परेऽह्नि विहितक्रियः ।
संकल्पं विधिवत् कृत्वा पञ्च देवान् प्रपूजयेत् ॥ ५३ ॥
मातृपूजां वसोर्धारां वृद्धिश्राद्धं समाचरन् ।
महेशद्वारपालांश्च यजेत् भक्त्या समाहितः ॥ ५४ ॥
नन्दी महाबलः कीशवदनो गणनायकः ।
द्वारपालाः शिवस्यैते सर्वे शस्त्रास्त्रपाणयः ॥ ५५ ॥
ततो लिङ्गं समानीय वेदीरूपां च तां रचीम् ।
मण्डले सर्वतोभद्रे स्थापयेद्दा शुभासने ॥ ५६ ॥
अष्टभिः कलसै. शम्भुं मनुना त्र्यम्बकेन च ।
स्नापयित्वार्चयेत् भक्त्या षोड़शैरुपचारकैः ॥ ५७ ॥
वेदीं च मूलमन्त्रेण तद्वत् संस्थाप्य पूजयन् ।
कृताञ्जलिपुटः साधुः प्रार्थयेत् शङ्करं शिवम् ॥ ५८ ॥
आगच्छ भगवन् शम्भो ! सर्वदेवनमस्कृत ! ।

नन्वु केन विधिना सर्वदेवबलिं दद्यादित्याकाङ्क्षायामाह ऐशान्यामित्यादि । वारुणेन वसिति मन्त्रेण ॥ ४९ ॥

सर्वदेवबलिसमर्पणमन्त्रमेवाह सर्वे देवाः सिद्धगणा इत्यादि ॥ ५० ॥ ५१ ॥

एतम् ह्रीं श्रीं ह्रः स्वाहेतीमम् ॥ ५२ ॥

पञ्च देवान् ब्रह्मादीन् ॥ ५३ ॥ ५४ ॥

सम्मूल्यान्महेशद्वारपालानाह नन्दीत्यादिनैकेन ॥ ५५ ॥ ५६ ॥

मनुना ह्रौंश्रौं ह्रौं इति मन्त्रेण त्र्यम्बकेन त्र्यम्बकं यजामहे इत्यादि मन्त्रेण ॥ ५७ ॥

मूलमन्त्रेण ह्रीं श्रीं ह्रः स्वाहेति मन्त्रेण ॥ ५८ ॥

पिनाकपाणे! सर्वेश! महादेव! नमोऽस्तु ते ॥ ५९॥
आगच्छ मन्दिरे देव! भक्तानुग्रहकारक!।
भगवत्या सहागच्छ कृपां कुरु नमो नमः ॥ ६०॥
मातर्देवि! महामाये! सर्वकल्याणकारिणि!।
प्रसीद शम्भुना सार्धं नमस्तेऽस्तु हरप्रिये! ॥ ६१ ॥
आयाहि वरदे! देवि! भवनेऽस्मिन् वरप्रदे!।
प्रीता भव महेशानि! सर्वसम्पत्करी भव ॥ ६२ ॥
तिष्ठ देवदेवेशि! स्वैः स्वैःपरिकरैः सह
सुखं निवसतां गेहे प्रीयेतां भक्तवत्सलौ ॥ ६३ ॥
इति प्रार्थ्य शिवं देवीं मङ्गलध्वनिपूर्वकम्।
प्रदक्षिणं त्रिधा वेश्म कारयित्वा प्रवेशयेत् ॥ ६४ ॥
पाषाणखनिते गर्त्ते इष्टकारचितेऽपि वा।
अधस्त्रिभागलिङ्गस्य रोपयेन्मूलमुच्चरन् ॥ ६५ ॥
यावच्चन्द्रश्च सूर्यश्च यावत् पृथ्वी च सागराः।
तावदत्र महादेव! स्थिरो भव नमोऽस्तु ते ॥ ६६ ॥
मन्त्रेणानेन सुदृढं कारयित्वा सदाशिवम्।
उत्तरायां तत्र वेदीं मूलेनैव प्रवेशयेत् ॥ ६७ ॥
स्थिरा भव जगद्धात्रि! सृष्टिस्थित्यन्तकारिणि!।
यावद्दिवानिशानाथौ तावदत्र स्थिरा भव ॥ ६८ ॥

ननु शङ्करं शिवाञ्च प्रति किं प्रार्थयेदित्यपेक्षायामाह आगच्छ भगवन् शम्भो इत्यादि ॥ ५९-६४ ॥

पाषाणेत्यादि। ततो मूलं मन्त्रमुच्चरन् साधकः पाषाणे खनिते इष्टकारचितेऽपि वा गर्त्ते लिङ्गस्याधस्त्रिभागमधो रोपयेत् ॥ ६५ ॥६६॥

मन्त्रेणेत्यादि।

अनेन सुदृढ़ीकृत्य लिङ्गं सृष्ट्वा पठेदिमम् ॥ ६९ ॥
व्याघ्रभूताः पिशाचाश्च गन्धर्वाः सिद्धचारणाः ।
यक्षा नागाश्च वेताला: लोकपाला महर्षयः ॥ ७० ॥
मातरो गणनाथाश्च विष्णुर्ब्रह्मा बृहस्पतिः ।
यस्य सिंहासने युक्ता भूचराः खेचरास्तथा ॥ ७१ ॥
आवाहयामि तं देवं त्र्यक्षमीशानमव्ययम् ।
आगच्छ भगवन्नत्र ब्रह्मनिर्मितयन्त्रके ॥ ७२ ॥
ध्रुवाय भव सर्वेषां शुभाय च सुखाय च ।
ततो देवप्रतिष्ठोक्तविधिना स्थापयन् शिवम् ॥ ७३ ॥
प्राग्वद्गत्वा मानसोपचारैः सम्पूजयेत् प्रिये ! ।
विशेषमर्घ्यं संस्थाप्य समर्च्य गणदेवताः ।
पुनर्घ्यात्वा महेशानं पुष्पं लिङ्गोपरि न्यसेत् ॥ ७४ ॥
पाशाङ्कुशपुटा प्रकृतिर्यादिसान्ताः सबिन्दुकाः ।
ह्रीं हंस इति मन्त्रेण तत्र प्राणान् निवेशयेत् ।

अनेन यावच्चन्द्रश्च सूर्य्यश्चेत्यादिमन्त्रेण सदाशिवं सुदृढं कारयित्वा मूलेनैव मन्त्रेण तत्र सदाशिवे वेदीं प्रवेशयेत् ॥ ६७ ॥ ६८ ॥

सुदृढीकृत्य वेदीमिति शेषः ॥ ६९ ॥

इमं कं पठेदित्याकाङ्क्षायामाह व्याघ्रभूता इत्यादिना ॥ ७०-७४

पाशेत्यादिना । पाशाङ्कुशपुटा पाशाङ्कुशाभ्यामांक्रोंबीजाभ्यां पुट आद्यन्तयोः संयोगो यस्यास्तथाभूता शक्तिः ह्रीं बीजं पूर्वमुच्चेत, ततः सबिन्दुकाः सानुस्वारा वादिसान्तवर्णा वक्ष्यमाणाः ततो ह्रीं हंस इत्युच्चेत योजनया आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हंस इति मन्त्रो जातः, अनेन मन्त्रेण प्रागुक्तविधानेन तत्र लिङ्गे प्राणान्निवेशयेत् ॥ ७५ ॥ ७६ ॥

चन्दनागुरुकाश्मीरैर्विलिप्य गिरिजापतिम् ॥ ७५ ॥
यजेत् प्रागुक्तविधिना षोड़शैरुपचारकैः।
जातनामादिसंस्कारान् कृत्वा पूर्वविधानवत् ॥७६॥
समाप्य सर्वं विधिवत् वेद्यां देवीं महेश्वरीम्।
अभ्यर्च्य तत्र देवस्य मूर्त्तीरष्टौ प्रपूजयेत् ॥ ७७ ॥
शर्वः क्षितिः समुद्दिष्टा भवो जलमुदाहृता।
रुद्रोऽग्निरुग्रो वायुः स्यात् भीम आकाशशब्दितः।७८॥
पशोःपतिर्यजमानो महादेवः सुधाकरः।
ईशानः सूर्य इत्येते मूर्त्तयोऽष्टौ प्रकीर्त्तिताः ॥ ७९ ॥
प्रणवादिनमोऽन्तेन प्रत्येकाङ्गानपूर्वकम्।
पूर्वादीशानपर्य्यन्तमष्ट मूर्त्तीः क्रमाद्यजेत् ॥ ८० ॥
इन्द्रादिदिक्पतीनिष्ट्वा ब्राह्म्याद्याश्चाष्ट मातृकाः।
हृद्यं वितानं गेहादि दद्यादीशाय साधकः ॥ ८१ ॥
ततः कृताञ्जलिर्भूत्वा प्रार्थयेत् पार्वतीपतिम् ॥ ८२॥
गृहेऽस्मिन् करुणासिन्धो! स्थापितोऽसि मया प्रभो!।
प्रसीद भगवन् शम्भो! सर्वकारणकारण! ॥ ८७ ॥

तत्र वेद्यामेव ॥ ७७ ॥

महादेवस्य प्रपूज्या अष्टौ मूर्त्तीराह शर्वः क्षितिरित्यादिभ्यां द्वाभ्याम् ॥ ७८ ॥ ७९ ॥

ननु केन विधिना महादेवस्याष्टौ मूर्त्तीः प्रपूजयेदित्याकाङ्क्षायामाह प्रणवादीत्यादि। प्रणवादिनमोऽन्तेन नाममन्त्रेण पूर्वात् पूर्वमारभ्य यथा शर्वं क्षितिमूर्त्तिं इहागच्छेह तिष्ठेह सन्निधेहि मम पूजां गृहाणेत्याह्वय ओं शर्वाय क्षितिमूर्त्तये नमः इति मन्त्रेण वेद्यां पूर्वदेशे गन्धपुष्पादिभिः शर्वं क्षितिमूर्त्तिं यजेत्। एवमेवाग्नेयादिषु क्रमतोऽन्या अपि सप्त मूर्त्तीर्यजेत्। इत्था पूजयित्वा ॥ ८० ॥ ८१ ॥

यावत् ससागरा पृथ्वी यावत् अग्निदिवाकरौ ।
तावदस्मिन् गृहे तिष्ठ नमस्ते परमेश्वर ! ॥ ८४ ॥
गृहेऽस्मिन् यस्य कस्यापि जीवस्य मरणं भवेत् ।
न तत्पापैः प्रलिप्येऽहं प्रसादात्तव धूर्जटे ! ॥ ८५ ॥
ततः प्रदक्षिणीकृत्य नमस्कृत्य गृहं व्रजेत् ।
प्रभाते पुनरागत्य स्नापयेच्चन्द्रशेखरम् ॥ ८६ ॥
शुद्धैः पञ्चामृतैः स्नानं प्रथमं प्रतिपादयेत् ।
ततः सुगन्धितोयानां कलसैः शतसंख्यकैः ॥ ८७ ॥
सपूज्य तं यथाशक्त्या प्रार्थयेत् भक्तिभावतः ॥ ८८ ॥
विधिहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।
सम्पूर्णमस्तु तत् सर्वं त्वत्प्रसादादुमापते ! ॥ ८९ ॥
यावच्चन्द्रश्च सूर्य्यश्च यावत् पृथ्वी च सागराः ।
तावन्मे कीर्त्तिरतुला लोके तिष्ठतु सर्वदा ॥ ९० ॥
नमस्त्र्यम्बाय रुद्राय पिनाकवरधारिणे ।
विष्णुब्रह्मेन्द्रसूर्य्याद्यैरर्चिताय नमो नमः ॥ ९१ ॥
ततस्तु दक्षिणां दत्त्वा भोजयेत् कौलिकान् द्विजान् ।
भक्ष्यैः पेयैश्च वासोभिर्दरिद्रान् परितोषयेत् ॥ ९२ ॥
प्रत्यहं पूजयेदेवं यथाविभवमात्मनः ।

ननु पार्वतीपतिं किं प्रार्थयेदित्याकाङ्क्षायामाह गृहेऽस्मिन् करुणासिन्धो ! इत्यादि ॥ ८२-८६ ॥

ननु केन द्रव्येण शिवं स्नापयेदित्यपेक्षायामाह शुद्धैरि-त्यादि ॥ ८७ ॥

तम् शिवम् ॥ ८८ ॥

स्थावरं शिवलिङ्गन्तु न कदापि विचालयेत् ॥ ९३ ॥
अचलस्थे शलिङ्गस्य प्रतिष्ठा कथितेति ते ।
सङ्क्षेपात् परमेशानि ! सर्वागमसमुद्धृता ॥ ९४ ॥

श्रीदेव्युवाच ।

यद्यकस्माद्व्रतानां पूजाबाधो भवेद्विभो ! ।
विधेय तत्र किं भक्तैस्तन्मे कथय तत्त्वतः ॥ ९५ ॥
अपूजनीया कैर्दोषैर्भवेयुर्देवमूर्त्तयः ।
त्याज्या वा केन दोषेण तदुपागम्य भण्यताम् ॥ ९६ ॥

श्रीमदाशिव उवाच ।

एकाहमर्चनाबाधे द्विगुणं देवमर्चयेत् ।
दिनद्वये तद्विगुणं तद्गुणं दिनत्रये ॥ ९७ ॥
ततः ऊर्ध्वमपर्व्वन्तु यदि पूजा न सम्भवेत् ।
तदाष्टकलसैर्देवं स्नापयित्वा यजेत् सुधीः ॥ ९८ ॥
षण्मासात् परतो देवं प्राक्संस्कारविधानतः ।
पुनः सुसंस्कृतं कृत्वा पूजयेत् साधकाग्रणीः ॥ ९९ ॥
खण्डितं स्फुटितं व्यङ्गं संस्पृष्टं कुष्ठरोगिणा ।
पतितं दुष्टभूम्यादौ न देवं पूजयेत् बुधः ॥ १०० ॥
हीनाङ्गं स्फुटितं भग्नं देवं तोये विसर्जयेत् ।
स्पर्शादिदोषदुष्टन्तु संस्कृत्य पुनरर्चयेत् ॥ १०१ ॥

ननु शिव किं पार्थयेदित्याकाङ्क्षायामाह विधिहीनमित्यादि ॥ ८९-९४ ॥

श्रीदेव्युवाच यदीत्यादि । तत्र पूजाबाधे सति ॥ ९५ ॥ ९६ ॥

एवं प्रार्थितः सन् श्रीमदाशिव उवाच एकाहमर्चनाबाधे इत्यादि ॥ ९७ ॥ ९९ ॥

महापीठेऽनादिलिङ्गे सर्वदोषविवर्जिते।
सर्वदा पूजयेत्तत्र स्वं स्वमिष्टं सुखाप्तये ॥ १०२ ॥
यद्यत्सृष्टं महामाये! नृणां कर्मानुजीविनाम्।
निःश्रेयसाय तत् सर्वं सविशेषं प्रकीर्त्तितम् ॥ १०३ ॥
विना कर्म्म न तिष्ठन्ति क्षणार्द्धमपि देहिनः।
अनिच्छन्तोऽपि विवशाः क्रथन्ते कर्म्मवायुना ॥१०४॥
कर्म्मणा सुखमश्नन्ति दुःखमश्नन्ति कर्म्मणा।
जायन्ते च प्रलीयन्ते वर्त्तन्ते कर्म्मणो वशात ॥१०५॥
अतो बहुविधं कर्म्म कथितं साधनान्वितम्।
प्रवृत्तयेऽल्पबोधानां दुश्चेष्टितनिवृत्तये ॥ १०६ ॥
यतो हि कर्म्म द्विविधं शुभञ्चाशुभमेव च।
अशुभात् कर्म्मणो यान्ति प्राणिनस्तीव्रयातनाम ॥१०७॥
कर्म्मणोऽपि शुभाद्देवि! फलेष्वासक्तचेतसः।
प्रयान्त्यायात्यमुत्रेह कर्म्मशृङ्खलयन्त्रिताः ॥ १०८ ॥
यावन्न क्षीयते कर्म्म शुभ वाशुभमेव वा।
तावन्न जायते मोक्षो नृणां कल्पशतैरपि ॥ १०९ ॥
यथा लौहमयै पाशैः पाशैः स्वर्णमयैरपि।
तथा बद्धो भवेज्जीवः कर्म्मभिश्चाशुभैः शुभैः ॥ ११० ॥

व्याकृम् विगताकृम् ॥ १००=१०७ ॥

एव नानाविधानि सुखप्रापकाणि प्रचुरसाधनसंयुतानि कर्माणि व्याकृत्येदानीं ब्रह्मज्ञानेनैव लोका मुक्तिमधिगच्छेयुर्न तु कर्मभिरिति व्याकर्तुमुपक्रमते कर्मणोऽपि शुभादित्यादि। हे देवि! शुभादपि कर्मणो हेतोः फलेष्वासक्तचेतसो जनाः कर्मशृङ्खलयन्त्रिताः कर्मरूपेण निगडेन बद्धाः सन्तो लोकादस्मादमुत्र परलोके प्रयान्ति, तस्माच्च

कुर्वाणः सततं कर्म कृत्वा कष्टशतान्यपि ।
तावन्न लभते मोक्षं यावत् ज्ञानं न विन्दति ॥ १११ ॥
ज्ञानं तत्त्वविचारेण निष्कामेणापि कर्मणा ।
जायते क्षीणतमसां विदुषां निर्मलात्मनाम् ॥ ११२ ॥
ब्रह्मादिस्तम्बपर्य्यन्तं मायया कल्पितं जगत् ।
सत्यमेकं परं ब्रह्म विदित्वैवं सुखी भवेत् ॥ ११३ ॥
विहाय नामरूपाणि नित्ये ब्रह्मणि निश्चले ।
परिनिश्चिततत्त्वो यः स मुक्तः कर्मबन्धनात् ॥ ११४ ॥
न मुक्तिर्जपनाद्धोमादुपवासशतैरपि ।
ब्रह्मैवाहमिति ज्ञात्वा मुक्तो भवति देहभृत् ॥ ११५ ॥
आत्मा साक्षी विभुः पूर्णः सत्योऽद्वैतः परात्परः ।
देहस्थोऽपि न देहस्थो ज्ञात्वैव मुक्तिभाग् भवेत् ॥११६॥
बालक्रीडनवत् सर्वं रूपनामादिकल्पनम् ।
विहाय ब्रह्मनिष्ठो यः स मुक्तो नात्र संशयः ॥ ११७ ॥
मनसा कल्पिता मूर्त्तिर्नृणां चेन्मोक्षसाधनी ।

लोकात् पुनरिहायान्ति मुक्तिभाजिनस्तु न भवन्तीत्यर्थः ॥ १०८–११० ॥

न विन्दति न लभते ॥ १११ ॥

ननु मोक्षैकसाधनं ज्ञानं कथमुत्पद्यते तत्राह ज्ञानमित्यादिना । तत्त्वविचारेण ब्रह्मणो विचारणेन क्षीणतमसाम् क्षीणाज्ञानरूपान्धकाराणाम् निर्मलात्मनाम् विमलान्तःकरणानाम् ॥ ११२ ॥ ११३ ॥

विहायेत्यादि । नित्ये अविनाशिनि निश्चले पूर्वरूपापरित्यागिनि, परिनिश्चितं सम्यङ्निर्णीतं तत्त्वं याथार्थ्यं येन स परिनिश्चिततत्त्वः ॥ ११४ ॥ ११५ ॥

स्वप्नलब्धेन राज्येन राजानो मानवास्तथा ॥ ११८ ॥
मृच्छिलाधातुदार्वादिमूर्त्तावीश्वरबुद्धयः ।
क्लिश्यन्तस्तपसा ज्ञानं विना मोक्षं न यान्ति ते ॥ ११९
आहारसंयमक्लिष्टा यथेष्टाहारतुन्दिलाः ।
ब्रह्मज्ञानविहीनास्ते निष्कृतिं ते व्रजन्ति किम् ॥ १२०
वायुपर्णकणातोयव्रतिनो मोक्षभागिनः ।
सन्ति चेत् पन्नगा मुक्ताः पशुपक्षिजलेचराः ॥ १२१ ॥
उत्तमो ब्रह्मसद्भावो ध्यानभावस्तु मध्यम ।
स्तुतिर्जपोऽधमो भावो बहिः पूजाऽधमाधमा ॥ १२२ ॥
योगो जीवात्मनोरैक्यं पूजनं सेवकेशयोः ।
सर्वं ब्रह्मेति विदुषो न योगो न च पूजनम् ॥ १२३ ॥
ब्रह्मज्ञान परं ज्ञान यस्य चित्ते विराजते ।
किन्तस्य जपयज्ञाद्यैस्तपोभिर्नियमव्रतैः ॥ १२४ ॥

आत्मेत्यादि । साक्षी शुभाशुभद्रष्टा विभु· व्यापक पूर्ण अखण्डस्वरूप अद्वैतः सजातीयविजातीयस्वगतभेदशून्य. ॥ ११६-११८ ॥

तपसा कृच्छ्र चान्द्रायणादिना ॥ ११९ ॥

निष्कृतिम् निस्तारम् व्रजन्ति प्राप्नुवन्ति ॥ १२० । १२१ ॥

उत्तम इत्यादि । ब्रह्मैव सत् सच्चित्त सर्वमसदित्युत्तमो भाव· । उत्तम भजनं भवतीत्येवमन्वय· ध्यानभाव· ध्यानरूप भजनम् ॥ १२२ ॥

योग इत्यादि । सर्वं ब्रह्मैव भवतीति विदुषो जानतो जनस्य जीवात्मनोरैक्यमेव योगो भवति सेवकेशयो· सेवकेश्वरयोरैक्यमेव पूजनं भवति तद्विज्ञो योगो नास्ति तद्विज्ञं पूजनमपि नास्ति तस्य ॥ १२३ ॥

सत्यं विज्ञानमानन्दमेकं ब्रह्मेति पश्यतः ।
स्वभावात् ब्रह्मभूतस्य किं पूजा ध्यानधारणा ॥ १२५ ॥
न पापं नैव सुकृतं न स्वर्गो न पुनर्भवः ।
नापि ध्येयो न वा ध्याता सर्वं ब्रह्मेति जानतः ॥ १२६ ॥
अयमात्मा सदा मुक्तो निर्लिप्तः सर्ववस्तुषु ।
किं तस्य बन्धनं कस्मान्मुक्तिमिच्छन्ति दुर्धियः ॥ १२७ ॥
स्वमायारचितं विश्वमंवितर्क्यं सुरैरपि ।
स्वयं विराजते तत्र ह्यप्रविष्टः प्रविष्टवत् ॥ १२८ ॥
बहिरन्तर्यथाकाशः सर्वेषामेव वस्तुनाम् ।
तथैव भाति सद्रूपो ह्यात्मा साक्षी स्वरूपतः ॥ १२९ ॥
न बाल्यमस्ति हृदयं नात्मनो यौवनं जडम् ।
सदैकरूपश्चिन्मात्रो विकारपरिवर्जितः ॥ १३० ॥
जन्मयौवनवार्द्धक्यं देहस्यैव न चात्मनः ।
पश्यन्तोऽपि न पश्यन्ति मायाग्राहतबुद्धयः ॥ १३१ ॥

सत्यमित्यादि । विज्ञानं विज्ञानस्वरूपम् एकम् अद्वैतम् धारणा चित्तवृत्तिनिरोधः ॥ १२५ ॥

न पुनर्भवः न पुनरुत्पत्तिः ॥ १२६ ॥

निर्लिप्तः अनासक्तः ॥ १२७ ॥

नन्वात्मनो देहरूपबन्धनमस्त्येव कथमुच्यते अयमात्मा सदा मुक्त इत्यादि तत्राह स्वमायेत्यादि । अवितर्क्यम् अनूहनीयम् ॥ १२८ ॥ १२९ ॥

ननु जन्म आत्मनो बालत्वादेरभावे हेतूनाह सदैकरूप इत्यार्द्धेन ॥ १३० ॥

तर्हि कस्य जन्मादिकं भवति तत्राह जन्मेत्यादि ॥ १३१ ॥

यथा शरावतोयस्थं रविं पश्यत्यनेकधा ।
तथैव मायया देहे बहुधात्मानमीक्षते ॥ १३२ ॥
यथा सलिलचाञ्चल्यं मन्यन्ते तद्गते विधौ ।
तथैव बुद्धेश्चाञ्चल्यं पश्यत्यात्मन्यकोविदाः ॥ १३३ ॥
घटस्थं यादृशं व्योम घटे भग्नेऽपि तादृशम् ।
नष्टे देहे तथैवात्मा समरूपो विराजते ॥ १३४ ॥
आत्मज्ञानमिदं देवि ! परं मोक्षैकसाधनम् ।
जानन्निहैव मुक्तः स्यात् सत्यं सत्यं न संशयः ॥ १३५ ॥
न कर्म्मणा विमुक्तः स्यान्न सन्तत्या धनेन वा ।
आत्मनात्मानमाज्ञाय मुक्तो भवति मानवः ॥ १३६ ॥
प्रियो ह्यात्मैव सर्वेषां नात्मनोऽस्त्यपरं प्रियम् ।
लोकेऽस्मिन्नात्मसम्बन्धात् भवन्त्यन्ये प्रियाः शिवे ॥ १३७
ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं भाति मायया ।
विचार्य्यमाणे त्रितये आत्मैवैकोऽवशिष्यते ॥ १३८ ॥
ज्ञानमात्मैव चिद्रूपो ज्ञेयमात्मैव चिन्मयः ।
विज्ञाता स्वयमेवात्मा यो जानाति स आत्मवित् ॥ १३९
एतत्ते कथितं ज्ञानं साक्षान्निर्वाणकारणम् ।
चतुर्विधावधूतानामेतदेव परं धनम् ॥ १४० ॥

श्रीदेव्युवाच ।

द्विविधाश्रमो प्रोक्तो गार्हस्थो भैक्षुकस्तथा ।
किमिदं श्रूयते चित्रमवधूताश्चतुर्विधा ॥ १४१ ॥

ननु तत्तद्देहस्थित आत्मा नानारूपः प्रतीयते कथमुच्यते सदैकरूप इति तत्राह यथेत्यादि ॥ १३२ ॥

तद्गते विधौ सलिलगते चन्द्रे अकोविदाः अविद्वांसः ॥ १३३-१४० ॥

श्रुत्वा वेदितुमिच्छामि तत्त्वतः कथय प्रभो !।
चतुर्विधावधूतानां लक्षणं सविशेषतः ॥ १४२ ॥

श्रीसदाशिव उवाच।

ब्रह्ममन्त्रोपासका ये ब्राह्मणक्षत्रियादयः।
गृहाश्रमे वसन्तोऽपि ज्ञेयास्ते यतयः प्रिये ! ॥ १४३ ॥
पूर्णाभिषेकविधिना संस्कृता ये च मानवाः।
शैवावधूतास्ते ज्ञेयाः पूजनीयाः कुलार्चिते ! ॥ १४४ ॥
ब्राह्मावधूताः शैवाश्च स्वाश्रमाचारवर्त्तिनः।
विदध्युः सर्वकर्माणि मदुदीरितवर्त्मना ॥ १४५ ॥
विना ब्रह्मार्पितं चैते तथा चक्रार्पितं विना।
निषिद्धमन्नं तोयञ्च न गृह्णीयुः कदाचन ॥ १४६ ॥
ब्राह्मावधूतकौलानां कौलानामभिषेकिणाम्।
आगमे कथितो धर्म्म आचारश्च वरानने ! ॥ १४७ ॥
स्नानं सन्ध्याग्नं पानं दानं च दाररक्षणम्।
सर्वमागममार्गेण शैवब्राह्मावधूतयोः ॥ १४८ ॥
उक्तावधूतो द्विविधः पूर्णापूर्णविभेदतः।
पूर्णः परमहंसाख्यः परिव्राड्वरः प्रिये ! ॥ १४९ ॥
क्षतावधूतसंस्कारो यदि स्यात् ज्ञानदुर्बलः।

चतुर्विधानामवधूतानां लक्षणं विज्ञातुमिच्छन्ती श्रीदुर्ग्युवाच द्विविधावित्यादि ॥ १४१ । १४२ ॥

श्रीदेव्यैव प्रार्थितः सन् श्रीसदाशिव उवाच ब्रह्ममन्त्रोपासका ये इत्यादि ॥ १४३ । १४४ ॥

विदध्युः कुर्य्युः ॥ १४५-१४८ ॥

तदा लोकालये तिष्ठन्नात्मानं स तु शोधयेत् ॥ १५० ॥
रचन् स्वजातिचिह्नञ्च कुर्वन् कर्माणि कौलवत् ।
सदा ब्रह्मपरो भूत्वा साधयेत् ज्ञानमुत्तमम् ॥ १५१ ॥
ओं तत्सन्मन्त्रमुच्चार्य्य सोऽहमस्मीति चिन्तयन् ।
कुर्य्यादात्मोचितं कर्म्म सदा वैराग्यमाश्रितः ॥ १५२ ॥
कुर्वन् कर्माण्यनासक्तो नलिनीदलनीरवत् ।
यतिरात्मानमुद्धर्त्तुं तत्त्वज्ञानविवेकतः ॥ १५३ ॥
ओं तत्सदिति मन्त्रेण यो यत् कर्म्म समाचरेत् ।
गृहस्थो वाप्युदासीनस्तस्याभीष्टाय तद् भवेत् ॥ १५४ ॥
जपो होमः प्रतिष्ठा च संस्कारार्य्यखिलाः क्रियाः ।
ओं तत्सन्मन्त्रनिष्पन्नाः सम्पूर्णाः स्युर्न संशयः ॥ १५५ ॥
किमन्यैर्वेदभिर्म्मन्त्रैः किमन्यैर्भूरिसाधनैः ।
ब्राह्मेणानेन मन्त्रेण सर्वकर्माणि साधयेत् ॥ १५६ ॥
सुखसाध्यमबाह्यञ्च सम्पूर्णफलदायकम् ।
नास्त्येतत्सदृशं मन्त्रमुपायान्तरमम्बिके ! ॥ १५७ ॥
पुरः प्रदेशे देहे वा लिखित्वा धारयेदिमम् ।
गेहस्थस्य महातीर्थं देह पुण्यप्रदो भवेत् ॥ १५८ ॥
निगमागमतन्त्राणां सारात्सारतरो मनुः ।
ओं तत्सदिति देवेशि ! तवाग्रे सत्यमीरितम् ॥ १५९ ॥

अपरः अपूर्णः ॥ १४९—१५३ ॥

अथ ओं तत्सदिति मन्त्रस्य माहात्म्यमाह ओं तत्सदिति मन्त्रेणेत्यादिभिः । समाचरेत् कुर्य्यात् ॥ १५४ १५७ ॥

इमम् ओं तत्सदिति मन्त्रम् ॥ १५८ १६० ॥

ब्रह्मविष्णुमहेशानां भित्त्वा तालुशिरःशिखाः ।
प्रादुर्भूतोऽयमो तत्सत् सर्वमन्त्रोत्तमोत्तमः ॥ १६० ॥
चतुर्विधानामन्त्राणामन्येषामपि वस्तुनाम् ।
मन्त्राद्यैः शोधनेनालं स्याच्चेदेतेन शोधितम् ॥१६१॥
पश्यन् सर्वत्र सद्रूपं जपंस्तत्सन्महामनुम् ।
खेच्छाचारः शुद्धचित्तः स एव भुवि कौलराट् ॥१६२॥
जपादस्य भवेत् सिद्धो मुक्तः स्यादर्थचिन्तनात् ।
साक्षात् ब्रह्मसमो देही सार्थमेनं जपन् मनुम् ॥१६३॥
त्रिपदोऽयं महामन्त्रः सर्वकारणकारणम् ।
साधनादस्य मन्त्रस्य भवेन्मृत्युञ्जयः स्वयम् ॥ १६४ ॥
युग्मं युग्मपदं वापि प्रत्येकपदमेव वा ।
जप्त्वैतस्य महेशानि ! साधकः सिद्धिभाग् भवेत् ॥ १६५ ॥
शैवावधूतसंस्कारविधूताखिलकर्मणः ।
नापि देवे न वा पित्र्ये नार्षे क्रत्येऽधिकारिता ॥१६६
चतुर्णामवधूतानां तुरीयो हंस उच्यते ।
त्रयोऽन्ये योगभोगाढ्या मुक्ताः सर्वे शिवोपमाः ॥१६७॥
हंसो न कुर्यात् स्त्रीसङ्गं न वा धातुपरिग्रहम् ।
प्रारब्धमश्नन् विहरेन्निषेधविधिवर्जितः ॥ १६८ ॥

चतुर्विधानामित्यादि । चतुर्विधानाम् मन्त्रमन्त्र्यकेत्रदेवोद्धाराम् ॥ १६१-१६७ ॥

अश्नन् भुञ्जान ॥ १६८ ॥

त्यजेत् स्वजातिचिह्नानि कर्माणि गृहमेधिनाम् ।
तुरीयो विचरेत् चोर्णीं निःसङ्कल्पो निरुद्यमः ॥ १६८ ॥
सदात्मभावसन्तुष्टः शोकमोहविवर्जितः ।
निर्निकेतस्थितिक्षुः स्यान्निःशङ्कोः निरुपद्रवः ॥ १७० ॥
नार्पणं भक्ष्यपेयानां न तस्य ध्यानधारणाः ।
मुक्तोऽविरक्तो निर्द्वन्द्वो हसाचारपरो यतिः ॥ १७१ ॥
इति ते कथितं देवि ! चतुर्णां कुलयोगिनाम् ।
लक्षणं सविशेषेण साधूनां मत्स्वरूपिणाम् ॥ १७२ ॥
एतेषां दर्शनस्पर्शादालापात् परितोषणात् ।
सर्वतीर्थफलावाप्तिर्जायते मनुजन्मनाम् ॥ १७३ ॥
पृथिव्यां यानि तीर्थानि पुण्यक्षेत्राणि यानि च ।
कुलसन्न्यासिनां देहे सन्ति तानि सदा प्रिये ! ॥ १७४ ॥
ते धन्यास्ते कृतार्थाश्च ते पुण्यास्ते कृताध्वराः ।
यैरर्चिताः कुलद्रव्यैर्मानवैः कुलसाधवः ॥ १७५ ॥
अशुचिर्याति शुचितामस्पृश्यः स्पृश्यतामियात् ।
अभक्ष्यमपि भक्ष्यं स्यात् येषां संस्पर्शमात्रतः ॥ १७६ ॥

गृहमेधिनाम्, गृहस्थानाम् । निरुद्यम, आत्मशरीरनिर्वाहार्थव्यापारशून्य ॥ १६९ ॥

सदात्मेत्यादि । भाव', चिन्तनम् । निर्निकेत', नियतबततवास-शून्य । तितिक्षु', सहनशीलः ॥ १७०—१७२ ॥

अथावधूतानां माहात्म्यमाह एतेषामित्यादिभिः ॥ १७३।१७४ ॥

कुलद्रव्यै' मद्यादिभि. ॥ १७५ । १७६ ॥

किराताः पापिनः क्रूराः पुलिन्दा यवनाः खसाः ।
शुद्धयन्ति येषां सस्मर्यात्तान् विना कोऽन्यमर्चयेत्॥१७७
कुलतत्त्वैः कुलद्रव्यैः कौलिकान् कुलयोगिनः ।
येऽर्चयन्ति सकृत् भक्त्या तेऽपि पूज्या महीतले॥१७८॥
कौलधर्मात् परो धर्मो नास्त्येव कमलानने ।।
अन्त्यजोऽपि यमाश्रित्य पूतः कौलपदं व्रजेत् ॥ १७९ ॥
करिपादे विलीयन्ते सर्वप्राणिपदा यथा ।
कुलधर्मे निमज्जन्ति सर्वे धर्मास्तथा प्रिये ।॥ १८० ॥
अहो पुण्यतमाः कौलास्तीर्थरूपाः स्वयं प्रिये ।।
ये पुनन्त्यात्मसम्बन्धान् स्वेच्छश्वपचपामरान् ॥१८१॥
गङ्गायां पतिताम्भांसि यान्ति गाङ्गेयतां यथा ।
कुलाचारे विगन्तोऽपि सर्वे गच्छन्ति कौलताम्॥१८२॥
यथार्णवगतं वारि न पृथग्भावमाप्नुयात् ।
तथा कुलाम्बुधौ मग्ना न भवेयुर्जनाः पृथक् ॥१८३॥
विप्राद्यन्त्यजपर्यन्ता द्विपदा येऽत्र भूतले ।
ते सर्वेऽस्मिन् कुलाचारे भवेयुरधिकारिणः ॥१८४॥
आकृताः कुलधर्मेऽस्मिन् ये भवन्ति पराङ्मुखाः ।
सर्वधर्मपरिभ्रष्टास्ते गच्छन्त्यधमां गतिम् ॥ १८५ ॥
प्रार्थयन्ति कुलाचारं ये केचिदपि मानवा ।
तान् वञ्चयन् कुलीनोऽपि रौरवं नरकं व्रजेत् ॥ १८६ ॥

पुलिन्दाः चाण्डालविशेषाः ॥ १७७ ॥
कुलतत्त्वैः मांसादिभिः । कुलद्रव्यैः मद्यैः ॥ १७८—१८६ ॥

चाण्डालं यवनं नीच मत्वा स्त्रियमवज्ञया ।
कौलं न कुर्य्यात् यः कौलः सोऽधमो यात्यधोगतिम्॥१८७
गताभिषेकात् यत् पुण्य पुरश्चर्य्यागतैरपि ।
तस्मात् कोटिगुणं पुण्यमेकस्मिन् कौलिके कृते ॥१८८॥
ये ये वर्णाः क्षितौ सन्ति यद्यद्धर्म्ममुपाश्रिताः ।
कौला भवन्तस्ते पाशैर्मुक्ता यान्ति परं पदम् ॥१८९॥
शैवधर्माश्रिताः कौला. तीर्थरूपाः शिवात्मकाः ।
स्नेहेन श्रद्धया प्रेम्णा पूज्या मान्याः परस्परम्॥१९०॥
बहुनात्र किमुक्तेन तवाग्रे सत्यमुच्यते ।
भवाब्धितरणे सेतुः कुलधर्मो हि नापरः ॥ १९१ ॥
क्षिद्यन्ते संशयाः सर्वे क्षीयन्ते पापसञ्चयाः ।
दह्यन्ते कर्म्मजालानि कुलधर्म्मनिषेवणात् ॥ १९२ ॥
सत्यव्रता ब्रह्मनिष्ठाः कृपयाङ्कय मानवान् ।
पावयन्ति कुलाचारैस्ते ज्ञेया कौलिकोत्तमाः॥१९३॥
इति ते कथितं देवि । सर्वकर्म्मविनिर्णयम् ।
महानिर्वाणतन्त्रस्य पूर्वार्द्ध लोकपावनम् ॥१९४॥
य इदं शृणुयान्नित्य श्रावयेद्वापि मानवान् ।
सर्वपापविनिर्मुक्तः सोऽन्ते निर्वाणमाप्नुयात्॥१९५॥
सर्वागमानां तन्त्राणां सारात्सारं परात्परम् ।
तन्त्रराजमिदं ज्ञात्वा जायते सर्वशास्त्रवित् ॥ १९६॥
किन्तस्य तीर्थभ्रमणैः किं यज्ञैर्जपसाधनैः ।
जानन्नेतन्महातन्त्रं कर्म्मपाशैर्विमुच्यते ॥ १९७ ॥

अवज्ञया तिरस्क्रियया ॥ १८७ १९४ ॥

म विज्ञः वैधर्म्मविदां वरः ।
स ज्ञानी ब्रह्मवि[illegible] किं तद्वेत्ति कालिके ! ॥१९८॥
अलं वेदैः पुराणैश्च मैः संहितादिभिः ।
किमन्यैर्बहुभिस्तन्त्रैर्ज्ञात्वेदं सर्वविद्भवेत्॥ १९९ ॥
आसीद् गुह्यतमं यन्मे साधनं ज्ञानमुत्तमम् ।
तव प्रश्नेन तन्त्रेऽस्मिंस्तत् सर्वं सुप्रकाशितम् ॥ २०० ॥
यथा त्वं ब्रह्मणः शक्तिर्म्मम प्राणाधिका परा ।
महानिर्वाणतन्त्र मे तथा जानीहि सुव्रते ! ॥ २०१ ॥
यथा नगेषु हिमवान् तारकासु यथा शशी ।
भास्वांस्तेजःसु तन्त्रेषु तन्त्रराजमिदं तथा ॥ २०२ ॥
सर्वधर्म्ममयं तन्त्रं ब्रह्मज्ञानैकसाधनम् ।
पठित्वा पाठयित्वापि ब्रह्मज्ञानी भवेन्नरः ॥ २०३ ॥
विद्यते यस्य भवने सर्वतन्त्रोत्तमोत्तमम् ।
न तस्य वशे देवेशि ! पशुर्भवति कर्हिचित् ॥ २०४ ॥
अज्ञानतिमिरान्धोऽपि मूर्खः कर्म्मजड़ोऽपि वा ।
शृण्वन्नेतन्महातन्त्रं कर्म्मबन्धाद्विमुच्यते ॥ २०५ ॥
एतत्तन्त्रस्य पठनं श्रवणं पूजनं तथा ।
वन्दनं परमेशानि ! नृणां कैवल्यदायकम् ॥ २०६ ॥
उक्तं बहुविधं तन्त्रमेकैकाख्यानसंयुतम् ।
सर्वधर्म्मान्वितं तन्त्रं नातःपरतरं क्वचित् ॥ २०७ ॥
पातालचक्र भूचक्रज्योतिश्चक्रसमन्वितम् ।

अथ महानिर्वाणतन्त्रस्य माहात्म्यमभिधत्ते व इदं [illegible]
[illegible]त्यभित्यादिभि ॥ १९५ २०१ ॥

परार्धमाद्यं यो वेत्ति [illegible] ॥ २०८ ॥

परार्धसहितं [illegible] भवेत् ।

त्रिकालगोचरं त्रैलोक्यस्थं कथितुं क्षमः॥२०९॥

सन्ति तत्त्वानि बहुधा आत्मानि विविधान्यपि ।

महानिर्वाणतन्त्रस्य कलां नार्हन्ति षोडशीम्॥ २१० ॥

महानिर्वाणतन्त्रस्य माहात्म्यं किं ब्रवीमि ते ।

विहित्वैतन्महातन्त्रं ब्रह्मनिर्वाणमाप्नुयात् ॥ २११ ॥

इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णय-
कारे श्रीसदाशिवोक्तपञ्चमोपदेशे पूर्वभागे त्रयोविंश-
त्यादिनवविंशावधूतविरत्वकथनं नाम
चतुर्दशोल्लासः ।

समाप्तोऽयं ग्रन्थः ।

तेजोऽसि तेजो मयि धेहि ॥ [illegible] ॥

इति श्रीमहानिर्वाणतन्त्रटीकायां चतुर्दशोल्लासः ।

स विज्ञः सर्वशास्त्रेषु सर्वधर्म्मविदां वरः।
स ज्ञानी ब्रह्मवित् साधुर्यत्र तद्वेत्ति कालिके ! ॥१९८॥
अत्र वेदैः पुराणैश्च स्मृतिभिः संहितादिभिः।
किमन्यैर्बहुभिस्तन्त्रैर्ज्ञात्वेदं सर्वविद्भवेत्॥ १९९ ॥
आसीद् गुह्यतमं यन्मे साधनं ज्ञानमुत्तमम।
तव प्रश्नेन तन्त्रेऽस्मिंस्तत् सर्वं सुप्रकाशितम् ॥ २०० ॥
यथा त्वं ब्रह्मणः शक्तिर्म्मम प्राणाधिका परा।
महानिर्वाणतन्त्रं मे तथा जानीहि सुव्रते ! ॥ २०१ ॥
यथा नगेषु हिमवान् तारकासु यथा शशी।
भास्वांस्तेजःसु तन्त्रेषु तन्त्रराजमिदं तथा ॥ २०२ ॥
सर्वधर्म्ममयं तन्त्रं ब्रह्मज्ञानैकसाधनम्।
पठित्वा पाठयित्वापि ब्रह्मज्ञानी भवेन्नरः ॥ २०३ ॥
विद्यते यस्य भवने सर्वतन्त्रोत्तमोत्तमम्।
तस्य वश्या देवेशि ! पशुर्भवति कर्हिचित् ॥ २०४ ॥
तिमिरान्धोऽपि मूर्खः कर्म्मजड़ोऽपि वा।
महातन्त्रं कर्म्मबन्धादिमुच्यते ॥ २०५ ॥
अस्य पठनं श्रवणं पूजनं तथा।
न्दनं परमेशानि ! नृणां कैवल्यदायकम् ॥ २०६ ॥
उक्तं बहुविधं तन्त्रमेकैकाख्यानसंयुतम्।
सर्वधर्म्मान्वितं तन्त्रं नातःपरतरं क्वचित् ॥ २०७ ॥
पातालचक्रं भूचक्रज्योतिश्चक्रसमन्वितम्।

अथ महानिर्वाणतन्त्रस्य माहात्म्यमभिधत्ते य इदं शृणुयान्नि-
त्यादिभिः ॥ १९५, २०१ ॥

[illegible] ह्येनि[illegible]र्वसङ्गे न संशयः ॥ [illegible]

यथाऽसक्तिं ग्रसत्येवं कालरात्री भवेत ।

निःसारं [illegible]र्वं त्रैलोक्यहृत्काजं क्षयितुं क्षमः॥२२८॥

[illegible]लि तन्त्राणि वटुधा षाखाणि विविधान्यपि ।

अहं निर्वाणतन्त्रस्य कर्त्ता कार्त्तिक षोडशीम् ॥ २२९ ॥

महादिव्यैश्वतन्त्रस्य कार्त्तस्य [illegible]लि त्रयोसि ते ।

विदित्वैतत्कुलज्ञातत्वं ब्रह्मनिर्वाणमाप्नुयात् ॥ २३१ ॥

इति श्रीसदाशिवप्रोक्ते [illegible]महानिर्वाणतन्त्रे सर्वधर्मनिर्णय-
[illegible]संवादे [illegible]दिव्यभावविचारो नाम
चतुर्दशोल्लासः ।

[illegible]

[illegible]

इति श्रीमहानिर्वाणतन्त्रटीकायां चतुर्दशोल्लासः ।